नं: ८-घ-क

काशिकावृत्तिटीका

पदमञ्जरी

पत्राणि १८१

© Dharmartha Trust J&K, Digitized by eGangotri

नं० ४ - घ - क

काशिकावृत्तिटीका

पदमञ्जरी

पत्राणि १८१

४

© Dharmartha Trust J&K. Digitized by eGangotri



श्लोक संख्या ४५०००

पत्रसंख्या १०६६

पुस्तकमेनदेवनाथ
पाठकीयम्

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पृ॰
१

॥श्रीगणेशाय नमः॥ ॥अव्यक्तप्रधानपुरुषात्मकमस्य तन्त्रमेतत्समस्तमधितिष्ठति यः स्वतन्त्रः। तस्मै शिवाय परमाय पदं गताय मायावाय भवभार रमयं विहितः प्रणा
मः॥ स्वस्वं मनोऽन्यमवाप्नुमयेन विघ्नं यस्य प्रसादमनवाप्य न तु प्रकुर्वन्ति। पद्मासनप्रभृतयः प्रथमेऽपि देवास्तं हस्तिमुखमस्तकमपि प्रपन्नः। तातं रुद्रकुमाराय
प्रणाम्याम्बां श्रियं तथा। ज्येष्ठं चाग्निकुमाराख्यं माचार्यमपराजितम्। यस्मिन्निरायहे रत्नमंत्तया विश्रुतोऽदृश्यासु दिक्षु दृश्यः। उक्ताः हमयपदमंजरी मम्योऽशब्दशास्त्रसहकार
पारपात्। तामिमामनुपधेनचेतसा भावयन्तु भुवि भव्यबुद्धयः। कः खलु प्रणिपिनिप्रियं वदेम स्वारीभवति मद्विधे जने। अविचारितरमणीयं कामं व्याख्यान्तरं न भवतु हेतेः।
हृदयंगमा भविष्यति गुणगत्याः गणामियं व्याख्या। इष्टदेवनमस्कारः कार्यः समन्वेहः किं कृतः। वृत्तौ सत्येन यथा भाष्ये वार्त्तिके च न तदुच्यते। मनसा वचसा च कर्मणा कृत एवा
पमिहानिवेशितः। नहि दर्भपवित्रपाणिताघपरमंगलमत्र कीर्त्यते। वक्ष्यन्तरे यथासंगुणान् वदन्नर्हन्ति कुन्निजे ग्रन्थे। प्रेक्षावन्तां प्रवृत्तये क्रियमाणं वक्ष्यति दिशाति। वृत्तौ
भाष्यादिषु। वक्ष्यतिनिर्दिष्टमपि ततिनार्थेनार्थिनः प्रवर्त्तन्ते। इतरेतेनु प्रयुक्तो ग्रन्थादौ रक्षनिर्देशः। वत्स्यन्तरे सम्भविगुणकथनं तु प्रवृत्तिनियमार्था। कथमपरथा
मत्रिविहायवक्ष्यन्तरायस्याम्। म तु नर्गुणो हस्तादिषु विप्रकीर्णस्य तन्त्रस्य यः सारभूतो शास्त्रसंग्रहात्मकत्वं सूत्रार्थप्रधानोऽग्रन्थोऽवृत्तिः। साचेह यानि काशिका

॥श्रीगणेशाय नमः॥ ॥वृत्तौ भाष्ये तथा धातुनामपारायणादिषु। विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः॥
इष्ट्युपसंख्यानवती शुद्धगणा विहतगूढसूत्रार्था। व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥ १ ॥ ॥

सूत्राणां कुणिप्रभृतिभिराचार्यैर्विरचितं विवरणं आक्षेपसमाधानपरो ग्रन्थो भाष्यं इह तु कात्यायनप्रणीतानां वाक्यानां पतञ्जलिप्रणीतं विवरणं। तथा शब्दःस
मुच्चये। पारायणशब्दः प्रत्येकमभिसंबध्यते। धातुपारायणं नामपारायणमिति। यत्र धातुप्रक्रिया तद्धातुपारायणं। यत्र गणशब्दानां निर्वचनं तन्नामपारा
यणं। आदिशब्देन शिक्षोणादिफिट्सूत्रग्रहणं। विप्रकीर्णस्य विक्षिप्तस्य तन्त्रस्य प्रधानेतिमिद्धान्तसूत्रव्याख्येयपरिच्छेदः इति नेयं दृश्यः इह तु सिद्धान्तवचनः। तत्रापि व्याक
रणशास्त्रे वर्त्तते वृत्त्यादिसमभिव्याहारात्तस्य यः सारः उत्कृष्टांशः तत्संग्रहः क्रियते संगृह्यते तदर्थमर्थात्तत्कारं दर्शयति। इष्ट्युपसंख्यानवतीति। सूत्रेणा
गृहीतं लक्ष्यं येन संगृह्यते तदुपलक्षणमिष्ट्युपसंख्यानग्रहणं। तेन वक्तव्यादीनामपि ग्रहणं। वृत्त्यन्तरेषु सूत्राण्येव व्याख्यायन्ते इष्ट्यः पुनरिष्यादिमती॥ तथा प्र
वृत्तगणा। वृत्त्यन्तरे लोहितादिकज्जयः कण्वचनेषु आदिषु पठितगणान्ति। कराकानुशाकलः पूर्वः कतादुत्तरः इत्यन्तः इति च। सैषा गणस्य शुद्धिः। वृत्त्यन्तरेषु तु गणपा
ठ एव नास्ति प्रागेव शुद्धिः। रोरणा विस्तारो गूढः सूत्रार्थो विवृतो यया सा विवृतगूढसूत्रार्था। गूढग्रहणं सूत्रार्थमात्रोपलक्षणं सूत्रार्थप्रधानेत्यर्थः। अनेन
वृत्तिलक्षणमुक्तं। व्युत्पन्नानां शब्दरूपाणां सिद्धिर्यस्यां सा व्युत्पन्नरूपसिद्धिः। उदाहरणमंदिते ... अभिधानं। काशिकेति देशतोऽभिधा
नं काशिषु भवा काशादिभ्यष्ठञ्ञिति काशि...

राम॰
१

© Dharmartha Trust J&K. Digitized by eGangotri

यथा पुनरयमंशः प्रारभ्यते तथा दर्शयति। व्याकरणस्येति। एतावद्धि शास्त्रशरीरं यदिष्टुपसंख्यानादि एतावता हि शास्त्रकल्पं परिनिष्ठितं परिस
माप्यते। अस्यैव तु शरीरस्य परिकरबन्धो रक्षाबन्धः परिशिष्टो ऽयं ग्रन्थकारेण भाष्यकारेण क्रियते अपेक्षणमाधानादिमुखेनायमेवांशः स्थाप्यत इत्य
र्थः। तत्र च व्याकरणविषया प्रवृत्तिः क्रियत इति वचनात्प्रयोजनं तदेवास्यापीति अर्थादुक्तं भवति। अथ व्याकरणस्यैव किं प्रयोजनं किमनेन
दृष्टेन सर्वथाध्येयं व्याकरणम्। श्रूयते हि। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ऽध्येयो ज्ञेय इति संध्योपासनादिवदवश्यं कर्तव्यं व्याकरणाध्ययनमित्यु
क्तं भवति। तत्र यथा अनुपासीनः संध्यां प्रत्यवैति तथानधीयानो ऽपि व्याकरणम्। तत्र व्याकरणं ज्योतिषं निरुक्तं शिक्षा छन्दोविचितिः कल्पसूत्राण्यङ्गा
नि। अङ्गत्वं चाङ्गमङ्गलवात्। मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते। निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे। शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान्प्रच
क्षत इति। उपकारकत्वाच्च। तत्र व्याकरणमर्थविशेषमाश्रित्य पदमन्वाचक्षाणं पदस्य दार्थप्रतिपादनेन वेदस्योपकरोति। ज्योतिषमपि स्वाध्यायोपयो

व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत्। शिष्टः परिकरबन्धः क्रियते ऽस्य ग्रन्थकारेण॥ अथ शब्दानुशासनम्॥ १ ॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥ छ॥ ॥

गिनमनुष्ठानोपयोगिनं च कालविशेषं प्रतिपादयति। निरुक्तं तु व्याकरणस्यैव कार्त्स्न्यम्। छन्दोविचितिरपि गायत्र्या यजति त्रिष्टुभं शंसतीत्यादौ
अज्ञातानां गायत्र्यादिशब्दानां लक्षणतो ऽर्थमाचष्टे। शिक्षाध्ययनकाले कर्मणि च मन्त्राणामुच्चारणप्रकारं प्रतिपादयति। कल्पसूत्राण्यपि
प्रतिशाखं शाखान्तराधीतेन समाम्नायप्राप्तेन चाङ्गेनोपेतस्य कर्मणः प्रयोगं कल्पयन्ति। एषु चाङ्गेषु व्याकरणं प्रधानं पदपदार्थज्ञानस्य तदाय
त्तत्वात्। वृत्तिकारस्य प्रयोजनप्रकरणत्वात्प्रेक्षावत्प्रवृत्तेः संभवाच्च प्रयोजनस्य भाष्यकारेणापठितं प्रयोजनमाह। अथेति। अथेत्य
यं शब्दो ऽधिकारार्थः। अधिकारः प्रस्तावः प्रारम्भः तमथशब्दो द्योतयति। शब्दानुशासनमित्येतावत्युच्यमाने संदेहः स्यात्। किं शब्दानुशासनं प्र
स्तूयते उत प्रस्तूयत इति। अथशब्दे तु सति क्रियान्तरव्यवच्छेदेन प्रस्तूयतत्वे वार्थो निश्चीयते। विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः। अ
न्वेनेयेन तच्छास्त्रमत्र शब्दानुशासनम्। नु अपपूर्वो हि शास्तिर्विविच्य ज्ञापने दृष्टः। तद्यथा। अक्षेत्रवित्क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः। सं
बन्धिषु षष्ठ्यन्तेषु यो ऽसौ जसानुशासनीति वा ततः करणे ल्युट्। शब्दानामनुशासनं शब्दानुशासनमिति कर्मणि षष्ठ्याः समासः। अत्र च शब्दानामि

दमनुशासनं नार्थानामिति अर्थमाह नित्ययोरुभयोः कर्तृविशेषस्या
विवक्षितत्वादुभयप्राप्त्यभावात् उभयप्राप्तौ कर्मणीत्यनेन षष्ठी किं तर्हि कर्तृ
कर्मणोः कृतीत्यनेनेति कर्मणि चेति न निषिद्धः समासः १ ॥

।। अतिदं प्रथमाः शब्दाः साधवः परिकीर्तिताः । त एव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथोच्चारिताः पुंभिरपशब्दा इतीरिताः ।। स्मार्यन्तं स्मृते
साधूनर्थधीहेतवः स्मृताः । यद्यपि लोके गावादयो गाव्यादयश्च समसमेव प्रयुज्यन्ते वाचकत्वाभिमानोपि सम एव तेषु । लौकिकानां साधीयस्त्वा गाव्यादिषु
। तथापि गावादयो न तु गाव्यादयः साधवः । त एव साक्षाद्वाचकाः । गाव्यादयस्तु बालादिभिरशक्त्यादिना गावाद्युच्चारणेच्छया न यथा तथोच्चार्यन्ते तत आदिमं तोपभ्रं
शाः । ते च स्वयमवाचकाः अपि प्रथमं गावादिशब्दस्मरणद्वारेणार्थधियं जनयन्ति ये च तत्रैव प्रथमे व्यवहारेषु साधंते तेषां गावादिवत्तेष्वेव वाचकत्वाभिमानः । एवं
तन्मूलानामपि तत्र ये साधवः ते शास्त्रेणानुशिष्यन्ते साधुभ्यो विविक्ताः प्रकृतिप्रत्ययविभागेन ज्ञाप्यन्ते इमे साधव इति । कथं पुनरिदमाचार्येण पाणिनिनावग
तं एते साधव इति । आपिशलेन पूर्वव्याकरणेन । आपिशालिना तर्हि केनावगतं । ततः पूर्वेण व्याकरणेन । यद्येवमंधपरंपराप्रसंगः । न यथा अस्मिन्संसारे
नोक्तं केनेदमवगतमिति पृष्टोऽपरं पांथं तं मूलं निर्दिशति सोप्यपरं तं तदानैन ह्यचक्षुः शौत्रसमप्रमाणं भवति न तादृगेतत् । नैष दोषः । सर्व एव हि स्वे स्वे काले गाव्या
दिभ्यो विविक्तान् गवादिशब्दान् प्रत्यक्षत एवोपलभन्ते । चत्वारो वेदाः ऋग्यजुः सामाथर्वलक्षणाः । तत्र ऋग्वेद एकविंशतिधा भिन्नः । एकशतं यजुः शाखाः । स
हस्रवर्त्मा सामवेदः । नवधा आथर्वणो वेदः । षडङ्गानि मीमांसान्यायविस्तरः अष्टादश पुराणानि । अनन्तान्युपपुराणानि । अष्टादश स्मृतयः । अनन्ता उपस्मृ
तयः भारतरामायणादिरितिहासः आयुर्वेदो धनुर्वेदो गांधर्वं अर्थशास्त्रं काव्यानि नाटकानि एतावान् प्रयोगस्य विषयः । तद्यस्मात् सर्वत्र निष्णातस्तावत्सर्वा
नेव व्याकरणानुगतान् शब्दान् प्रत्यक्षयति व्याकरणेन च पूर्वस्मिन्नपि काले तेषां सत्तामनुसंधत्ते एषा अस्मदादीनां गतिः । पाणिनिरपि स्वकाले शब्दान्
प्रत्यक्षयन् आपिशलादिना पूर्वस्मिन्नपि काले संज्ञां अनुसंधत्ते । एवमापिशलिः । अनादिरयं संसारः । कथं पुनरस्मदादीनां सर्वलक्ष्यदर्शित्वं मा भूदस्मदादीनां
अस्मद्विशिष्टानां तु महर्षीणां भवति यस्य वा ईश्वरानुग्रहः स सर्वं प्रत्यक्षयति अत्रैव हि लौकिकाः स्मरन्ति । येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं
व्याकरणं प्रोक्तं तस्मै पाणिनये नमः इति । अक्षरसमाम्नायं च व्याचक्षते देवसूत्राणीति । अथवा कस्यचित्क्वचिद् परस्यापरे तथा । अमसामेतथा शब्दाः सं
तिदर्शनगोचराः । तथा च यद्दृष्टं तन्मद्दृष्टं वा सूत्रकारेण तत्स्फुटं वाक्यकारेणाव्रवीत्स्येवं तेनादृष्टं च भाष्यकृत । अत एव पाणिनीयमेतत् त्रिमुनिव्याकरणं
दंति सिद्धांतः । अपरोक्षेन्द्रियगोचराश्च शब्दा इति नास्त्यंधपरंपराप्रसंगः । यस्मात्स्वे स्वे काले सर्वे शब्दाः प्रत्यक्षतोऽगृह्यन्त । पूर्वपूर्वव्याकरणदर्शनेन तस्मिंस्तस्मि
न्काले सत्तानुसंधीयत इत्येतावत् । तस्मान्नास्त्यंधपरंपराप्रसंगः । नहि चक्षुष्मति मूले कल्पितेपयसः शौत्रसमप्रमाणं भवति । यद्यपीतिहासपुराणादिष्वपश
ब्दा अपि संभवन्ति तथापि येषामेव पूर्वपूर्वव्याकरणावशेषेन तस्मिंस्तस्मिन्काले सत्तानुसंधानं त एवाधुनातनाः साधव इति निर्णीयन्ते । यथैव वेदवाक्यानां पाठेऽसत

© Dharmartha Trust J&K. Digitized by eGangotri

पि संकेते। नह्हि नामभिः प्रयुक्तानामुपदेशेन निर्णयः। आह। अनादिता चेत्साधुत्वं संज्ञाशब्देषु का गतिः। उत्पन्नेन नामकरणे गृह्येषु नियमश्रुतेः। पाण्याकामनसंज्ञा
नां विनियोगे समस्तिनः। तस्मादनादिता संज्ञास्वपि नैव विनिरूप्यते। यास्तु न देशभाषाभिः संज्ञास्तासां न साधुता लकारवार्त्तिके चैतदुक्तं का सा यत्रोच्चरीता न
हि पर्याप्ता विसंज्ञाशक्तिते कर्तुं गृह्येषु नियमविधानात्। तत्रापस्तंबः। द्व्यक्षरं चतुरक्षरं वा नाम पूर्वमाख्यातोत्तरमिति। बौधायनस्त्वधिकमप्याह। अघ्यण
कं देवतानुकं वेतिस्मप्यणकं अघ्य मिथ्याऽपि देवतानूकं देवताभिधायि। कृतं कुर्यान्न तद्धितमिति गृह्यांतरं। तस्मात्सादिप्रयुक्तानामेव शब्दविरहोऽवसिष्टो
द्वहसादीनां संज्ञात्वेन विनियोगः। याः पुनर्देशभाषाभिः संज्ञाः कुचिर्मचीमिति न तासां साधुत्वं न दे तत् लकारोपदेशस्य प्रयोजननिराकरणावसरे वार्त्ति
ककारेणाप्युक्तं न्याय्यभावात्कल्पनं संज्ञादिष्विति। यदृच्छया कश्चिल्लृतको नाम तस्मै देवदत्ताय देहीति अकार्यं यथा स्यादिति लृकार उपदिश्यते। न
ह्यसौ प्यभावात्। सोऽप्यनतकशब्दः सहि कृदंतः। अनतीयतेः कुलमनतक इति ततश्च तस्यैव संज्ञात्वेन कल्पनं युक्तं। स एव संज्ञात्वेन कल्पित इत्यर्थः।
आदिशब्देनेतरद्गृह्यते क्रियाशब्दा अपि न लक्षणमस्तीति नैव प्रयोक्तव्याः। किं तर्हि अनादिप्रयुक्ता एवेति तेषु चान्तदिमत्वमात्मोपदेशाद्वांतवांप
थानहि विचिरंतिपरः प्रयुज्यत इति। अस्त्वेवं शास्त्रीयेनामकृस्पो। यास्त्वेताः स्वेच्छया संज्ञाः क्रियंते डिघुभादयः। कथं नु तासां साधुत्वं नैव ताः साधवो
मताः। अनपभ्रंशरूपत्वात् अप्यासामपशब्दता। हस्तचेष्टा यथा लोके तथा संकेतिता इमाः। ततश्च। नासां प्रयोगेऽभ्युदयः प्रत्यवायोऽपि वा भवेत्। ला
घवेनार्थबोधार्थं प्रयुज्यंते तु केवलं। तदेवमनादित्वमपभ्रष्टता साधुत्वमिति स्थितं। अपरे त्वभ्युदययोग्यतां साधुत्वमातिष्ठंते सा च व्याकरणपरंप
रयावसीयत इत्याहुः। अपर आह शब्दान्तरजातिः साधुत्वं एतच्च व्याकरणाय एकस्मिन्निते वतस्मि वकाकतिरत्नततमिचपरीक्षकाणामाह वा। अनप
भ्रष्टतानादिर्यद्यभ्युदययोग्यता। व्यक्तिपाल्यंजनीया वा जातिः कापीह साधुतेति। अस्त्वेवं साधुत्वं अस्तु च व्याकरणं साक्षान्नाम स्तापनं किंपुनरेतैः प्रयो
पितैः प्रयोजनं। मा भूदस्मात् ज्ञानमेव प्रयोजनं श्रूयते हि यो वा इमां वाचं परशोऽक्षरशः स्वरशश्च वेद स आर्त्विजीनः स्यादिति आर्त्विजीनो यजमा
नः आर्त्विज्यमर्हतीति अथवा आर्त्विजीनकुलिक आर्त्विक्कर्मार्हतीति याजकोऽथार्त्विजीनः। यज्ञर्त्विग्भ्यां घखञाविति सूत्रेण यज्ञर्त्विग्भ्यां तत्कर्मा
र्हतीति चोपसंख्यानमिति वार्त्तिके न चरखञ् विद्वान्स ज्ञेनविहायाजयेदिति द्वयोरपि विदुषोरधिकारात्। स्मर्यते च पश्चमाकुरुते वाचं पश्चमीमांस
ने घरांतावुभौ पुण्यकर्माणौ पंक्तिपावनयावनाविति। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति च। तथा। निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्य

© Dharmartha Trust J&K. Digitized by eGangotri

तइतितदेवं साधूनां शब्दानां प्रकृतिप्रत्ययादिविभागेन ज्ञानमेव पुरुषार्थः। न चैतत्त्रोपायान्तरं लघीयोऽस्ति अन्यतो व्याकरणात्। यस्य चैतन्नास्ति तस्याध्ययन
मेव निष्फलं। श्रूयते हि यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्। अविज्ञातं प्रकृत्यादिविभागेनाविज्ञातार्थमवि
ज्ञातमिति नैरुक्ताः॥ अर्थज्ञानमपि व्याकरणायत्तमेव। किंच साधूनां प्रज्ञापनं प्रयोगोपि तेषामेव यथा स्यादिति तदिह साधून् प्रज्ञापयता आचार्येण सा
धुभिरेव भाषितव्यमित्यभिमतं लक्ष्यते। अनया च सम्मत्या मूलभूता श्रुतिरप्यनुमीयते यथाष्टकादिषु। ननु चार्थाभिधानाय प्रयोगः शब्दगोचरः। प्राप्त
त्वाद्विधेयः स्यात् क्षुधितस्येव भोजनं। उच्यते। अर्थप्रयोगे शब्दानां प्रयोगे संप्रयुयस्थिते। धर्म्मीय नियमः शास्त्रेण भक्षणवत्तादिवद्भवेत्। क्षुधउपघातार्थी भो
जने प्रवृत्तिः। शक्यं च यत्किंचन रिक्षुरेण भुंजानेनापि क्षुदुपहंतुं। अथ च तत्र धर्म्मीय नियमः क्रियते शास्त्रतोऽन्नानि भुंजीतेति तदिहापि साधुभिरसाधुभि
श्च भाषणोपायेनियमः साधुभिरेव भाषेत न एतैर्भाषमाणस्य धर्मो भवति धर्मोद्दृश्युदय इति। श्रूयते च। एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके काम
धुग्भवतीति। स्मर्यते च। यस्तु प्रयुंक्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले। सोऽनंतमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैरिति कात्यायन
प्रणीतेषु भ्राजाख्येषु श्लोकेषु मध्ये पठितोयं श्लोकः। तथा साधुष्वपि साम्यलक्षणान्विताद्विशेषलक्षणान्वितस्य प्रयोगे फलविशेषः स्मर्यते। नाकमि
ष्ट सुखं यांति सुयुक्तैर्वडवारथैः। अथ पत्काषिणो यांति ये चीकमतभाषिण इति। अयमर्थः। कमेर्णिङन्तस्य आयादय आर्द्धधातुके वेति णिङभावपक्षे लुङि कमेरूपं
स्यादिति चङो विशेषलक्षणं। णिश्रिद्रुस्रुभ्य इति साम्यलक्षणं तत्र ये विशेषलक्षणस्य स्मर्तारः चकमतेति प्रयुंजते ते सुयुक्तैर्वडवारथैरि
ष्टसुखं नाकं स्वर्गं यांति। ये तु साम्यलक्षणवशेनाचीकमतेति भाषंते ते पादैः कर्षंतः स्वर्गं यांतीति चान्द्रोभाष्यकारेणापठितोयं श्लोकः। तदेवं साधून्
प्रयुंजानस्याभ्युदयो भवतीति नियमार्थः। अपरस्त्वाह। गम्यागम्यवद्भक्ष्याभक्ष्यवच्चायं नियमः। तद्यथा समानात् स्त्रीषु प्रसज्यं तं प्रत्युच्यते इयं गम्या इयमग
म्येति शक्यते च यां कांचिदपि गच्छता तारणाभिगमः कर्तुं तत्र नियमः इयमेव गम्या अगम्यां गच्छन्प्रत्यवेयादिति। तथा क्षुधा मांसभक्षणे प्रवृत्तिः शक्यं च यत्किं
चित्मांसं भक्षयता क्षुदुपहंतुं तत्र नियमः पंचपंचनखा भक्ष्याः पंचैव शेषा अभक्ष्याः अभक्षणे प्रत्यवायः इति तदिहापि साधुभिरेव भाषेत अन्यैर्भाष
माणः प्रत्यवेयादिति नियमार्थं इति। तथा च ब्राह्मणं। ते सुरा हेलयो हेलय इति कुर्वंतः पराबभूवुः। तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा
एष यदपशब्द इति। अत्र हेलयो हेलय इति वाक्ये वचनमपशब्दः हे हे प्रयोगे हेहयो रिति प्राप्ते असुरस्ताकारणास्मिन्ने। अरिशब्दे रेफस्य लत्वमित्यपरे।

© Dharmartha Trust J&K. Digitized by eGangotri

तथा दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति अपशब्दप्रयोगे प्रत्यवाय
उदाहृतः । मंत्रो हीन इति प्रसिद्धः पाठः । स्वरेण स्वरतः । आद्यादित्वात्तसिः । मिथ्याप्रयुक्तोऽयमर्थं प्रतिपादनाय प्रयुक्तः शब्दः ततोऽर्थान्तरे स्वरवर्णदोषा
न्निपातयन्न तमर्थमाहेत्यर्थः । वाग्वज्रो वाग्वज्रः यथेन्द्रशत्रुरुदाहरणे इंद्रशत्रु ४ इंद्रशत्रुशब्दः । स हि स्वरकृतादपराधाद्यजमानं हिंसितवान् । इंद्रमभि
चरता हतपुत्रेण त्वष्ट्रा इंद्रशत्रुर्वर्द्धस्वेति मंत्रः प्रयुक्तः । तत्रेंद्रस्य शत्रुरिति षष्ठीसमासार्थो विवक्षितेऽन्तोदात्ते प्रयोक्तव्ये आद्युदात्तः प्रयुक्तः । तत्र बहु
व्रीह्यर्थेऽपि संहारादिंद्र एवास्य शत्रुरभवत् । कः पुनर्बहुव्रीहितत्पुरुषयोरर्थभेदो यावता यस्येंद्रः शत्रुः इंद्रस्याप्यसौ शत्रुर्वैरी । सपत्नपर्यायो हि शत्रु
शब्दः । नैष दोषः क्रियाशब्दोऽत्र शत्रुशब्दः । शातयिता शत्रुरिति तत्रेंद्रस्य शातयिता भूत्वा विवर्द्धस्वेति षष्ठीसमासेऽर्थः । बहुव्रीहौ त्विंद्रः शातयिता
क इति तत्पुरुषबहुव्रीह्योरर्थभेदः । कथं पुनरस्याद्युदात्तत्वस्यान्तोदात्तत्वस्य वा प्रसंगः । पावनाय यज्ञकर्मणि सेकश्रुत्या भवितव्यं । अयमप्यदोषः तत्र हि
जपादिषु पर्युदासेन मंत्राणामेकश्रुतिर्विधीयते स्वेच्छया प्रयुज्यमानस्य मंत्रो न भवति । यद्वा एकश्रुत्यभावादेवात्र प्रत्यवायः । तथा यस्तु
प्रयुंक्ते इति श्लोकेन दुष्यति चापशब्दैरिति दोषो दर्शितः । तस्मादपशब्दप्रयोगेऽधर्म इति । तदेतद्यज्ञकर्मणि सर्वेषामभिमतं तथा च प्रायश्चि
त्तविधिरपि तत्र भवति आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति । प्रायश्चित्ते च प्रायश्चित्तीयायज्ञकर्मणोऽस
त्र न प्रत्यवाय इति केचित् । अन्ये तु तत्रापि किंचित्तं प्रत्यवायमिच्छन्ति तथा च नानृतं वदेदिति निषेधः द्विविधं ह्यनृतं शब्दानृतं च । तथा हि अ
र्थस्य अर्थस्य चान्यथा प्रतिपत्तिहेतुरुच्चारणमनृतवदनं तदत्र प्रतिषिध्यते । तत्र यथा अर्थानृतं वदतः प्रत्यवायः तथा शब्दानृतमपीत्यल
मियता । स्थितमेतत् शब्दानुशासनमित्यन्वर्थसंज्ञोच्चारणेन व्याकरणस्य प्रयोजनमन्वाख्यातमिति । अथ किं सूत्रकारेणानेदमुक्तं प्रयोज
नं यथा तन्त्रान्तरेष्वादौ प्रयोजनमुदीर्यते । उच्यते । काणादेनापि पाणिनिनापि च कुत्र लोकः प्रवर्त्तते उक्तं प्रयोजनं यत्र यत्र यानेनैतदीरितं । तस्मात् ।
यत्र प्रयोजनं व्यक्तं तत्र लोकः प्रवर्त्तते । न त्ववश्यमिदं वाक्यं ग्रंथादौ वाच्यमिति मन्महे । किंचाप्रयोजनवचनस्य किं प्रयोजनं तदर्थिनां तत्र प्रवृत्तिरिति चेत् ।
नः पुंवाक्यानां विप्रलंभसंभावितत्वात्तस्य उत्पन्नोऽपि प्रत्ययो द्रागेव लीयते ततश्च सकलशास्त्रश्रवणोत्तरं तन्निश्चयो भवति ततः किं न प्रयोजनश्रवणे

© Dharmartha Trust J&K. Digitized by eGangotri

मात्रादेव प्रवृत्तिः। अयं सूत्रकारोप्युज्झितकामायेन न यत्किंचित्प्रयोजनमुक्तम् अस्मिन्नेकस्वामिमते प्रत्ययोदितिसंभावयन्तः कथं प्रवर्त्तेरन्। अथ सं
देहात्प्रवृत्तिः। अस्त्वेवं शास्त्रे प्रयोजनवाक्ये तु कथं प्रवृत्तिः न हि तस्य प्रयोजनमुक्तम् अथ तस्याप्युच्येत तस्यापि तस्यापीत्यनवस्था। अथ सूत्रकारः स्व
यमेवोपन्यस्य तत्र तत्र प्रवर्त्तयति शास्त्रेष्वेवमेवास्तु किं प्रयोजनवचनेन भाष्यकारस्तु विवरणकारा एव दवीमवगाहमानाः प्रयोजनप्रतिपादनमात्रपरत्व
न्तिकारोपि तदेव पठितवान्। तथा वेदस्यापि प्रयोजनं व्याकरणस्य न तु नियतानुपूर्वीकस्य शिष्याचार्यपरंपरया धार्यमाणशरीरस्य वेदस्य कान्यमर
क्षा व्याकरणेन। सत्स्वेये भाषायां म्रहृह्यलोपागमवर्णविकाराः केवलं छन्दस्येव दृश्यन्ते ते केवलप्रयोगशरणैः प्राकृतिकाः। संभाव्येरन्। वैयाकरणा
स्तु लोपस्त आत्मनेपदेष्विति लक्षणदर्शी तिं देवरूपं छापयति। तथा ऊहोपि प्रयोजनं। यत्रांगजातं प्रणीतमुपदिष्टं सा प्रकृतिर्दर्शपूर्णमासादिः। यत्र त
सा विकृतिः सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इत्यादिः। तत्र वैकृतस्य विधेरुपकारापेक्षायां तन्मुखेन प्राकृतमंगजातं प्राप्यते। तत्र यस्यांगस्य प्रकृ
तौ य उपकारो लब्धः यथा व्रीहीनवहन्तीत्यत्रावघातस्य वैतुष्यं तस्य विकृतावसंभवे तन्निवृत्तिः यथा कृष्णलेष्ववघातस्य यथा चाम्नातमंगजातं प्राप्य
ते एवं मंत्रोपि तस्य चानुष्ठेयार्थप्रकाशनं कार्यं प्रकृतौ। तत्र प्रकृतौ यस्य परमभिधेयं तस्याकल्पेनाभिधेयं विकृतौ नास्ति तस्य सर्वस्यैव निवृत्तिः। य
था कृष्णलेष्ववघातमंत्रस्य अवरक्षो दिवः सपत्नं वध्यासमिति। यस्य त्वेकदेशस्याभिधेयं नास्ति तस्य तावन्मात्रं निवर्त्तते यथा अग्नये जुष्टं निर्वपा
मीत्यत्र देवताभिधायिपदं सौर्यादिषु निवर्त्तते। न च विभक्तेरलुप्तत्वादेकारस्यावस्थानप्रसंगः। कार्यं रान्तव्यतिरिक्तेष्वेव चैकारस्य संप्रदाने
वाच्ये। तत्र तु पशब्दस्य वाच्ये ततश्चैकारान्ते ऽग्निशब्दे निवर्त्तमाने एकारोपि निवर्त्तते ततः सौर्यकर्म्मणि देवताभिधायि चतुर्थ्यन्तं पदमूह्यं सूर्याये
ति तथा देवीरापः शुद्धा स्थेति अप्कविनियुक्तो मंत्रः तस्याम्ये ऊहः देवाऽपः शुद्धमसीति। तथा पुरोगशो अवदानमंत्रः। माते मा संविक्थाः इति तस्य
बहूनामूहः। मा भेष्ट मा संविजिध्वमित्यापि न चैतदवैयाकरणानां सुकरं। तथा असंदेहः। स्थूलपृषतीमनड्वाहीमालभेतेति साम्नायते। तत्र संदेहः
किं स्थूला पृषती आहोस्वित् स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति तत्र वैयाकरणः पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थं निश्चिनोति। न देवां
उपासनीयं फलेन शास्त्रं व्याकरणं महत्।। प्रदीपभूतं सर्वासां विद्यानां यदवस्थितं। किं बहुनापि दृश्यार्थं पदस्यानं मुक्तिसोपानपदवी।। इयं सामो स

१

राम॰
४

© Dharmartha Trust J&K. Digitized by eGangotri

केषां शब्दानामिति। कथं पुनरनुशासनेन गुणीभूतानां शब्दानां किं शब्देन परामर्शो युज्यते स्यादयं दोषः यदि केषामित्येतावदुच्येत न तदा हि शब्दानामि
त्यनुषङ्गाश्रयणायः। तत्र गुणीभूतस्यानुपपन्नं। इहानुशासनानामिति स्वशब्देनोपादीयते तेनानुप्रक्रान्तगुणभूतशब्दपरामृष्येतावता तत्र नानुपपन्नं बु
द्ध्या संनिहितत्वात्। राजपुरुषोयं कस्य राज्ञ इतिवत्। पृच्छतश्चायमभिप्रायः शब्दानुशासनमित्यत्र शब्दः सामान्यवचनः सन्ति च समुद्रघोषादयः शब्दाः
येषु वर्णाभिव्यक्तिरपि नास्ति सन्ति च गाव्यादयोपभ्रंशाः सन्ति न्यायाद्यगोनादयः साधवः तत्राविशेषात्सर्वेषामनुशासनं प्राप्नोतीति। इतरोपि श
ब्दानुशासनशब्दस्य व्याकरणे योगरूढत्वात् तस्य च वेदाङ्गत्वात् समुद्रघोषगाव्यादिव्युत्पादनस्य वेदानुपयोगित्वादाह। लौकिकानां वैदिकानां
चेति। लोके विदिता लौकिकाः लोकसर्वलोकाट्ठञ्। यद्यपि गाव्यादयोपि लोके विदिताः तथापि ते न सर्वलोके विदिताः प्रतिदेशं भिन्नत्वात्
अपभ्रंशानां। लोकशब्दश्चायं सर्वस्मिन् लोके वर्तते संकोचकाभावात्। अतः सर्वलोकप्रसिद्धानां गवादीनामित्यर्थः साधूनामिति यावत्। वै

॥ केषां शब्दानां लौकिकानां वैदिकानां च। कथमनुशासनं॥ ॥

दे भवा वैदिकाः अध्यात्मादित्वात् ठञ्। वैदिकानां लौकिकत्वेपि प्राधान्यख्यापनार्थं पृथग्ग्रहणं यथा ब्राह्मणा आगताः वसिष्ठोप्यागत इति। न चान्वाख्या
ने प्रतिपदपाठोभ्युपायः तत्रापि त्रयः प्रकाराः शब्दापशब्दोभयोपदेशभेदेन। शब्देष्वेवोपदिष्टेषु गम्यत एतत् अतोन्येपशब्दा इति यथा पञ्च पञ्चनखा भक्ष्या इ
ति भक्ष्यनियमादन्येभक्ष्या इति गम्यते। तथा अपशब्दोपदेशेप्यन्ये सुशब्दा इति गम्यते यथा अभक्ष्यो ग्रामकुक्कुट इत्युक्ते आरण्यो भक्ष्य इति गम्यते। हेयोपादेयो
पदेशोपि स्यात् प्रतिपत्तिर्भवति यथा अपथमिदं एष पन्था इति। आनन्त्यात्तु शब्दानां सर्वथाप्यसंभवः। एवं हि श्रूयते। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपद
विहितानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगामेति। बृहस्पतिः प्रवक्ता इन्द्रश्चाध्येता दिव्यं च वर्षसहस्रमध्ययनकालः न चान्तगमनमासीद्यस्त
स्य कुतोद्यत्वेल्पायुषि प्रज्ञापायः सर्वथा चिरं जीवति स वर्षशतं जीवति न चान्योभ्युपायोस्तीति मन्यमानस्याह कथमिति। कथं व्याकरणेन शब्दानुशा
सनं। कथं वा व्याकरणं शब्दानामनुशासनं न कथंचिदित्यर्थः। येनाल्पेनैव यत्नेन महतो महतः शब्दौघान् प्रतिपद्यन्ते तदुपायान्तरं दर्शयति॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰
५

प्रकृत्यादिविभागकल्पनयेति तत्र प्रतिपन्नशब्दोपदेश एव तावदाश्रितः नियतत्वात् । अपशब्दा हि प्रतिदेशं प्रतिगृहं प्रतिपुरुषं प्रायशश्चानवस्थिताः । न ते
लक्षणेनानुगन्तुं शक्यन्ते । उपायस्य च साक्षात्प्रतिपत्तिर्युक्ता । प्रत्ययात्पूर्वं क्रियत इति प्रकृतिः । आदिशब्देन प्रत्ययविकारागमानां ग्रहणं । तेषां विभागः संकी
र्णरूपतानस्य कल्पना काल्पनिका बुद्धिः । तया हेतुभूतया शब्दानामनुशासनं व्याकरणेन व्याकरणं वा कल्पनाग्रहणेन कल्पनामात्रं प्रकृत्यादिविभागः न
पारमार्थिक इति वैयाकरणसिद्धान्तं दर्शयति । अत एव क्वचित्प्रत्ययेऽनियमो दृश्यते । वसेस्तव्यत्कर्तरि णिच्च वसतीति वास्तव्यः । तद्धितान्तो वा । वास्तुनि भवो वास्त
व्य इति । तथा गिरौ डश्छन्दसि गिरौ शेते गिरिशः । तद्धितो वा गिरिरस्यास्ति निवासत्वेनेति लोमादित्वाच्छः । नन्वेवं प्रतिशब्दं प्रकृतिप्रत्ययविभाग उच्यमाने गुरु
तरमापद्यते न यथा पचतीत्यत्र डुपचष् प्रकृतिः तिप्प्रत्ययः शब्विकरण इत्यादि तत्कोऽयमभ्युपायो दर्शितः अत आह । सामान्यविशेषवता लक्षणेनेति ।

प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन ३ ॥ वृ ॥

करण एषा तृतीया कल्पनायां च करणता हेतौ च शब्दो न पठितव्यः एकस्मिन् हि साध्ये हेतुद्वयसमावेशे समुच्चयो भवति इह तु कल्पनायां लक्षणं करणं
कल्पना त्वनुशासने हेतुः तदयमर्थः सामान्यविशेषवता लक्षणेन करणभूतेन या प्रकृत्यादिविभागकल्पना तया हेतुभूतया शब्दानामनुशासनं व्याक
रणं व्याकरणेन वा शब्दानामनुशिष्टिरिति । तत्रोत्सर्गलक्षणं सामान्यवत् तद्यथा कर्मण्यणिति । तत्र धातोरित्येतत्कर्मणीत्येतच्च सामान्यमनेन
च कुम्भकारो नगरकार इत्यादिकं महान्तं शब्दौघं प्रतिपद्यते । विशेषलक्षणं विशेषवत् । तद्यथा । आतोऽनुपसर्गे क इति अत्रात इत्यनुपसर्ग इति च वि
शेषः । अनेन गोदः कम्बलद इत्यादिकं महान्तं शब्दौघं प्रतिपद्यते । एवमन्यत्रापि द्रष्टव्यं । कवित्स च्चतेलाघवं भवतीति । अपाद एव तु ज्यायान् ॥ ३ ॥

॥ छ छ ॥ ॥ छ छ ॥ ॥ छ ॥ ॥

ए॰
५

© Dharmartha Trust J&K. Digitized by eGangotri

अथ किमर्थो वर्णानामुपदेश इति। ननु तावदिति मुनवर्णास्वरूपज्ञापनार्थः। तस्य कलाध्मातादिदोषरहितस्य लोकत एव सिद्धत्वात्। अन्यथा दीर्घप्लुतादेरुपदेशः कर्तव्यः स्यात्। न च ग्रहणकशास्त्रेणापि तेषां सिद्धिः तस्यस्वरूपस्योच्चारणे कसमधिगम्यत्वात्। अथ तेषां लोकतो गणादि विदादि पाठ्यत्वे तेऽनभ्यत्वाद् परिज्ञानं दृष्टत्वादिति षष्ठ्येवमेव वक्तव्यम्। न च ह इत्यादेर्जिनत्वादि वत्संज्ञा परिभाषादिरूपता पेन पारंपर्येणाप्यतिबद्धप्रयुक्तेन। तस्मात् लाघवार्थ उपदेशो नेति प्रश्नः। प्रत्याहारार्थ इति। प्रत्याहार्यन्ते संक्षिप्यन्ते अस्मिन् वर्णा इति प्रत्याहाराणं विशिष्टानुपूर्वीको विशिष्टानुबंधयुक्तश्चास्य समाम्नायः सयथास्यादित्येवमर्थ इत्यर्थः। संक्षेपोराशीकरणं। प्रत्याहारोणा किमर्थमित्याह। लाघवेन शास्त्रप्रवृत्त्यर्थ इति। सति हि प्रत्याहारे आदिरन्त्येन सहेतेत्येतत्प्रवर्तते तत्प्रवृत्तौ अकारादीनां वर्णानामणादिकाः संज्ञाः संपद्यन्ते। तानि ष्पन्नव्यवहारे लाघवं भवति। असति प्रत्याहारे संनिवेशविशेषाये क्षयोः आद्यन्तयोरभावात् आदिरन्त्येनेत्यस्याप्रवृत्तौ अणादिसंज्ञाभावादकारादीनां पाठवतां कार्यमिष्यते तावंतः स्वरूपेणैव ग्राह्याः स्युः। ततश्च गौरवप्रसंग इत्यर्थः। अथवा प्रत्याक्षिप्यन्ते संक्षिप्यन्त इति संक्षेपः संकोचः।

अथ किमर्थो वर्णानामुपदेशः प्रत्याहारार्थः। प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः॥ ॥ अइउण्॥ ॥ अइउ इत्यनेन क्रमेण ॥ ॥छ॥ ॥

प्रत्याहारो अणादि संज्ञा। स हि हि वर्णोपदेशे पूर्वोक्तोऽक्षरसमाम्नायस्तावत्संपद्यते॥ तेनाणादयः संज्ञाः। ततो लाघवेन शास्त्रप्रवृत्तिरित्यर्थः॥ ॥अइउण्॥ ॥
कोऽस्य सूत्रस्यार्थः। किमभिधेयं किं वा प्रयोजनं। तत्राभिधेयं तावत् स्वेन अभिधेयमस्य स्थापि प्रयोगउपपद्यते। प्रयोजनार्थो हि ग्रहणानां प्रयोगः। विद्यते चात्र प्रयोजनं सूत्रणादिसंज्ञानिष्पत्तिः। अथेह कस्मान्न जुगणादिकमर्कार्यं न भवति। उच्यते। अत्र च सत्यपि न संनिवेशो हलंत्यमित्यस्मिन्प्रवृत्ते आदिरन्त्येनेत्यनेनाचसंज्ञानिर्वर्त्यते। अतो मात्सं निवेशात्याग कारादीनामसत्त्वाभावात् तत्कार्याभावः। अथवा वा इति पाठान्निपातत्वं निपातत्वात् अनर्थकत्वात्संज्ञाप्रत्ययलाभक्तिभावः। किं निपातव्यक्तिरेकैवात्र निर्दिश्यते। ननु सर्व एव व्यक्तयो निर्दिष्टुमिष्टाः। सत्यं तथापि सर्वासां युगपदुच्चारयितुमशक्यत्वादेकैव निर्दिश्या। सा च निपातव्यक्तिरेकैव युक्तान्निर्दिश्यते संहिताकार्याभावात्। इह परसूत्र पञ्चस्कु टमवगम्यात्। अनेन क्रमेणेति। अनेन क्रमस्य विवक्षितत्वं दर्शयति। एवं लण्प्रहणे ष्वकारादीनां त्रयाणां ग्रहणं इग्ग्रहणेषु अकारस्याग्रहणं उक ग्रहणे च कारकारयोर्द्वयोरप्यग्रहणं उपपद्यत इति भावः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पु॰
६

वर्णानिति। यद्यमी वर्णाः कात्प्रत्ययः कस्मान्न भवति। उच्यते। वर्णात्कारः स्वरूपनाममर्थः। वर्णादुच्चार्यमाणात्कारप्रत्ययो भवतीति एवं हि विज्ञायमाने ककारादुत्पादे उच्चार्यमाणस्य फलसमुदायस्य वर्णात्कारप्रत्ययो न स्यात्। किं तर्हि निर्दिश्यमानेभ्यः प्रत्ययोच्चार्यमाणस्य प्रयोगस्यावर्णेति निर्दिष्टः प्रति पाद्यः तस्माद्वर्णाद्वर्णस्य प्रतिपादकात्कारप्रत्यय इत्यर्थः। अत्र चानुवृत्तिर्विंशेयादनएवनात्पर्यनतु कविपुत्र इत्यादिषु दृष्टानां अकारादीनां प्रतिपादन इति कारप्रत्ययाभावः। अन्त इति। यद्यपि णकारस्य पूर्वोन्नरवर्णापेक्षया मध्यभावः तथापि पूर्वीयेष्वंतं सत्वं अस्त्येव। हलंतमिस्यत्र तांस तत्वमाश्रितं न मध्य त्वं प्रतिविदं तत्त्वांसत्वमस्येवमध्यत्वं तु सदप्यनाश्रितत्वात् किंचित्कारमिति भावः। न चैवमप्यप्रधानत्वात् यथा कार्यं न भवति तथैतत्तंत्रापि न स्यादित्या शंक्योक्तं इतमिति। अपायामस्मणादित्वं त्वात्संनेतमीवात्स्मात् हेते तिवचनादितत्संज्ञा एव कमिति भावः। तस्येत्यादि। तस्येति कर्मणि षष्ठी। ग्रहणमु पादानं तच्च शब्दविषयं सदुच्चारणं संपद्यते। उच्चारणवचनस्यवा ग्राह्याः ग्रहणवता प्रातिपदिकेनेति यथा। एकेनेति सहार्थयोगे तृतीया नस्यणकारस्ये

वर्णानुपदिश्यांते णकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवत्येकेन। उरण्परस्यइस्त कारेण। ह्रस्वमवर्णं प्रयोगे संवृतं। दीर्घप्लुतयोस्त्व विवृतत्वं॥ ॥४॥ ॥ ॥

केनादिना अकारेण सह प्रदेशे प्रयुक्तं ज्ञात्वेनोच्चारणं भवति। न केवलस्य आदिरंत्येनेति वचनात्तापि। वर्णान्तरसहितस्येत्यर्थः। अथवा तस्येति कर्तरि षष्ठी। ग्रह णमुपादानमेवसणकार एकेनैवादिना सहितो ग्राहको भवति। न त्वनेकेनापि वर्णान्तरेण न च केवल इत्यर्थः। उरण्परइस्तकारेणेति। अत्राकारेणेत्येतावद् विवक्षितं उरण्परइत्युपलक्षणं। उरण्परइत्याद्यकारेणेत्यर्थः अतएवाकारेणेत्युक्तं। उरण्परइत्यस्य तु विवक्षितत्वे तन्त्र वक्तव्यं। अयेणः पोष्यमित्यादा विकारेण कस्मान्न भवति ग्रहणं अविष्णुधातुभ्रुवांय्वोरियुङुवङाविति त्रैकारीकारयोः स्वरूपेण निर्देशात् अन्यथा ह्यण इति ब्रूयात् न च पूर्वेणापरेणा वेति संदेहः। पूर्वेणेति व्याख्यानात्। घोरित्यपि हि निर्देशो किं ह्रस्वयोर्ग्रहणं उत दीर्घयो अथ यकारवकारयोः इति संदेहात् व्याख्यानत एव निर्णयः। ह्रस्वम वर्णमित्यादि। प्रयुज्यत इति प्रयोगो धात्वादिः तत्र ह्रस्वमवर्णं सिद्धत्वं संवृतादयः शब्दा उभयवचनाः। इत्थं चाङ्गुगुण्यं चाङ्गुगुणांच। यथा प्रयुक्तादयः। संवृतगु णयुक्तमित्यर्थः। विवृतत्वमिति गुणिवचनात् त्वप्रत्ययः। विवृतगुणवत्वमित्यर्थः। तथा चाशिक्षा विवृतकरणाः स्वराः तेभ्य एत्तु विवृततरौ ताभ्यामैऔ ताभ्यामप्याकारः संवृतोकार इति॥ ४ ॥ ॥

रा॰ म॰
६

© Dharmartha Trust J&K. Digitized by eGangotri

तेषां सावर्ण्यप्रसिद्ध्यर्थमिति अन्यथा भिन्नत्वात्प्रयत्नस्य असति सावर्ण्ये दंडकमित्यादौ दीर्घप्लुतयोः परतो ऽकः सवर्णे इति दीर्घत्वं न स्यात्। ननु च सत्यपि
विवृतत्वे नैव प्लुतस्य दीर्घत्वं प्राप्नोतीति तस्मिन् कर्त्तव्ये प्लुतस्यासिद्धत्वात्। स्वरसंधिषु प्लुतस्यासिद्धत्वज्ञापनाद्दोषः। विवृत इति। विवृततर इत्यर्थः। न हि विवृ
तस्य ततो विवृततरेण सावर्ण्यमुपपद्यते प्रयत्नभेदात्। विवृतो ऽपि हि प्रतिज्ञायमानो यथाक्षरसमाम्नायिक एव प्रतिज्ञायेत तत्र नो धातुप्रातिपदिकप्रत्य
यनिपातस्थस्याकारस्य संवृतत्वाद्ग्रहणं न स्यात्। ततश्च वृक्षाभ्यामत्र नो दीर्घो ऽकारस्य न स्यात्। अंत्यस्यैव तु स्यात्। दधिदित्यं नोदात्तो न स्यात्। नायक इति प्र
त्ययाकारस्यानुदात्तादौ पादे शोभनः स्यात्। प्रपचतीति प्रशब्दाकारस्य निपातत्वादाद्युदात्तत्वाद्युदात्तो न स्यात्। अस्य च्वाविस्तादावुपात्तस्य संवृतत्वाद्नए
त्वादप्रतिग्राहकत्वे शुक्लीभवतीत्यादावेव स्यात् मालीभवतीत्यादौ तु न स्यात्। अथाक्षरसमाम्नायिकस्यैव विवृतत्वप्रतिज्ञाने किं प्रयोजनं न स्वयं क
स्विदपि पुनः प्रयुज्यते। उच्यते यत्राकः सवर्णे दीर्घ इत्यादौ प्रत्याहारग्रहणं तत्रादिरंत्येनेति वचनान्नयोरेवाकारककारयोरनुकरणमिति तेन प्रत्याहारगते

तेषां सावर्ण्यप्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते॥ ॥५॥ ॥

नाकारेण विवृतेन प्रयोगाख्ययोर्दीर्घप्लुतयोः सावर्ण्यात् ग्रहणमिति खट्वाढकमित्यादौ दीर्घत्वादिकार्यं यथा स्यात्। असति हि विवृतत्वे अस्य च्वाविस्ता
दिवन्नस्त्याद्यारेष्वपि संवृतस्य प्रयोगाख्यस्य ह्रस्वस्यैव हि कार्यं स्यात्। सति तु विवृतत्वे दीर्घप्लुतयोरपीत्यस्यैवाक्षरसमाम्नायिकस्यापि कस्यापि विवृतत्व
प्रतिज्ञाने फलं। अतः पूर्वोक्तदोषप्रसंगादेव यो नाम कश्चिदकारः स सर्वो विवृतः प्रतिज्ञायते। तदाह इह शास्त्र इति। इहेत्यनेनावस्तुत्वे सति संनिधानादक्ष
रसमाम्नाय इति अर्थः स्यात् इति शास्त्रग्रहणं। ननु चास्य च्वाविस्तादौ सत्यपि विवृतत्वे नैव सवर्णानां ग्रहणं सिध्यति। अनण्त्वात्। प्रत्युच्चारणं त्वन्ये
चान्ये वाकारादयः तदिह सर्वेषां विवृतत्वेपि सावर्ण्यमात्रं सिध्यति न त्वणत्वमपि ये ऽक्षरसमाम्नाय उपदिष्टाः त एवाणः आदिरंत्येनेति वचनात्। ततश्चा
कः सवर्ण इत्यादौ प्रत्याहारणैव सवर्णग्रहणं स्यात् नास्य च्वाविस्तादौ। एतच्चौघमिकारादिष्वपि समानं ते ऽपि कोयणावीत्यादावेव ग्राहकाः स्युः न यसे
तिचेत्यादौ। ननु प्रसभितान्यानादुच्चारणस्याभिव्यंजकत्वात्सर्वेष्वच्चारणेष्वेक एवाकार इति तस्मान्नणत्वमाशंकते। पद्येवं अनुबंधकार्याणां संकीर्ण
त्वा कर्मण्यण् आतो ऽनुपसर्गे क इत्यादिषु पुनः पुनरेकस्यैवाकारस्योच्चार्यते स च नानानुबंधयुक्त इति सर्वत्र सर्वानुबंधकार्यप्रसंगः। अस्यां प्रतिक
इत्यस्यैवानुबंधकार्यप्रसंगः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

लोकवत्‌व्यवस्था भविष्यति तत्‌ यथा लोके इह मुंडो भव इह जटी लोमश इह शिखी भव इह नग्नी कौपीनी भवेत्येकस्यापि धर्मिणो देशभेदेन धर्मभेद उक्तो यो यत्र
धर्म उक्तः स तत्रैव व्यवतिष्ठते न पुनर्धर्मिण एकत्वात्सर्वत्रापि भवति तद्वदिहापि गोघटस्तत्र चास्यादिप्रतिषेधो लिंगमात्रं प्रोक्तमपि तत्क्रमाश्री
यत इति तेन घटेन तत्र इति घटिकः ध्वनस्य निमित्तं धर्मस्य निमित्ता देशघटत्वलक्षणो वन्यतो भविष्यतः आह निष्कृता देवघटस्यापदेशात्‌ तस्याप्रयोगस्य काप्यप
देशस्य निवर्तनात्‌ किरणोत्पादो स्वभावेकाचइति विभक्ते रुद्धाकृत्वं न भविष्यति। स्यादेतत्‌ एकस्यैव कारः तमेकदा एक एवोच्चारयेन्न बहवः सहेति न
दर्शनस्पर्शनादिवदुपपत्तेः यथा एकमेव पटं एकदैव कश्चित्‌ स्पृशति कश्चित्‌ पश्यतीति तथा घोतदुच्चारणं नाम स्यात्‌। मेकत्वेप्यकारस्य न कश्चिद्दोषः।
युक्तिवशात्तु पृथगुच्चारणं भिन्नोकारस्याश्रितः। तथा हि इदं उ अग्निमित्यकारयोः कालव्यवायो दृश्यते इदं उ इति शब्दव्यवायश्च न चैकस्य कालशब्दव्यवा
य उपपद्यते। नानात्वे तु उपपद्यते यथा अइउणित्यत्राकारोकारयोः यथा वा हिरिति। ननु यथा एकस्यापि घटस्य कंजकप्रदीपसन्निधानासन्निधा
नाभ्यामुपलब्ध्यनुपलब्धी तथैकस्याप्यकारस्य व्यंजकध्वनिसंनिधानात्पूर्वमनुपलब्धस्य मध्ये वतरसंनिधानादनुपलब्धस्य पश्चात्संनिधा
नादुपलब्धिरिति उपलब्धेरेव कालव्यवायो नाकारस्य। नैतत्‌ प्रतीतिसाक्षिकमुच्यते लौकिका ह्यकारस्यैव व्यवायं प्रतियंतीति ये स्मिन्‌ दुरुक्ते कशि
क्षिता न भवंति। किंचानुनासिकत्वादीनां विरुद्धानां धर्माणामेकदैवाश्रयोकार उपलभ्यते। अतो विरुद्धधर्माध्यासान्नानात्वं गवाश्ववद्भेदेनु
मानतः प्रत्यभिज्ञा च जातिनिबंधना ह्यालाववत्‌ व्यक्तिप्रत्यभिज्ञात्वसिद्धाभेदस्यैव प्रतिपुरुषं प्रसिद्धेः तथा चकुर्वंतः इह तेषु वर्णेषु शब्दवि
शेषादूर्ध्वविशेषं निश्चिन्वंति। न चैतदभेदस्यैव प्रतिभासे समुपपद्यते। एवं तर्हि सैव जातिरत्र निर्दिश्यते ननु तथ सर्वेषामणत्वं भविष्यति। यद्येवं अणुदित्स
वर्णस्य चेमग्रहणमनर्थकं एवं त्वस्य समाम्नायवदस्याविरसादावपि जातिनिर्देश एवास्तु किमण्ग्रहणेन। एवं तर्हि नैवात्र जातिर्निर्दिश्यते नाप्येकैव व्य
स्त्वव्यक्तिः सदपि दूरत्वव्यक्तयो निर्दिष्यते तत्तदेतदेवं कथं भवति। स्यादृश्यप्रधानो निर्देशः। स्यादृश्यं च यावत्सर्वासामपि दूरत्वव्यक्तीनामस्तीत्येकव्यक्तिनिर्देशोपि तद्रूपस्याबि
वक्षितत्वात्‌ यस्मान्मणायं निर्देशः संपद्यत इति सर्वासामणत्वसिद्धिः। एवं च कृत्वा यदुक्तं विवृतोच्चारणं तदेव धात्वादिगतस्याप्यकारस्य विवृतस्योच्चारणं संपत्स्यते मितिन
तेषां दृश्यविवृतत्वं प्रतिज्ञातमसिति सर्वमवदातं॥ ५ ॥ ॥ श्रीरामचंद्राय नमः॥ — ॥श्रीः॥ — ॥एम॥ — ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।कथं पुनर्ज्ञायते विवृतः प्रतिज्ञायत इत्याह तस्येत्यादि। यदि पूर्वमकारो विवृतो न प्रतिज्ञातः स्यात् ततस्तस्य विवृतस्य प्रयोगार्थं अर्थशब्दो निवृत्तिवचनः प्रयो
गनिवृत्त्यर्थं प्रत्यापत्तिं न कुर्यात्। अथवा तस्येति संवृतः। परामृश्यते तेन तस्य संवृतस्य प्रयोगो यथा स्यादित्येवमर्थमित्यर्थः। स्वतन्त्रपाद्धि प्रसृतस्य पुनस्तस्या प्रयेय
त्वोऽर्थवान् भवति। ननु चातिखट्वस्याद्यावाकारस्य विवृतस्य ह्रस्वो विधीयमानोऽन्तरतम्याद्विवृतो भवेत्। तस्य प्रयोगो मा भूदिति प्रत्यापत्तिवचनमर्थवता। नै
तदेवं। ह्रस्वादेशेषु च वर्णेषु पस्थानादयो ह्रस्वेन भाव्यं। असति च विवृतत्वे अकारं न गृह्णातीति आकारस्य ह्रस्वो नैव स्यादिति कस्य प्रत्यापत्तिः स्यात्। यत्तु स्था
पोऽन्तरतम्यामित्याकारस्यैव ह्रस्वः तस्य प्रत्यापत्तिः स्यात्। एवं मन्यते नैव लोके न च वेदे विवृतोऽकारोऽस्तीति कस्तर्हि संवृतः योऽस्ति स भविष्यति। अथवा यदि विवृतः
प्रतिज्ञायते प्रयोगेऽपि तस्य तथाभूतस्य प्राप्नोतीत्याशंकाह तस्येत्यादि। अस्मिन्पक्षे ज्ञापकस्यानुपपन्नत्वात्काचिदनुपपत्तिः। विवृतत्वप्रतिज्ञानं तु मा भू

।तस्य प्रयोगार्थं अ अ इति शास्त्रान्ते प्रत्यापत्तिः करिष्यते।। छ।। ऋलृक। ऋलृ इत्येतौ वर्णावुपदिश्य पूर्वांश्चानेक
काणमितं करोति प्रत्याहारार्थं। तस्य ग्रहणं भवति त्रिभिः। अकः सवर्णे दीर्घ इत्यकारेण।। इको गुणवृद्धी इतीकारेण।
उगितश्चेत्युकारेण। अकारादयो वर्णाः प्रचुरप्रयोगविषयाः तेषामुपादानमुपदेशे प्रयोजनं।। ।। ।।

नात्र अवसेयं। यदि प्रत्यापत्तिः क्रियते तयैव प्रत्यापत्त्या संवृताकारः संवृतः संपन्न इति पुनरपि साकारं पन स्यादित्यत आह। शास्त्रान्त इति। शास्त्रान्ते क्रि
यमाणा प्रत्यापत्तिः सर्वेष्वेव शास्त्रकार्येषु व्याप्नोतीति भावः। ऋलृक्।। इह प्रयोजनार्थो वर्णानामुपदेशो न स्वरूपज्ञापनार्थः लृकारोपदेशस्य च
न किंचित्प्रयोजनं दृश्यत इति तदुपदेशमाक्षेप्तुकामः किं पुनः कारणं लृकारोपदेशस्येव प्रयोजनं दृष्ट्वा तेन पुनर्वर्णान्तरोपदेशस्येत्याशंकां निराकुर्वन्ना
ह अकारादयो वर्णा इति। वर्णशब्द उभयलिंगः तथा च पूर्वत्र ह्रस्वमवर्णमित्युक्तं इह च वर्णा इति। प्रचुरप्रयोगविषया इति प्रयुज्यत इति प्रयोगो धातवा
दिः प्रचुरः प्रभूतः प्रयोगो विषयो येषामिति त्रिपदो बहुव्रीहिः। अथवा प्रयुक्तिः प्रयोगः तस्य विषयः प्रयोगविषयः ततः प्रचुरशब्देन बहुव्रीहिः सु
ज्ञानं प्रयोजनमिति तद्यथा दंडाग्रं दध्यत्र देवछत्रमित्यादौ स्थानित्वं निमित्तत्वमित्यादि।। ।।छ।। ।।छ।। ।।छ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

ऌकारस्त्विति। नु शब्दो ऋकारादिभ्यो विशेषं दर्शयति। कॢपिष्ठ एवेति। यादेनन्तत्कॢपिष्ठस्यानस्या कार्यार्थ उपदेश इति तत्राह नितत्राह लपेश्चेति। न हि तस्यायमौ
पदेशिकः किं तर्हि कृपो रो ल इति विधानेन संपादितः स चासिद्ध इत्यर्थः। ततः किमित्याह तस्यासिद्धत्वादिति। अकार्ष्णीति भविष्यन्तीति धातोरत्र इत्युदात्तत्वं लृ
तमितिहि शेषनिघातः कल्पनमिति कोपुणाद्दीर्घ इत्यादीनि। किमर्थं ऌकार उपदिश्यत इति। न हि तस्यैकोपि गुणवृद्ध्यादेः स्थानित्वं निमित्तत्वं वा संभवतीति
भावः। लत्वविधानादिति। लत्वं विधीयते येन तल्लत्वविधानं सूत्रं कृपो रो ल इत्येतत् तस्मात्तदाश्रयणादित्यर्थः। एतेन तेषु लत्वस्यासिद्धत्वं दर्शयति। कॢप्त शिखइ
ति। अत्र गुरोरनृत इति प्लुते कर्तव्ये लत्वस्यासिद्धत्वात् न स चानच्चादर्चो विधीयमानः प्लुतो न स्यात्। प्रक्लृप्त इति। अंतर्भावितण्यर्थत्वात् कर्मणि क्तः। तिर

ऌकारः कॢपिस्थ एव प्रयुज्यते कॢपेश्च पूर्वत्रासिद्धमिति लत्वमसिद्धं तत्र ऋकार एव अकार्षीर्णि भवि
ष्यंतीति किमर्थं ऌकार उपदिश्यते। लत्वविधानाद्यानि यानि कार्याणि तानि ऌकारे यथा स्युः। तिलकातिप्लु
तस्यानि। प्लुतः स्वरितो द्विर्वचनं। कॢप्तस● शिखः। प्रक्लृप्तः। कॢप्तवानिति॥ ॥ ६ ॥ ॥श्रीः॥ ॥

तं न रः शेषनिघातः। अत्रो हलाह्यदनुदात्तस्य स्वरितत्वस्मिन् कर्तव्ये लत्वस्यासिद्धत्वान्न स चानत्वात् स्वरितो न स्यात्। ननु बनाचः स्वरितो विधीयते तस्य अनुदा
त्तं संज्ञात्वचो विधीयते एवं स्वरितसंज्ञापितत्वस्थानादेशयोरुभयोरपि ऌकारयोरनच्त्वात् स्वरितो न स्यादेव कॢप्तवानिति। अत्रानचिचेति यकारस्य द्विर्व
चनं न स्यात्। यद्यपि पूर्वमपि द्विर्वचनस्योदाहरणं तथापि विस्पष्टार्थमिदमुदाहरणमुपन्यस्तं। ननु च कृपो रो ल इत्येतत्सूत्रं स्वरितविधानात्परं अत्र
इत्येतस्मात्पूर्वमस्त्येवं हि लत्वस्यासिद्धत्वात् प्लुतस्वरितद्विर्वचनानि प्रकारस्यैव सिद्धानीति। नैतदस्ति। कृपो रो ल इत्येतस्मिन्नुत्कृष्यमाणे ओपदेशेन्त्य
नदृषु इत्यतस्तनिजे गिलत इति हलि चेति दीर्घत्वं स्यात्। तस्मिन् कर्तव्ये लत्वासिद्धत्वादिति यथान्यासमेवसाधीयः॥ ६ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ल्लकृपिस्य एव प्रयुक्तत्वेन एसेतदपि शिथिलयन्नाह यच्चाशक्तिजमिति। साधुशब्दं ज्ञात्वा स्याशक्तेरन्या शक्तिरेवात्राशक्तिः न त्वभावमात्रं तज्जन्मनश्च साध्वनुकरणमप्य
साध्वेव यथा ब्रह्महत्यानुकरणं यो सेव मसो ब्राह्मणं हन्तीति ब्राह्मणं हन्ति सो पि प्रसज्येतेति। विषमोयमुपन्यासः। न तत्रानुकरणात् प्रत्यवायः। किं तर्हि अविकलतत्
क्रियानुष्ठानात्। एवं यदि पुनरनुकरणात्स्यात् एवमसौ ब्राह्मणं हन्तीति कदलीस्तंभच्छेदेऽपि प्रसज्येयात्। न हि इहापि य एव कुमार्या ऌतक शब्दः प्रयुक्तः तमेव य
थानुकुर्वन्नप्युंजीतनः स्यादसाधुः। अयं तु शब्दांतरमयुंक्ते कथ्यांग्रथ्येऽदात्। कुमार्यापि प्रयुक्तस्य पुरुषविशेषोऽर्थः अनुकरणस्य तु कुमार्याप्रयुक्तमनुकार्यशब्द
रूपं। अत एवाह असाधुशब्दरूपं तदनुकरणस्येति। न चापशब्दस्य द्योतकत्वादपशब्दत्वं। अन्यथा साधुशब्दस्येवापशब्दः स्यात्। नापि प्रकृतिवदनुकरणं
भवतीत्यपशब्दत्वं शास्त्रीयोहि तत्र प्रकृतिर्गृह्यते शास्त्रीयं तत्कार्यमतिदिश्यते न चापशब्दः शास्त्रीया प्रकृतिः न चाप्यपशब्दत्वं शास्त्रीयं कार्यं। अनोचाशक्तिजा

यच्चाशक्तिजमसाधुशब्दरूपं तदनुकरणस्यापि साधुत्वमिष्यते। तत्स्थस्यापि ऌकारस्याकार्यप्रतिपत्त्यर्थमुपदेश आ
क्षिप्यते। ऋतक इति प्रयोक्तव्ये शक्तिवैकल्यात् कुमार्या ऌतक इति प्रयुक्तं तमन्योऽनुकरोति। कुमार्य्ऌतक इत्याहेति॥ ॥

नुकरणमपि साध्वेवाभ्युपगन्तव्यमनेनैतद्दर्शयति न्यायसिद्धमप्येतच्छिष्टानामिच्छया नियम्यत इति तेन किं सिद्धं भवति। ऌवर्णस्य दीर्घा न सन्तीत्येतत्सिद्धं भव
ति अन्यथा ऋतक इत्यत्रापि तथैवाशक्तिवैकल्याद् ॠतक इति यदि कश्चिद्दीर्घोनुकुर्यात् कुमार्य् ॠतक इत्याहेति तदा ऌवर्णस्य दीर्घप्रयोगः साधुरेव स्यात्। इको यणचीत्यत्रा
सत्यपि ऌकारोपदेशे वैषम्यात् संख्यातानुदेशाभावेऽपि आन्तरतम्यात् सिद्धं इष्टं। गमिप्रभृतीनां ऌकारस्येत्त्वे ज्ञापि पुषादिद्युताद्ऌदित इति ज्ञापकात् सिद्धा।
अतः पूर्वोक्तान्येव प्रयोजनानि। ननु वचनान्यपि ऋकारऌकारयोः सवर्णसंज्ञा वक्तव्येति सवर्णसंज्ञया सिद्धानि सा चावश्यं वक्तव्यापि ऌकारस्यात्र सवर्णदी
र्घत्वं यथा स्यात्। सा सवर्णसंज्ञास्य पेसाना वद्वक्तव्या। क्लृप्तशिख इत्यत्र प्लुतसिद्धये यत्नः कर्तव्यः अनृत इति प्रतिषेधप्रसंगात् ऌकारोपदेशेन तु सत्ता वदुपदे
शः स्वरसंधिप्रकरणे च ऌकारस्य ऋकारवद्ग्राह्यो वाच्य इत्यविशेषात् सत्वकारऌकारमुपदिदेश॥ ॥ श्रीः॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।एओङ्।। ।।अत्र पूर्वोऽस्त्वेति नोक्तं पूर्वैः सहास्य ग्रहणासंभवात्। अथ खिङ्जिदादिभ्योङ् असत्यतिवृक्ति ख्यातिभ्योऽ इत्सकारेणाग्रहणं कस्मान्न भवति। आ
दिर्त्वेनेत्यत्रा एउदित्सवर्णस्य चेत्यतो प्रत्ययस्येत्यनुवृत्तेः। एवं च रोः सुपीत्यत्राप्रत्ययः इति निषेधात् स्वरूपग्रहणं। सुपि चेत्यत्र तु प्रतिषेधो न भवति यत्रादौ सुपी
ति विशेषणात्। उक्तस्त्र च कुवचने फलीति। सुप्तिङन्तं पदमिति अत्रापि तिङ् साहचर्यात् सुविति प्रत्याहारः। ङ्णस्ङ्दृङ् हलोरित्यत्र प्रत्याहारे सति अङ्
दो हलादौ चेत्वं विधीयेत। ततश्चाङ् हलोरित्यनर्थकं एतावन्तो हि प्रत्ययाः अड्डदयोर्हलादयश्च व्यतिरिक्ता हेङस्त्र तु ङितीत्यनुवृत्तेरेव अप्रसंगः अतोऽङ्
ग्रहणासामर्थ्यान्न स्वरूपग्रहणं। अदङ्शोङीति न प्रत्याहारः। कुछत्पत्नमिति संलोलिटि पुनर्गुणविधानात्। सनि च इङ्श्चेति न प्रत्याहारः। इकोऽलिति किं
त्वविधानात् अक्रमगमां सनीति दीर्घविधानाच्च। नहीङ्तानां सह निर्गम्यादेशो इगं ताऽऽरजन्ता वा धातवः सन्ति भवेयुः। परिमाणाख्यायां सर्वेभ्यः इङश्चेति

।।एओङ्।। ।।एओ इत्येतौ वर्णावुपदिश्य पश्चान्ते ङकारमितं करोति प्रत्याहारार्थं। तस्य ग्रहणं भवत्येकेन। एङि पररूपमित्ये
कारेण।। ।।ऐऔच्।। ऐ औ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते चकारमितं करोति। प्रत्याहारार्थं। तस्य ग्रहणं भवति चतु
र्भिः। अचोऽपरस्मिन्पूर्वविधावित्यकारेण। इकोगुणवृद्धावित्यकारेण। एचोऽयवायाव इत्येकारेण। वृद्धिरादैजि
त्यैकारेण। प्रत्याहारेष्वनुबंधानां कथमज्ग्रहणेषु न।। ७ ।।

न प्रत्याहारः यदि स्यात् सकर्मकानामेङ्ङितानां च सामान्यलक्षणेनैव घञः सिद्धत्वादिवर्णे वर्णेति घञ्योर्बाधाय घञ्विधिः स्यात् न च तयोरपि वचनसा
मर्थ्यान्नित्यो बाध इति विकल्पः स्यात् ततश्च तत्तद्विधावेव वा ग्रहणं कुर्यात्। क्रीङ्जीनां णाविति न प्रत्याहारः। क्रीङ्जोः पृथगुपादानात् साहचर्याच्च इङ्धा
योरिति न प्रत्याहारः धाञि साहचर्यात्।। ।।ऐऔच्।। ।।इहादित्यन्ते न सहेति मध्यवर्त्तिनामजित्येषां संज्ञा भवन्ती ऐकारादीनामिव णकारादीनामपि प्राप्नो
ति ततश्च दधि णकारः दधिकरोति दधिङकार इति यणादेशः प्राप्नोति एवमग्रहणे णकारस्यापि ग्रहणे सुगणणकारस्य कः सवर्णे दीर्घः प्राप्नोति तथाऽ ग्रह
णे चकारस्यापि ग्रहणात् वृचीनामपि सारोऽत्र द्वा वाय इति णत्वं स्यात्। एवं सर्वेष्वेव प्रत्याहारेषु।। प्रत्याहारेष्वनुबन्धानामिति। प्रत्याहारेऽस्मिन् शास्त्रसमाम्नाये ये अनुबन्धाः तेषां
हारेषु मध्यवर्त्तिनामनुबन्धानां तत्कृतप्रत्याहारनिबन्धनं कार्यं प्राप्नोतीत्यभिप्राय १

© Dharmartha Trust J&K. Digitized by eGangotri

आचारादिति। आचरणमाचारः आचार्यस्य प्रवृत्तिः ग्रहणादयो बहुलं तत्र विमर्षिकर्त्तोः अचिङ्मुटि इति ततो ज्ञापकाद्भवति। सामान्यापेक्षं च ज्ञापकमिति का
र्यालम्बिते तत्र न भवति। अप्रधानत्वादिति। अणादिसंज्ञाप्रणयनार्थमनुबन्धोच्चारणं तत्राकारादारभ्य आचकारान्मध्यवर्त्तिनामच् संज्ञा भवतीत्यप्रवृत्तेः
प्राप्तेषां स्वार्थमुपादानं निष्फलं तं न परार्थमेव तेषां प्राधान्यं नो भवति। तत्र च येषामकारादीनां न केचिदपि संज्ञा स्वरूपेण भवि: तेषां तावत्स्वार्थमेवोपादानं
कारादीनामप्यणादिसंज्ञा पुनः कथं चिद्प्राधान्यं अणादिसंज्ञासु संज्ञास्वरूपान्तर्भावे यस्ये रूपमित्यनुवृत्तेः स्वार्थमप्युपादानं न परार्थमेव णकारादीनां तु परार्थ
मेवेत्यप्राधान्यं किं च। णकारादीनामच् संज्ञा प्राप्नोति लोपश्च तत्र परत्वान्नित्यत्वाच्च लोपे कृते संज्ञाप्रवृत्तिकाले असत्वादपि तेषामजादिसंज्ञा: भावः तस्मात् हलोप
श्चेति। स्वार्थ एव तत्र पूर्वमलान्तरमित्यिथा· पक्षे तु प्रसाहाय्यो नुबन्धोपेक्षितः तस्य वचनसामर्थ्यात् प्रवृत्तेः प्राक् लोपाभावः इहाकारादयो वर्णाः स
भागाः षट् ते यदाहतस्मादिति उदात्तमर्द्धह्रस्वं दीर्घ प्लुतं रसेद्रुतावृत्ति। संतति च केषांचिद्भागा वर्णान्तरबुद्धिबोधाः आकारादिषु काराद्यः एकारैकारयोरका

॥आचारादप्रधानत्वाल्लोपश्च बलवत्तरः॥ छ ॥

ऐकारै ओकारौकारकारोकारैऋकारैरेफल्लकारैलकाराः तेन तत्र ह्रकारादिग्रहणे न गच्छेत्स्वत्वेति संदेहः तदर्थं च किमकारादिसंघातमात्रमाकारादयः
वर्णादिवद्धुरीयादिवद्वा। किं वा वर्णान्तरमेव तत्स्वदृशाव यवं वृषि हादिवदिति संदेहः किं तावत्प्राप्तं संघातमात्रमिति। कुतः अकारादिरूपप्रत्यभिज्ञानात् क
मेणोपलब्धेश्च एर्नुरिति सूक्ते पूर्वमकारः पश्चादिदुतो इति प्रतिपत्तेः स्थानक्रमाभिधानाच्च एऐ कंठतालव्यौ॥ ओऔ कंठोष्ठ्यौ इति। न ह्येकस्य वर्णस्य स्थानद्वये
न क्रमेणानिष्पत्तिः यत्र कारोप्याह एचो: प्लुतिप्रसंगे तदवयवाविदुतौ प्लवेते इति। आश्वलायनोप्याह विवि च्यसंध्यक्षराणामकारमिति। अतः संघातमात्र
त्वात्तद्ग्रहणे न ग्रहणोमतिः अग्ने इन्द्र वायो उदकं इति सवर्णदीर्घत्वं प्राप्नोतीति परत्वादन्तरंगत्वाच्च अव यव प्रतिपत्तिपूर्वकत्वात् समुदायप्रतिपत्तेः। अग्ने एतीत्येङः
पदान्तादतिस्यात्। आलूय प्रमायेति तुक् खट्वाभिरिति ऐसः पातेति अतो लोपः। वाचात वृत्तिवाचोनिमिघ्नजल सणोऽवन्तौ स्यातां एवमाद्येपक्षे दोषं दृष्ट्वा
द्वितीयं पक्षमाश्रित्याह॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का० वृ०
१०

वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इत्यादि। वर्णैकदेशा इति एतेन वर्णग्रहणं वर्णानां सतामेकदेशा एतेन वर्णसमुदायानामिति ज्ञापनार्थं तेन वर्णैकत्वव्यवस्थापक एकत्वप्रतिभासो लक्षितः। न स्वे
कारादेः परस्यैव वर्णसमूहत्वेन प्रतिभासः किं तु स्ववर्णतया अकारादिभागसंवेदनं तु एकवर्णत्वेपि तत्समभागत्वात् भागानां चाकारादिसादृश्याद् उपपन्नं तदाह वर्णान्तरस
मानाकृतय इति। भागानामेव च क्रमोपलब्धिः स्थानभेदोप्येकवर्णत्वेपि वकारवदुपपन्नः सत्रकारवचनमपि सदृशभागनिबन्धनमेवास्य। अतो कारादिप्रसभिन्नानादे
त्यत्र्यापि सिद्धत्वाद्बाधितासमथानुपपन्ना चैकत्वबुद्धिरेकवर्णत्वे प्रमाणं। नेष्वित्ति। एकदेशेषु तत्कार्यमिति वर्णान्तरकार्यं सवर्णदीर्घत्वादि न भवति। किं कारणमित्या
ह। तच्छायानुकारिणो हीति। तच्छायात दीकारः एवं प्रत्यक्षेणैकत्वं साधयित्वा तत्र विप्रतिपत्तं प्रत्यनुमानमाह। एकमित्यादि। इच्छायोनिरात्मगुणोत्र प्रयत्नो न पुनः स्थ
नादिर्वर्णगुणः। इहैकप्रयत्ननिर्वर्त्य एको वर्णः। एकेच्छापूर्वकश्चैकः प्रयत्नः तत्र यथा एकवर्णोच्चारणेच्छापूर्वकैकप्रयत्ननिर्वर्त्यत्वाद् इकारादीनां सभागत्वेप्येक
त्वं तथा ऋकारादेरपि न हि कश्चिदेकाग्रघुच्चारणेन प्रयत्नस्य तत्कारणमनतारच्छायावाभिन्नत्वमुपैति। अतो नरसिंहवज्जात्यन्तरत्वात् ऋकारादीनामभावादेव तत्कार्य

वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति तच्छायानुकारिणो हि ते न पुनस्त एव। एकप्रयत्ननिर्वर्त्या हि
वर्णा इति। साचार्यानुवृत्तिर्धातिलादेशविभागेषु सकारप्रतिविधानार्थं नुड्विधावृकारग्रहणं आनृधतुः आनृधुः। लादेशे तकार
ग्रहणं। क्लृप्तः। क्लृप्तवान्। विनापेक्ष्य कार्यग्रहणं कर्तव्यं ८

णामभावः। यद्येवं तस्मान्नुड् द्विहल इति नुट् आनर्च्छेत्यादावेव स्यात् आनृधतुरित्यादौ न स्यात् तत्र कारस्य सरेफस्याहलत्वात्। तथा कृपो रो ल इति लत्वं क्
ल्पं च चलीक्लृप्यते इत्यत्र सोषु द्विसेवरेफस्य स्यात् मुख्यो लकारः न तु क्लृप्त इत्यादौ कारस्य ल्कारः। रषाभ्यामिति णत्वमात्रम्स्तीर्णमित्यादावेव स्यात् तिसृणां नृणामि
त्यादौ तु न स्यात्। इत्यत आह नुड्विधीत्यादि। सकारनकारस्थानिकत्वसमूहस्य स्वविनाभइति पूर्वाचार्याणां संज्ञा इह नुण्कारस्य ग्रहणं नुड्विधौ तावद्विहल्य
हणं न क्रियते न चैवमानर्चत्युदाहरणमपि संज्ञाः अश्नोतेश्चेत्यस्य नियमार्थत्वात् अकारोपधस्य यदि भवति अश्नोतेरेवेति अश्नातिनिवृत्त्यर्थं हि नान्यरस्येव
कृपातालेचरोलइति सामान्यनिर्देशात् ऋकारलृकारयोश्च रेफलकारौ इत्यस्मान्निष्कृष्यस्थानादेशभावाद्योगादेकदेशविकारद्वारेण सकारस्यैव लृकारः। अत्र
च प्रमाणं कृपिरिति क्लृप इति निर्देशः। णत्वेपि ऋतिसामान्यनिर्देशात् ऋकारस्थोपि तावद्रेफो गृह्यते तेन च परस्यात् ऋकारव्यवधानं अरं कुर्वाणः ऋव्यवायेपि ति विभ
ज्यसामान्येन व्यवायेपि णत्वविधानात्। न चैवं वर्णान्तरव्यवायेपि प्रसंगः। अट्कुप्वाङ्नुम्व्यवायेपि इति नियमार्थत्वात् आश्रसमानापि केवलस्य सापि तेनैव व्यवायेपि भव

राम०
१०

© Dharmartha Trust J&K. Digitized by eGangotri

।हयवरट्। आन्महदुदात्त इति न प्रत्याहारः। प्राक्सितादड्व्यवायेपीति वचनात् प्रत्याहारे तस्मिन् प्रत्येकमन्ते अलोन्त्यस्येत्यंत्यस्य स्यात् समुदायस्य त्वन्हेस्यदिशइति
कुतोव्यवायः। ननु च यदादुदात्तहत्स इत्यत्र प्रत्याहारः न दोष्व्यवाय इत्यत्रापि प्रत्याहारस्व ग्गात्वविधिवत् न तत्स्थाप्यवस्तुनो तीत्यादौ षत्वविधानार्थमेतत्स्यात्। एवं
तत्पोदिरिंत्येकैस्त्रात्प्रत्यय इतिश्नुवर्त्तते स वाच्यर्थः प्रतीयते विधीयत इति न भाव्यमानेषु सर्वत्र प्रत्याहारग्रहणं न भविष्यति। न चैवमिको यणचीत्यादौ दो
षः आदिरंत्येनेत्येतद्विधावुण इत्यादिभिः प्रत्येकमभिसंबध्यते। तत्र कश्चिदत्वर्थग्रहणांश्चिन्त्ये। उद्दलादेरिति न प्रत्याहारः विभाषेट इति वचनात्। इद्धिधौ सं
गस्येत्यनुवर्त्तनंयं च मंतं चेद्विपरिणाम्यते इकारादीनां च प्रत्येकमिद्धं तत आदेः परस्येत्याद्युधानुकस्य इकारादिरादेशः स्यात्। अविपरिणामे तु लोंत्यस्य स्यात् समु

॥ ॥हयवरट्॥ ॥हयवरट् इत्येतान्वर्णानुपदिश्य पूर्वं चान्ते टकारमित्संज्ञको
ति प्रत्याहारार्थं। तस्य ग्रहणं प्रत्येकेनाण्णाष्ठौटीत्यकारेण॥ ॥ ॥

दायस्येति द्वे स्वर्ग दिशः। न च त्रिष्वपि पक्षेषु इणां तादंगादुत्तरोय इट् तत उत्तरे षाढी ध्वं लुङ्लिटां धकारस्य मूर्धन्यः। दीधीवेवीटामिति न प्रत्याहारः इकव्यतिरिक्ता
नामिटां गुणाप्रसक्तेरभावात् सर्वेषामपि कांग्यणनिषेधे विधेर्निर्विषयत्वात्। इट ईटीति न प्रत्याहारः। इट्सामर्थ्यं च पर्णात्। विधौ च स्वरूपग्रहणमुक्तं अनुवादोपि तस्ये
न्यायः। अपरे रफो यकारात्पूर्व उपदिश्यते तत् हयवरडिति। परोवायथान्यासं। तत्र पूर्वोपदेशे यरणग्रहणान्निमर्वी शिरे फेणान्याहा णो इकोणविउदात्तकर
णो हल्पर्वति उदात्तस्वरितयोरण्णः स्वरितोनुदात्तस्य संयोगादेरातो धातोर्ण्वत इति तत्रैको णाचीति संज्ञा तानुदेशादिकारस्य रेफः प्राप्नोति तथादे
विलादिटे विषतिरलोन्त्युपधादिति किन्त्वविकल्पः स्यात् वकारस्य लत्वं न भावात्। रेफस्य च वत्वं न भावात् गोधेरः पचेरनजीवेरघनकुजीरदानुरिति लोप्यो
ओर्वर्लीति न स्यादिति पर एवोपदेशः। अत्र पक्षे दोषमुद्भावयितुकाम आह॥ ॥ ॥ श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अपमित्यापि। अवहितेपि परत्वाद्वोवर्त्तते यथा वाऽस्मात्सरंव्व ह्वंत इति। पकारात्तु रस्य रेफस्योपदेशादयं दोषः ननु वकारादिति वकारात्परइति नोक्तं। यदि यरउपदिश्यते
ततः किमित्याह। नस्येत्यादि। अनुनासिकः प्राप्नोतीति। णकारस्य तु स्थानासत्वात्। ननु चैवमप्यंतरतमपरिभाषाबाध्येत नहि णकारो रेफस्यांतरतमः। प्रयत्नभेदा
त्। तत्रापत्तमित्यादौ तु सावकाशं वचनं। नैतदस्ति। भक्तिः पदार्थ इत्यस्मिन्पक्षे णत्वं चोद्यते तस्मिन्पक्षे सर्वो मांधमकृतान्तं तासर्व्येण निर्देशाद्यत्नेन द्विविधं लक्षणं तत्र

अयं रेफो यकारात्परउपदिश्यते। तस्य यद्ग्रहणेन यण्ग्रहणे सति न सवर्णायत्तीत्यत्र यरोनुनासिके
नुनासिको वेति अनुनासिकः प्राप्नोति। मद्रूह्रोभद्रह्रद इत्यत्र द्विर्वचनं प्राप्नोति। अचो रहा
भ्यां द्वे इति। कुंडं रथेन वनं रथेनेत्यत्रानुस्वारस्य ययि परसवर्ण इति परसवर्णः प्राप्नोति ९

यत्नभेदादनंतरतम इति यदि णकारं न प्रवर्त्तयेत् अयमेव स्यात्। द्विर्वचनं प्राप्नोतीति। न तत्र द्वयो रेफयोः श्रवणं स्यात् रोरिलोपे द्विर्वचनस्यासिद्धत्वात्। हलोय
मामित्यत्र चरूयो होन्यतरस्यामित्यतः अन्यतरस्यां ग्रहणमनुवर्त्तते अतः स्यादेव पक्षे द्वयो रेफयोः श्रवणं। परसवर्णः प्राप्नोतीति। कः पुनरसौ न नु रेफोष्म
णां सवर्णा न संतीति। वर्णितमापेक्षयैतदुक्तं ते रेफस्कोरेफस्य सवर्णा एव ९

© Dharmartha Trust J&K. Digitized by eGangotri

॥एवं व्यक्तिपदार्थमाश्रित्य चोदिते जातिपदार्थमाश्रित्यपरिहारमाह। नैष दोष इति। जातौ एकवचनेनैते दोषा इति यावत्। आकृतावितिजातावित्यर्थः। इह केषांचिज्जा
तिः पदार्थः। गृहीतसंबंधा हि शब्दा अर्थं बोधयन्ति। न च क्षुरादिवन्नक्तिरूपेश्वाः संबंधग्रहणं च व्यक्तिषु न संभवति तासामानंत्यात्। केषांचिद्व्यक्तिः पदार्थः। तत्रैव वाह
दोहादिकार्यसंभवात्। जातौ हि पदार्थे व्यक्तिषु क्रियमाणा वाहदोहादिकं अचोदितार्थानुष्ठितः स्यात्। जातेश्चोपलक्षणाभावेनाश्रयणात् संबंधग्रहणं। यथा यत्रा
सौ काकः अदो देवदत्तगृहमिति। पाणिनेस्तु मतं। केवलव्यक्तिपक्षे हि संबंधग्रहणासंभवः। जातिरुपलक्षणमिति चेत्। न। तटस्थताभावात्। यत्र हि संबंधग्रह
णोत्तरकालं शब्दार्थः प्रतीयमानः भाति स्विकेनाकारेण प्रतीयते न तदाकारेणैव तत्रोपलक्षणत्वं यथा गृहे न हि गृहं प्रतीयमानं काकाधारमेव प्रतीयते किंतर्हि आकृति
सिना कारेणा गृह चु गौरित्युक्ते गवाकारेण व्यक्तयः प्रतीयंते तेन खंडादिरूपेणेति तटस्थताभावान्नोपलक्षणत्वं जातेः। अस्तु तर्हि संबंधवाच्यात्। व्यक्तेरपि प्रतीतेः न

नैष दोषः। आ क्षमो पदार्थसमुदायमकल्लक्षेलक्षणं प्रवर्त्तत इति दर्शनेयरोनुनासिकोनुनासिकोवांतरतमोभव
तीत्येवमेतत्प्रवर्त्तते। तदनेन गकारादीनां ककारादयो यथासंख्या नतो गुणातस्थानतरतमाः ते सर्वे विहिताः। ये तु न स्था
नतः नापि गुणतः स्थानमात्रेण मात्रेण वाऽन्तरतमाः ते सर्वे निवर्त्तिता इति स्थानमात्रांतरतमो एकस्य णकारो न भव
ति॥ १० ॥ ॥

स्तत्तु गौरित्युक्ते गोत्वमिति वन्निष्कृष्टा जातिः प्रतीयते। किं तु नियतव्यक्तिरूपेण अन्यथासिद्धेः शब्दार्थत्वमिति चेत्। न। तदभावात्। स्यादेतत्। सत्यं नियता व्यक्तिः प्रती
यते सा त्वपर्यवसानेन न तु शब्दमहिम्ना जातिप्रतीतिर्हि न जातिमात्रे पर्यवस्यति किं तु व्यक्तिमपि कवलीकरोति यथा पंजरस्थं सिंहमनुभूतवतः सिंहप्रतीतिः पंज
रं तत्रस्थं तद्वत्सिंहमिति: सिंहशब्दवाच्य इति ज्ञानतापि वतात्सं जरमपि प्रतीयते तद्वदिहापि व्यक्तिगतामेव जातिमनुभूतवतो जातिप्रतीतिरुत्पद्यमाना बलात् व्य
क्तिमपि गोचरयति। अतोऽन्यथासिद्धप्रतीतित्वान्न व्यक्तिः शब्दार्थ इति। तच्च नैवं। अन्यथासिद्धेरभावात् यदि हि जातिप्रतीतेरेपंसभावः व्यक्तिमपि गोचरयतीति
न तेनो गोत्वमिसा दावपि प्रसंगः। न हि तत्र जातिर्न प्रतीयते। स्यादेतत् गोत्वादिशब्देर्जातिः स्वरूपेणाभिधीयते गवादिभिस्तु व्यक्तिपरतंत्रा अतः प्रतीतिवैषम्य
मिति। मैवं। व्यक्तिपरतंत्रेत्यपि जातिरेव वेद्युच्यते। गोत्वगोशब्दयोरविशेषापत्तेः तत्त्वांतरं चेज्जातिरेव वाच्येति स्यात्। पारतंत्र्यस्यापि वाच्यत्वात्। न चानभिधायक
क्तिं तस्यारतं व्यमभिधातुं शक्यमिति व्यक्तेरपि वाच्यत्वप्रसंगः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का०प्र०
१२

नचवाऽर्णेगणायांयोष इतिवत्‌लक्षणायाव्यक्तिः प्रतीयतइति। शब्दांतरसंनिधानमंतरेणापिनियमेनप्रतीयमानत्वात्॥ नहिलाक्षणिकोर्थ एवंप्रतीयते। अतः श
ब्दमहिम्नैवजातिर्व्यक्तिश्चप्रतीयतइत्युभयंशब्दार्थः। तत्रकश्चित्किंचिन्नाख्येयोगोव्यतेकिंचिन्नांतरीयकतया। दृष्टंचैकशब्दस्यापिकुत्रचित्तात्पर्यंकिंचिन्नां
तरीयकत्वंयथाग्रहंसम्माष्टीतिकर्मत्वंविवक्षितमेकत्वमविवक्षितंतद्वदिहपरोऽनुनासिकेऽनुनासिकोवेत्यत्रलक्षणानुरोधाद्व्यक्तिः प्राधान्येनाश्रीयतेतस्याएक
त्वाद्यद्यपिसकृदेवप्रवर्ततेतेनप्रतिव्यक्त्यावृत्त्या। यद्येवंकथंसमुदायेप्रवर्तयि॥ उच्यते॥ जातेःस्थानित्वमादिशत्वंनिमित्तत्वमित्येवमादयोधर्माव्यक्तिद्वार
काः। तेनजातौप्रवर्तमानंतद्व्यक्तिषुव्यक्तिषुप्रवर्तते। नचव्यक्तयःतेनतेनप्रातिस्विकेनाकारेणप्रतीयतेकिंत्वेकजातिरूषिताइति एषसमुदायार्थः। समुदा
येप्रवर्तमानंकथंप्रवर्ततेकिमविशेषेणेत्याह। परोऽनुनासिकइत्यादि। येयमस्मत्कृतमहत्तिः तत्रांतरमयपरिभाषापिएकवाक्यतामापद्यतइत्यर्थः। ततः
किमित्यतआह। तद्वनेनेति। गकारादीनामितिवर्गतृतीयानां। ङकारादयइतिवर्गपंचमाः। यथासंख्यमितियोयस्यवर्ग्यः सतस्येत्यर्थः। स्थानतोगुणत
श्चेति। तृतीयांतात्तसिः। स्थानानिगुणाश्चतुल्यास्यप्रयत्नमित्यत्रवक्ष्यामः। येतुनस्थानतोनापिगुणतइति। आंतरतमाइत्यपेक्ष्यते। तेसर्वेनिवर्त्ति
ताइतिवक्ष्यमाणेनसंबंधः। केपुनस्तेणकारणकारमकारानुनासिकायवलाः स्थानमात्रेणगुणमात्रेणवेति। अत्राप्यांतरतमाइत्यपेक्ष्यतेसर्वैविवक्षसंबंधः। तत्रस्था
नमात्रेणांतरतमाञ्जढबानांयलावःसानुनासिकाः। गुणमात्रेणत्वांतरतमास्तृतीयानामन्यवर्गीयाःपंचमाइति। इतिकरणोहेतौयस्मादेतेस्था
नगुणाभ्यामांतरतमाएवविहितास्मात्सर्वैनिवर्त्तिताः तस्मात्स्थानमात्रेणांतरतमोरेफस्यणकारोनभवति॥ १० ॥ ॥श्रीः॥ ॥

॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

तम०
१२

© Dharmartha Trust J&K. Digitized by eGangotri

द्विर्वचनेपीति। एवं परिहार इति शेषः। रेफस्येत्यादिना यकोपस्य द्विर्वचनस्य सहेतुकां प्राप्तिमनूद्य परिहरति। तदित्यादि। रेफस्य द्विर्वचनं प्रतिनिमित्तभावः
साक्षाद्दिष्टः अस्य संज्ञिष्टः रहाभ्यामिति द्विर्वचनं नु परं तु भावादनुमितं अस्य सानुमितयोश्च प्रत्यक्षं बलीयः। तद्यथा ब्राह्मणाभोज्यं तोमाठरकौण्डिन्यौ परिवेविष्टां
इति परिवेषणाद्धि न त्वेन भुजिसाधनत्वं बाध्यते। यथैवं स्कोयणादीनामिति निर्दिष्टः। जितिनिमित्तभावं प्रतिज्ञानुमीयमानात् कः कार्ययोगं प्रति साक्षादिष्टा र
ति दध्युदकादिषु बाधितयो निमित्तभावः। न। तत्र घ केः प्राधान्येनाश्रयणात्। तत्र हि प्राधान्ये हि प्रातिलक्षणमश्रकलक्षणं प्रवर्त्तते प्रातिलक्षणं बाभि न्नानिल
क्षणानि तेषां सर्वेषां तंत्रोच्चारणमिको यणाचीति ततश्चैकामपि निमित्तभावं प्रत्ययितात्पर्येण निर्दिष्टान्तत्रापि यणभविष्यति। इतरथा तद्विषयं लक्षणांश

द्विर्वचनेपि रेफस्य परं तु भविष्यतीति यत्कार्यं प्राप्तं तत्साक्षाद्दिष्टेन निमित्तभावेन बाध्यत इति न
द्विरुच्यते रेफः। अनुस्वारस्य ययि परसवर्णं इत्येतदप्यनुस्वारान्तरतमं सकृदेव परसवर्णं विदध्या
ति। न च रेफस्यानुस्वारान्तरतमः सवर्णोऽस्तीति न भविष्यति कुण्डरथेन वनं येनेत्यत्र॥ ॥

यस्मात् ज्ञातिनिर्दिष्टो नु क्वचिदपि मक्षो अपहृतं ज्ञातो प्रहृतमेवेति विशेषः। अनुस्वारस्येत्यादि। न केवलं परो नुनासिके नुनासिको वेत्येतदेवान्तरतमे सकृदे
वप्रवर्त्तमानं विदधाति अपि त्वनुस्वारस्य ययि परसवर्ण इत्येतदप्यपि शब्दार्थः। ततः किमित्यत आह। न चेत्यादि। रेफस्य सवर्णो नास्तीति संबंधः। किं
विशिष्टो नास्तीत्याह। अनुस्वारान्तरतम इति रेफस्य हि रेफ एव तुल्यस्थानप्रयत्नः स चानुस्वारान्तरतमो न भवति। यत्र वानुस्वारान्तरतमः परसवर्णोऽस्तं
ति प्रोगिता कुण्डितेत्यादौ तत्र चरितार्थं वचनं॥ ॥ ७ ~ ७॥ ~ ॥७॥ ~ ॥७॥ ~ ॥७॥ ~ ॥७॥ ~ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का० प्र०
१३

अट्टांमध्य इति। नन्वनुस्वारस्याप्युपदेशः कर्त्तव्यः। प्रेङ्खणमित्यादौ णत्वं यथा स्यात्। न च परसवर्णे कृते तवर्गव्यवाय इति णत्वसिद्धिः। तस्यासिद्धत्वात्। एवं तर्हि नुम्व्यवाय इति णत्वं भविष्यति। यदि नुम्व्यवाय इत्युच्यते प्रेन्वनमित्यत्रापि प्राप्नोति। इह च न स्यात्। प्रेंभणमिति। अनुस्वारस्थानिकत्वात्। नैष दोषः। नुम्ग्रहणमनुस्वारोपलक्षणार्थं। तत्र यथा नक्षत्रं दृष्ट्वा वाचं विसृजेदिति कालोपलक्षणे दिवा नक्षत्रदर्शनेपि न भवति। रात्रावदर्शनेपि भवति। एवमिहापि सत्यपि नुम्यनुस्वाराभावेन भवति। असत्यपि नुम्यनुस्वारे सति भविष्यति। इह केचिदुज्झिमुपध्मानीयोपधं पठंति। तेषामुज्झितेत्यादौ जश्त्वं यथा स्यादिति। फलस्याप्युपदेशः कर्त्तव्यः। वृत्रिकार इत्यटकारोपधं मन्यते। अप्सु प्सु इति यथा स्यात्। पुजमुज्झो याणुपतायपोरिति। कुत्वाभावे नि पा

अट्टांमध्ये विसर्जनीयजिह्वामूलीयोपध्मानीयानामप्युपदेशः कर्त्तव्यः। किं प्रयोजनं। उरः केण। उरःपेण। उरः केण। उरः पेणाम्नत्रानुस्वारव्यवाय इति णत्वं यथा स्यादिति॥ ११ ॥ श्रीरामचंद्राय नमः॥ ॥छ॥ ॥

समानेवकारोच्चारणं लिंगमुत्तरेकुत्वविषयेद्रकारस्य वत्वविधायिवचनमस्तीति। तत्र ततोऽश्रुना श्रुरित्यस्यानंतरं कल्प्यते। ऋफेद्रस्य व इति। उफेर्द्रकारस्य श्रुनायोगे वकारो भवतीत्यर्थः। ततोऽश्रुनेत्युपजीवनार्थवात्रे वास्य कल्पनं युक्तं। अन्यथा वृक्षन इत्यत्र कल्पनं स्यादिति। दृत्वा दुह्लिजिषतीत्यत्र न नह्वा इति प्रतिषेधसिद्धिरिति। चात् न च स्यादेव विसर्जनीयपरयोः शर्प्युत्पादपदेशः कर्त्तव्यः। सर्पी विषु यिप्सु अत्र शर्व्यवाय इति षत्वं यथा स्यात्। मा भूदेवं नुम्विसर्जनीयशर्व्यवायेपीति भविष्यति तत्र चावश्यं नुमग्रहणमेव कर्त्तव्यं नुम्स्थानिकेनैवानुस्वारेणाव्यवायेय यथा स्यात्। पुंस्विलाद्दौमाभूदिति तस्मात्स्थ कुम्रतांमध्य इति। उरः केणेति। नायमहत्तादौ कप्रत्ययः सोपदा विति सत्वप्रसंगात्। किं तर्हि उरः कायतीत्यातोनुपसर्गे कः। उरः पेणेति पारस्वरो। उभयत्र कुप्वोः कः पौ चेति यथायथं विसर्जनीयजिह्वामूलीयोपध्मानीयेषु कृतेषु तद्व्यवायेणत्वं भवति॥ ११॥

रा०म०
१३

© Dharmartha Trust J&K. Digitized by eGangotri

लेग्म॥ अयं णकारो ऽचिरनुबध्यते पूर्वस्मात् तेन ग्रहणान्मा ग्रहणा निवृत्तये प्रत्यासत्तेः पूर्वेणैव कस्तु एषामनुग्रहायपरेणा वेति संशये निर्णयमाह। इणा ग्र हणानीत्यादि। तत्र न यथा सवर्णीग्रहणे निवृत्तिर्यानयापूर्वमिवसिद्धिपादितो अणाग्रहणे निर्वर्तते तवरणपरः। अणुदित्सवर्णस्य ढ्रलोपे पूर्वस्य दीर्घोणः केणः अणोऽप्रगृह्यस्येति। तत्रोरणपरस्तुलिय इति एवेत्यात्। क्रतिः कृतं प्रकृतं नन्दः पारिमाहे मणां तृस्याद्वा वायुदात्तानुदात्तस्य रितानुनासिकदीर्घाश्यणः सु कर्त्रीकाकुरस्यादेचयुगाहमोः प्रायपोः एवो वर्णस्य चरपरत्वादांतर्यविशेषात्सर्वस्व स्तुः। इकोयणाचिक त्वार्थस्य यात्वेद्व्योरेफयोः स्वर्णस्यात् नैषदोषः क्रीतर्द्वात्तोरिति धातुग्रहणं ज्ञापकं पूर्वेणेति तद्धिमा ल्हणापित्तादौ माभूदिति। परेणाच ग्रहणे नामीति दीर्घेरपरे कृतेः न्हकाणंतत्वादेव न भविष्यतीति लघ र्थस्यात्। नचवाच्यं चिकीर्षतीत्यत्रापनगमा संनीति दीर्घेरपरे सत्युपधायाश्चेति इत्वमेषितव्यं नेत्वमात्ह णामित्यादावपि स्यादिति उत्तरार्थं धातुग्रहणमि

॥लण्॥ लइत्येकं वर्णमुपदिश्य पूर्वेश्चांते णकारमितं करोति प्रत्याहारार्थं तस्य

ग्रहणं भवति त्रिभिः। अणुदित्सवर्णस्य चाप्रत्ययः इत्यकारेण। इकोरितीकारेण। उको

यणश्चीति यकारेण। इणाग्रहणानि सर्वाणि परेणैव णकारेण। अणग्रहणानि नु॥ ॥

ति। तथाहि सन्ति तत्रैव कर्त्तव्यं स्यात्। ढ्रलोपइत्यत्र अपि हल्ला स्रणामसंभवादेचां तु विशेषाभावादनर्थमेवान ग्रहणं स्यात्। तत श्चावश्चेत्ये वसिद्धमित्यण ग्रह णमा समर्थीत् पूर्वेण। ननुहह उघमन इत्यस्मात् अदित्वादिउ भाजे गुणे उत्वधत्वष्टुत्वढलोपेषु कृतेषु रेफस्य दीर्घे अकारे ढलोपस्यासिद्धत्वादुपधायाश्चेती त्वे पूर्वेणाग्यु णा वे ढ तिय्या स्यादिति परेणाग्रहणं स्यात्। पत्नर्हितर्तीये तिर्दिश्यति तत्र ज्ञापयति पूर्वेणेति अन्यथाहलइत्यत्रापि परेणाणग्रहणं स्यानु हन्ते स्तेः संप्रसारणे दीर्घः स्यात्। केण इत्यत्र परेणाणग्रहणे गोकानोकाणी अक्रउणानकावतु ष्कमितिषत्वविसर्जनीययोरसिद्धत्वा द्रुत प्रसंगः एवं तर्हि द्रूत्स्यु त्वात्श्चेत्युपस्थितत्वस्याबाधायपूर्वेणा भविष्यति अबाधेनापि सुपपन्नो सत्यां बाधोन स्याच्च। अणोऽप्रगृह्यस्येत्यत्र परेणास तिकर्तृ अग्रेवा योपचेयपो माला माच क्षाणो माल इत्यत्र वयते प्रत्यपः ह स्वरस्य अपि प्राप्नोति। एवं तर्हि अप्रगृह्यस्येति पर्युदासेन अव एव अनुनासिको युक्तः। न चाणग्रहणसामर्थ्यान्निजिवृ कन्यायस्य बाधः। तस्य पूर्वेणाप्युपपन्नत्वात्। अतस्तु इत्कं अनुग्रहणानि सर्वाणि ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का·प·॥ १४

॥ ६.६॥

पूर्वेणेति। अस्यापवादः। अणुदित्सवर्णस्य चाप्रत्यय इत्येतदेकमनेनेति। यद्यत्र पूर्वेण स्यात् उरण्रपर इत्यत्र उरित्यनेन ऋकारस्याग्रहणात् अनर्थकं तत्प्रयोजनं स्यात्। ऌकालोऽजित्यत्र ऌकारस्य त्रिमात्राणामग्रहणात् प्लुतसंज्ञापि न स्यात्। अत एतदेकं परेण। अत्र च ज्ञापकं उरणित्यत्र ऋग्रहणात् द्विकृतसंज्ञा न इत्येतत् स्मानुरागिणि जंताल्लुङि चङि अचीकृतदित्यत्र ऋकारस्य स्थानिनः अकार एव यथा स्यादित्येवमर्थं। न च पूर्वेण ग्रहणे ऋकारस्य स्थानित्वं आदेशत्वं वा प्रसज्ज्यतेति अनर्थकं न स्यात्। ननु परेणापि ग्रहणे उरित्यनेन स्थानिना दीर्घस्य ग्रहणे सत्यपि ऋदित्यनेन भाव्यमानत्वाद् ऋकारस्याग्रहणादनर्थकमेव तत्परकरणं उच्यते। असति तपरकरणे भाव्यमानत्वस्यैवासिद्धिः। तथा हि। अपूर्वे निष्पन्ने प्राप्तस्यानेन बाधितस्य प्रतिप्रसवे वचनसत्ताय एवं भवतीति अचीकृतत् अचीकृतत् अमीमृजदित्यत्र ऋवर्णाभिः कृवर्णस्य विनाशे प्राप्ते सरूपमेव वा। स्थितमप्युनर्ज्ञायेत संभवति च स्वरूपाभ्यनुज्ञानं सवर्णग्रहणे सतीति स्वरूपाभ्यनुज्ञानार्थमेव सवर्णग्रहणं स्यात्। सति तु तपरकरणे सवर्णग्रहणाभावात् स्वरूपाभ्यनुज्ञानासंभवादपूर्वविधिरेव संपद्यत इति भाव्य

पूर्वेणाण्ग्रहणं अणुदित्सवर्णस्य चाप्रत्यय इत्येतदेकमनेना। अथ किमर्थमण्ग्रहणमेवैतत् क्रियते नैवं शंका। अंतःस्था नामपि हि सवर्णानां ग्रहणमिष्यते। सय्यंता। सवत्सरः। यल्लोकं। तल्लोकमित्यत्र अनुस्वारस्यानुनासिकेषु सवर्णेषु कृतेतस्य यद्ग्रहणे न ग्रहणात् द्विर्वचनं यथा स्यादिति। हकारादिषु अकार उच्चारणार्थो नानुबंधः। लकारेत्वनुनासिकः प्रतिज्ञायते। तेन उरण्रपर इत्यत्र प्रत्याहारग्रहणं लपरत्वमपि भवति॥ १२॥

मानत्वसिद्ध्यपेक्षत्वमंतपरकरणमिति ज्ञापकमेव। अण्यकिमर्थमिति। एवं हि मंदे हस्व न भवतीति भावः। अंतःस्थानामपिहीत्यादि। अंतस्था द्विप्रभेदा रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च तत्राक्षरसमाम्नाये निरनुनासिकाः पठ्यंते ततश्च सय्यंतेत्यादौ अंतरतम्यात्सानुनासिकेषु यकारादिषु पमसवर्णेष्वनुस्वारस्य कृतेषु तेषां प्रत्याहारेनुपदेशाय लेनाज्झीस्य न चिवेतिद्विर्वचनं न स्यात्॥ अण्ग्रहणे तु सति सवर्णग्रहणे न तेषामपि यत्वात्तन्नि ष्पति। अथ सानुनासिका उपदिश्येरन् ततो निरनुनासिकेषु तेषु परसवर्ण एव न स्यात्। यथां मध्ये तेषामसंनिवेशात्। हकारादिष्वित्यादि। अकारलकारयोः परइति लकारस्याण्ग्रपरः स्यात्। लपरश्चेष्यते तस्मादनुनासिकः प्रतिज्ञायते तेन ऌकारस्याण्ग्रपः ऌकारस्तुलपर इति तवल्कार इति सिद्धं भवतीति किं

प्रा॰ १४

© Dharmartha Trust J&K. Digitized by eGangotri

ञमङणनम्॥ ॥सूत्रनिर्देशो ऽल्पमकितीतिन प्रत्याहाराः साक्षाद्गृह्यन्त इति निर्देशानभ्युपमानत्वाच्च। एवमेव वक्ष्ये ऽजसमीपे तत्स्थस्वमिपांतांतंताम ङः
वर्णकाद्यो ऽमित्यत्रापि कुशलो ऽग्निशस्त्राहरुचर्यादिमिपर्वशति सुबधिकारात्। तस्मात् ञमिति न प्रत्याहाराः तुषुरहि अङ्गार्यगालव योरित्यागमसाहचर्येण तदभ्यु
पगमानत्वाच्च। अत एव च ञमिति न प्रत्याहारः। अस्तोरोपधयो रिति च व्याख्यानाच्च। ञकारेणापि ग्रहणमस्य दृश्यत इति। यथेवं कथं त्रिभिरिति शर्वमुक्तं अष्टाध्या
यी ञ ग्रहणाभिप्रायं तत् अत एव यमिजमिनेते। ष्मिल्वत्रापि दृश्यते। केचित्तिवित्यादि। यास्मेतास्म नंतरोक्ता निप्रत्याहारग्रहणानि तानि तुमः स्वप्पजपरे हलो

॥ञमङणनम्॥ ॥ञमङणानडल्लेतान्वर्णाननुपदिश्य पूर्वेभ्यश्चांते मकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भ
वति त्रिभिः। पुमः खय्यम्परे। अमकारेण। हलोयमां यमि लोप इति यकारेण। ङमो ह्रस्वादचि ङमुण्नित्यमिति ङका
रेण। ञमंताड्ड इति ञकारेणापि ग्रहणमस्य दृश्यते। केचित्तु सर्वाण्येतानि प्रत्याहारग्रहणानि ञकारेण भवंति
ति मकारमनुबंधं प्रत्याचक्षते। तथा तु मतिङमो ह्रस्वादचि ङमुण्नित्यमित्यत्रागमिनो ऽभेदाभावात् आगमाला
वप्रतिपत्तौ प्रतिपत्तिगौरवं भवति॥ ॥

पञ्जापत्तिलोपः। ङः ञो ह्रस्वादचि ङ्नुट् नित्यमित्येवं ञकारेणैव भवंत्विति निश्चित्य केचिदाचार्या मकारमनुबंधं प्रत्याचक्षते तत्र दोषमाह। तथा चेति।
पुमः खय्यम्परे इत्यत्र तु मकारमकारयोरस्य च वचयोः संभवात् अदोषः। हलो यमां यमि लोप इत्यत्रापि ञकारमकारयोः परतो हल उत्तरयोर्ञकारम
कारयोरसंभवः। संभवे पि वा रूढिरीति लोपः। आगमिनोऽनन्तोरभावात् इति। लभेतु रूपस्य क्विपि संभव इति चेत्। नाऊन्हः संयोगान्तलोपात् लमेर्ञिश्च वि
धानात्। प्रतिपत्तिपत्तिगौरवमिति। यथागमिनोरभावः तर्हि त्रयश्चागमिनः पञ्चागमाः वैषम्यात् संख्यानानुदेशो न स्यात्। नैष दोषः। यथासंख्य
मित्यत्र समिति दृष्टान्तानि दृश्यगानसंख्यासाम्यमाश्रीयते नन्वनुष्ठानसमये प्रयोगगतमिति चोद्यपरिहारयोः क्रियमाणयोः प्रतिपत्तिगौरवं भवती
त्यर्थः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ञमङ॥ ॥ङत्वादिभ्योञः अतङ्ङणनादिभ्योयञः स्यादेनप्रत्याहारः भावमानत्वात् । अनभिधानाच्च । ङञिचपरत्वात्तत्रनप्रत्याहारः । परेनविशेषणा
त्॥ ॥घढधष्॥ ॥लषयतपदेतिनप्रत्याहारः अकारेवारणाद्यनुसाहचर्यात्॥ ॥जबगडदश्॥ ॥एतदोशाद्दमरशाणविरेजितिनप्रत्याहारःभाव

॥झभञ्॥ झभञ्इत्येतौवर्णावुपदिश्यपूर्वेश्चौतेञकारमितंकरोतिप्रत्याहारार्थं तस्यग्रहणंभवत्येकेन । अतोदीर्घोयञिति
यकारेण॥ ॥घढधष्॥ घढधष्इत्येतान्वर्णाननुपदिश्यपूर्वांश्चांतेषकारमितंकरोतिप्रत्याहारार्थं । तस्यग्रहणंभवतिद्वाभ्यां ।
एकाचोबशोभष्झषंतस्यस्ध्वोरितिझकारभकाराभ्यां॥ ॥जबगडदश्॥ ॥जबगडदइत्येतान्वर्णाननुपदिश्यपूर्वांश्चांतेश
कारमितंकरोतिप्रत्याहारार्थं तस्यग्रहणंभवतिषड्भिः । भोभगोअघोअपूर्वस्ययोशीतिअकारेण । हशिचेतिहकारेण । ने
ड्वशिकृतीतिवकारेण । झलांजशोझशीतिजकारझकाराभ्यां । एकाचोभष्झषंतस्यस्ध्वोरितिबकारेण॥ ॥खफछठथ
चटतव्॥ ॥खफछठथचटतइत्येतान्वर्णाननुपदिश्यपूर्वांश्चांतेवकारमितंकरोतिप्रत्याहारार्थं तस्यग्रहणंभवत्येकेन । नछ
व्यप्रशानितिछकारेण । खफग्रहणमुत्तरार्थं॥ ॥कपय्॥ ॥कपइत्येतौवर्णावुपदिश्यपूर्वांश्चांतेयकारमितंकरो
तिप्रत्याहारार्थं । तस्यग्रहणंभवतिचतुर्भिः । अनुस्वारस्ययियिपरसवर्णइतियकारेण । मयउञोवोवेतिमकारेण । झयो
होन्यतरस्यामितिझकारेण । पुमःखय्यम्परइतिखकारेण॥ १३॥ ॥

मानत्वात् । मस्यञ्जिनशोरितिमस्तिसाहचर्यान्॥ ॥खफछठथचटतव्॥ एचोयवायावइत्यत्राकारस्यासंनिवेशात् इतिनप्रत्याहारः । नत्साहचर्यादव्
पिनतुछकारेणोवास्यग्रहणं नचखफौतत्रातभूतौतत्किमर्थंतयोर्ग्रहणमित्याह । खफग्रहणमिति । उत्तरेरेनुबंधैरनुस्वारस्ययिपरसवर्णः पुमःखय्य
म्परइत्यादौप्रत्याहारेतयोर्ग्रहणंयथास्यादित्येवमर्थमित्यर्थः॥ ॥कपय्॥ ॥एचोयवायावइत्यत्राकारस्यासन्निवेशाद्यइतिनप्रत्याहारः । नत्साहचर्या

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥शषसर्॥ इति तां धातूनामुपदेशसामर्थ्यात् हि रितो वेति न प्रत्याहारः। प्रियाख्छिरादिसूत्रेष्वरितिगारिति न प्रत्याहारः। प्रियाख्छिरादिसूत्रेष्वरितिगारि
ति न प्रत्याहारः। भाष्यमानत्वात् प्रागिमाह च र्षाद्य॥ ॥लण्॥ ॥इहास्य षां वर्णानो सकृदुपदेशः हकारस्य द्विरूपादि उपनेतत्र तु हितोऽयोपदेशस्य
प्रयोजनं इच्छति॥ अयेति। लिहित्वेति मिहप्रीतो अलिक्षदिति। लिहन्त्रास्वादने लुङ्। क्तः। होटः। षदोः कसि। तु दिहिस्व पिहीति रुदिरस्य श्रुति

॥शषसर्॥ शषसरूपेन वर्णानुपदिश्य पूर्वेश्चांते रेफमितं करोति प्रत्याहारार्थे तस्य ग्रहणं भवति यंचाभिः। परो
तु नासिके तु नासिको वेति पकारेण। रुरोफ रिस वर्णो इति फकारेणास्य रिचेति रिवकारेण। अभ्यासे चर्च्चेति वकारेण।
शर्पूर्वाः खय इति शकारेण॥ ॥हल्॥ ॥हकारस्येकं वर्णमुपदिश्य पूर्वेश्चांते लकारमितं करोति प्रत्याहारार्थं।
तस्य ग्रहणं भवति षड्भिः। अलोऽन्त्यात् पूर्व उपधेति अकारेण। अभ्यो हलोऽनन्तराः संयोग इति हकारेण। लोपो व्योर्व
लीति वकारेण। रलो व्युपधाद्धलादेः संश्चेति रेफेण। झलो झलीति झकारेण। शल इगुपधादनिटः क्स इति श
कारेण। अथ किमर्थमयमुपदिश्यते पिहकारः पुनरुपादिश्यते। किं लक्ष्यते छिद्यो पथा स्युरिति। स्निहित्वा स्नेहित्वा
इत्यत्र हलो व्युपधाद्धलादेः संश्चेति किं त्वं पथा स्यात्। लिहेः अलिक्षदिति शल इगुपधादनिटः क्स इति क्सा पथा
स्यात्। रुदिहि स्वपिहीति वलादिलक्षणा इट् न स्यात्। अहल्भ्यां हल्ग्रहणेषु च हकारस्य ग्रहणाय यथा स्यात्। प
घे वं हयवरडित्यत्र तेहि किमर्थमुपदिश्यते॥
मोचने। त्रिष्वप्रशये। अददात् लोट्। सिपुः सेर्हिः। अदाग्धामितिलुङ्। तमस्यान्धेः
सिचावदब्रजेतिहरिः। दाहेर्धातोर्यः। तस्यासिद्धत्वात् कारात् परः सिचो लोपः। ढषभस्तथोर्द्धोधः। एवं परोपदेशस्य प्रयोजनानि दर्शयित्वा पूर्वोपदेश

॥ स्य प्रयोजनं दर्शयितुं इच्छति। हयवरट् सूत्रे त्ति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

महांहिसइति महान् हिः इति स्थिते दीर्घादटि समानपादः इति रुः आतोटि नित्यमित्यनुनासिकः । भोभगो अघो अ पूर्वस्येति यत्वं हलि सर्वेषामिति यलो
पः । अत्राशीत्यनुवर्त्तते । ब्राह्मणाः शरात्कः । रुः । हश्चिवेत्युत्वं गुणः । उपलक्षणं चैतत् प्रयोजनानां तेन णः वीप्सं लुङ् लिङ् धोगा तविभाषेट् इति मर्द्धस्मावि
भाषेट् इति मद्भिस्मविकल्पो विप्रयोजनं लिलिहि ढे लिलिहि ध्वेणाकारादीनामनुबंधानां यावद्भिर्ग्रहणमिष्यते तावद्यादर्शयति । एकस्मादिति परेण ।

महांहिसः ह्रेवाहमंत्यत्र अट् ग्रहणेषु गा३ ग्रहणेषु चा३ ग्रहणेषु च ग्रहणं यथा स्यात् ह्रश्चिवे
तिहकारग्रहणं यथा स्यात् । ब्राह्मणो ह्मति । ह्रश्चिवेति अत्वं यथा स्यात् । एकस्मान् ङणवटा
द्वाभ्यां षट्त्रिभ्य एव कणमास्युः । ज्ञेयो वयो चतुर्भ्योः पंचभ्यः शलो षड्ढ्र इति ॥ ॥ इति प्रत्याहारः
॥ ॥ १४ ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ श्री ॥ ॥ १४ ॥

स्यादिति शेषः स्युरिति वक्ष्यमाणेन संबंधः । एङ् यज अण् अच् अट् इति एकस्मादेकारादेः परेङ् कारादयो ग्राह्याः स्युः एवमुत्तरत्रापि यथा वेदितव्याः । द्वाभ्यां षः
कघ्भष । त्रिभ्य एव कणमाः । अक इक उक । अण इण यण । अम यम ङम । ज्ञेयो चतुर्भ्यः अच् इच् एच् यप् खर्प् यरः पंचभ्यः यन् रुः रव झव चश्
ञ्। ज्ञेलो षड्भ्यः । अल् हल् वल् रल् झल् शल् इति ॥ ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥वृद्धिरादैच्॥ ॥त्रिपदमिदं सूत्रं वृद्धिः। आत्। ऐच्। इति। अत्र चाकारः प्रयोगस्थैराकारैरर्थवान् जातमभिप्रायं चैकवचनं। ऐच् च ऐकारौकाराभ्यां संहितो
दित्वेपि द्विवचनं न भवति। द्वयोरप्येकत्वबुद्ध्यापितत्वेनैकमायत्वयोः स्वाभिधानात्। एवं सर्वेष्वेव प्रत्याहारेषु एकवचनं द्रष्टव्यं। समाहारद्वंद्वो वा आत् ऐच् इति। तिद्धा
दुदेषहात्तात् समाहार इति समासांतस्तु न भवति समासांतविधेरनित्यत्वादनित्यत्वं च द्विविभ्यां पाद्दन्मूर्ध्नसु इति मूर्द्धन्ग्रहणस्य निर्देशात् अवसीयते॥ अ
न्यथा द्वित्रिभ्यां षमूर्द्ध इति षप्रत्ययांतत्वान्मूर्द्धशब्देति निर्देशः स्यात्। आदैच्छब्दात्समासलादर्थवत्त्वाद्वा विभक्त्युत्पत्तौ चोः कुः पदस्येति कुत्वप्राप्तं त्र्यस्रस्य समयादि
त्वेन भवत्यन्यत्र हि भविष्यति छंदोवत्सूत्राणि भवंति। हल्ङ्याब्भ्य इत्यस्य त्र्यीशब्दानां प्रवृत्तिरिति पक्षे दधुक्षु इत्यादिवत्स्यात् … निष्युत्पत्तिः। अभेदोपचाराद्वा वृद्धि
सुक्ते घादेशस्तु वृत्तिः। नचैवं लक्षणायैवादैच्छुद्धिशब्दस्य वृत्तिसिद्धेः सूत्रस्यानर्थकं नियमार्थत्वात्। अन्यथा वृद्धिन् क्रियायोगितां कारादिषु स्तुतेषु च वर्त्ते

॥ ॥वृद्धिरादैच्॥ ॥१५॥ ॥ ॥

न माता न च वर्त्तिष्यमाणे श्रेव वर्त्ततामिति नियमः॥ चतुष्टयीपक्षे तु कथं। पावृता अत्र संज्ञात्वेन विनियोगो मतिरिति वृद्धिरित्यादौ प्रदेशांतर एव वृद्धिशब्दस्या
देशप्रवृत्तिर्युक्ता न तु अत्रैव संज्ञा विनियुक्तिकाले। उक्तं ते नित्यः शब्दार्थसंबंध इति दर्शने न कश्चिदपि पुरुषव्यापारात्मा गवाचकः सन् पुरुषव्यापारेण
वाचकः क्रियते अतः सर्वे शब्दाः संज्ञारूपेण सर्वानर्थान् प्रतिपादयितुं समर्थाः तत्र नियतार्थेन व्यवहाराप्रसिद्धेर्नियमार्थ एव पुरुषव्यापारः स पाप्र
युक्तस्य वृद्धिशब्दस्यादैजर्थ इति। एवं वैतोल्स दार्थो व्याख्यातः। वाक्यविषयाः पुनरष्टौ कल्याः अनर्थकं साध्वनुशासनं। प्रयोगनियमार्थं। आदेशा
र्थं आगमार्थं विशेषणार्थं तद्गुणार्थं आरोपार्थं संज्ञार्थमिति। तत्रानर्थकाभिधानं प्रमादाद्यपदोषात् तदनवधानाद्वा शक्तेर्वा भवति न चैतत्तत्रभवत्ये
भगवतः संभवति। आचार्यो हि दर्भपवित्रपाणिः शुचावचकाशे प्राङ्मुख उपविश्य मंगलपूर्वकं महता प्रणिधानेन सूत्राणि प्रणीतवान् तत्राक्ष
रमात्रेणाप्यनर्थकेन न भवितुं किं पुनरियता सूत्रेण॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

साद्यनुशासनमपि नमपि न भवति सिद्धत्वाद्धलिशब्दस्य किं त्वंततवान् आदेश छन्दस्य चार्थबलात्। ननु छन्दोवद्भावेन सूत्र एव प्रयोगः सिध्यति सत्राद्वहिर्
पि कुत्वाभावार्थं निपातनमेतत्स्यात्। उच्यते हलिशब्दस्यैव मन्त्रपसंगः संभूयकारित्वं च पदानां बुध्यत्वं सिद्धं अतो नायं पक्षः। नापि प्रयोगनियमार्थं
पत्रहि सहप्रयोगप्रसंगः तत्र नियमः कर्त्तव्यः न च हलशब्दे छन्दयोः सहप्रयोगप्रसंगः विनियोगाभावात् संबंधात् उत्तरकालं हलिशब्दे नैवागतत्वात्।
किंचा नेह प्रयोगानियमश्चाश्रयते नन्वारभ्यते पर एवेति। पदस्य नारभ्यते पदस्यापि आरभ्यते उपसर्जनं पूर्वमिति ययोरेकपर्यायं नास्ति तयोर्नारभ्यते
तयोरप्यारभ्यते तत्र प्राग्धातोः कृञ् चानुप्रयुज्यते लिटीति नैवं विधेनो च्चारणेनारभ्यते। एवमप्यारभ्यते विदांकुर्वन्त्वित्यन्यतरस्यां इति नात्र केवलः
प्रयोग एव नियम्यते किं तु आमादिकमपि विधीयते अतः केवलस्य प्रयोगनियमस्यासंभावाद् उच्चारणेन कश्चिदप्यभावान्नायं प्रयोगनियमः आ
देशार्थमपि न भवति स्थानार्थाभिधानसमर्थस्यैव स्यादेशत्वं न च हलिशब्द आदेशान्ते वा तस्यार्थमभिधातुं समर्थः निर्देशाद्वयस्वयं सिद्धिर्हलि
पातिकातिद्वातिरायोनावरस्ताहतलोज्ञापतेन हलिशब्दस्यादेशान्ते वा तस्यादेशा इति। अथादेव शब्दस्य हलिशब्दस्यादेशः कस्मान्न भवति न ह्य
त्र किंचिल्लिंगमस्ति। सत्यं अयं तु पक्षो न संभवत्येव रोगच्छ्दो हालादिं त्येनेति संज्ञात्वेन विनियुक्तः कथमस्य हलस्य ग्रहणं अशब्द संज्ञेति निषेधात्।
एतेरेव लिंगैरागमत्वं न भवति। षष्ठ्यभावाच्च पूर्वौ तु ताभ्यामिति पंचम्याः षष्ठ्यर्थो वाश्यते। टित्वादिलिंगाभावाच्च न हि तद्धितः कश्चिदाग
मो दृष्टः विशेषणात्वमपि न भवति असंभवाद् प्रयोजनलाभाच्च न त्वस्ति संभवः हलिशब्दस्याभावादेष छन्दस्येति नापि वर्द्धनक्रियायामादेच इति एवं
विशेषणे च प्रयोजनमपि नास्ति। एतेन तद्गुणाभ्याएयोपि निरस्तः यथा हि सिंहो माणवक इति सिंहगुणा माणवके आरोप्यन्ते नैवमत्र संभवः
प्रयोजनं वा समस्ति॥ १५ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अतः पारिशेष्यात्संज्ञासंज्ञिसंबंध एवैतस्माल्लोक्यात् इह वृद्धिशब्द इत्यादि। विपर्ययस्तु न भवति वृद्धिशब्दः संज्ञी आदैचः संज्ञेति। स हि त्रिधा स्यात्। आदैजि
त्यर्थं शब्दः आपे औ र समर्थ समुदायः तेषां प्रत्येकमिति। तत्रादैच्छब्दस्य तावन्न संभवः न संभवति। ऐजित्यस्य संज्ञाशब्दत्वात् तस्य स्वरूपग्रहणासंभवात् गौरव्या
त् अनादत्वे स्वात्वात् आवर्त्तिनो हि संज्ञा भवति इह वृद्धिशब्दः आवर्त्ती तेनादैच्छब्दः नापि समुदायः गौरवात् नोहत्वे स्वप्रत्ययकृत हि प्रत्येकं लाघवादादैच्छब्दः
इत् न आविष्क्रोऽपि तद्गतौ ऐ च नौ ऐ औ वेति। न प्रयोजनमंतरेणैकस्यानेकसंज्ञाकरणस्यायुक्तत्वात् न ह्ययं वृद्धिशब्दः सहस्रेणानामभिः स्तोतव्यः। शब्देनार्थ
गतेरर्थस्य संज्ञात्वं मा विज्ञायीति शब्दग्रहणं एतद्वार्थे अवग्रहणासंभवान्नेष्यते। तदिह वृद्धिशब्दः संज्ञात्वेन विधीयत इति समुदायेनानर्थकादिपक्षनिरासः।

॥वृद्धिशब्दः संज्ञात्वेन विधीयते ॥ ० ॥ ॥

वृद्धिशब्द इत्यनेन विपर्ययनिरासः वृद्धिशब्दः संज्ञा न पुनरादैच्छब्द इति वचनव्यक्त्या। शब्दग्रहणेनार्थनिरासः वृद्धिशब्दः संज्ञा न पुनरर्थ इति। यत्र समुदायस्य
कार्यमिच्छति करोति तत्र यथा तेऽभ्यस्तमिति तत्र ह्युभेग्रहणं समुदितप्रतिपत्त्यर्थम् अनन्यार्थं वा महतीं संज्ञां करोति हलोऽनन्तराः संयोग इति इह तु महा
संज्ञाकरणं मंगलार्थम् अत एव प्रथममुच्चारणम् अन्यथा हि सतः कार्यिणः कार्येणाभवितव्यमित्यदेङ् गुण इत्यादिवन्निर्दिश्येत। आनन्तर्यत्वाभावाच्च प्र
त्येकमेव संज्ञा। किं च लौकिकप्रयोगेष्ववस्थितानामादैचां संज्ञया भवितव्यम्। न च समुदायस्य क्वचित्प्रयोगः। अतोऽसंभवादपि प्रत्येकमेव संज्ञा। लिंगात्त्वाकि
लिंगं प्रस्थेऽवृद्धमकर्क्यादीनां मालादीनां चेति। इदं हि मालाप्रस्थ इत्यादाववृद्धमिति पर्युदासे प्राप्ते वचनं अतः प्रत्येकमेव संज्ञा तदाह॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रत्येकमिति। तत्रापि त्रयः प्रकाराः। लुगादिसंज्ञावत्तद्भावितानामेव टिसंज्ञावदतद्भावितानामेव अनुनासिकादिसंज्ञावदुभयेषां वेति। तत्र यदि येह वृद्धि
संज्ञया भाव्यं तेषामेव स्यात्। शालीय इति छो न स्यात्। आम्रमयं रैकुलमयं इद्वलक्षणो मयण् न स्यात्। आम्रगुप्तायनिः उदीचां वृद्धादिति फिञ् न स्यात्।
अथातद्भावितानामेव गार्गीयः। ऐतिकायनीयः औपगवीयः। छो न स्यात्। अतो दोषदर्शनाद्ग्रहणमात्रविशेषणत्वाच्चोभयेषां संज्ञेत्याह सामान्येनेति।
आकारोऽनन्तरो देवदत्ताभिन्नकालानां ग्रहणं क इति नन्विह तदर्थं तपरत्वं नापि गुणानां तरप्रयुक्तानां ग्रहणार्थं अभेदकत्वाच्च गुणानां लोके हि मुंडे नापि चोर्ये
कृते संजातके शोऽपि प्रत्यभिज्ञायन्ते गृह्यन्ते॥ तथा अदुदात्तः स्वरितोऽत्र वचनं लिंगं अन्यथा ह्युदात्तगुणमेवाश्रयेत्। अतो नर्थकं तपरकरणमि
त्यत आह। तपरकरणमिति। तश्चासौ परश्च तपरः तस्य करणमुच्चारणं आकारात्परस्य तकारस्योच्चारणमित्यर्थः। अथशातः यदोयस्मादिति तद्गुण

प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च तपरकरणमैजर्थं तादपि परस्
तिरवे द्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसंगनिवृत्तये। आश्वलायनः। ऐतिकायनः। औपगवः। औप
मन्यवः। शालीयो मालीयः। वृद्धिप्रदेशाः सिचि वृद्धिः परस्मैपदेष्वित्येवमादयः॥ १६ ॥ ॥

संविज्ञानो बहुव्रीहिः तकारसहितस्याकारस्योच्चारणमित्यर्थः। ऐजर्थमिति ऐचोरर्थः प्रयोजनं यस्य तत्त्रयोक्तं। तपरस्तत्कालस्येत्यत्र तः परो यस्मादि
ति बहुव्रीहिराश्रितः तत्कथं तपरकरणमैजर्थमित्याशंक्य पंचमीसमासोऽपि तत्राश्रित इति दर्शयितुं तादपि पर इति। इति करणो हेतौ यस्मात्तादपि
परस्तस्मादैजर्थं इति। ऐजर्थत्वमेव प्रकटयति खट्वैडकादिष्विति। असति तपरकरणे त्रिमात्रचतुर्मात्रयोरप्यैचोः सवर्णग्रहणेन ग्रहणाद्वृद्धिसंज्ञा स्या
त् तत्र खट्वैडकादौ खट्वौदनः खट्वैडकार खट्वौदन इति त्रिमात्रचतुर्मात्रावादिनोरपि त्रिमात्रचतुर्मात्रावैकारौकारौ स्यातामिति तन्निवृत्त्यर्थं तपरकरणं॥
आश्वलायन इत्यादिना तद्भावितानामाकारादीनां क्रमेणोदाहरणानि। अश्वलेतिकशब्दौ नडादी उपमन्युशब्दो विदादिः। लक्षणस्य बहुविष
यत्वसूचनार्थं चतुर्थस्योदाहरणस्योपन्यासः। आकारस्यातद्भावितस्य कार्ये उदाहरणमाह। शालीयो मालीय इति। ऐकारौकारयोस्त्वतद्भावितयोरुदा

© Dharmartha Trust J&K. Digitized by eGangotri

अदेङ्॥ ॥पूर्वेणातुल्यमेतत्। नपरकरणं त्विह सर्वार्थमिति न तु पूर्ववदन्तरार्थमिति तु शब्दः स्पष्टार्थः। असति हि तस्मिन् दीर्घप्लुतयोरपि गुणसंज्ञा
स्यात् ततश्चान्तरतमेति कदाचिदकारः स्यात् कदाचिदाकारः स्यात्। स्वरत्वे वृते एकस्याऽर्धमात्रत्वादयम् एकोऽर्धतरतमत्वात्। न चाकारस्य वृद्धि
संज्ञा बाधिका एकसंज्ञाधिकारात् इन्द्रसंज्ञासमावेशात्। एङः स्व त्रिमात्रचतुर्मात्रे स्त गुणसंज्ञा सा यथा स्यात् रथेषा रते ह्वेषा अग्नीः व ऽ३ गो ३ इति त्रिमात्र
चतुर्मात्रौ स्याताम्। तपरत्वे त्वादीनि तद्भावितानाम देङः क्रमेणास्योदाहरणानि। पचन्ति जयन्ति लकारस्य कार्ये उदाहरणे। अत्रोल्कारेय रतः ग्

॥अदेङ् गुणः। गुणशब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भावितानाम तद्
भावितानां च। तपरकरणं त्विह सर्वार्थं। तपरता चेमा। स्तोता। पचन्ति। जयन्ति। अहं पचे। गुणप्र
देशाः मिदेर्गुणः इत्येवमादयः॥ ॥इको गुणवृद्धी॥ परिभाषेयं स्थानिनियमार्था। अनियमप्रसङ्गे निय
मो विधीयते॥ १७ ॥ ॥छ॥ ॥छ॥ ॥

ही
वकारस्थानेऽगुण इति पररूपं भवति। एकारस्य तद्भावितस्योदाहरणम् अहं पचे इति। उकारस्य तु न संभवति॥ ॥इकः॥ ॥परिभाषेयमिति। नाधिकारः। अ
स्वरितत्वात् असंपुद्य निर्दिश्यत्व। अधिकारे इको गुणवृद्धी न धातुलोप इति संप्रत्येव निर्दिश्येत। नापि विधिः इकः स्थाने गुणवृद्धी भवत इति लक्षणान्तरे
ण विधास्यमानत्वात्। ननु पदाय स्वतन्त्रो विधिः तदा तेषि करत्वस्योपस्थापकाभावात् यान्ते स्यादावनिकोऽपि विधिः स्यात् इह तु सार्वधातुकाद्यभावे
पि दधिमध्विस्यादौ विधिरस्तु। एवं तर्हि गुणवृद्ध्यधिकारेण गुणवृद्धिग्रहणान्न विधिः॥ ॥छ॥ ॥एम०॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

यद्यपि प्रकृतं गुणवृद्धिग्रहणं संज्ञापरं इत्युक्तं तनुवृत्तिसामर्थ्यात्संज्ञिपरं भविष्यतीत्यदेङ् गुण इत्यत्र चानुवर्तमानमपि वृद्धिग्रहणं न संबध्य-
ते। अन्यथा तु वचनात्। चकाराकरणाद्वाऽस्मादिह तत्र गुणसंज्ञो अतो चकारश्च न क्रियते। अतो विधिप्रदेशेषु न गुणवृद्धिग्रहणानुवर्त्तनं। अत ए-
वाधिकमप्यपि न भवति परिभाषायां तु तस्याविधिप्रदेशविषयत्वं सिद्धपेक वर्त्तनं तादृ इति वक्ष्यामः अतः परिभाषेयं। योगोनायमपरिदृश्येत तत्र
वा न लक्षणमिदमित्युक्ता लिङ्गान्निर्देशः। उच्यते यथार्थयोगः यथा सत्त्वं द्रष्टं एवं परिभाषापि तत्त्वमानाधिकरण्यादियमिति निर्देशः। न
तु परिभाषात्वं विधित्वमितं इदमशक्ष्यमुद्देशकः सिद्धत्वं पक्षयोर्नुदेशः सूत्रत्वं परत्वायोगाद्रूपता वा सिद्धेति पुनः पृष्ठदेशकस्यात्रैलिङ्गा-
नुपपत्तिः। कश्चिदत्र परिभाषेयमित्यनुपपत्तौ स्थानिनियमार्थमाविधीयते येयं परिभाषा सा स्थानिनियमार्थेति न तु परिभाषारूपतां विधीयते
इत्याह। न वाच्यः अस्मिन् परिभाषात्वं कथमनुपपत इति। अव्यापकस्यापि परिहारः समर्थः यस्मिन्देवविधिरित्यादावेतत्र परिभाषेयमित्ये-
ता षष्ठ्युपयते न पुनरेतदर्थेति। यं तु ब्रूमः। निर्दिश्यमानमाति निर्दिश्यमानयोरेकामायादयं जिमर्वनामा नियर्मयेणात्तल्लिंगमा-
सिमवंति। तत्र यथा अग्नेगोपलमग्नेर्गोचेतकर्त्री इतिकर्माकमपरामर्शिनोपितद्वत् स्यातिविधीयमानस्य कर्त्रीकारस्य लिंगं भवति
तद्वदिहापि सूत्रमेवाद्दिशत इदमशत्स्यतिविधीयमानपरिभाषाकमस्य लिंगं भवति। स्थानिनियमार्थेति। इगारम्भेस्थानिनि गुणवृ-
द्धोर्नियमोर्थः प्रयोजनं यस्याः सा तथोक्ता॥ १७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।गदध्येयीति वृद्धिशब्दस्य पूर्वनिपातः प्राप्तः सूत्रनिर्देशेन न नित्यं बाधन्ते धर्मादिषूभयमिति वचनादिति सत्यं यत्नाद्वृद्धिगुणविधानादिति किं पुनरनेन
ग्रंथेनोच्यते ननु नियमरूपेणास्य सूत्रस्य प्रवृत्तिरिति। यथाऽऽएचइक्स्थानादेशे इकस्तु आदिश्यमान एव। इग्वेति। यद्येवं अनियमप्रसंगे नियमइ
ति सार्वधातुकार्धधातुकयोः सिचि वृद्धिर्मिदेरेव स्यात् अत्र सत्यं भिन्नो योगः अलोऽन्त्यस्य भवत्येव वृद्धिगुणौ अंत्यस्यापि विशेषितत्वादिक्स्थानि
कत्वमाप्नुतः। ननु मिदिमृजिपुगंतलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु यथाक्रमं तत्रालोऽन्त्यस्यैव नियम एव प्रसंगः। अथ यदुक्तं आकारानां सावधारणत्वात् प्रास
मेवावधारणं इक एवेत्येव शब्देनाभिधीयते नेन पुनर्नियमो नेन प्रदर्श्यते एष्यातपत्ययः कर्मकत्वेऽपीति अतो विधिरूपेणोपास्याप्यपरो विवक्षितः परि
भाषात्वाद्गुणवृद्धिविधेः संस्कारकं विध्यंतरापेक्ष्यत्वात् इको यणित्यादेरलोऽन्त्यस्येत्ययमिति पक्षः ततो नाप्रसाप्यामलोऽन्त्यपरिभाषायामिमा

॥वृद्धिगुणौ स्वसंज्ञया शिष्यमाणौ इक एव स्थाने वेदितव्यौ। वक्ष्यति। सार्वधातुकार्धधातुकयोः। अंगस्य गुणः इ
ति॥ ॥इक एव स्थाने वेदितव्यः। तरति। नयति। भवति। वृद्धिः खल्वपि। अकार्षीत्। अहार्षीत्॥ ॥ ॥

स्यमानत्वात्तस्याबाधिकास्यात्। ततश्च यत्रैषा न तत्र प्रवर्त्तेते निजुषिगुणोऽयधेहलभवति अविभयुः अबिभरुरित्येवमनेनिजुः पर्यवेवि
षुः अत्रापि प्राप्नोति। सार्वधातुकार्धधातुकयोर्यथेह भवति चेता स्तोतेति एवमीहिता ऊहिता उम्भिता अत्रापि प्राप्नोति। अथ तु सामान्यवि
शेषयोरसंभवे बाधकभावः। अस्ति चात्र संभवः यदलोऽन्त्यस्य गुणवृद्धी स्यातां इकश्च तन्नोऽजुसिचेत्यादौ गुणवृद्धिलिंगादिक्परिभाषाप्र
वृत्तिहेतुः अंगस्येति स्थानषष्ठीनिर्देशात् अलोऽन्त्यस्येत्येषापि। तत्र च न समस्तस्य अंगान्त्यस्थानिकोऽपि भवति तदवयवस्यैव कोऽन्त्यस्यापी
तिनापि विकल्पः कदाचिदंगान्त्यस्थानिकोऽपि कदाचिन्न तदवयवस्येकोऽन्त्यस्यापीति। एकत्वात् षष्ठ्यर्थस्य एक एव हि स्थानी लघुतायामंगस्येति
ष्ठ्यान्वर्थः स्थाने योगो वा अवयवयोगो वा न द्वौ समुच्चितौ नापि विकल्पितौ न च यथा अंगस्येत्येतत् पूर्वमिक इत्यनेन वैयाधिकरण्येन संबध्येत
अंगस्य यदिकस्तस्य गुण इति ततो लोऽन्त्यस्येत्येतदनर्थकं स्यात्॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रतः पूर्वमलोमस्येत्यनेन संबध्यते मध्यांतस्य इकारो विशेष्यते अंगं यस्य स एकोऽगुण इति पद्मा इकारान्तमंगं विशिष्यते विशेषणेन च तदन्तविधिः इगन्तस्यां
गस्येति एवमपि हि षष्ठीत्वान्न पाघात् अलोमस्य आहृतप्रसंसर्वथा अंगांतस्य एको गुण इति नु सिमार्वधातुकाद्धधातुकगुणेन कश्चिद्दोषः । मिदा
दिषु पूर्वोक्तेन प्रकारेण द्वयोरन्त्यायामभवात् अन्यतरद्गृहीतव्यं तत्राविशेषादुभयमपि स्यात् इति उच्यते च वृद्धिर्गुणो मृजेर्वृद्धिः मिदेर्गुण इति नोस
वीदेशो स्यात् अतो विधिरूपेण नियमरूपेण वा सूत्रस्य मा परो नाभ्युपगंतव्यः । किं तत्र्यं तेन क्रियते । परोक्षायां स्वापनं यत्र गुणो भवती
ति वृद्धिर्भवतीति तत्रेकरस्येत्यनेन षष्ठ्यंतं यदुच्यते इति षष्ठात् मितिनि अलोमस्येत्यस्य नु गतेकवाक्यभावः एवं हि विज्ञायमाने सिविवृद्धिरिसादे

॥ ॥१८॥ ॥छ॥ ॥

यत्रांत्य इकुरुसंभवतीति तत्रेकरस्येत्यनेनोपस्थितेनांगे विशेषितेन तदन्तविधौ सतीगंतस्यांगस्य गुण इति वाक्यव्यापारे परिनिष्ठिते पश्चाद् इलो
मस्येत्यनेन इगंतस्य प्राप्तं गुणं तन्नोपलक्ष्यांगांस्य विधत्ते नित्यं कइस्य स्थानवेलायामुपतिष्ठते । मिदेर्गुण इत्यादौ तु पत्रांस इकुन
संभवतीत्यत्रांगेनेकि विशेषितेंगस्य एको गुण इति वाक्यव्यापारे परिसमाप्ते स्थानषष्ठ्यभावात् त्वयं न प्रवर्तते इति नित्यं कइस्य नेन समहोपतिष्ठते
येनाविशेषादुभयोर्निवृत्तिः स्यादिति सिद्धमिष्टं वृत्तिकारेणत्वस्य सूत्रस्य प्रयोजनं पिंडीकृत्य प्रदर्शितं सर्वथा अत्रांसस्य वानस्य वाइक
एव गुणो वृद्धिर्भवतः नत्वंत्यस्याप्यपरः अत एव वेदितव्या विलाहस्य स्वरव्यापारमदर्शनेनतु इका एव स्थाने भवत इत्येतावदुक्तं स्यात् ॥
स्वसंज्ञया शिष्यमाणाविति । वृद्धिर्भवति गुणो भवतीस्येवं विधीयमानावित्यर्थः ॥ ॥१८॥ ॥ २ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।इक इति किमिति प्रधानावयवाक्षेपेण समुदायस्यैवाक्षेपः सूत्रं किमर्थमित्यर्थः। आत्मंध्वक्षेत्यादि। ननु गुणे प्राप्ते वृगिति टकः किल रणं सामग इत्या
त्वाग्लोपार्थं ज्ञापकं आकारस्य गुणो न भवति सिद्धं स्यात् तस्मात् मग इति तथा आयनीत्या दोषं क्षरणाम एव पदेश सामर्थ्यात् गुणो न भविष्यति। इत्
रथा प्रक्रियालाघवार्थमेकारमेवोपदिदेश। ज्ञ नेः इति स्तिकरणार्थं ज्ञनानाम पिञ्चस्य मात्रि वेङ्काकारे गुणो कृते सिद्धं स्यात् पुनरज इति।
यद्येवं मिदेर्गुणोत्पादावृत्तिः सर्वादेशः स्यात्। किंच गमेरप्ययं दोषो भवति तस्य च स्यात् ततः आंतर्यादोकारो गुणः स्यात्। रै नौ ग्लौ इत्यत्र
श्वावारक्षिवर्त्मनः पर्यभिधानमस्ति। तथा चितः चिनुतः भिन्तः वेभिद्यते इत्यादौ क्ङिति चेति प्रतिषेधार्थमपि गुणस्यैव लक्षणात्व मे वितव्यं।
अथ वृद्धिग्रहणं किमर्थं मृजेर्वृद्धिरिके मा यथा स्यात् अलोऽन्त्यस्य मा भूत्। योगविभागात्सिद्धं मृजेर्वृद्धिः स्वः मृजेरचो वृद्धिर्भवति अंगाक्षिप्ते
न मत्सयेनाचोञ्णितीत्यपगन्तस्य मा र्ष्टि: अरो न भविष्यति। सिचि वृद्धिस्तदीकारस्य मा भूत् अचिकीर्षीत्। अतो लोपो भविष्यतीति अपवृत्तोपादिय ड·

।इक इति किं। आत्मंभस्त्रव्यंजनानां मा भूत्। यानं ध्मायति उंभिता पुनर्गुणवृद्धिग्रहणं
स्वसंज्ञया विधाने नियमार्थं। इह मा भूत्। द्यौः पंथाः। सः। इमं इति॥ १७ ॥ ॥

परा वृद्धिर्दीर्घेभ्यः पूर्वविप्रतिषिद्धमिति वचनात्। यथा चिकीर्षक इति। आकारस्य नास्ति विशेषः सग्गिद्विधानादसंभवश्च। एजंतमप्यनसं भव
ति आत्वविधानात् रैनौ ग्लौ इत्यत्रानां आचारक्विबंतानामविशेषः गोशब्दस्य क्विबंतस्य अत इद्धातोरित्यतो धातोरित्यनुवृत्तेः धातुरेवयो धातु
रिति विज्ञानात् सिचि वृद्ध्यभावः। अभैत्सीदित्यादौ सिचि वृद्धिरित्यनेन व्यंजनस्य न प्राप्नोति याह वृद्धौ विधीयमाना हलंतलक्षणा वृद्धिर्बाधि
का नेटीत्ययं च निषेधो यच्च यावत् हलंतस्य वृद्धिः सिचि वृद्धिरिति गाह लंतस्याच इति तासां सर्वा न भवंतीति विज्ञाय तेनेत्यन्तटीत्यादौ अ
सस्य वृद्धिर्न भविष्यतीति देवमिको वृद्धिर्यथा स्यात् अदेच व्यंजनानां मा भूत् इति एवमर्थं तावत् वृद्धिग्रहणं न कर्तव्यं। एवं तर्हि मृज्यते मृष्ट इ
त्यादौ क्ङिति चेति प्रतिषेधार्थं मृजेर्वृद्धेर्लक्षणात्वदिदमपि योगविभागात्सिद्धं मृजेर्वृद्धिं जनुः परिमृजा जनुः इत्येवमर्थं तत्रयोगविभागः अ
त्यस्यानंतरमजादौ क्ङिति वेति कत्वं परिमृजंति परिमार्जंति परिमम्

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰
२१

नातो वा अज्ञादावपि विकल्पेनेति सिद्धिहेत्वर्हे प्रतिषेधार्थमिदं लक्षणं त्वया कृतो ऽधिधूननेकुर्वादीनन्वबुवीत् अन्वबुवीत अत्राप्यंतर्भूतमितिचेन्मा
त्राये प्लुताद्दंतशो उवङ् सतिहलंतत्वान्नेटीति निषेधः स्यात् सिचं अंतरंगं भवति अचैषीत् अहौषीत् गुणः स्यात्। अस्त्कृत सैव वृद्धिः कश्चिद्
तो अकर्षीदित्यादौ हलंतलक्षणा वृद्धिः। अतारीदित्यादौ हलंतलक्षणायां नेटीति प्रतिषेधे अतो हलादेरिति विकल्पं बाधित्वा लोन्तस्य
निमित्ता वृद्धिः। अलावीदित्यादौ गुणंति पूर्वे इति अंतरंगत्वात् गुणावादेशयोः कृतयोः अपि अतो ल्यांतस्येत्यत्र वकारस्यापि लुप्तनिर्दिष्टत्वान्नि
त्या वृद्धिः मा भवान् अवीत् अमवीदित्यत्रापि तर्हि वकारप्रश्लेषान्नित्या वृद्धिः स्यात्। सिचं अंतरंगं भवतीत्युक्ते त्वं तु सूत्रेणोपत्वग्रिणि? वृद्धिग्रहणं न कर्त
व्यं अनवीदित्यत्रांतरंगत्वाद् गुणावादेशयोः कृतयोः यांतानामनेत्येव सिद्धत्वात् तत् स्थाने अतिमचीनि वेदयिष्यामः। अतो ल्यांतस्येत्यत्र वकारप्रश्लेषे
णाप्याह वृद्धिरविमव्योर्नेति तदेवमनर्थकं वृद्धिग्रहणं। नानर्थकं सिचं अंतरंगमप्यग्रहणमिति मा भूत् हि वृद्धिग्रहणं प्रत्याख्यायते यदि च सिचं अंतरं
गं स्यात् चिनीप्रभृतिभ्यो परं गतेभ्यः। वि रिणोति जिरियोति भ्यां च लुङि सिचि अचैषीत् अनैषीत् अचिरायीत् अजिरायीदिति न स्या
त् गुणावादेशयोः कृतयोः यांतानां नेति प्रतिषेधप्रसंगात्। इष्टलक्षणयां तु सिचि वृद्धेनर्वयेवांतरंगं बाध्यते यदि स्यात् नकापि सिचीगंत भ
वेत्। तत्र चाचिरायीदित्यादि सिद्धं। यथा च तयप्? गुणायाः देशो बाध्यते एवं न्वनुवीदित्युवङपि बाध्यते तत अतः प्रतिषेधार्थमपि वृद्धिरित्य लक्ष
णं त्वमेषितव्यमिति सर्वमवदातं। एवं च कृत्वा? वृद्धिकारणे वृद्धिग्रहणस्य प्रयोजनं दर्शितं। अथ कथं स्वसंज्ञया शिष्यमा
णा विस्पष्टविशेषो लभ्यते तत्राह पुनर्गुणवृद्धिग्रहणमित्यादि। इह पूर्वसूत्राभ्यां गुणवृद्धिग्रहणमनुवर्त्तते तेने वा देङ्आदैचां च
ग्रहणेमिद्धे यत् पुनरिह गुणवृद्धिग्रहणं तत् स्वसंज्ञयाविधाने नियमार्थं अन्यथा प्रकृतं गुणवृद्धिग्रहणं तटस्थमुपलक्षणं स्यात् वक्तव्ये गुणवृद्धी तद्विधाविति
सत्तु विधिर्गुणवृद्धिशब्दाभ्यां प्रकारांतरेणावेमेष? विशेषो नाश्रितः स्यात्। पुनर्गुणवृद्धिग्रहणसामर्थ्यात्तु शब्दमापारोप्य आश्रीयते गुणवृद्धी येगुणवृद्धीश
ब्दाश्रिते ये गुणवृद्धिग्रहणाच्च स्वरूपप्रधानत्वं संपद्यते तेनायं विशेषो लभ्यत इत्यर्थः। अन्यथा अवश्लेम? स्वस्वसंज्ञया विधाने नियमस्यादिवदित्यादि
षु गुणवृद्धिसंज्ञके पुनस्त्वं ज्ञेषु चयत्रेऊ न संभवति अष्टन आ विभक्तावित्यादौ तत्र चरितार्थत्वात् द्विवञ्चोदिता विषु गुणवृद्धिसंज्ञकेषु यत्रेक् संभवति तत्रायं

२१

© Dharmartha Trust J&K. Digitized by eGangotri

॥ नधातु ॥ दुरीणो लोपश्च दुःशब्द उपपदे रीणो धातोः प्रत्ययो भवति धातोश्च लोपः दुःखेन ईयते प्राप्यते दूरमिति तत्र यद्यपि क्विप् तस्य धातोर्लोपः संभवति तथाप्ये
वंविषये गुणवृद्ध्योः प्राप्त्यभावादेकदेशो धातुशब्देनोक्त इत्याह । धात्वेकदेश इति धातुलोप इति तत्सुतुषे सति आर्द्धधातुकग्रहणं लोपविशेषणं गुणवृद्धि
विशेषणं उभयविशेषणं वेति त्रयः कल्पाः । तत्राद्ये लोपविशेषणं आर्द्धधातुकनिमित्ते धातुलोपे सति यत्किंचननिमित्ते गुणवृद्धी न भवत इत्यर्थः स्यात्
ततश्च प्रेद्धमिति प्रपूर्वादिन्धेः क्तप्रत्यये तन्निमित्ते नलोपे सति प्राप्नुवत आद्गुणस्यापि निषेधः स्यात् । यद्यपीक इत्यनुवर्त्तते तथापि इद्धयोः षष्ठ्या निर्दिष्टयोः स्थाने भवन्नन्
तरमपदेशं लभत इति स्यादेव न चेह सूत्रे इक इत्यस्य त्वपरत्वे प्रमाणमस्ति न्यासे तु प्रमाणं न स्याम । ननु पूर्वं धातुः साधनेन युज्यत इति दर्शने प्रथमोपनतत्वा
त्प्रत्ययापेक्षत्वान्नलोपो अन्तरङ्गः पूर्वं धातुरुपसर्गेण युज्यत इति तु दर्शने प्रथमोपनतत्वोपसर्गापेक्षत्वाद्गुणोऽन्तरङ्गः । ततश्चासिद्धं बहिरङ्गमन्तरङ्गे इति प्रतिषेधो न भवि
ष्यतीति नैतद् । हीनाजानन्तर्य इति निषेधात् । अथ गुणवृद्धिविशेषणमार्द्धधातुकग्रहणं तदोयमर्थः स्यात् यत्किंचननिमित्ते धातुलोपे सत्यार्द्धधातुकनिमि

॥ न धातुलोप आर्धधातुके । धात्वेकदेशो धातुः तस्य लोपो यस्मि
न्नार्द्धधातुके तदार्धधातुकं धातुलोपं तत्र ये गुणवृद्धी प्राप्नुतः ॥

त्ते गुणवृद्धी न भवत इति तदा प्रेद्धमित्यत्र दोषो न गुणस्य तन्निमित्तत्वात् किंतु क्नोपयतीत्यत्र क्नूयी शब्द इत्यस्मात् णिचि पुकि च यलोपे पुगन्तलक्षणस्य गुण
स्य निषेधः स्यात् । अत उभयविशेषणं आर्द्धधातुकनिमित्ते धातुलोपे सत्यार्द्धधातुकनिमित्ते गुणवृद्धी न भवत इति तत्र सहश्रुतस्योभयविशेषणत्व
मेव तावद् दुर्लभं अथापि स्यात् एवमपि लोपगुणवृद्धीनामेकार्द्धधातुकनिमित्तत्वं न लभ्यते ततश्च विभज्यान्वाख्यानपक्षे भेद्यत इति अत्र भिदेः कर्मक
र्त्तरि यकि भिद्यत इति स्थिते नित्यत्वात् पूर्वं णिलोपे यकमपेक्ष्य प्रवृत्ते प्रत्ययलक्षणेन णिचमपेक्ष्य प्राप्नुवतो गुणस्य निषेधः स्यात् द्वयोरप्यार्द्धधा
तुकनिमित्तत्वादिति तत्सुतुषे सति सर्वथा दोषं दृष्ट्वाह । तस्य लोपो यस्मिन्निति अस्मिन्न्यासे धातोर्लोपो यस्मिन्निति अन्यपदार्थभूतेनार्द्धधातुके न लोपो वि
शेष्यते साक्षाच्च गुणवृद्धी धातोर्लोपो यस्मिन्न तस्मिन्निति एकार्द्धधातुकनिमित्तत्वं च लोपगुणवृद्धीनां लभ्यत इति न कश्चिद्दोषः ॥ ॥ ॥

॥ ७ ७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तेन भवत इति। अनेन गुणवृद्ध्योरयं निषेधो न पूर्वसूत्रव्यापारस्येति दर्शयति पदे पस्त्वाप न हि पूर्वसूत्रव्यापारः। न चैवं भवत्या ऽर्धधातुके तस्य प्रसंगः दीधी
वेवीयमिति वा असंबद्धं स्यात् पुगन्तलघूपधस्य तन्निषेधे लोलुव इत्यादिलक्षणं यङ्लुकि द्विर्वचनं गुणाय यङ्लुकोः गुणो निषिद्धे उवङ् मरीमृज इति शिवादुपधस्य च लोलू
यादिस्य इत्यादिना सूत्रार्थमुदाहरणेषु दर्शयति। ननु च यङ कारस्य अतो लोपे कृते तस्य स्थानिवत्त्वाद् गुणवृद्धी न भविष्यतः। यथा याप चक इत्यत उप
धायाश्च निवृत्तिः न त्वत्रानेन निषेधः सिध्यति किं कारणं अनिमित्तत्वात्। नात्र अतो लोपेन लभ्यते यङो विवेति समुदायलुकि प्रतिपदं विहितेन वा
धितत्वात् योगविभागात् सिद्धं अतो लोपो भवत्या ऽर्धधातुके ततो यस्य यङ इत्यस्य समुदायस्य यो कारस्तस्यापि लोपो भवति किमर्थमिदं विशेषविहि
तेन समुदायलुका अतो लोपो मा बाधीति तेन स्थानिवत्त्वादेव गुणवृद्धी न भविष्यतः। यद्येवं तर्हि गुणवृद्धी न भवतः एवं चेक्षिपः चेक्रिपः लोलुव स्तोष्टु
व इती यङ्लुग्वद्वावप्यत्र यमपेक्ष्य न स्याता तां माभूतामचि यण्वत्त्वं सोऽस्यान्यकारस्तदाश्रयो भविष्यतः साहियको लुप्ते प्रत्ययलक्षणे कः। ननु चेक्षिपः तोष्टु

तेनभवतः। लोलुवः। पोपुवः। मरीमृजः। लोलूयादिभ्योयङ्‌न्तेभ्यः पचाद्यच्‌विहिते
यङोऽचि चेति यङो लुकि कृते तमेवाचमाश्रित्य ययोर्गुणवृद्धी प्राप्ते तयोः प्रतिषेधः॥१०॥

वः इत्यत्रान्तरङ्गान् अपि विधीन् बहिरङ्गो लुग्बाधत इति अकृत्सार्वधातुकयोर्दीर्घ इति प्राप्तो यङो लुकि कृते स्थानिवद्भावे सत्यपि चेक्षिप अतो लुगम इति स्थि
ते स्थान्यकारेण सह मलघूपधसंज्ञा संज्ञातमिति असमये गुणः स्यादेव अन्तरङ्गो विधिर्यङ् वङो भविष्यति अशिश्रियत् अदुद्रुवत् इति यथा· अतः स्थानिव
त्वादेव सिद्धं नार्थो नेन उच्यते। सर्वत्र दीर्घं तेषु कृत्स्नं ते पुचेयङ्‌वङोः कृतयोः पुनर्लघूपधलक्षणो गुणः प्राप्नोति। न च पुनरपि स्थानिवद्भावः। आदिष्टादचः
पूर्वत्वात्। किंचायं यतो लोपः क्षिपते जंगम इत्यत्र गम हन इत्युपधालोपः स्यात्। अथात्रानङीति प्रतिषेधः दरीहृशः क्रदर्शो डीगुणः स्यात्। देध्यः दीङो युडेवीति
युट् स्यात्। सनीस्रंसः दनीध्वंसः अनिदितामित्युपधालोपः स्यात्। यायाः वावाः इत्यादिष्वाकारलोपः स्यात् यदा पुनर्योगविभागमकृत्वा विशेषविहितः स
मुदायलुक्क्रियते तत--- गादेशस्य स्थानिवत्त्वाभावात् उपधालोपादयो न भवन्ति तस्मादवश्यं समुदायस्य लुगेषितव्यः। एवं च लोलुव इत्यादावपि गुणवृद्धी प्रा
तापि प्रसूत्रमपि कर्तव्यम्॥ १० ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ल्‌ज्‌लवितेतिप्रागेवधातुसंज्ञायाभवन्ननुबंधलोपोधातुलोपोनभवतिारेडसीतिा दूषरिषिहिंसायांअनेभ्योपिदृश्यंतइतिविच्‌वेरपृक्तस्यलोपोनधातुलोपोमव
तिनचसस्यषिधातुग्रहणोलुप्यतेस्मिन्निस्यधिकरणसाधनेर्थग्रयणादनेमित्तिकेअनुबंधप्रत्ययलोपेनभविष्यतिात्र्यलोपश्चात्रोहिंसंज्ञाचाद्ः कथमस्या
धिकरणसाधनतालभ्यते।रोरीतीति।रुशाहेयङ्‌ङ्‌ क्तितिपिहयांनत्वस्यत्यार्धधातुकग्रहणेधातोर्लोपोयस्मिन्निति बहु व्रीसतेरोरवीतीसत्रचयङ्‌गनै
मित्तिकंनस्यार्द्धधातुकग्रहणंवहुव्रीहित्वेप्रमाणंमत्यपितस्मिंस्तस्तुषसंभवात्‌॥इदंतर्हिप्रयोजनंतुवीधुवीधुर्वीहिंसार्थाःमुर्छामोहसमुछ्रयोःते
भ्योयङ्‌गंतेभ्यःक्तिबादेशोसार्वधातुकेयरलोराल्लोपततोतोनिःसादीछ्वोर्लोपस्यगुणस्यचैकनिमित्तलान्निषेधःस्यो देवाःकइत्वेवेतीईकरइत्यस्यानुवृत्तिंप्र
तिनइकाकार्यत्वेवशाहस्यार्थः।अभाज्ञिरणइति।भंजेश्चचिणिचञ्चिचभावकरणयोरितुपधालोपः।प्रक्रियातर्कगहनप्रविष्टोहृष्टमानसः।हरदत्तद
ः स्वैरंविहरत्वेकेनवार्यतामप्॥ ॥क्ङितिच॥ ॥क्ङित्ग्रहणंमध्दिविधीयमानस्यप्रतिषेधस्यविशेषणंस्यात्‌गुणवृद्धीङ्‌िति न भवतइतितत्तोविधिसंस्थ

धातुग्रहणंकिं।ल्‌ज्‌।लविता।रेडसिपर्णान्नवेत।अनुबंधप्रत्ययलोपेमाभूत।रिषेर्हिंसार्थस्यविजप्रत्ययलोपेडदाहर
णोरेरिति।आर्धधातुकइतिकिं।त्रिधावृद्धो।वृषभोरोरवीति।सार्वधातुकेमाभूत।इकइत्येव।अभिजिरणः॥क्ङितिच॥ ॥

र्णात्तस्मिन्नितिनिर्दिष्टेपूर्वस्येत्यस्योपस्थानात्‌क्ङितःअनंतरस्यैवप्रतिषेधःस्यात्‌यघपिप्रतिषेधस्यविधानदृआयायांपौर्वापर्यंनसंभवतितथा।निषेधयोर्गुण
वृद्ध्योःएपितयापिस्थानिनइकोनंतरे।क्ङितिप्रतिषेधःस्यात्‌।एवंहिविधानोत्तरकालमपितावद्गुणवृध्यभावरूपस्यप्रतिषेधस्यक्ङिदनंतरःप्रभवइति।इको
गुणवृद्धीस्यादावप्येतावदेवपौर्वापर्यंयद्विधानदृआयांस्थानिनउत्तरकालंतुविधेयस्य।यथात्वनूघमानयोर्गुणवृद्ध्योर्विशेषणंक्ङितिसतियेगुणवृद्धीप्रा
मुतस्तेनभवतइतिनहात्अनुवादकत्वात्तस्मिन्नित्यादिकायाःपरिभाषायाःअनुपस्थानंनहिक्ङितिसतियेगुणवृद्धीइत्युक्तेविधिआपरेणक्ङितःकश्चित्स्य‌ीः
विधंगभूतास्वपरिभाषास्तत्रैवोपतिष्ठंतेनानुवादेतस्यापिपरार्थत्वात्‌द्वयोःपरार्थयोःपरस्परसंबंधाभावात्‌अमयाहाइर्षस्यचामारिल्लद्वद्वमिततत्रेक्
परिभाषोपस्थानेशालायइतिहद्वसंज्ञानस्यात्‌।तथाचोदीचामातःस्थानइतिस्थानग्रहणंआतःस्थानेयोदित्यनुवादत्वात्‌षष्ठीस्थानेयोगेतिष्ठा
नेयोगेनलभ्येतेति।अतोस्मिन्सेक्ङितीतिसप्तमीयस्यचभावेनेतिक्ङितोहिसत्तालक्षणोभावेनगुणवृद्ध्योःप्राप्तिलक्षणोभावोलक्ष्यतेनिमित्तस्यव
हतयानिमित्तिनःप्राप्तिर्लक्ष्यतइतिक्ङितिसतियेगुणवृद्धीप्राप्नुतइतिअस्यक्ङिन्निमित्तेयेगुणवृद्धीप्राप्नुतइत्यर्थोभवतिभिन्नः।मृष्टइत्यत्रैवोपधा

निमित्तसप्तम्येषेति। निमित्तात्सप्तमी निमित्तसप्तमी पंचम्यर्थे शेषत्वेन विवक्षिते षष्ठीसमासः। क्ङिन्निमित्ते इति। एतेन गुणवृद्धिविशेषणं क्ङिद्ग्रहणमिति स्त्रूपितं न तु च विधीयमानतया प्राधान्यात् प्रतिषेधस्यैवेति दि शेषणं पुक्तं। नैतदस्ति यत्र हि गुणः कृतात्म संस्कारः प्रधानोपकाराय महते प्रभवतीति तत्रात्मनो ऽभिसंस्कारमनुभूय प्रधानेन संबध्यते यथा ऽरुणैकहायन्यादिसंस्कृतं पुरुषेणाउक्तं च गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते प्रधानस्योपकारे हि तथा भूयसि वर्त्तन इति। इह गुणवृद्ध्योः क्ङिद्ग्रहणेन विशेषितयोर्महान् प्रधानस्य प्रतिषेधस्योपकारो भवति व्यवहितस्यापि तन्निषेधः। भिन्न इति। रुधादिभ्यामिति न त्वं मृड इति प्रश्ना दिनावत्वं चिनुतेति सार्वधातुकमपित् ङित् स्नुवोः सार्वधातुके यद्येवा निमित्तसप्तमी श्नाद्युष्टं। नैदोषः। एधि धारणे इति तौ तुदादी ताभ्यामिति पित्तुदादिभ्यः श्नः ति ऽग्नि दुरुभ्यः कर्तरि शप् द्विसेति क्रिसेति स्त्रिअत् इत्स्नात इति स्थिते श्नात्युष्टं तस्यां गापत्यति पिलभूपधलक्षणा गुणः प्राप्नोति श्नाद्युष्टोः परतः पूर्वस्य सार्वधातुका

निमित्तसप्तम्येषा क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः। चितः। चितवान्। स्तृतः स्तृतवान्।
भिन्नः भिन्नवान्। मृष्टवान्। ङित् चिनुते चिनुतः। चिन्वंति। मृष्टः। मृजंति। गकारोप्यत्र चर्त्वभूतो नि
र्दिश्यते ग्लाजिस्थश्च ग्स्नुः। जिष्णुर्भूष्णुः॥ २१॥

इग्यणुकलक्षणाश्चेत्तत्र श्नाद्युङिन्निमित्तस्यैव प्रतिषेधः स्यात्तन्नेति ङिन्निमित्तस्य पक्षान्तरे तु ति ङिन्निमित्तस्यापि गुणस्य श्नाद्युषोः परतः प्रतिषेधो लभ्यते। न वा वहि रंगलक्षणत्वाद् हि भूतिति विवाश्रयो गुणो बहिरंगः अंतर्भूता श्नाद्युङिन्निमित्तापि पक्ष्युपचत्वं वाधिष्यते ग्लाजिस्थश्च ग्स्नुरिति पत्र तस्यति गिच्चायं प्रत्ययो न कित्त तेन स्थ ईकारो न भवतीति क्तो गिल्वान्न स्थ ईकार इति च ततश्च भूष्णुरित्यत्र प्रतिषेधो न स्यादित्यत आह गकारोप्यत्रेत्यादि। चर्त्वभूतः चर्त्वप्राप्तः अतएव गकारप्रश्लेषात् संख्यातानुदेशो न भवति अन्यथा क्ङितौ द्वौ गुणवृद्धी अपि द्वे इति संख्यातानुदेशः प्राप्नोति किति गुणस्य ङिति वृद्धेरिति। ज्ञापनार्थश्चायं स्मिर्दे गुण इति इग्निङिति गुणं शास्ति न तज्ज्ञापयत्याचार्यो नात्र संख्यातानुदेशो भवतीति। पठितं हि ग्स्नु प्रत्ययो गित् भूष्णुरिति दृ प्राप्नोति नैष दोषः स्नुकः किती सत्रापि गकारश्चर्त्वभूतो निर्दिश्यते सोत्र लाघवनिर्देशस्य चर्त्वस्यासिद्धत्वात्सामर्थ्यपि हश्चि चेत्युत्वं न भवति कुतो ---

© Dharmartha Trust J&K. Digitized by eGangotri

कामयत इति। कमेर्णिङ्. लैगवायन इति॥ लिगुशब्दान्नडादिभ्यः फक्। नेर्गुणा इति गुणस्य प्रतिषेधो न भवति किमर्थं न भवति यावता ङकार इङ्गो वनेन इति क्ङित्
त्रेहि चकारः क्रियते स इत्यर्थे विज्ञायते तेनेककृतिमं शह मुख्यार्थविधीयमानयोर्गुणवृद्ध्योः प्रतिषेधः न चैवमोर्गुणः मृजेर्वृद्धिरित्यादिष्विह त्रिमुनिव्या
करणं यथोत्तरं च मुनीनां प्रामाण्यमिति दर्शनस्थितिः तेन सूत्रकारेणानुक्तं वार्तिककार आह दुरुक्तं च दूषयति एवं भाष्यकारेणापरमन्त्र त्वमपि द्व
योश्चास्तीत्येतावन्न यस्मिन्विधिस्तदादावल्ग्रहण इत्येवं तदादिविधौ सिद्धे आदिग्रहणं मुखेनाज्ञादेशस्थानी त्या। यपदेशिवद्भावेनाजादेशमा

॥ इक इत्येव। कामयते। लैगवायनः। मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते। संक्रमो नाम गुणवृद्धिप्रति
षेधविषयः। परिमृजन्ति। परिमार्जन्ति। परिमृजन्तु। परिमार्जन्तु। लघूपधगुणस्याप्यत्र प्रतिषेधः। अचि
नवम् असुनवम् इत्यादौ सत्यपि ङित्वे यासुटो ङिद्वचनं ज्ञापकं ङिति यत्कार्यं तत्कारे ङिति न भवतीति॥ ॥

मृजन्तुं परिमृजः। पूर्वं ममृजतुः ममृजे। संक्रमो नामेत्यादि सं भ्रकामतो यक्रामतो गुणवृद्धी अस्मादिति कृत्वा लघूपधगुणस्याप्यत्र प्रतिषेध इ
ति अत्र सूत्रे लघूपधगुणस्यापि प्रतिषेधः ननु सार्वधातुकार्धधातुकयोरित्येतस्यैवेत्यर्थः। अनेन निमित्तसप्तम्याः फलं दर्शितं अत्रेमनेन च सूत्रं
निर्दिश्यते। इहाचिनो इति ङितो लङः स्थिवादेशः स्थानिवद्भावात् ङिदिति गुणप्रतिषेधः प्राप्नोति इहाचिनवम् इति च लङो मिपिपि मिपः स्थाने आदेशो त
स्यापि स्थानिवद्भावपरं परयाङित्वात् गुणप्रतिषेधः स्यादित्यत आह अचिनवमित्यादि यदि ङिति यत्कार्यं तत् ङितो लकारस्यादेशो स्थानि
वद्भावात् स्यात् यासुटो ङिद्वचनमनर्थकं स्यात् लिङो ङित्वादेव तदादेशो ङित्कार्यस्य सिद्धत्वात्॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥दीधी॥ ॥दीधीवेव्योरितिं दीधीङ् दीप्तिदेवनयोः वेवीङ् वेतिना तुल्ये इत्येतयोः अथ दीङ् क्षये धीङ् अनादरे वेञ् तन्तुसन्ताने वी गत्यादिषु एते
षां ग्रहणं कस्मान्न भवति दीङ उस्तावन्न भवति मीनाति मिनोति दीङां ल्यपि चेति चकारेणैजविषये आत्वविधानात् । वेञोपि न भवति गुणप्राप्त्यभावात्
नेन दृक्षि चकारस्तावन्मीनाति मिनोत्यर्थः स्यात् दीङोपि ग्रहणं ल्यबर्थं स्यात् वेञोपि प्रवेयमित्यत्र ईयात् इति लेकृते गुणः प्राप्नोति । एवं तर्हि चतुर्णां
ग्रहणे अभिप्रेते असंदेहार्थं दीवेधीवीनामिति ब्रूयात् किंच अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी । इट् च इति । आर्धधातुकस्येडित्यागमस्यान
नु धातुसम्बन्धपरिग्रहे क्रियमाणे वितिस्य धातोर्ग्रहणं पुनः कं संप्रत्ययं सिद्धान्तिकाय दागमस्य ग्रहणं आगमो हि प्रत्यादि दूरतः । शास्त्रे अल्पान्तरत्वेन पूर्वनिप
ताभावात् वनधातुरिट् दीधीवेव्यो स्तधातुत्वात्प्रकृतित्वाद् भ्यर्हितं चेति पूर्वनिपातः । अथ दीधीवेव्योर्ग्रहणं किमर्थं यावता छान्दसावेतौ धातू दृष्टानु

॥दीधीवेवीटां॥ ॥दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः । आदीध्यनं आदीध्यकः । आवेव्यनं आवे
व्यकः । इटः खल्वपि । श्वः कणिता । श्वो रणिता । वृद्धिरिटो न संभवतीति लघूपधगुणस्यात्र प्रतिषेधः ॥ २२ ॥

विधिश्छन्दसि दृष्टत्वेन हि इष्यते च गुणः होत्रा यद्यतः कृपयन्न दीधेत अदीधयुर्दशग्वा इति अतो दीधीवेव्योरनर्थकः प्रतिषेधः केचित् गुणा इति च गुणादर्श
नात् अप्रतिषेध इति । आदीध्यनमिति । ल्युटि एरनेकाच इति यणादेशः । कणिता इति कणरणी शब्दार्थौ लुटि तिपो डा टेः ताप्रिटि लोपः कणि
त आदीति स्थिते तकारान्तं लघूपधमिति आगमस्य गुणस्य प्रतिषेधः ननु च नेड्वशि कृति इत्यत इति इडित्यनुवर्तमाने आर्धधातुकस्येट् इति पुनरिड्ग्र
हणमिडेव यथा स्यात् विकारो मा भूदित्येवमर्थं भविष्यति यद्येवं अलावात् पिय ------------------ घः वेरुपधाया इति च दीर्घो
न स्यात् । अंगप्रकरणे नियमः तेनांगस्यैव विकारो निवर्त्यते । इह तर्हि पवि घ्रवते प्रत्ययेन पुंसके जसः शेः अतो लोपस्य स्थानिवत्वात् नुम् भवतीति --
------------ प्रियाष्टान्तकुलानीति भवति ॥ २२ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

हलो॥ ऽनंतरमवकाशगवषिपरिधानांतर्द्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येंतरात्मनि चेत्संतरशब्दोनेकार्थः। इह छिद्रवाचिनो ग्रहणांतरेषा
मसंभवात् न विद्यते तरं येषां ते । नंतराः नंतरशब्दोत्र रेशादव्यवधिर्त्तिभिंन्नजातीयैः शब्दैरव्यवहिताः श्लिष्टोच्चारिता इति। एवं भूता हि हलो भिः छिद्राभर्व्वतिभिन्न
जातीयैरिति वचनं तत्रै व व्यवधानमसिद्धेः श्लिष्टोच्चारितार्हनिवचनाद्व्यग्रहेपि संज्ञा न भवति धेते व्यत्रांतरमर्द्धमात्राकालः। संयोग इति प्रत्येकैकस्य
हलः श्लिष्टोच्चारितस्य एषा संज्ञा स्यात् इह निर्धारणात् इत्यत्र सति रेफ पकारः संयोग इति वान्त्यस्य संयोगादेरित्येत्वं स्यात् समुदायस्य तु संज्ञित्वे जचोर

॥ हलोऽनंतराः संयोगः॥ भिन्नजातीयैरक्षरैरव्यवहिताः श्लिष्टोच्चारिताः हलः संयोगसंज्ञा भवंति स
मुदायः संज्ञी। जातौ चेदं बहुवचनं तेन द्वयोर्बहूनां च संयोगसंज्ञा सिद्धा भवति। अग्निरिति॥ नो॥ अ
श्व इति॥ श्वौ॥ इंद्रश्चंद्रो मंद्रः इति नद्राः। उष्ट्रो राष्ट्रं भ्राष्ट्रं इति षट्राः। तिलान् स्यात् गणतीति॥ नमतरणा
वा॥ नतमतरयाः। हल इति किं। तितउ छत्रं संयोगांतस्य लोप इति लोपः स्यात्। अनंतरा इति किं प
चति पनसं। स्कोः संयोगाद्योरिति लोपः स्यात्। संयोगप्रदेशाः संयोगांतस्य लोप इत्येवमादयः ४३

हाभ्यामिति पकारस्य सत्यपि द्विर्वचने तस्यासिद्धत्वादेत्वाभावः। इह च संस्कृषीष्ट अनंतश्च संयोगादेरिति इत्वं स्क्रियत इति गुणो न स्यात् संयोगाद्योरिति
गुणः। इषत्कारोति ककारस्य निर्घोटकारस्य संयोगत्वात् संयोगांतलोपः स्यात् शाक्यवृक्षोति रु लिलकारेपरतः स्कोः संयोगाद्योरिति निर्धात इति
योगादेरातरति निष्ठानत्वं स्यात् समुदाये तु संज्ञिनि नैते दोषाः इत्यालोच्याह समुदायः संज्ञीति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं संपुज्यते
स्मिन्नित्यो हल इति नैरंतर्यं च श्रुतं संज्ञिरूपेनु प्रविशतीति युक्तं प्रत्येकपक्षेतद्दुपलक्षणं स्यात् अतः समुदाय एव संज्ञी युक्त इति भावः। हल इति बहुव

॥ वचननिर्देशाद्द्वयोः संज्ञा न स्यादित्याशंक्याह। जातौ चेति च शब्दो
यस्मादर्थे यस्माज्जातौ बहुवचनं तेन द्वयोर्बहूनां चेति॥ ॥

का॰ प॰
२५

अथ यत्र बहवो हलः संश्लिष्टाः तत्र किं द्वयोर्बहूनां चाविशेषेण संज्ञा आहोस्विद् द्वन्द्वानामेव यदि वक्तुनाम्नेव द्वह्मस्त्रिनत्रो ऽलीसंसादृचः परे तु मिमनमज्जरति स्थिते नमज्जा नामैका संज्ञा ननु मज्जयोरिति सकोः संयोगाद्योरिति सलोपेन स्यात् नैष दोषः मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यः मन्नद्वसुपधालोपो यथा स्यात् अग्न्यथा द्वयोर्द्वयोस्संज्ञाश्रयेण मस्जेरपि संयोगादिलोपे तस्यासिद्धत्वान्न लोपेन स्यात् इहतर्हि निर्लिपात् संस्वरिषीष्ट संस्वर्यते निर्म्लान इति एत्वे ऋगुणनिष्ठानत्वानि न स्युः अस्तु तर्ह्यविशेषेण कुतः निर्छिद्रत्वाविशेषात् न च द्विर्वचन न्यायेन समुदायस्यैव स्यादिति वाच्यं यथा द्विवचने समुदायावयवैकाचोपुरपत्कर्तुमशक्तो नेवमत्रा शक्तिः यथा च समुदाये द्विरुक्ते अवयवा अपि द्विरुक्ता भवन्तीत्यस्य प्रचलन समुदायावयवैः प्रचलन्तीति न्यायेन न तथेह समुदाये प्रवृत्तया संज्ञयावयवानां तत्कार्यसिद्धिः अतो नायं द्विर्वचनन्यायस्य विषयः अतो ऽविशेषेण द्वयोर्बहूनां चेति स्थितं यद्येवमिदं मिच्छतीरं इर्यतितततः मन्दं इन्द्रिं इप्सि षतीत्यत्र द्वयोः संयोगेन दोषो वचनत्रेन नद्राः इति प्रतिषेधो नकार बहूकारस्याप्यिष्यात् नवाज्विधेः अज्जादेरिति वर्जनेनात्र कर्म्मधारयात् पंचमी आदेरचः परे न द्राण नद्रिरुच्यते इत्यर्थः अग्निरित्यादीनि नृणो दाहरणानि तिलानस्त्रावयतीति हेमपरे वेति वर्त्तमाने उः मिधुरिति च नश्वेति धुद्द्धवंति त्रपदान घुद्दतदन्नस्तरयायदा धुद्दत दान न सतरया इतिन उद्धत्रमिति तिनो ते उ मन्त्रे उ प्रत्ययः अस्तोङा णामाम यथा हुणारभावः सवङ्गावात् द्विर्वचनं इलं चरिलोपः संयोगान्तलोपः स्यादिति पयचो रप्य न स्त्रयोः संयोग संज्ञा स्यादिति भावः ननु च छेवेति तु किं कृते तकारः पदान्तो न संयोगः नैतदस्ति छेचेत्ययं उक्त ह्रस्वमात्रमभक्तो न तदन्तग्रहणेन गृह्यतेऽतिपदं संयोगान्तमेव पचतीति रूपमुदाहरणं स्कोःसंयोगाद्योरिति लोपः स्यादिति पदि स्तकारमकारयोः सान्तरयोरपि संयोगसंज्ञा स्यादिति भावः॥ २३ ॥ ॥

एम॰
२५

© Dharmartha Trust J&K. Digitized by eGangotri

समासो दिक्समासः। दिगुपदिष्टे समासे बहुव्रीहौ विभाषा सर्वादीनि सर्वनामसंज्ञानि भवन्ति उत्तरपूर्वस्यै। उत्तरपूर्वायै। दक्षिणा
पूर्वस्यै। दक्षिणापूर्वायै। दिग्ग्रहणं किं। न बहुव्रीहाविति प्रतिषेधं वक्ष्यति। तत्र न ज्ञायते क्व विभाषा क्व प्रतिषेध इति। दिग्ग्र
हणे पुनः क्रियमाणे ज्ञायते दिगुपदिष्टसमासे विभाषा अन्यत्र प्रतिषेध इति। समासग्रहणं किं। समास एव यो बहुव्रीहिः त
त्र विभाषा यथा स्यात्। बहुव्रीहिविज्ञानेन यो बहुव्रीहिस्तत्र माभूत्। दक्षिणादक्षिणस्यै देहि। बहुव्रीहौ इति किं। द्वन्द्वे वि
भाषा माभूत्। दक्षिणोत्तरपूर्वाणामिति॥ ॥

ज्ञाविधानेन तदन्तस्यापि सिध्यतीति तदन्तविधेरभ्युपगमादिति। समासग्रहणं किमिति
न बहुव्रीहिः समासत्वमभिचरतीति प्रश्नः। दक्षिणादक्षिणस्यै इति। एकं बहुव्रीहिवदित्यनुवृत्तावाबाधे वेति दक्षिणाशब्दस्य द्विर्वचनं बहुव्रीहाविति यमपि
निषेधो न भवति तत्रापि समासाधिकारात्। दक्षिणोत्तरपूर्वाणाम् इति असति बहुव्रीहिग्रहणे यथा न बहुव्रीहाविति प्रतिषेधं बाधते एवं द्वन्द्वे चेत्येत
मपि बाधेत। अथ क्रियमाणेपि बहुव्रीहिग्रहणे या पूर्वा सोत्तरा यस्योन्मुग्धस्य तस्मै पूर्वोत्तराय देहीत्यत्र कस्मान्न भवति। प्रतिपदोक्तो यो दिक्समासो दिङ्ना
मान्यन्तराल इति तस्य ग्रहणं। यद्येवं तत एव हेतोर्द्वन्द्वे न भविष्यति। सत्यं। उत्तरार्थमवश्यं कर्तव्यं बहुव्रीहिग्रहणमिहापि विस्पष्टार्थं भविष्यतीति मन्यते॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ नबहुव्रीहौ ॥ ॥ अत्रहेतोर्द्विधासूत्रार्थो लक्ष्यते बहुव्रीहौ वर्तिनिनिषेधाधिकरणं बहुव्रीहौ संज्ञा न प्रवर्त्तते बहुव्रीह्याधारा संज्ञा न भवतीति बहुव्रीहेः संज्ञा न भवतीति। सप्तम्यधिकरणं वा बहुव्रीहौ पानिसर्वादीनि सर्वनामसंज्ञानि न भवंतीति तत्र सर्वनामसंज्ञाया मिमादिनाधंयस्संदर्शयति। कथं पुनर्ज्ञापनेऽभ्युपगानस्तदंतविधिरितिअतएवनिषेधात्। द्वितीयं सूत्रार्थं दर्शयति बहुव्रीहौ वर्तिनादि प्रथमस्योदाहरणमाह प्रियविश्वायेति। सर्वनाम्नः पूर्वनिपाते प्राप्ते वा प्रियस्येति प्रियशब्दस्य पूर्वनिपातः। त्यकायेति। सर्वनामसंख्ययोरिति द्वयोः पूर्वनिपाते परत्वात्संख्यायाः पूर्वनिपातः। द्वितीयस्योदाहरणमाह इह चेति। अत्र च प्रतिषेधोपमारभ्यत इत्यनुषंगः अत्रासति निषेधे अकचि सति त्वकत्पितृकः मकत्पितृक इति प्राप्नोति। सति तु प्रागिवात्क इति कप्रतिप्रत्ययोत्तरपदयोश्चेति त्वमादेशयोः त्वत्कपितृको मत्कपितृक इति सिध्यति। नद्यृतश्चेति कप्। ननु च बहुव्रीहौ चायं निषेधः इह तु प्रागेव

॥ नबहुव्रीहौ ॥ सर्वनामसंज्ञायां तदंतविधेरभ्युपगमादाह बहुव्रीहेरपि सर्वाद्यंतस्य संज्ञा स्यादिति प्रतिषेध आरभ्यते।
बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञानि न भवंति। प्रियविश्वाय। प्रियोभयाय। द्व्यन्याय। त्वकत्पितृकः मकत्पितृकः इह च त्वत्कपि-
त्कको मत्कपितृक इति अकच्न भवति। बहुव्रीहाविति वर्त्तमाने पुनर्बहुव्रीहिग्रहणं भूतपूर्वमात्रेऽपि प्रतिषेधो यथा
स्यात्। वस्त्रान्तरवसनान्तर इति ३७ ॥ ॥

ततस्त्वकपितात्र अहकपितास्येति वाक्यावस्थायामेवाकच्प्राप्नोति एवं तर्हि प्रतिषेधसामर्थ्यात् पश्चात्कोपमर्देन बहुव्रीहिर्भवति तस्यामेवावस्थायां निषेधो भविष्यति। अत्र च प्रथमः सूत्रार्थः तदंतविधिज्ञापनाय वोपन्यस्तः ननु प्रियविश्वायेत्यादौ समुदायस्य संज्ञाप्रसंगः असर्वो यत्वात् यथात्र अति सर्वपिसमादौ बहुव्रीहाविति वर्त्तमाने पुनर्बहुव्रीहिग्रहणं किमर्थमित्याह। बहुव्रीहाविता दि। वस्त्रान्तरवसनान्तर इति वस्त्रमंतरं येषां वसनमंतरं येषामिति बहुव्रीह्यर्थः हि अत्रासति बहुव्रीहिग्रहणे वर्त्तमानबहुव्रीह्यपेक्षो निषेधः स्यात् ततश्च जस्विभाषास्यात् पुनर्बहुव्रीहिग्रहणात्तु पदंनोद्भूतः सोंतरशब्दो बहुव्रीहेः पूर्वमंतर्भूतः इति बहुव्रीह्यपेक्षो निषेध एव निषेधो भवति। इदं तु नदंतस्य संज्ञानिषेध इति प्रथमपक्षानुरोधेन प्रत्युदाहरणं न त्व। त्र प्रसंगोः सर्वार्थत्वात्। वसंतोऽस्मिन्निति वसनंतरः इहेन नविशूपाणामपि समान्तार्थानामि

© Dharmartha Trust J&K. Digitized by eGangotri

॥तृतीया॥ समास इति वर्त्तमाने अस्मादि सूत्र अस्यैव ग्रहणे प्राप्ते योगेन स्यापि ग्रहणार्थं पुनः समासग्रहणमित्यर्थः। न च तृतीया समास समासार्थे वाक्ये प्रसंगः स्यात् ह
पूर्वसदृशेत्यादिना तच्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते। त्वयका मयकेति। युष्मदस्मदोः तृतीयैकवचने त्वमावेकवचने योचि सुवंतयोः प्राकृटेरकच्। हं
ह्वेस। अंपसमुदाय एवेन निषेधो न। वयका न कृतः। प्यदादौ नां न्याव त प्यदादीनां तावत प्यदादीनि सर्वै नित्यमिति एकशेषेणाभ्यमप्राक्तयदादिभ्यो का
रांतास्त्रकाचोकरविशेषः सर्वनाम्नो हत्रिमात्रे पुंवद्भावस्त्विष्यत एव दक्षिणोत्तरपूर्वाणामिति सोयं प्रतिषेधो ज्ञापयति। अस्ति सर्वनामसंज्ञायोतदंतवि

॥तृतीयासमासे॥ तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न भवंति। मासपूर्वाय। संवत्सरपूर्वाय। द्व्यहपूर्वाय। त्र्यहपूर्वा
य। समास इति वर्त्तमाने पुनः समासग्रहणात् तृतीयासमासार्थवाक्येपि प्रतिषेधो यथा स्यात्। मासेन पूर्वाय। पूर्वसदृशसमो
नार्थेति तृतीयासमासं प्रतिपदं वक्ष्यति तस्यैव ग्रहणं न यस्य कस्यचित् तृतीयासमासस्य कर्तृकरणे कृता बहुलमिति। त्वयका
कृतं मयका कृतं॥ ॥द्वंद्वे च॥ ॥द्वंद्वे च समासे सर्वादीनि सर्वनामसंज्ञानि न भवंति। पूर्वापराणां। कतरकतमानां॥ ॥
विभाषा जसि॥ ॥पूर्वेण नित्ये प्रतिषेधे प्राप्ते जसि विभाषा आरभ्यते। द्वंद्वे समासे जसि विभाषा सर्वादीनि सर्वनामसंज्ञानि
न भवंति। कतरकतमे। कतरकतमाः। जसः कार्यं प्रति विभाषा अकच् न भवति। कतरकतमकाः॥ ॥ ॥ ॥

धिरिति॥ ॥विभाषा॥ ॥जसः कार्यं प्रति विभाषेति। तत्कथं व्यवस्थितविभाषेयं यद्वा जसीति कार्यापेक्षया अधिकरणसप्तमी जसाधारं यत्कार्यं शी
भावाख्यं तत्र कर्त्तव्य इति अस्येत्वात् ङः जस इ जसी शाव् नपाये सपान पुंसकड्ढ लत्वे सप्तम्या लुका निर्देशः जस इकारे कर्त्तव्य इति। किं कारणमेवं व्याख्यायते
तत्राह। अकजर्थीति। हि शब्दो यस्मादर्थे यद्यविशेषेण विकल्पः स्यात् कतरकतमक इति स्थिते तु तस्याप्यर्थे विवक्षयोत्र असामवस्था पो अकच्च हि पक्षिमपि प्र
निसंज्ञा स्यात् ततश्च न तस्मध्यपातित्वात् अकच्च न ग्रहणो शीभावः स्यात् अके तु सति न भवति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥प्रथम॥ ॥उभयशब्दस्येत्यादि॥ उभावयवावस्य उभादुदात्तो नित्यमिति तयपोऽयजादेशः स्थानिवद्भावात् तिवैरायं तयबन्तः तथापि गणे पाठात् नित्यमेव संज्ञा भवति। ननु गणे पाठः उभे उभयस्मिन् उभयेषामित्यादिषु कार्यः इह तयग्रहणस्य द्वितये द्वितया इति। उभयशब्दात् जस्युभयप्रसंगोऽपरत्वाद् इयमेव विभाषा प्राप्नोतीति नैष दोषः। अन्तरंगा नित्या संज्ञा विभक्त्यानपेक्षत्वात् इति सैव प्रवर्तते। काकचोर्यथा योगं हन्ति इति। नेमशब्दोऽल्पक वाची हन्तिः अनेषु कस्पेसेषप यापोगार्थः कः पुनर्द्वेषो नेमशब्दे पठितुम् कार्यं प्रतिनियमात् तदपक्षे कोऽपि स्यात् अस्तु नेमके नेमकाः निरल्प्यक वितस्यात् इह हणे नग्र हणात् इस्मिन्निक ल्पे सति एतद्रूपद्वयं भवत्येव समासे। प्रथमादिषु पक्षे अकज्भवतीत्येवं प्रयोगे ग्रन्थः॥ पूर्व॥ असंज्ञायामिति संज्ञायाम सत्यां पूर्वादियश्वेत्यसंज्ञा रूपान भवं

॥प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च॥ विभाषा जसीति वर्त्तते। द्वन्द्व इति निवृत्तं। प्रथम चरम। तय। अल्प। अर्द्ध॥ कतिपय नेम। इत्येते जसि विभाषा सर्वनामसंज्ञा भवंति। प्रथमे। प्रथमाः। चरमे। चरमाः। द्वितये। द्वितयाः। अल्पे। अल्पाः। अर्द्धे। अर्द्धाः। कतिपये। कतिपये। कतिपयाः। नेमे नेमाः। तय इति तयप् प्रत्ययः। शिष्टानि प्रातिपदिकानि। तत्र नेम इति सर्वादिषु पठ्यते तस्य प्राप्ते विभाषा। अन्येषामप्राप्ते। उभयशब्दस्य तयप्प्रत्ययान्तस्य गणे पाठान्नित्या सर्वनामसंज्ञा इहापि जस्कार्यं प्रतिवि भाषा। काकचोर्यथा योगं हन्ति॥ ॥पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां॥ पूर्व। पर। अवर। दक्षिण। उत्त र। अपर। अधर। इत्येतेषां गणे पाठात् सर्वेषां नित्यायां सर्वनामसंज्ञायां प्राप्तायां जसि विभाषा आरभ्यते। पूर्वादीनि विभाषा ज सि सर्वनामसंज्ञानि भवंति व्यवस्थायामसंज्ञायां स्वाभिधेयापेक्षोऽवधिनियमो व्यवस्था। पूर्वाः। पूर्वे। पराः। अवरे। अवराः। द क्षिणाः। उत्तरे। उत्तराः। अपरे। अपराः। अधरे। अधराः। व्यवस्थायामिति किं। दक्षिणा इमे गाथकाः प्रवीणा इत्यर्थः। असंज्ञायामिति किं। उत्तराः कुरवः। सत्यामेव व्यवस्थायामियं नेषां संज्ञा ३८

नीत्यर्थः। व्यवस्थानियमः स चात्रार्थाद् वव्यपेक्षत्वात् स्वाभिधेयापेक्ष इत्या दि पूर्वादीनामभ्यान्तरां स्वाभिधेयो दिग्देशकालस्वभावोऽर्थः तमपेक्षते तेन नवपि क्षते पः स्वाभिधेयापेक्षः अवधिर्मर्यादा पूर्वदेशस्य यत्पूर्वत्वं तत्परदेशापेक्षम् यानियमः सा व्यवस्थेति तावद्विवक्षितं तत्संगम्यमानायां पूर्वादिशब्दानां स्वाभिधेय एव वर्तिमानामिति पंसंज्ञा भवति न तु गाथकाः प्रवीणा शब्दः सापेक्षमर्थमाचष्टे

+ प्रवीणा इत्यर्थ इति। अनेन व्यवस्थाभावमाह न हि १

॥स्वमज्ञाति॥ अज्ञातिधनाख्यायामिति सामर्थ्यमाह न चेदित्यादि। पत्रशब्दो न स्वनिरपेक्षः स्वशब्दो ज्ञातिधने स्वरूपेणाचष्टेत आत्मीयसंज्ञारूपेण प्रवर्तते तयोः। आ
त्मीया इत्यर्थ इति पुत्राणां गवां च स्वत्वं पित्रा ज्ञातिधनत्वेन नैकाकारेण तत्र वर्तते किं तर्हि आत्मीयाकारेणेत्यर्थः। आत्मग्रहणोपलक्षितं ज्ञातिधनयोः पर्यवसान
त अत्रापि प्राप्नोति। धूमायंत इत्यादि। यथोल्मुकान्याग्निष्ठानि असंहतानि धूमायंते संहतानि तु प्रज्वलंतीति द्वते ज्ञातयोपीत्यर्थः। स्वा ज्ञायत इति स्वशब्दस्याने
कार्थत्वात् तदर्थस्य अव्यभिचारणार्थं पर्यायशब्दापि ज्ञातिशब्दस्य प्रयोगः। स एव तु न प्रयुक्तः निरंकुशाः कवयश्च इति। अंतरं॥ ॥बहिः॥ इत्यनावृतो देश उच्यते।
बहिरित्यनेन योगो बहिर्योगः इतीति शब्दाध्याहारेण तृतीयासमासः स चानावृतस्य बाह्यस्य वस्तुनो भवति। उपसंवीयते परिधीयते वासोन्तरेणोपसंव्यानं

पे ४ प्ती

॥स्वमज्ञातिधनाख्यायां॥ अत्रापि नित्या सर्वनामसंज्ञा प्राप्ता जसि विभाष्यते। स्वमित्येतच्छब्दरूपं जसि विभाषा सर्वनामसंज्ञं भवति न
चेत् ज्ञातिधनयोः संज्ञारूपेण वर्तते। स्वे पुत्राः। स्वाः पुत्राः। स्वे गावः। स्वा गावः। आत्मीया इत्यर्थः। ज्ञातिप्रतिषेधः किं। धूमायंत इवाग्नि
ष्ठाः प्रज्वलंतीव संहताः। उल्मुकानीव मे भांति स्वा ज्ञातयो भरतर्षभ। अधनाख्यायामिति किं। प्रभूताः स्वा न दीयंते प्रभूताः स्वा न भुज्यं
ते। प्रभूता धना इत्यर्थः॥ ॥अंतरं बहिर्योगोपसंव्यानयोः॥ ॥अत्रापि पूर्वेण नित्या सर्वनामसंज्ञा प्राप्ता जसि विभाष्य
ते। अंतरमित्येतच्छब्दरूपं विभाषा जसि सर्वनामसंज्ञं भवति बहिर्योगे उपसंव्याने च गम्यमाने। अंतरे गृहाः। अंतरा गृहाः। नगरबाह्याश्चां
डालादिगृहा उच्यंते। अंतरे शाटकाः। अंतराः शाटकाः। उपसंव्यानं परिधानीयमुच्यते न प्रावरणीयं। बहिर्योगोपसंव्यानयोरिति किं। अ
नयोर्ग्रामयोरंतरे तापसः प्रतिवसति। अस्मिन्नंतरे शीतान्युदकानि। मध्यप्रदेशवचनोऽन्तरशब्दः। गणसूत्रस्य चेदं प्रत्युदाहरणं। अ
पुरीति वक्तव्यं। अंतरायां पुरि वसति। विभाषाप्रकरणे तीयस्य ङित्सु सर्वनामसंज्ञेति उपसंख्यानं। द्वितीयायै द्वितीयस्मै। तृतीयायै तृती

कर्मणि ल्युट्। नगरबाह्या इति बहिर्योगं दर्शयति परिधानीयमंतर्वासः प्रावरणीयं बहिर्वासः। अंतरे तापस इति। अत्र संज्ञाभावात् ङेः स्मिन् भवति जसीति वर्तमाने कथं
सप्तम्यंतं प्रत्युदाहृतमित्याह गणसूत्रस्य चेत्यादि। गणसूत्रमप्येवमेव पठ्यते। कस्मात्पुनरस्य तत्स्थाने गणसूत्रस्य प्रत्युदाहरणं दीयते न सूत्रस्य। अपुरीति वक्तव्यमिति
वक्तव्यमिति तद्गणसूत्रविषयं यथा स्यादिति तत्प्राप्तिप्रस्तावः सूत्रस्याप्यनन्यादिशा प्रत्युदाहरणं गम्यत इति न पृथग्दर्शितं। अंतरायामिति। प्राकाराद्बहिर्विनिर्गतामित्यर्थः।
यद्यपि गणसूत्रे तेन शब्दः पठ्यते तथापि तस्यैव सर्वनामत्वात् टापा सहैकादेशोपि तद्ग्रहणेन गृह्यत इति स्यात् प्रसंगः। लिंगविशिष्टपरिभाषया वा टाबंतस्यैव ग्रहणा
प्रसंगे वचनं। विभाषाप्रकरण इत्यादि। यथायमर्थः सिद्ध्यति तथा विभाषा द्वितीयातृतीयाभ्यामित्यत्र वक्ष्यामः॥ ३९ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥स्वरादिनिपातमव्ययं॥ तसिलादिरिति। पंचम्यास्तसिलित्यारभ्य एधाच्चेत्येतदंतः। शस्तसी। बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्। प्रतियोगे पंचम्यास्तसिः। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। द्वि
त्रिचतुर्भ्यः सुच्। आस्थालाविति। एण्। आमिः। अयाः। प्रत्नपूर्वप्रत्नथाः। संघघकर्मविधिः। विभाषा साति कार्त्स्न्ये देये त्रा च। अमु च छन्दसि। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे। मुनिपातान्व स्यंत इति।
अथ किमर्थं स्वरादीनां पृथग्ग्रहणं क्रियते न चादिष्वेव पठ्येरन्। न। चादीनामसत्त्ववचनानां निपातसंज्ञा स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानां चाव्ययसंज्ञा स्वस्तिवा
चयति स्वपश्येति क्रियासंबंधेनेक्यस्पष्टि दर्शनात् सत्त्ववाचित्वे। अथ प्राग्रीश्वरान्निपाताः स्वरादीनि वा तृपोऽसत्त्व इत्येवं सूत्रन्यासः क्रियेत कः पुनरत्र विशेषः। तत्र वा स्वरादि
ग्रहणं क्रियेत अत्र वा किंच। निपात एकाजनाङिति प्रगृह्यसंज्ञा स्वरादीनां मा भूत्। किमोऽत्। दक्षिणादाच्। एकाच्। तद्धितः। के अभूततद्भावे कृतः। कृत एकाचः। तस्येति। अथवा
दिरेकाजनाङिति क्रियमाणे तत्र चादीनामसत्त्ववचनत्वं विशेषणं न लभ्यते। नैष दोषः। चादयोऽसत्त्व इत्यत्रासत्त्वग्रहणं चादीनां पाठविशेषणं यथा तिरोगोत्रादीनां तत्र कुत्सनाभीक्ष्ण्य

॥स्वरादिनिपातमव्ययं॥ स्वरादीनि शब्दरूपाणि निपाताश्चाव्ययसंज्ञानि भवंति। स्वर्। अंतर्। प्रातर्। एते अंतोदात्ताः पठ्यंते। पुनर्। आद्युदात्तः। सनुतर्। उच्चैस्।
नीचैस्। शनैस्। ऋधक्। आरात्। ऋते। युगपत्। पृथक्। एतेऽपि सनुतरप्रभृतयोऽन्तोदात्ताः पठ्यंते। ह्यस्। श्वस्। दिवा। रात्रौ। सायं। चिरं। मनाक्। ईषत्। जोषं।
तूष्णीं। बहिस्। आविस्। अवस्। अधस्। समया। निकषा। स्वयं। मृषा। नक्तं। नञ्। हेतौ। अद्धा। इद्धा। सामि। एतेऽपि ह्यस्प्रभृतयोऽन्तोदात्ताः पठ्यंते। सायम्
इत्यत्रान्तोदात्तः। वत्। वदन्तमव्ययसंज्ञं भवति। ब्राह्मणवत्। क्षत्रियवत्। सनात्। सनत्। तिरस्। एते आद्युदात्ताः पठ्यंते। अंतरा। अयमन्तोदात्तः। अंतरेण। ज्यो
क्। कं। शं। सहसा। विना। नाना। स्वस्ति। स्वधा। अलं। वषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मुधा। मिथ्या। क्त्वातोसुन्कसुनः। कृन्मकारांतः
संध्यक्षरांतः अव्ययीभावश्च। पुरा। मिथो। मिथस्। प्रबाहुकम्। आर्यहलम्। अभीक्ष्णं। साकं। सार्द्धं। नमस्। हिरुक्। तसिलादिस्तद्धित एधाच्पर्यंतः। शस्तसी।
कृत्वसुच्। सुच्। आस्थालौ। च्व्यर्थाश्च। अम्। आम्। प्रशान्। स्वरादिः। निपाता व्यक्षंते। प्राग्रीश्वरान्निपाता इति। च। वा। ह। अह। एव। एवम्। इत्यादयः।
((
अव्ययप्रदेशाः अव्ययादाप्सुप इत्येवमादयः। सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययं ४०

ग्रहणं गोत्रादीनां न तेन यत्र यत्र चादिग्रहणं तत्र सर्वत्र सर्वत्र विशिष्टानामेव ग्रहणं। तत्राप्ययमप्यर्थः। उभे संज्ञे न कर्तव्ये भवतः अव्ययं निपात इति। कथं प्राग्रीश्वरान्नि
पाता इति वा अव्ययानीति वा सूत्रं कर्तव्यं ततः स्वरादीनि तद्धितश्चासर्वविभक्तिः पाठवदव्ययीभावश्चेति। तत्र चार यो सत्त्व इत्सामान्यायावदधिरीश्वरे विभाषा कृञीति
तत्र यस्मिन् प्रदेशे निपातग्रहणं तत्र चादिग्रहणमस्तु अव्ययप्रदेशेष्वव्ययग्रहणं निपातग्रहणं चेति। नन्वेतु तथा न कृतमित्येव। अव्ययमित्यन्वर्थसंज्ञेति दर्श
यति सदृशं त्रिष्वित्यादि। श्रुतिरियं माथर्वणी प्रणवविषया त्रिषु लिंगेषु स्त्रीपुन्नपुंसकेषु सदृशो लिंगविशेषप्रतिपादनेः सामर्थ्यात्। विभक्तिष्विति। कारके
षु वचनेष्विति एकत्वादिसंख्यासु। अव्ययाभावस्य शक्तिलिंगविशेषयोगेऽपि वचनादव्ययत्वं यस्मान्न व्येति नानात्वं गच्छति सत्त्वधर्मान्नगच्छतीत्यर्थः। तत्तस्मा
दव्ययमिति। पृषोदरादित्वान्नव्येतीति तदव्ययमिति वा। किं पुनः प्रयोजनमन्वर्थसंज्ञाकरणे। उपसर्जनप्रतिषेधः। अत्युच्चैसौ अत्युच्चैस इति अतिक्रांतप्रधानस्यात्र सत्त्वधर्मं परि
ग्रहात्। उच्चैः शब्दः पठ्यते कः प्रसंगस्तदंतस्य। एतज्ज्ञापयत्याचार्यः अस्त्यव्ययसंज्ञायां तदंतविधिरिति तेन परमस्वः परमोच्चैरिति स्वरादिप्राधान्येन तदंतस्यापि भवति। कुरु

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥तद्धितश्च॥ ॥रुहृपघपिसंज्ञाविधौ प्रत्ययग्रहणात् तदन्तविधिप्रतिषेधः तथापि केवलस्य तद्धितस्य संज्ञायां प्रयोजनाभावात् तदन्तविधिर्विज्ञायत इत्याह तद्धितान्तः श
ब्द इति। अकच्चावव्ययातिपदिकस्य मध्ये वर्तत एवाविधीयते तेन भवकपादाय सुप इत्यत्राप्यव्ययादाप्सुप इति तस्य सुपो लुक् न तु परस्य अन्तु च्चैस्साविसादावपि प्रसंगात्। ननु तु च्चैस्तुल्यार्थ
नामपरिकृच्छवृत्तित्वमव्ययस्येति। अत्रापि पूर्ववत् स्वाव्ययस्य ग्रहणात् सर्वाविभक्तिर्यस्य संबंधिनी न प्रवर्तते सोऽसर्वविभक्तिः। किं पुनरिदं तद्धितस्य विशेषणम् आहोस्विन्नेदं
न स्य कथं वेदं तद्धितस्य विशेषणं कथं वा तदन्तस्य पदिसर्वाविभक्तिर्यस्य तं संबंधिनी न भवति कारणत्वेन यस्मात् स सर्वाविभक्तिः कारणं न भवति यथा पंचभ्यास्तलिसादि
विति कार्यमन्यपदार्थः तदा तद्धितस्य विशेषणं भवति यत्र तद्धितस्यैव तु उत्पत्तिः न तदन्तस्य एवं विशिष्टेन च तद्धितेन तदन्तविधौ तादृशान्तद्धितान्तोऽव्ययमित्यर्थो भवति। अथ
तु सर्वाविभक्तिर्यस्य कार्यत्वेन संबंधिनी न भवति यस्मात् सर्वाविभक्तिर्नोत्पद्यत इति कारणमन्यपदार्थः तदा तदन्तस्य विशेषणं भवति न हि तद्धितमात्रान्न विभक्त्युत्पत्ति
प्रसंगः तत्र पूर्वस्मिन्पक्षे विनाप्यनेन सूत्रेण स्यात् न हि विनन्त्रप्रत्यासत्तिमित्यत्र प्रति निपतति काचिद्विभक्तिरस्मिन् तेनेति सर्वविभक्त्यन्तात्प्रतिविहितस्मानाद्वाभावाजातो भवत इत्यव्ययेभ्यस्तनि
संज्ञेभ्यः सामान्यविहिताः स्वादयो विधीयंत एवेति यच्चैवैयपि भवदादिप्रयोगे तसिलादयो विधीयंते इतरतराभ्योऽपि दृश्यन्त इति तेऽपि स भवानतो भवानतं भवंतं ततो भवंत

॥ ॥ ॥तद्धितश्चासर्वविभक्तिः॥ ॥तद्धितान्तः शब्दोऽसर्वविभक्तिरव्ययसंज्ञो भवति॥

मितिसर्वविभक्त्यन्तेभ्य उत्पद्यत इति तत्रापि न स्यात् तस्यापत्यं तत्र भव इत्यादौ च षष्ठ्यादिका एकैकविभक्तिर्निमित्तं न तु सर्वैस्तोयगवादावतिप्रसंगश्चेति द्वितीयपंच
म्याश्रित्साह। यस्माद्दिसादि। ततइत्यादौ प्रागादिशो विभक्तिरिति तसिलादीनां विभक्तित्वात्स्यादाघं तत्वां कथं पुनरेते असर्वविभक्तयः यावता पञ्चसंख्यासंभवन्ति तत्राप
सुपदेशः अव्ययेभ्यस्तनिः संज्ञेभ्यः इत्यस्मिन् पक्षे अव्ययादाप्सुप इति ज्ञापकात् अपरो च सर्वविभक्तयः अथ संख्याकर्मादयश्च साहीनामर्थाः तेन सहास्यैकत्वाकारतेति
यश्च तत्रोऽविभक्तित्वमेवासत्वभूतार्थानाम् आपद्यते उपते। द्व्येकयोर्द्विवचनैकवचन इत्यत्र एकस्मिन्नित्यपनीय एकवचनमिति एवं च सूत्रं कर्तव्यं ततो द्विवक्तो द्विव
चनबहुवचने इति तत्रैकवचनमेकस्मिन्नपि भविष्यति संख्याकर्माघभावे च अमामे प्रायगणार्थत्वादेकवचनमित्यस्य सूत्रस्य। द्वित्वबहुत्वयोरप्राप्तं द्विवचनब
हुवचनाभ्यां बाध्यते तत तथापि सत्ववचनेभ्योऽपि सप्तानां विभक्तीनां सप्ताप्येकवचनानि भवंति। अव्ययीभावादप्येवमेव तावता पि नाव्ययीभावात् तृतीयासप्तम्योरि
त्यस्योपपत्तेः नदिदमुच्यते एकवचनमुत्सर्गः करिष्यत इति एवं स्थिते यस्मात् सर्वाविभक्तिर्नोत्पद्यते त्येकवचनेन न विग्रहः अव्ययवका तस्मिंस्तिः सर्वशब्दः यस्य
त्रिकस्य विभक्तिसंज्ञा विहिता तन्निरवशेषं यस्मान्नोत्पद्यते किं तु तदेशमेवेत्यर्थः। तदाह॥

© Dharmartha Trust J&K. Digitized by eGangotri

यस्मात्सर्वविभक्तिरिति।यदि तु सर्वा विभक्तय इति बहुवचनेन विग्रहोऽत्र ततः सर्वान्नीन इतिवत् प्रकारकार्त्स्न्येऽपि सर्वशब्दस्य संभवात् एकवचनमात्रोऽसत्तावपि सर्ववि
भक्तयः स्युः असत्त्ववचनेभ्य उत्पद्यन्त इति न स्यात् सर्वविभक्तित्वमिति भावः।इह ते नैकदिक तस्मिंश्चैतस्मिन्नर्थे विधीनपोरप्यणुत्तमोरणइत्यप्रधानः तस्मिन्न् इत्योपम
ज्जीनत्त्वेनापार्थप्रधानइतित एवामत्वे वचनतात तद्धित इति किमिति।असर्वविभक्तिरव्ययमिति वा कम्माभक्तार्वमेवप्रकरणात्।ये हि स्वरादयो येव निपाताः ये च कृन्मेजन्ताः
ये च क्त्वादयो ये चाव्ययीभावः सर्वे ते असर्वविभक्तय इति।एतेभ्योऽपि समस्तापि विभक्तिषु केकमेव वचनमुत्पद्यत इति स्यात् अतिप्रसंग इति कर्तव्यं तद्धितग्रहणं
तस्मिंश्च कृते प्रकरणमपि कर्तव्यमिति भावः।विंशत्यादयस्तु कृतेकशेषाद्विवचनबहुवचनान्ता अपि भवन्तीति नासर्वविभक्तयः।एवं इयत्त्रयोभयशब्दास्त्वपर्या

॥यस्मान्न सर्वविभक्तेरुत्पत्तिः सोऽसर्वविभक्तिः।ततः।यतः।तत्र।यत्र।तदा।सर्व
दा।सदा।तद्धित इति किं।एकः।द्वौ।बहवः।असर्वविभक्तिरिति किं।औपगवः।औ
पगवौ।औपगवाः॥ ॥४१॥ ॥श्रीः॥ ॥श्रीशः॥ ॥श्रीश॥

ताः एवमपि गोदयोरहरत्नवोग्रामः अदूरभवश्चेत्यणोवरणादिभ्यश्चेतिलुपि युक्तवद्भावात् सर्वासु विभक्तिषु द्विवचनस्योत्पत्तेरत्र इति प्रसंगः स्यादयं पर्यनु
योगो यदि तद्धितान्तो गोदशब्दः वयं तु योगाप्रख्यानाद्योगप्रमाणे च तदभावे दर्शनं स्यादिमधीयाना नैवं पर्यनुयोज्याः।एवमपि यं स्मायास्संज्ञासंघसूत्राध्य
यनेषु संज्ञायां स्वार्थ उत्पाद्याः ये चैवयं चकाः अकुनयः अत्र प्राप्नोति यच्च जित्वंयं पचतिकल्पमित्यादौ च एकवचनमेवोत्पद्यत इति स्यादेवातिप्रसंगः तस्मा
त्तद्धितानां पाठ एवाश्रयणीयः तदाह सिद्धं तु पाठात्तसिलादयः प्राक्पाशपः शसप्रभृतयः प्राक् समासान्तेभ्यः मान्तः कृत्वोर्थः तसिवती नानाञाविति॥ ॥

॥ ॥४१॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥कृत्मेजन्तः॥ ॥अत्रापि पूर्ववत्तदन्तस्य संज्ञेति निष्ठिते मेजन्तग्रहणात् कृदन्तस्य विशेषणां कृदन्तं मेजन्तम् अव्ययमिति कृत एव वा कृद्यो मेजन्तः तदन्तमव्ययमिति तत्रा
घोषे प्रतामो प्रतामः लवमाच शृतिषि विक्षि पिपि लोपे कृतिलेन दूद स्वितिहै ह्नोलो: अत्रापि प्राप्नोति भवति तेन तत्प्रत्ययप्लक्षणेन कृदन्तं मेजन्तं च शूपतेर
ति मंत्रेषेवं दृश्याद्वितीयपक्षमा प्रिलाद्‌। कृधद्‌ति। नवत्रापि कारयोच कारस्यामन्त स्यनप्राप्नोति पूर्वत्र तु लिटः कृत्वा लिडं अत्रापि स्वरादिषु मिति पाठातसि
द्धं अथापि तन्त्र तद्धितस्य पाठः एवमपि कृदन्तत्वादुत्पन्नानां सुपामामश्‌ तिलुग् भविष्यति लेरितिहि तत्रानुवर्तते। स्वादुंकारमिति। स्वादुमि णमुल स्वादुमित्य

॥कृत्मेजन्तः॥ कृद्यो मकारान्त एजन्तश्च तदन्तं शब्दरूपमव्ययसंज्ञं भवति। स्वादुंकारं भुंक्ते। संपन्नंकारं भुंक्ते। लवणंकारं भुंक्ते। ए
जन्तः। वक्षे रायः। भागमेवरथानो। कृलेटूनायजीवसे। ज्योक्च सूर्यं दृशे। वक्षे इति वचेस्तुमर्थे सेसेनितिसेप्रत्ययेकृते च कृते रूपं। एषट्
तिद्द्राः संप्रसारणेगुणाषत्वे च कृते रूपं। जीवसे इति जीवेः असेप्रत्यये रूपं। दृशे इति दृशेः केप्रत्यये निपात्यते। दृशे विख्ये चेति। अत
ग्रहणमोपदेशिकप्रतिपत्त्यर्थं। रहमाभूत। आधये। चिकीर्षवे। कुंभकारेभ्य इति॥ ॥क्त्वातोसुन्कसुनः॥ ॥क्त्वातोसुन्कसुन इत्ये
वमन्तं शब्दरूपमव्ययसंज्ञं भवति। कृत्वा। हृत्वा। तोसुन्। पुरा सूर्यस्योदेतोराधेयः। पुरा वत्सानामपाकर्तोः। भावलक्षणे स्थेण्कृञ्
वदिचरिहुतमिजनिभ्यस्तोसुन्प्रत्ययः। कसुन्। सृपितृदोः कसुन्। एराकृत्स्माभिविसृपो विलिखः। शृता। पुराजर्तमुखान्तदः॥ ॥अव्य
यीभावश्च॥ ॥अव्ययीभावश्च समासोऽव्ययसंज्ञो भवति। किंप्रयोजनं। लुक्मुखस्वरोपचाराः। लुक्। उपाग्नि प्रत्यग्नि शलभाः
पतन्ति। मुखस्वरः। उपाग्निमुखः। प्रत्यग्निमुखः। मुखं स्वांगमिति सुत्रस्यपदान्तोदात्तबाधनामव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्य इति प्रतिषेधात्

धग्रहणात्संपन्नंकारमित्यपि भवति स्वादुमी तिनिपातनात्पूर्वपदस्य मान्तत्वं येन विधिस्तदन्तस्येत्येव सिद्धे स्वार्थकमन्तग्रहणं तत्राह। अन्तग्रहणमित्यादि निस्यो गेब्रुद्धी
हि विज्ञानार्थोपदेशिकप्रतिपत्तिः। आधायरत्यादि। आरूर्वाहाञः उपसर्गेयोः किः। चतुर्थ्येकवचने घेर्डितिआधये भवत्यप्रसक्तेजन्तः नोपदेशे। एवं चिकीर्षवे करोतेः स
न्नन्ता तच्छीलादिष्वप्यसिसन्सु उः। कुंभकारेभ्यः कर्मण्यण। अन्तः बहुवचने झल्येत् अत्राव्ययसंज्ञायामव्ययादिति लुक्स्यात्। सन्निपातपरिभाषया प्येतन्सिद्धं तथा लक्षणप्रति
पदोक्तयोः प्रतिपदोक्तस्यैवेति अन्तग्रहणात्तु यत्नोत्तरं द्रष्टव्यं॥ ॥अव्ययीभावश्च॥ ॥लुङ्मुखस्वरोपचारा इति। अत्र मुखस्वरोपचारौ निवर्तमानतयाप्रयोजनं

© Dharmartha Trust J&K. Digitized by eGangotri

का·प१९१
४२

पूर्वपदप्रकृतिस्वरएवेति। समासस्योर्णान्तोदात्तत्वं। उपपयःकामइति। शीलिकामिति स्वाचरित्गोया: कर्म्मणि घञ्जेतेनगाबङ्गी हिः। अत्र मुखस्वपनि हन्तिरेख
म्। स्वात्मणे ज्ञनं लुकृताव्ययीभावाद्र तो मिति विशेषप्रतिषेधात् सिद्धः। अतः कृकमिकंसेत्यत्र चानुत्तरपदस्थस्येति वर्त्तते नन्व मदव्ययकार्यं संभवति। उपा
ग्निकमिसकच उपकुंभंमम इति मुमप्रतिषेधः। उपकुंभीभूत इत्यत्र च्वाविसमोपसंख्यानिकः प्रतिषेधः। उपाग्न्यधीयाने तिसुवामं त्रित इत्यस्योपसंख्या
निः प्रतिषेधः। तत्कुतोयं कार्यनियम इत्यत आह सर्वमिदमित्यादि। इह चेत्यादिना न लोकाव्ययेत्यत्र यदव्ययमिति अव्ययप्रतिषेधेनो सुन्कसुनोः प्रतिषेधः इति न
सावकाशमतां दर्शयति॥ ॥शिसर्वनामस्थानं॥ ॥कुंडानीति। जश्शसोः शिः। सर्वनामस्थान इति वर्त्तमानेन नपुंसकस्य झलचः इति नुम्। सर्वनामस्थाने चा

पूर्वपदप्रकृतिस्वरएवभवति। उपचार। उपपयः कारः। उपपयः कामः। विसर्जनीयस्थानिकस्य सकारस्य उपचार इ
ति संज्ञा तत्राव्ययीभावस्याव्ययत्वे अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्येति पर्युदासः सिद्धो भवति। स
र्वमिदं काण्डं स्वरादिष्वपि पठ्यते। पुनर्वचनमनित्यत्वज्ञापनार्थं। तेनायं कार्यनियमः सिद्धो भवति। इह च पुरा सूर्यस्योदे
तोराधेयः। पुरा क्रूरस्य विसृपः इति न लोकाव्ययनिष्ठेति षष्ठीप्रतिषेधो न भवति॥ ॥शिसर्वनामस्थानं॥ ॥शि इ
त्येतत्सर्वनामस्थानसंज्ञं भवति। जश्शसोः शिरादेशः। कुण्डानि तिष्ठन्ति। कुण्डानि पश्य। दधीनि मधूनि त्रपूणि। जतूनि।
सर्वनामस्थानप्रदेशाः सर्वनामस्थाने चासंबुद्धावित्येवमादयः॥ ४२॥

संबुद्धाविति दीर्घः। यद्यपि जश्शसोः शिर्नपुंसकाच्चेति विहितस्य शी। अथ हृस्वशब्दापेक्षया नपुंसकह्रस्वत्वे शि इति रूपं संभवति तथापि लाक्षणिकत्वान्नत
स्य ग्रहणं। सर्वनामस्थानप्रदेशेषु शिग्रहणे सुयेग्रहणं न स्यात्। शिसुयेरितिवचनेन नपुंसकसुयेपि ग्रहणं प्राप्नोति। अतः संज्ञा तावत्कर्त्तव्या किमर्थं तु महती
क्रियते केचिदाहुः। सर्वनि नाम तिष्ठत्यस्मिन्निति सर्वनामस्थानं नाम प्रातिपदिकं सर्वशब्दोवयववाची तस्य वचनः सर्वावयवयुक्तं यत्र नाम तिष्ठतीत्यर्थः तेना
न्यत्र सन्नेनाम तिष्ठतीत्यर्थो गम्यते किं सिद्धं भवति अपेपुषइत्यादौ संप्रसारणे कृते तस्य सर्वकृतस्पष्टो निहृतिः सिद्धा भवति अन्यथा निहृत्तिकारणाभावात् अपाति

४२

© Dharmartha Trust J&K. Digitized by eGangotri

॥सुडनपुंसकस्य॥ सुडिति पंचवचनानीति। अनेनौटष्टकारेण प्रत्याहारो न टा शाव् इत्येतिदर्शयति। आदिरंत्येनेत्यत्रांत्यत्वप्रयुक्तायस्येत्संज्ञा तेन प्रत्याहारो ल
कारेत्वकारस्येत्संज्ञाविधानसामर्थ्यात्प्रत्याहार इति भावः। नपुंसकादन्यत्रेति। अनेन पर्युदासत्वं दर्शयति प्रसज्यप्रतिषेधे हि कुंडानि तिष्ठंतीति जसः शेः पू
र्वेण णशाविति तस्या अपि प्रतिषेधशंका स्यात् अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति परिहरेन्न स्यात्। असमर्थसमासश्चाश्रयणीयः स्यात्। नपुंसके
न विधिरिति स्त्रीपुंससंबंधिनः सुटः उपादानात्। नप्रतिषेध इति। विधिप्रधानत्वात्पर्युदासस्य। तेनेत्यादि। यत एवं नपुंसके नास्य व्यापारः तेन जसो यः

॥सुडनपुंसकस्य॥ सुडिति पंचवचनानि सर्वनामस्थानसंज्ञानि भवंति नपुंसकादन्यत्र नपुंसके न विधिः न प्र
तिषेधः तेन जसश्शेः सर्वनामस्थानसंज्ञा पूर्वेण भवत्येव। राजा। राजानौ। राजानः। राजानं। राजानौ। सुडिति किं
। राज्ञः पश्य। अनपुंसकस्येति किं। सामनी। वेमनी॥ ॥नवेति विभाषा॥ ॥नेति प्रतिषेधो वेति विकल्पः
तयोः प्रतिषेधविकल्पयोर्विभाषेति संज्ञा भवति॥ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

शिः तस्य पूर्वेणासंज्ञा भवतीति। सामनी इति नपुंसकाच्चेति शीभावः। विभाषा ङिश्योरित्यल्लोपाभावे दीर्घो न भवति॥ ॥नवेति॥ न वा शब्दोयमेकनिपातो
प्यस्ति प्रतिषेधवाची न वोक्तार्थत्वादिति पक्ष्या। तस्य ग्रहणे विभाषा दिक्समासे इति प्रकृते न बहुव्रीहाविति प्रतिषेधो नर्थकः स्यात् विभाषाप्रदेशेषु च
न शब्दग्रहणे गौणदेयः स्यात्। अत एव संस्थानावाचिनो नकारांतस्यापि अग्रहणं प्रस्त्र अस्त्रीलिंगवचनोपि न गृह्यते प्रदेशो घ्यसंभवात्। नहि विभाषा श्वेरित्यादौ
विधेयस्य नवपुरणात्वं स्त्रीलिंगता वा संभवति तस्मान्निपातसमुदायोयमित्याह। नेति प्रतिषेध इत्यादि। तयोः प्रतिषेधविकल्पयोरिति नेनार्थयोर्वा सं
ज्ञेति दर्शितं। ननु स्वरूपं शब्दस्येति वचनान्नवाशब्दस्यैव ग्रहणं युक्तं तत्राह॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥इति करणाइत्यादि कर्माणि स्युः। इति आर्थी करणस्य सोऽर्थः संज्ञिनो निर्देशोपयास्यादित्येवमर्थः। इति ... द्वौ हि पदार्थौ विपर्ययौ सम्भवतः तत्र लोके व्याप्यार्थप्रधानेषु शब्देष्विति शब्दः प्रयुक्तोऽर्थपदार्थकत्वात् प्रकृतशब्दपदार्थकत्वमवस्थापयति। अतो ... अयमाहेति। इह तु व्याकरणे स्वं रूपमिति वचनात् स्वरूपं पदार्थः तत अन्यत्र वा शास्त्राणां पर इति शब्दः प्रयुक्तः तोऽस्य स्वपदार्थता ... अर्थपदार्थकत्वमवस्थापयति। तस्मादर्थयोरेव संज्ञा। विभाषाप्रदेशेषु विभाषादिना प्रतिषेधविकल्पयोरेकस्मिन्नेव योगे सह उपस्थापनं न विषयभेदेनेति दर्शयति। तथा सति विषयभेदो दुर्ज्ञानः स्यादिति भावः। तत्रेत्यादिना सर्वप्रतिषेधः प्रवर्तते पश्चाद्विकल्प इति दर्शयति। यदि तु पूर्वं विकल्पः प्रवर्तेत पश्चात् प्रतिषेधः ततो विकल्पप्रवृत्तिरनर्थकैव स्यात्। आनुपूर्व्या च संज्ञा विधिवाक्येऽस्तु तैव प्रदेशवाक्ये प्यास्य ... तु सुक्ता उभयत्र विभाषाः प्रयोजयन्तीति। प्राप्तविभाषायामप्राप्तविभाषायां च संज्ञाकरणस्यानुपयोगात्। तथा हि। प्राप्तविभाषायां तावद् विभाषोपपदेन प्रतीयमानः इति स्वरितेति रस्यादिना निस्मात्मनेपदे प्राप्ते विभाषा विधीयते विभाषाशब्दश्च वा अन्यतरस्यामित्यादिवद् विकल्पवाचित्वेन प्रसिद्धः। तेन भावयोः प्रति

॥इति करणार्थनिर्देशार्थः। विभाषाप्रदेशेषु प्रतिषेधविकल्पावुपतिष्ठेते। तत्र प्रतिषेधेन समीकृते विषये पश्चाद्विकल्पः प्रवर्तते। उभयत्र विभाषाः प्रयोजयन्ति। विभाषा श्वेः। शुशाव शिश्वाय। शुशुवतुः। शिश्वियतुः। विभाषाप्रदेशाः विभाषाश्वेरित्येवमादयः॥ ४३ ॥ ॥

पादयोः भावांशस्य प्राप्तत्वादभावांशपरता विज्ञायते भावांशस्तु स्थित एव। अप्राप्तविभाषायामपि विभाषोर्णोरित्यभावांशस्याप्राप्तत्वात् भावांशपरता विज्ञायते। विभाषा श्वेरित्यत्र तु यदि विधिमुखेन विभाषा प्रवृत्तिः प्रवर्तते पित्स्वेव संप्रसारणं विभाषा स्यात् कित्सु तु पञ्चादित्वान्नित्यमेव स्यात्। अथ प्रतिषेधमुखेन प्रवृत्तिः तदा कित्स्वेव विकल्पः स्यात् पित्सु न च शक्यं वक्तुं पित्सु विधिमुखेन प्रवर्तते कित्सु प्रतिषेधमुखेनेति। एकत्वाद्वाक्यस्य। न स्व चान्यतराविकल्पः वेपक्षीणत्वात् संज्ञाकरणे तु पूर्वं प्रतिषेधे कित्सु प्रवृत्ते किदकिदात्मको लिट् सर्व एव समीकृतो भवति सर्वस्य संप्रसारणानिमित्तत्वात् ततो विकल्पः सर्वत्र विधिमुखेन पक्षे संप्रसारणं संपादयति। एतच्चाह ततोपदार्थसमुदाये सह लक्षणं प्रवर्तत इति दर्शने प्रयोजनं। यदा तु प्रतिलक्ष्यं विभाषा श्वेरिति अस्य व्यापारः तदा क्वचिद्विधिमुखेन क्वचित्प्रतिषेधमुखेन प्रवर्तत इति संज्ञाकरणमन्तरेणाप्यर्थः सिद्ध्यति। तथा च हृक्रोरन्यतरस्यामित्यादौ अन्यतरस्यांग्रहणे वा ग्रहणे चोभयत्र विभाषा इष्टसिद्धिः सूत्रारम्भे तु संज्ञाप्यर्थः। विभाषेत्यर्थः संज्ञा न वा अर्थयोरिति मा स्मैषां शुश्वाविति श्वयतेर्लिटि तिपो णलि संप्रसारणे द्वाणादेशौ॥ ४३ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥इग्यणः॥ ॥यणः स्थान इति। कथं पुनरनुवादे स्थानसंबन्धो लभ्यते। षष्ठी स्थानेयोगेत्यत्राधिकारात्। भूत इति। कार्यान्तरार्थमनूद्यमानो भूतः। विधेयस्तु भा-
वी। तत्र च संज्ञिनो भाविनस्तत्संज्ञापि भाविन्येव प्राप्ता। अस्य सूत्रस्य प्रयोजनं दर्शयति। वचिस्वपियजादीनां किति। तत्र वकारस्य भूतस्य संप्रसारणसंज्ञा भवतीति। इष्ट-
उप्तमिति वचिस्वपीत्यादिना संप्रसारणं। गृहीतमिति ग्रहिज्यावयादिना। ग्रहोलिटि दीर्घः। केचिदित्यादि। एवं वदतां भाविनी संज्ञा नाश्रयणीया। स्थानेयोगश्च लभ्य-
ते इग्यण इत्यत्र भवतीत्यध्याहारात् सर्वसूत्राच्चेति करणात्। यणः स्थाने इग्भवतीति योयं वाक्यार्थ इत्यर्थो लभ्यते। कथं पुनरर्थद्वयमेकस्य सूत्रस्य भवन्न-

॥ ॥इग्यणः संप्रसारणम्॥ ॥ इग्यो यणः स्थाने भूतो भावी वा तस्य संप्रसारणमित्येषा संज्ञा भवति। यज् इष्टं। व-
प उप्तं। ग्रह गृहीतं। केचित्तु भणन्ति यथा सूत्रमिदं व्याचक्षते। वाक्यार्थः संज्ञी वर्णश्चेति। इग्यण इति यो वाक्यार्थः स्थान्या-
देशसंबन्धः स च संप्रसारणसंज्ञो भवति यणः स्थानिक इग्वर्णः स संप्रसारणसंज्ञो भवतीति। तत्र विधौ वाक्यार्थ उप-
तिष्ठते ष्यङः संप्रसारणं वमोः संप्रसारणमिति। अनुवादे वर्णः संप्रसारणस्य संप्रसारणाच्चेति॥ ॥ ॥

ति। तन्त्रेणावृत्त्या वा। अस्य च लिङ्गं विभक्तिविशेषनिर्देशः यदयं ष्यङः संप्रसारणमिति सौ भाव्यमानविभक्त्या निर्देशं करोति ततो ज्ञायते वाक्यार्थः सं-
ज्ञीति न हि तत्र वर्णस्य संभवः संप्रसारणस्येत्यादौ तु भूतविभक्त्या निर्देशात् ज्ञापयते वर्णः संज्ञीति न हि तत्र वाक्यार्थः संभवति। तत्रेत्यादिना द्वयोरर्थयो-
र्विषयविभागेनोपस्थानं दर्शयति। अदुहितरामिति। दुहेर्लुङि कर्मकर्तरि उत्तमैकवचने इटि न दुहस्नुनमामिति यक्प्रतिषिद्धे अजन्तुकिं अदुहि इति स्थि-
ते तिङश्चेति तरप् किमेत्तिङ्व्ययघादित्याम्। तत्र लकारस्य यणः स्थाने इकि हि इति संप्रसारणसंज्ञाया हलः इति दीर्घत्वं प्राप्नोतीति नियोगमेव करोति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प८॰॥
४४

संख्यातानुदेशादिति। तत्र एव उपन्यासो गसंज्ञार्थः संख्यातास्य्यात्संख्यातानुदेशो हि नियकमस्य्यानिकस्य रकारस्य संज्ञा या भाव्यं अयं तु लकारस्थानिकः। घुम्यामिलत्र दिव उदित्सु ते य एणादेशो हल इति दीर्घत्वं प्राप्तं तत्परकरणात् न भवति। अक्षद्यूः अक्षद्युवौ अक्षद्युवः इत्यत्र दावुः संप्रसारणसंज्ञायोः संप्रसारणाच्चेति पूर्वरूपत्वं प्राप्तं वारणीहांगं वलोप इति उवङा बाध्यते॥ ॥आद्यन्तौ॥ ॥अत्र द्वौ पक्षौ संभवतः संज्ञा स्यात् परिभाषा वेति। तत्र संज्ञापक्षे पमर्थः। टकिताविति कर्म्मधारयः इत्संज्ञकौ टकारककारौ यो आद्यन्तयोः संज्ञे इति तत्र इडिंस्वत्राद्यर्थं न टकारेण बहुव्रीहौ इकारादिः शब्दो गृहीत आदेशो विधीयमानस्तस्यानेः तरलम इत्संज्ञो भवतीति सिद्धमिष्टं। एवं पुकारांत वचनेन ककारेण बहुव्रीहौ षकारान्तो गृहीतः आदेशो भियो भीषभवतीति सिद्धं। न त्वस्मिन्पक्षे संज्ञा संज्ञिप्रत्यायनार्था संज्ञिप्रसाधनार्थी संज्ञिनं मत्याप्यलपमेव निवर्त्तिष्यत इति किमिति ग्रहणे न टकटकाविपिवास्तु उभ्य ते इत्संज्ञकत्वेन देशविशेषोलस्य ते। तेनेत्संज्ञकस्य योदेशस्तद्देशाव छित्तो टकौ संज्ञे भवत इति आलजाटचौ टस्येकरणाद्वौ

। संख्यातानुदेशादिह न भवति। अदुहितराम् इति। संप्रसारणप्रदेशाः वसोः संप्रसारणम् इत्येवमादयः॥ ॥आद्यन्तौ टकितौ॥ ॥आदिष्टिद्भवति अन्तः किद्भवति षष्ठीनिर्दिष्टस्यावयवौ। लविता। मुंडो भीषयति। टित्प्रदेशाः आर्धधातुकस्येड्वलादेरित्येवमादयः। कित्प्रदेशाः भियो हेतुभये षुगित्येवमादयः॥ ॥४४॥ ॥श्रीः॥ ॥छ॥

कौ संज्ञे न भवतः अस्मिन्पक्षे दोषः। लुङ् लङ् लृङ् इत्यत्र इति अटि समकारादेशादेशस्य विधानान्तस्यैवोदात्तत्वं अलोन्त्यस्य स्यात् नाकारस्येत्येष दोषः। अनुदात्तेति त्रिपदो बहुव्रीहिः उदात्तो कार आदिरस्येति विशेषणस्या पदात्स्य सोत्रः पानिपातः। एवमथाउ ज्ञादीनामित्यत्रोदात्तग्रहणमेवानुवर्त्तत इति बहुव्रीहेरसंभवाद्दोषः तस्मात्परिभाषापक्षमाश्रित्याहा आदिष्टिद्भवतीति। परेणापरिभाषाप्रकरणेन साहचर्यादिति भावः। षष्ठी स्थानेयोग इत्यत्रेदमनुवर्त्तते तस्य वा इह षष्ठी निर्दिष्टस्येति। ते न च दोषः आतोनुपसर्गे कः इत्यादयः प्रत्ययाः आद्यन्तभूता न भवंति। एवमपि गणो षु कुव्रीहिः शाल्यो टिगिस्यत्र प्रसंगस्तत्र टकः स्थितव कि त्वयोगे परत्वाद्रन्तः स्यात् नैष दोषः। पुरस्तादपवादा अनंतरान्विधीन्बाधंते न परानिति एवमपि स्यान्नयोगं वाधते न प्रत्ययपरत्वं भीषयत इति। त्रिभीभये णिच्। भियो हेतुभये षुक भीस्यो हेतुभये॥ ॥४४॥ ॥

राम॰
॥४४॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥मिदचोन्त्यात्॥ अच इति निर्द्धारणे षष्ठी जातावेकवचनमित्याह। अचामित्यादि। अत्रापि जातौ बहुवचनं। यदि पुनरेतस्मादित्ययमसमानाधिकरणाय पंचमी स्यात्ततो हलन्तेष्वस्याः प्रवृत्तिर्न स्यात्। ततश्च नपुंसकस्य झलच इति नुमिहैवाच्यान्त्यात्परः स्यात् कुण्डानीति यशांसीत्यत्र तु लोपः स्यात् एवं श्रेयसादीनामित्यादौ ततश्च नेत्युमित्व मनर्थकं स्यादिति भावः। समानजातीयेष्वेव निर्द्धारणं भवतीत्यंशोप्यजेव विज्ञायत इत्याह। अन्त्यादचः पर इति। पुरस्तादपवादन्यायेन स्थानेयोगत्वस्यैवायमपवा दो युक्त इत्याशंक्याह। स्थानेयोगप्रत्ययपरत्वस्यापवाद इति। स्थानेयोगश्च प्रत्ययपरत्वं चेति समाहारे द्वंद्वः तस्येह इति निर्देशात्। अयोमकारेण अवर्णार्थः अनोमि ल्यणा सामर्थ्यात् प्रत्ययपरत्वस्याप्ययमपवाद एवेत्युक्त इति भावः। मस्जेरित्यादि। मस्जिनशोर्झलीति नुमयं यद्यंत्यादचः परः स्यात्ततो निष्ठायां मग्न इत्यत्र निष्ठेत्यस्को संयोगाद्योरिति सलोपो न स्यात्। बहूनां समुदायेषु प्रायसेकोसंयोगसंज्ञा न द्वयोः इति स्मिन्पक्षे। सत्यपि वा सलोपे पित्त्वासिद्धत्वात् अनुपधा नकार इति अ

॥मिदचोन्त्यात्परः॥ ॥अच इति निर्धारणे षष्ठी। जातावेकवचनं। अचां मध्ये निर्दिष्टस्थानेयोगप्रत्ययपरत्वस्याप
वादः। स्थानीमंत्यादचः परो मित् स्यात्। विरुणद्धि। मुंचति। पयांसि। मित्प्रदेशाः। रुधादिभ्यः श्नमित्येवमादयः। मस्जेरन्त्या
त्पूर्वं नुममिच्छन्त्यनुषंगसंयोगादिलोपार्थं। मङ्क्ता। मग्नवान्। मंक्ता। मंक्तुं॥ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥ ॥

निदितामित्यनुषंगलोपो न स्यात्। नकारस्योपधायाः अनुषंग इति पूर्वाचार्याणां संज्ञा तस्मान्नकारात्पूर्वं नुम् कर्त्तव्य इत्यर्थः। मग्न इति ओदितश्चेति निष्ठानत्वं तस्मा
मिदुक्तात् कुत्वं। अत्राघं। ताेरकित्तादिति अनेतत्प्यनुहसो शर्वस्य संघातस्य मिदंतावयवो भवति आदिरित्यनुहसो तत्रस्तं निहितस्य परस्मादिर्भवति। अथ यो भयंनि
ष्ठतं ततो भज इति अयः पक्षाः तत्र भक्ते तानापिण्डानामिति नलोपो न स्यात् नछश्चानुस्वरस्याशिः तानि श्लोस्थं दमिव तुलमिति शेर्लुक्। वर्हलिह। अम्लिहः व
हालेलिह इतिरवाति अरुद्विषदजन्तस्य मुमिति अस्यापदान्तत्वादनुस्वारेण स्यात्। त्रपुणी इत्यत्र परत्वान्निपत्वा च नुमि कृते तेन व्यवधानाद्दोडः शीभावो न स्यात्।
अथ यपराशिः। त्रपुणो घेर्ङितीति गुणः प्राप्नोति अतिसरवीनि सखुरसंबुद्धाविति णित्वं चोर्ड्गणीतीति वृद्धिः प्राप्नोति अपुणि अन्ववेः पुंसी नितेनोपधायाः
इति दीर्घत्वं न प्राप्नोति तानापिण्डानामिति न लोपः वर्हलिह इत्यनुस्वारः। तस्मात्पूर्वं तिएवायं मिदेषितव्यः॥ ॥ छ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का० प्र० २२

४५

॥एच इक्॥ ॥परिभाषेयं स्थानिनियमार्था ह्रस्वो नपुंसके इत्यादावुपतिष्ठते। इहैचां पूर्वो भागो मात्रात्मकः कंठ्यो ऽकारसदृशः। एदैतोरुत्तरस्तालव्य इकारसदृशः। ओदौतोरोष्ठ्य उकारसदृशः। एवमवयवसमुदायात्मनामेचां ह्रस्वशासनेषु समुदायान्तरतमस्याभावात् अवयवान्तरतमो ह्रस्वो भवन् कदाचिदकारः स्यात् कदाचिदिकारोकारो मा कदाचिदकारो भूदित्येवमर्थ इदमारभ्यते तेन तदाह इगेव ह्रस्वो भवतीति। यदि त्वियं विधिः स्यात् तदा ह्रस्वादेशे इति विषयोपलक्षणमेव न स्यात्। यस्मिन्विषये एचो ह्रस्वादेशप्रसंगः तत्रैव भवतीति ततश्च दीर्घाणां स्थाने दीर्घा एवैकः स्युः सवर्णग्रहणात्। नैष दोषः। भाव्यमानोण् सवर्णान्न गृह्णाति। भाव्यमानोप्युकारः सवर्णान्न गृह्णातीति दिव उदिति तपरकरणात् अमूत्वामितिवत्। तथा एवामिकां च साम्यान्न संख्यातानुदेशोपि स्यात्। आदेशग्रहणं चानर्थकं स्यात्। ततश्चादेशग्रहणसामर्थ्यात् ह्रस्वा-

॥एच इग्घ्रस्वादेशे॥ एचो ह्रस्वादेशे कर्त्तव्ये इगेव ह्रस्वो भवति नान्यः। रै। अतिरि। नौ।
अतिनु। गो। उपगु। एच इति किं। अतिखट्वः। अतिमालः। ह्रस्वादेश इति किं। देवदत्त।
देवदत्त॥ ॥४५॥ ॥

देशानकाले इक् कर्त्तव्यः ह्रस्वादेशं कुर्वन्निकं कुर्यादित्यर्थः। यद्वा आदिश्यत इत्यादेशः ह्रस्वश्चासावादेशश्च ह्रस्वादेशः निर्धारणे सप्तमी जातावेकवचनं आदिश्यमानेषु ह्रस्वेषु मध्ये इगेव ह्रस्वो भवतीति सर्वथा नियमत्वेनास्य प्रवृत्तिः प्राप्तिपूर्वकश्च नियम इति ये प्राप्ता अन्तरतमास्तेष्वेव नियमः न चाकारस्यौकारौ प्राप्ताविति कुतोयमसंबंधः कुतो दीर्घप्रसंगः। एवं च इक्षित्येव सिद्धे इग्ग्रहणं परेण मा भूदिति। अतिरि। अतिरि। अतिनु। रायमतिक्रान्तं नावमतिक्रान्तं ब्राह्मणकुलमिति प्रादिसमासेन नपुंसके ह्रस्वत्वं। उपग्विति। अव्ययीभावः रैश्च स्तुं दस्यैवेति भाष्यं। एकारस्याप्रसिद्धत्वादुदाहरणं न प्रदर्शितं। हेशवमतिक्रान्तं ब्राह्मणकुलम् अतिहि। अतिखट्व इति। उपसर्जनह्रस्वः देवदत्तेति। आमन्त्रितासुदात्तत्वं। देवदत्तगुरोरनृत इत्यादिना प्लुतः॥ ॥४५॥ ॥ ॥

राम ४

॥४५॥

॥ ॥षष्ठीस्थाने॥ ॥योगनियमार्थेति। यद्यपि षष्ठी स्थानेयोगेत्यत्र वचनमस्ति यत्न एवकारस्तेनोभयत्रावधारणमिति षष्ठी नियमः। क्रमप्राप्तनीयतेन्तथापि
स्थाननिमित्तक एव संबंधः षष्ठ्यासाम्बन्ध्यर्थोऽस्तां संबंधनियमोपि भवतीति भावः। योगे वा नियमो योगनियमः। यद्वि योगनियमः क्रियते लोकेपि नियमः प्राप्तो
ति स्ववपदव षष्ठ्यादयष्व नमित्तेति नत अशासइदङ् हलोः शासेर्ष्वां मस्यसान् उपधामात्रस्य च। ऊदुपधाया गोहः गोहेश्वां मस्यसान् उपधामात्रस्य च तत्राह। इ
ह शास्त्रेयावषष्ठी अनियतयोगेति। एतेन शास्त्रे कार्यनियमः शास्त्रांगत्वात् परिभाषाणां तत्राप्यनियमप्रसंग इति दर्शयति अनियमप्रसंगे नियमः। कर्तव्यः लोकवत्

॥ ॥षष्ठीस्थानेयोगा॥ ॥परिभाषेयं योगनियमार्था॥ शास्त्रे यावषष्ठी अनियतयो
गाश्रूयते सा स्थानेयोगैव भवति नान्ययोगा॥ स्थानेयोगा निमित्तभूते सति सा प्रतिपन्नव्या
स्थानशब्दश्च प्रसंगवाची॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥

तद्यथा लोके ग्रामांतरं जिगमिषुः कश्चित्कंचिदाह पंथानं मे भवाननुपदिशत्विति। स यत्र संदेहः पथि द्वैविध्यात्तत्रैवोपदिशति अमुष्मिन्नवकाशे अनेन पथा
गच्छेति एवमिहापि। अस्तेर्भूरित्यस्तेः स्थाने अनंतरो वेति संदेहे नियमः क्रियते स्थाने योगे वेति। एतदेव स्पष्टयति। स्थानेयोगा स्थाननिमित्तभूत इति निमित्तभूते निमि
त्तत्वं प्राप्ते निमित्तग्रहणं कुर्वन् स्थान इति निमित्तसप्तमीं दर्शयति। स्थानशब्दोपमस्त्यकर्षवचनः गोस्थाने अश्वो बध्यतामिति। अस्तिवनिहन्तिवचनः श्रे
यारणः स्थाने कटुकमौषधमिति। अस्तिप्रसंगवचनः तदिह चरमस्य ग्रहणमित्याह। स्थानशब्दश्चेति। च शब्दोऽवधारणे भिन्नक्रमश्च चावीन्यस्थानेतरं दृष्टव्याः।
प्रसंगवाच्येवेति। कथमित्याह॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

यथेति। निहन्तिवाचीनत्वस्यते अस्तेरुपदेशासामर्थ्यात् ननु आर्धधातुके नियम्यते न सार्वधातुके अवश्यमुपपद्यते न हि मधुरायां अपारितः त्वष्ट्रो जीवति। नाप्यपकर्ष
वचनः। न ह्यर्थेन नित्यसंबन्धस्य ततोपकर्षः संभवति नाप्यार्द्धधातुकादपकर्षः न न हि नित्ये प्रकृतिप्रत्ययसमुदायेभ्यः कृतेऽपकर्षः संभवति। स्वाभाविक एव स्यात्तेरस्यो
त आर्द्धधातुके भूशब्दस्य च प्रयोगो नेत्थंप्रकारेण व्याख्यायते। अतः प्रसङ्ग एव स्थाने प्रसङ्गाः प्राप्तिः अस्तेः प्राप्तौ भूः प्रयोक्तव्य इत्यर्थः। अस्ति नार्थं प्रतिपादयितु
मुधुक्तः आर्द्धधातुके विषये भवति ना प्रतिपादयेदिति यावत्। प्रसङ्गे संबन्धस्येत्यादिना सूत्रार्थमुदाहरणे दर्शयति। ब्रुव इत्युपलक्षणं। किं पुनर्बहवः षष्ठ्यर्थाः
यत इदमुक्तं तत्र आह बहवो हीति। एकशतं षष्ठ्यर्थाः तत्र स्वस्वामिभावादयः शब्दे न संभवन्ति समीपादय एव तु संभवन्तीति अतो यावन्तः शब्दे संभवन्तीत्युक्तम्
बहितमपि हि समीपं भवती सनंजराद्देदेनोपादानं स्थाने योगे सप्तमी समस्य तत्र योगेति ह्री। लिङ्गं षष्ठी शब्दे न च सामानाधिकरण्यं अनुपपन्नं समासे पि तत्तु षष्ठ्या

।यथा दर्भाणां स्थाने शरैः प्रस्तरितव्यमिति दर्भाणां प्रसङ्गे इति गम्यते। एवमिहापि अस्तेः स्थाने प्रसङ्गे भूर्भवति। भविता। भवितुं। भवितव्यं। ब्रुवः प्रसङ्गे वचिर्भवति। वक्ता। वक्तव्यं। प्रसङ्गो संबन्धस्य निमित्तभूत इति ब्रुव इति षष्ठी। बहवो हि षष्ठ्यर्थाः स्वस्वाम्यनन्तरसमीपसमूहविकारावयवाद्याः। तत्र यावन्तः शब्दे संभवन्ति तेषु सर्वेषु प्राप्तेषु नियमः क्रियते षष्ठी स्थानेयोगेति। अधिकरणे बहुव्रीहिः। अत एव निपातनात् सप्तम्या अलुक्। ४९ ॥

ततो च सर्वोत्कृष्टो ऽत्र योगो सप्तम्या लुक् प्रसङ्गश्च बहुव्रीहावपि लुग् निवार्य एवेत्यत आह। षष्ठी स्थानेयोगेत्यादि। यद्वा अयोगे तिष्ठदर्थे दः। न विद्यते योगो यस्याः सा
अयोगा तत्र योगा मंतरेण षष्ठ्या अभावात् विशिष्टो योगो यस्याः नास्तीत्यर्थः। एवं च कृत्वा संदेह एवो यस्या अनियति एतद् पि सिद्धं भवति अथवा योगवती योगा षष्ठ्या
स्थावरूपं भावी योगः इति सामर्थ्याद्रू निमत्वर्थीयो कारः बहवो योगा यस्याः सन्तीति अभिन्नेपि पक्षे संदेहविषय उपस्थानमिति सिद्धं। भाष्ये सूत्रं प्रत्याख्यातं। कथं।
अस्तेर्भूरित्यत्र संदेहः स्थाने अनन्तरे समीप इति तत्र न स्थानुरोधात् स्थान इति अस्त्याम। इदं तु षष्ठ्यन्तं यथा स्थाने न युज्येत यतः षष्ठ्युच्चारिता तेन निर्दिश्य
मानस्यादेशा भवन्तीति सिद्धं भवति तत्र सूत्रे षष्ठी निषष्ठ्यन्तं गृह्यते षष्ठ्यन्तमेव निर्दिश्यमानं स्थानेन युज्यते न तु प्रतीयमानमिति तेन पादः पदिस्यस्याप्यमर्थः पाद
तस्यांगस्य योनयवः पाद्वः सूत्रे षष्ठ्या निर्दिष्टस्तस्य पद्वदादेशो न प्रतीयमानस्य तदन्तस्येति॥ ॥४९॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥स्थानेऽन्तरतमः॥ ॥यद्ययं स्वतन्त्रो विधिः स्यात् अत्रापि प्राप्नोति दधि मधु अत्र सकृत् कश्चिद् अन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतः स एव तस्य भविष्यतीनाम
स्थाप्य ... स्यात् इत्यनवस्था प्रसंगात्। प्रयोजनमन्तरेण हि प्रवर्त्तमानं अन्यसकृदपि प्रवर्त्तेत तत्र सर्वस्य निवृत्तस्य स्मृत्वाऽर्थप्रत्यापना य प्रयोगो न स्यात्। अपि च॥ वि
सं मुसल मित्यादौ यदा समुदाय स्य समुदायः तदा सकारमात्रस्यानादेशत्वात् षत्वाप्रसंगे पि सकारमात्रस्य सकारे आदेशः सकार इति षत्वं प्राप्नोति। अतः परिभाषा प्रकरणे
नु परिभाषेयं यत्र स्थान षष्ठी तत्रोपतिष्ठते तेन विधिशाकानामनेन सूत्रेणैकवाक्यत्वात् विधानकाल एवान्तरतम आदेशो विधीयते इत्याह। स्थाने प्राप्यमाणानामिति। अ
त्र एव ... प्रयोगात् प्राप्यमाणानामिति वचनात् विशिष्टविधिरेवायं न नियमः अर्थात् अन्तरतम स्थानादिति हार्दिकं भवति। अन्तरतम इत्यस्यार्थमाह सदृशतम इति। कुतश्चे

॥ ॥स्थानेऽन्तरतमः॥ ॥स्थाने प्राप्यमाणानां मध्ये अन्तरतम आदेशो भवति। स दृशतमः। कुतः स्थानार्थगुणप्रमाणतः।
स्थानतः। अकः सवर्णे दीर्घः। दण्डाग्रम्। क्षुपाग्रम्। कण्ठ्ययोरकारयोः कण्ठ्य एव दीर्घ आकारो भवति। अर्थतः। वतण्डी चासौ युवतिः वातण्ड्ययुव
तिः। पुंवद्भावेनान्तरतमः पुंशब्दो ऽतिदिश्यते। गुणतः। पाकः। त्यागः। रागः। चजोः कु घिण्ण्यतोरिति चकारस्याल्पप्राणस्याघोषस्य
तादृश एव ककारो भवति। प्रमाणतः। अमुष्मै। अमूभ्याम्। अदसोऽसेर्दादु दो मः इति ह्रस्वस्य ह्रस्वः दीर्घस्य दीर्घः। स्थाने इति वर्त्तमाने पुनः स्थान
ग्रहणं किं। यत्रानेकमान्तर्यं भवति तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात्। चेता। स्तोता। प्रमाणतो अकारो गुणः प्राप्नः। तत्र स्था
नत आन्तर्यादेकारौकारौ भवतः॥ ॥ एम ॥ ॥

तिः शब्दत्वस्य साधारणत्वात् प्रातिस्विकविशेषस्य चासाधारणत्वात् प्रश्नः। वतण्डी चासौ युवतिरिति विग्रहवाक्यं इतरद्दुदाहरणं। अत्र वतण्डस्यापत्यं स्त्री वतण्डा
ती। ... लुक् स्त्रियामिति यञो लुक् शार्ङ्गरवादित्वात् ङीन्। पुंवत् कर्मधारयेति समासे पुंशब्दो ऽतिदिश्यमानो वतण्डापत्यं चाचिनो वतण्डी शब्दस्य तत्पत्यवाची वातण्ड्यशब्दो भवति। व
चलुक् स्त्रियामिति यञो लुक् शार्ङ्गरवादित्वात् ङीनो ... इति समासे पुंशब्दो ... चतुर्थ्येकवचनेन साधितं सर्वनाम्नः स्मै सो मिसुपि चेति दीर्घत्वं स्थान इति वर्त्तमा
कारस्येत्यादि। अल्पप्राणत्वादिकं सवर्णसंज्ञाप्रयुक्तं। अमुष्मै अमूभ्यामिति। अदसः चतुर्थ्येकवचने ... सवर्णसंज्ञा ... स्तुत्यन्निरिवि रुद्धा। पुनः स्थानग्रहणमिति। प्रकृतेन हि स्थान शब्देन स्थाने प्राप्यमाणानामित्यर्थपम
न इति। पूर्वसूत्राद्यद्यपि तत्र समस्तं तथापि विवक्षितत्वात् ... अनुवृत्तिः ... पुनः स्थानग्रहणमिति। प्रकृतेन हि स्थानशब्देन स्थाने प्राप्यमाणानामिति अपम
वर्तिसमते ... यं तु तात्स्थादिस्थानवचनेनोवाकाभेदेन संबध्यते स्थानेऽन्तरतमो भवति यत्र चानेकमान्तर्यं तत्र स्थानकृतान्तर्यमाश्रीयत इति। वाक्यभेदेन स्थानमग्रहणं
लितं स्थानकृतस्य वहि सादृश्येन ... प्रमाणसादृश्यान्तरयप्रिमाणात् तमग्रहणमर्थमेव स्यात्॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ११

तमग्रहणं किमिति। सुमहद्दूर्गं संभवेत देवग्रहीष्यत इति प्रश्नः। वागग्घसतीत्यादि। इमास्सद्दशोपि तोके महद्दशाव्यवहारदर्शनात् तमग्रहणमिति भावः। सोष्माणः सो
ष्माण इत्यादि। उष्मणां श्रोत्रगुणमात्रवचनं इतिकरणो हेतौ यस्मात् ऊष्मगुणा युक्तास्तस्मात् ऊष्मगुणप्रकर्षस्य हकारस्य द्वितीयाः प्रसज्यन्त इत्यर्थः। श्रादय ऊष्माणः
सस्थाने न द्वितीया हकारेण च तुर्था इति शेषः। अत्रोष्मशब्दो गुणिवचनः सस्थानेनेति इत्थंभूतलक्षणे तृतीया हृदयाषष्ठ्याः खछादीनां द्वितीयानां सस्थानाः यथा
नाः यथा तेऊष्माणः एवं द्वितीया अपीत्यर्थः। फकारस्य सस्थानऊष्मा नास्ति तस्मात्तस्य विशेषतऊष्मत्वं वक्तव्यं हकारेण च तुर्था इति। यथा हकार ऊष्मा एवं तेपीत्यर्थः।
एवं नादवतो नादवन्त इति सन्नापि हेलयैंपोदुपः। इह रहस्यं उपसंश्रोतयन्तो ईमात्रस्य व्यंजनस्य अर्द्धमात्र इकः सम्प्रसारणं प्राप्नोति। इह च रध्यात्र कुमार्यत्र ब्रह्मबंधूर्थे मा
त्रिक द्विमात्रिकाणां मिकां मात्रिक द्विमात्रिकाय गाः प्राप्नुवंस्तान्यतः। नैवलोके न च वेदे अर्द्धमात्र इगस्ति नापि मात्रिको द्विमात्रिको वा यण योस्ति सम्भविष्यति। इहा

तमग्रहणं किं वाग्घसति त्रिष्टुब्भसति। फणोहोऽन्यतरस्यामिति हकारस्य पूर्वसवर्णे क्रियमाणे सोष्म
णः सोष्माण इति द्वितीयाः प्रसज्यन्ते नादवतो नादवन्त इति तृतीयाः। तमग्रहणाद्घे सोष्माणो नादवत
श्चतेभवन्तीति चतुर्थाः॥ ४७॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीः॥ ॥छ॥ ॥

तरतमशब्दः सम्प्रत्यंतोपि पठितो माभूदेस्थानेन्तरतम उरण्रपर इति संहितापाठो नित्यस्तत्र पदच्छेदे सम्प्रत्यंतमपि संभवानि तत्र वा पमर्थः षष्ठीति वर्तते अन्तर
तमोयस्यादेशस्य स्थानी तत्र षष्ठी यत्र षष्ठी तस्यादेश इत्येकः सवर्णे दीर्घ इत्यादौ विधीयमानस्य दीर्घस्यान्तरतमे स्थानिमेक इति षष्ठ्या उपसंहारात् सिद्धमिष्टं त
थाचोत्तोपि प्रत्यय इति अत्र एव इमनुहजापाः षष्ठ्याचान्तादेशस्यान्तरतमयोगे सेदौ तो रूपसंहारात्सिद्धं इतरथा एज् मात्रस्य चान्तादेशः स्यात्। अत्र पक्षे
दोषः इको यणचीति यणोयेन्तरतमा इकस्तत्र षष्ठीति दध्यत्रेत्यादावेव स्यात् कुमार्यत्रेत्यादौ न स्यात् तथा इकोगुण वृद्धी गुणवृद्धो यैन्तरतमा इकः तत्र
षष्ठीति इहैव स्यात् नेनालविनानायकोलावकः चेतास्तोता चापकत्तावकः इत्यत्र न स्यात् एवं दोषवत्वादस्य पक्षस्य यथाव्याख्यातमेव साधीय। वांतो
पि प्रत्यय इत्यत्र परिहारं वक्ष्यति॥ ४७॥ ॥

तृ॰ ४०

४७

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥उरण्॥ ॥अत्र चत्वारः पक्षाः संभवन्ति। उः स्थाने रपरो ऽण् भवतीत्यनेन प्राप्त्व विशिष्टो ऽण् भाव्यत इति प्रथमपक्षः। उः स्थाने ऽणेव भवति स च रपर इत्यणनेन प्रसं
गे ऽण् नियम्यते तेन स्वरपरत्वं विधीयत इति द्वितीयः पक्षः। उः स्थाने विहितो ऽण् तस्य विधानोत्तरकालं रपरत्वमात्रं विधीयत इति तृतीयः। उः स्थाने ऽण् विधीयते इमन्नयत
स प्रसंगावस्थायामेव रपरत्वमात्रं विधीयत इति चतुर्थः। तत्र प्रथमपक्षे नाप्राप्ते ऽस्त्यादिषु विधीयमानो ऽण् एतेषां बाधकः स्यात्। तेरनवनुद्धस्य विषयस्याभावात्। एवं हि तस्याव
चनव्यक्तिः षष्ठीनिर्दिष्टमात्रस्य भवन्नादेशो ऽन्तरतमो भवति सवर्णस्य तस्याण् रपर इति। ततश्च कृतिरित्यत्र त्रिस्यादिर्निम्मितिप्राप्तमकारं बाधित्वाणेरपरः स्यात्। कृतं प्रकृत
मिति शेषविधानं स्वरितं च व्रः पाहीति पूर्वसवर्णदीर्घत्वं अनुनासिकं च बाधित्वाणेव रः स्यात्। कर्तृकारक इति च गुणवृद्धी बाधित्वाण् भवन्नकार एवेति नियमाभावाद्धिका
रोकारावपि रपरौ स्यातां येषां मी प्रतिपदमुत्स्थाने आदेशाः ऋत इद्धातोरित्यादयः तेषु रपरत्वं न स्यात्। द्वितीये तु काम गुणवृद्ध्योर्विधौ न स्यात्। तथाहि। सर्वेषु गुण
वृद्धिसंज्ञकेषु प्राप्तेषु अणेव भवतीति नियमादकारावेव गुणवृद्धी रपरे भवत इति सिद्धं कर्त्तेत्यादि। आस्वान्तरेण यो ऽण् प्रसक्तः स एव नियमार्थो भवतीति इकारोका
रावत्र न प्राप्नुतः न च नियमप्रसंगे नियम इति इद्वावेव स्यात् अस्ति तत्रानियमप्रसंग इति कृत्वा गुणस्य कर्त्तेत्यत्र हे मात्रिकस्य मात्रिको ऽकार एव प्राप्नोति तपरेत्ने
त्यादौ द्विमात्रस्य द्विमात्र एव भवेत्। आणेवेति तु नियमभावान्तपरित्येत्यादौ एङेव गुणः स्यात्। कर्त्तेत्यादौ तु पधापि अकार एव गुणो लभ्यते न तु रपरत्वं तु न लभ्यते।

॥उरण् रपरः॥ ॥उः स्थाने ऽण्॥ ॥ ॥

पोत्पन्नो नण प्रसंगो ऽणेव भवतीति नियम्यते तस्य च स्वरपरत्वं विहितं अतो नियमपक्षे ऽपि गुणविषये दोषस्तदवस्थ एव। उच्यते द्वे एते परिभाषे आदेशनियमार्थे स्याता
नेतान्नम इति च उरण् रपर इति च तत्र पूर्वस्यावकाशः अजोः कुघिण्यतोरित्यादिः। अस्यास्त्ववकाशो यत्रान्तरतम्ये विशेषो नास्ति यथा नारक इत्यादौ वृद्धीनां कर्तृ
रित्येत्यादौ गुणो भवतीत्युक्ते सर्वेषु गुणेषु स्थाने ऽन्तरतम इति नियमो ऽस्तु उरण् रपर इति वा परत्वात् उरण् रपर इत्ययमेव प्रवर्त्स्यति। अतः सुष्ठूक्तं नियमपक्षे गुणवि
षये न कश्चिद्दोष इति किं तूदात्तादिषु दोषस्तदवस्थ एव स्यात्। तथाहि। कृतिरित्यादावुदात्तो भवतीत्युक्ते सर्वेषूदात्तसंज्ञकेषु प्राप्तेषु परत्वादनेनाण्णेवोदात्तः
सु तेच रपराः। एवमनुदात्तादिष्वपि द्रष्टव्यं ये च प्रतिपदमादेशाः ऋत इद्धातोरित्येवमादयः तेषामियमप्रसंगाभावादसति नियमे रपरत्वं न स्यात्। तदाह। उ
दात्तपरवत्तन्नमस्यनिह सर्व्वे वेदुदात्तादिषु दोष इति। तृतीये च उदात्तादिषु न दोषः त्रिस्यादिभिरन्तरतमस्यैव विधानात्। किरतीत्यादौ च न दोषः। गुणवृद्धी
कृतदोषः स्यादेव। तथाहि विहितस्य पश्चादनेन रपरत्वं विधीयते विधानकाले तौ तपरतो मात्रिकस्य मात्रिके गुणे परे कर्त्तेत्यादिष्वपि सिध्यति तपरेत्ने त्यादौ
त्विड्वे स्यात्। वृद्धिषु च विधानसमये कस्याश्चिदन्तरपीभावात् तिसृषु प्रवृत्तौ स्याकारस्याण्त्वात् रपरत्वे कारक स्ताक इति यथापि सिध्यति। कायकस्तापके
इत्यादौ नेष्टमनुषज्जनवा। अत एव मे तेषु पक्षेषु दोषसद्भावाच्चतुर्थपक्षमाश्रित्याह॥

© Dharmartha Trust J&K. Digitized by eGangotri

का०प॰२१

उस्थाने एरप्रसज्यमान एवेमारि एतत्र स्थानद्वयग्रहणानुवृत्तेर्लभ्यते तन्नैकमुस्थाने योऽर् विधीयत इत्यनुवादेपि स्थानसंबंधलाभाय। द्वितीयं तु सोऽरप्रस-
ज्य एवप्रसज्यमानावस्थायामेव रपरो भवतीति रपरत्वस्य कालविधानार्थं। स्थानेंतरतम इत्यत्र द्विपदपिंडितत्वाद् द्विवचनः स्थानशब्दः तथापि नतेनात्र कश्चिदर्थ इति प्र-
संगवचन एवेह संपद्यते। एवं च गुणवृद्ध्योः प्रसक्तावस्थायामेवाणोऽरपराः संपन्ना इति प्रमाणतोंतरतमावेदेङैचौ वाधित्वा स्थानतोंतरतमः स एव भविष्यतीति
न कश्चिद्दोषः। न चानेकाल्त्वात् सर्वादेशप्रसंगः। आनुपूर्व्या सिद्धेः। यदा अंगस्येति षष्ठी अंतेल्यनुसंहृतात् तदाय मुस्थाने यदाय मुस्थाने तदारपरः यदापरः तदा

॥उःस्थाने अण्प्रसज्यमान एव रपरो वेदितव्यः॥ कर्त्ता हर्त्ता हर्त्तॄन्॥ किरति गिरति॥ ढे मातुरः॥ उरिति किं॥ खेयं गेयं॥ अण्ग्रहणं किं॥ सुधातुरकङ्॥ सौधातकिः॥ ४८ ॥ ॥ ॥

नेकालिति न पुनः परार्हस्य सर्वादेशो युज्यते। ढे मातुरः इति। मातुः संख्यासंभद्रपूर्वायाः। खेयमिति ईच खनः। सौधातकिरिति। सुधातुरकङ् चाऽत्राय मक-
ङादेशो न अणत्वाद्रपरो न भवति। अथ योऽत्राणः स रपरः कस्मान्न भवति अनादेशत्वात्। समुदायो ह्यत्रादेशः। यद्येवं ढे वृद्ध्यर्थमपादानं परत्वं न स्यात्। पूर्वपरयोर्हि
समुदायोऽत्र स्थानी नावयवऋकारः। उच्यते। पूर्वपरयोरिति द्विवचननिर्देशात् तयोरेव स्थानित्वं न समुदायस्य अनिर्देशात्। अत एव द्वयोः स्थानिनो भिन्नत्वाद् विभु-
क्तत्वादेशो समानां इति नत्रैकस्य ग्रहणं क्रियते। ततः ऋकारस्यापि स्थानित्वमस्त्येव न ति दिरमुच्यते। यो ह्युभयोः स्थाने भवति लभते सावयवतः व्यपदेशानिति अ-
तस्तत्रापि रपरत्वं भविष्यति॥ ४८ ॥ ॥

रप्रम॰ ४८

© Dharmartha Trust J&K. Digitized by eGangotri

॥ अलो॥ अल इति जंसत ष्वेदयमर्थः स्यात अला प्यकाआदेशाअंत्यसेति तत्र रहोरजसां लोपः सर्वादेशः स्यात् नीरजीकरोतीति। अंत्यस्य चाविशेषितत्वात् बसुहंसु ध्वंसनडुहां दः इति दत्वं पदस्याप्यंत्यस्य स्यात परमानडुद्यामिति। अत्र संदेहार्थेवालंत्यस्येति वाच्यं स्यात्। अतोन्त्यस्येत्यनेन सामानाधिकरण्यात षष्ठ्यंतमिति स्थितं। यदि षष्ठी स्थाने योगेत्यनेनैकवाक्यतास्य स्यात् ततोयमर्थः स्यात इह शास्त्रे याकाचन षष्ठी सांत्यस्यालो भवति सा च स्थाने योगेति ततश्चाद्धे धातु कस्येट्लोट् इत्यस्याप्यंतेल्यनुसंहारादार्द्धधातुकांत्यस्येवेट् स्यात् स च भवन्नाघेनो टकितावित्यंतम् आकस्यात्। आद्यंतौ टकिताविति नेन हि स्थाने योगत्वमेव षष्ठ्या बाध्यते न पुनरंत्येल्यनुसंहारोपि अतो भिन्नं वाक्यं तदाहा षष्ठी निर्दिष्टस्येत्यादि। सामान्यवचनेपि षष्ठी स्थाने योगेत्यधिकारात स्थान षष्ठी निर्दिष्टस्येति वेदितव्यं। अ

॥ ॥ अलोन्त्यस्य षष्ठी निर्दिष्टस्य यदुच्यते आदेशः सोन्त्यस्याल स्थाने प्रत्येतव्यः

इको यणः। पंचगोणिः दशगोणिः॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥ श्रीः ॥

या षष्ठीमात्रस्याधिकारे षष्ठी निर्दिष्टस्य फलं कार्यं यथा भूतमुच्यते आदेशान्त्य मागमत्व पर्वात न यथाभूतमेवतदंत्यस्य भवतीत्यर्थः स्यात् ततश्चास एव दोषोप एकवाक्यतायां। अतः षष्ठी स्थाने योगेति सर्वमनुवर्त्यमर्थं चार्यो भवति स्थान षष्ठी निर्दिष्टस्य परुच्यते तत्तदंत्यस्यालो भवति न तस्य कृत्स्नस्येति। लोपं कार्यस्यांत्येलानुसंहारो हनिकारेण दर्शितः। यद्वा या स्थाने योगा षष्ठी सांत्यस्यालः इति षष्ठ्या एतानुसंहारो वेदितव्यः। अत्र पक्षे इ. चेत्यस्यायमर्थः। यत्र इ. इदेशो विधीयते तत्र या षष्ठी सांत्यस्यालः इति एवं सर्वत्र कार्यानुसंहारो तु यथाभूतमेव। षष्ठ्याः स्यादनुसंहारे इ. चेत्यादावहृतिः। अतः कार्यानुसंहारोक्त निकारेण दर्शितः॥ ॥७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ङिच्च॥ ॥होतापोतारावितिऋतोङि सर्वनामस्थानयोरितिगुणः अप्तृन्तृजित्यादिना दीर्घः।मातापितरावितिपिता मात्रेत्येकशेषाभावपक्षेऽभ्यर्हितत्वा मातुः पूर्वनिपातः पितुरिङशुश्रूषामाता गौरवेणेतिदृश्यते।अथ नानङ् सस्य कस्मान्न भवति तत्राह।नानङिल्यादि।अनन्त्यार्थङित्वेषानङादिषु चरितार्थमेतत् गुणवृद्धिप्रतिषेधार्थतया चरितार्थङित्वेनानङ्परेणानेकाल्शित्सर्वस्येत्यनेन बाध्यत इत्यर्थः।न नूत्सर्गापवादयोरयुक्तो विप्रतिषेधः अतुल्यकक्षत्वात्।न वांतरेण सर्वादेशतां गुणवृद्धिप्रतिषेधार्थत्वस्योन्मेषइति चरितार्थत्वमपि ङित्वस्य चिंत्यं।नवमो गुणवृद्धिप्रतिषेधार्थत्वस्यानिश्चितत्वात् दुर्बलं ङित्वमि तिकिंतु सर्वादेशोपि नानङ् गुणवृद्धिप्रतिषेधः प्रयोजनं संभाव्यते तावक्रियानपि विलंबो भवतित्याम ङादिषु सर्वादेशते न किंचित् ङित्वस्य प्रयोजनमि

॥ङिच्च॥ ङिच्च यआदेशः सोऽनेकाल्पि अलोंत्यस्य भवति।आनङ् ऋतोद्वंद्वे।होतापोतारौ।मातापितरौ।तातङ् ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वात्सर्वादेशस्तातङ् भवति।जीवताद्भवान्।जीवतात्त्वं॥ ॥आदेः परस्य ॥परस्य कार्यं शिष्यमाणं आदेरलः प्रत्येतव्यं। क्वचपरस्य कार्यं शिष्यते यत्र पंचमीनिर्देशः।तद्यथा।ईदासः।आसीनो यजते।द्व्यंतरुपसर्गेभ्योऽपईत्।द्वीपं।अंतरीपं।प्रतीपं।समीपं॥ ४९ ॥ ॥७ ७॥ ॥

तिसर्वादेशार्थता संभाव्यतापिनास्तीतितेषे व सह सावकाशत्वाद्धि प्रतिषेधात्सर्वादेश इति।अवाय योपदर्शितं गुणवृद्धिप्रतिषेधार्थत्वं सर्वादेशता मंतरेणनोपपद्यत इति अंतरेणोवविप्रतिषेधं सर्वादेशस्तातङ् भवति॥ ॥आदेः।शास्त्रे न क्वचित्परस्येत्युच्चार्यकार्यं विधीयत इति निर्विषयमेतदित्यभिप्राये गाह क्व चेति।यत्रेत्यादि पंचमीनिर्देशेषु तस्मादित्युत्तरस्येति परस्य कार्यं विधीयत इत्यर्थः।आसीन इति।आस उपवेशने अनुदात्तेत्।द्वीपमिति द्विधा गता आपो ऽस्मिन् ऋक्पूरब्धूः पथामानक्ष इति अकारः समासांतः॥ ॥४९॥ ॥७ ७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥अनेकाल्॥ ॥अनेकाल्ग्रहणं किमर्थम् अस्तेर्भूः सर्वस्य यथा स्यात् अलोन्त्यस्य मा भूत् नैतदस्ति प्रयोजनं ङिच्चेत्येतन्नियमार्थं भविष्यति यद्यनेकालन्त्यस्य भवति ङिदेवेति एवमप्यसत्यनेकाल्ग्रहणे अतो भिस ऐस् भिस्मादिषु पंचमीनिर्देशात् यथानेकाल्त्वादादेः परस्य स्यात् तस्मिन् द्वाविनोऽलोन्त्यस्य स्यादपवादो आदेः परस्य अनेकाल्शित्सर्वस्येति तत्रादेः परस्येत्यस्यापवादः यत्र कालादेशो लोपो वा इदासः बहोर्लोपो भू च बहोः आनीनः भूयात् अनेकाल्शित्सर्वस्येत्यस्यावकाशः यत्र पंचमीनिर्देशो नास्ति अस्तेर्भूः इह उभयं प्राप्नोति अतो भिस ऐस् अपवादत्वाद्विप्रतिषेधादनेकाल्शित्सर्वस्येति अयमेव भवतीति शित् ग्रहणं किमर्थं जसः शी सर्वस्य यथा स्यात् अनेकाल्त्वेन भविष्यति शकारे लुप्ते नानेकाल्त्वम् अनुबन्धासिद्धं च यदि वा एषः तदा प्रत्ययः प्रत्ययः तदेतत्संज्ञायां तत्संज्ञानं तदा लोपः यदा लोपः तदैकाल्त्वं इह सर्वादेशत्वमतः ऐनेकाल्त्वमुपपद्यते इहा तर्हि इदम इश् इदं कि मोरीश् की अत्र त्वं तेनैव सर्वादेशता प्रागेवेत्संज्ञा भवतीति न च तत्रापि शकारः प्रयोजनान्तराभावात्। अनेकाल्त्वमादेशस्य संपादयिनिवर्त्स्यते।

॥अनेकाल्शित्सर्वस्य॥ अनेकाल् य आदेशः शिच्च सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवति अस्तेर्भूः भविता भवितुं भवितव्यं शित् खल्वपि जश्शसोः शिः कुण्डानि तिष्ठन्ति कुण्डानि पश्य॥ ॥स्थानिवदादेशोऽनल्विधौ॥ ॥

इह तर्हि घसोरेद्धावभ्यासलोपश्च शित्सर्वस्य यथा स्यात् इश्मरशित्वादेवपि प्रयोजनाभावादित्संज्ञैव शकारस्य न स्यात् इति अवश्यप्रसंगः॥ ॥स्थानिवदादेशः॥ ॥ननु तत्स्थानापन्नस्य तद्धर्मलाभो भवति एकस्मिंश्च राजनि प्रोषिते तत्स्थाने अभिषिक्तस्य तत्सुत्रादेरपि तद्धर्मलाभो भवति वेदेपि व्रीहिस्थानापतितानीवाराद्यो अवघातादीन् व्रीहिधर्मान् लभन्ते तद्वदत्रापि स्थानापन्नो यस्तस्य स्थानिधर्मान् धातुत्वादीन् लप्स्यते नार्थो नेनेत्याशंक्याह स्थान्यादेशयोरिति आदि अयमभिप्रायः उपाध्यायत्वप्रयुक्ता उपाध्यायधर्माः राजधर्माश्चाभिषिक्तत्वप्रयुक्ताः व्रीहिधर्माश्चापूर्वसाधनत्वनिबंधनास्तत्र तत्त्वरूपनिबंधना इति युक्तं तत्प्रकारस्तु गौणो भवतीति इह तु स्वरूपमितिवचनात् त्स्यादिस्वरूपनिबंधनाः धातुत्वादयो धर्माः न भवनार्थ्याभिधानलक्षणकार्यप्रयुक्तः तत्त्वशिष्यस्य शास्त्रप्रेरयतीति तदा सत्त्वं गालाख्या सना दीन् उपाध्यायधर्मान् लभते + रूपमादेशानां नास्तीति तत्स्थानापन्नानामपि न स्युरिति तदाह। रूपस्याशित्ति न यमेत दित्यर्थः। नन्वत्र तत्र कार्यानुषोपितं तत्स्थानापन्नस्य तत् धर्मलाभो दृश्यते यदा गुरुपत्न्याः शिष्येण पत्नी

+ एक एव शब्दः

।। अचो ऽप्सु पाठ्याप प्रतिनिधित्वात् तद्दृष्टेव तद्धर्मा अनुष्ठीयंते एवं कृते त्र स्थानी पाठ्याप इति न तत्स्थानापन्नतया न चैव मत्र संभवतीतार स्वरमेव सत्त्वं । युष्मद स्मदोरादेशनिषेधात्तिं हं परयं युष्मदस्मदोरनादेश इत्याह तन्न ज्ञापयति भवति स्थानिकृतमादेश इति अलोऽन्त्ये चाप्रसंगो दोजग्धोल्यल्ग्रहणात् । यदि हि स्थानि लाश्रयमयादेशे स्यात् तिकितीमेव सिद्धे ल्यग्रहणमनर्थकं स्यात् । सत्यं ज्ञापणार्थं तावत्स्थानिवदादेश इति वक्तव्यं अजादेशस्य विषयविशेषस्थानिवत्त्वं स्वामि पदत्तादि विधिष्वप्रतिषेधं च स्वामीति सोऽस्यार्थः सन्निहैव क्रियते लिंगानुयपयोगादतिदेशो निमित्तादितिदेशो व्यपदेशातिदेश ४ शास्त्रातिदेशो रूपाति देशः स्नात्तादात्म्यातिदेशः कार्यातिदेश इति तत्र निमित्तमशक्यमपि देष्टुं ब्राह्मणवत् न हि ब्राह्मणस्याभोजनादिनिमित्तं ब्राह्मणत्वं च न ज्ञातेनापि क्षत्रिये तिदे ष्टुं शक्यते एवं स्थानस्यत्रापि न प्रकृतिगतन्निमित्तं ङि त्वादि संनतेति दिश्यते किंतु प्रकृतिगतमेव तत्सनाद्यवधानेष्वात्मनेपदनिमित्तमिति एतावता निमित्ताति देशवाचो ऽपुक्तिः । व्यपदेशातिदेशः संज्ञापक्षान्नाभिधीयते तत्र वते रानर्थक्यं वक्ष्यते कः पुनरयं युष्मतो व्यपदेशो ऽभिप्रेतः किं स्थानीति व्यपदेशः यथाऽस्याद्यंतव देकस्मिन्निति तत्र व्यपदेशातिदेशपक्षे । उतस्थानिनो येऽन्ये व्यपदेशाः धातुरंगमित्यादयः तेऽप्यादेशस्य भवंतीति । पूर्वः पक्षो ऽभवतोऽप्यनभिप्रेतः द्वितीयस्तु संज्ञा

।। स्थान्यादेशयोः पृथक्त्वात् स्थान्याश्रयं कार्यमादेशो न प्राप्नोतीत्ययमतिदेश आरभ्यते ५० ।।

यक्षान्महान्भेदः तथा हि संज्ञापक्षे पत्रस्थानिरूपमुच्चार्यतेऽप्राङो पमहनइत्यादौ तत्रैव कार्यं स्यात् न यत्नो स्त्यादयः अंगस्येनादयइत्यादौ न त्यत्र संज्ञान्वे न विनियुज्यमस्त्यादिस्थानिरूपमुच्चारितं यच्चोच्चारितं न सा संज्ञा आदेशस्य च कार्यं स्यात् न स्थानिनः नहि संज्ञोच्चारिता स्वयं कार्येण युज्यते । स्थानिनस्त्वव्यपदे शोऽप्यादेशस्यातिदिश्यमाने धातोस्तसदयः अंगस्येनादयइत्यादौ स्थान्यादेशयो रुभयोरपि कार्यं स्यात् उभयोरपि व्यपदेशसद्भावात् अप्राङो पमहनइत्यादिकं तु स्थानिस्वरूपनिबंधनं कार्यमादेशस्य न स्यात् न त्वत्र कश्चिद्व्यपदेशोऽपन्नादेशस्यातिदिश्यते अथापि स्वरूपमिति वचनादुन्निमपि हंते र्व्यपदेश इति तस्मि न्नतिदिष्टे कार्यं स्यादिति तु स्थानएवमपि पूर्वोक्तो विशेषो विद्यते इत्यास्मामेतत् अप्रधानत्वात्तु व्यपदेशो न भवति । अतएव शास्त्रातिदेशोपि न भवति । स्थानिरूपे चातिदिश्यमानेऽप्यादेशविधानं कार्यं स्यात् न वचनद्वयप्रामाण्यादिकल्पः वा लिटीति विकल्पारंभात् । तादात्म्यातिदेशो ऽप्यसंभवान्न भवति यो हि महावस्थितयो रन्योऽन्यतादात्म्यमतिदिश्यते सुबामंत्रितेन योश्चिवहलादेशे न स्थानीनिवर्तित इत्यसंभवः । अतः पारिशेष्यात्स्याधानात्वकार्यातिदेशोऽयं न दाहस्थान्याश्रयं कार्यमिति स्थान्याश्रयेषु कार्येष्विति च ।। ५० ।।

© Dharmartha Trust J&K. Digitized by eGangotri

॥ तापर्यंतश्वायंकाषीतिरेह्योगस्पेतेनक्षस्यएणिल्वादेशः स्थानिनातुल्यंवर्त्ततइत्येतावत्सेवपर्यवसितानिकेनतुप्रकारेणतुल्यत्वमित्यपेक्षायांतत्कार्यापन्ने
तितदाह स्थानिनातुल्यंवर्त्ततइति स्थानिवदिति। स्थान्याश्रयेष्विति बहुव्रीहिः। अनल्विधावित्यस्यार्थमाह अनलाश्रयेष्विति। एतेनविधीयतइतिविधिः
कार्यम्अलाश्रयोविधिरल्विधिः सुप्सुपेति समास इति दर्शयति किमर्थंपुनरुक्तात्पदस्यलोपाश्रयणेन स्यादेतन्नस्यादिति स्मिन् पश्चाल्विधिः पश्चाद्विधिः पश्चा
लाविधिः सर्वेसामलाश्रयत्वे सर्वत्रप्रतिषेधः सिद्धातितत्राल्विधिः प्रजेः ऊः द्यूः कद्यूः इत्यत्र संप्रसारणस्य स्थानिवत्वात्कोयप्रसादिवत् इति चेत्तुत्वंप्रसज्य
भवतिसद्यस्त्वत्रएतत्त्वरोः सुलोपोनभवति। अल्विधिः द्युउतप्रकामः उकारस्यलोपो व्योर्वलीतिलोपो व्योर्वलीतिलोपोनभवति उत्वंतु अहर्विमलद्युरित्यत्र
चरितार्थम् अलः पाम्नोभिमिः द्यौः पंथाः सहल्ड्यादिलोपोनभवति। अल्विधिः वृक्षोरस्के कस्कत्र सोपदादाविति विसर्जनीयस्य स्थानेविहितस्य सत्वस्य स्था

॥ स्थानिनातुल्यंवर्त्ततइति स्थानिवत् स्थानिवदादेशो भवति स्थान्याश्रयेषु कार्येष्वनलाश्रयेषु ॥

निवत्वात् विसर्जनीयस्याघुपदेशादरस्वत्वायइति णत्वंप्राप्तं न भवति। अतः सर्वविभक्त्यर्थसंग्रहार्थं उत्तरपदलोपाश्रयणं अन्यथाहि षष्ठीसमास एवाश्रिते
अल्स्थानिक एव विधिराश्रितः स्यादिति। तत्र संबंधसामान्ये षष्ठी विज्ञानादपि सर्वविभक्त्यर्थसंग्रहस्य सिद्धत्वात् अनुवादे हि स्थाने योगाभावात् सर्वोल्
संबंधी विधिः प्रतिपत्स्यते एवं तर्हि यत्र गुणाभावेनाल्लाश्रीयते तत्रापि निषेधो यथा स्यात् प्रपद्यतेति अत्र हि वलादेरिति प्रत्ययः प्राधान्येनाश्रितः वल्तु गु
णभावेनेति अप्राधान्यात् उत्तरपदलोपे तु भवति अलाश्रयत्वादिडिषेधः यथ लाश्रयेषु स्थानिवत्त्वं न भवति दद्धायसुपिचेति दीर्घो न स्यात् तत्रापि स्यादे
सुपीत्यलाश्रयत्वात् अरुदितामित्यत्र सार्वधातुकस्य तत्र स्याभादेशो रुदादिभ्यः सार्वधातुक इति वलाश्रय इणनस्यात् अत आह ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्थान्यलाश्रयाणीति। स्थानिनो ऽल् स्थान्यल् तदाश्रयो येषां तानि तथोक्तानि तदाश्रयमभिप्रायः। यथा गुरुवद्गुरुपुत्रे वर्त्तितव्यमन्यत्रोच्छिष्टभोजनात् पादोपसंग्रहणाच्चे
ति। अतिदेशे प्रवृत्ते यथा गुरुपुत्रः स्वयं गुरुर्भवति तद्वदुच्छिष्टं भुज्यते पादौ चोपसंगृह्येते तत्कस्य हेतोः। अतिदेशेनैकवाक्यतामापन्नः प्रतिषेध आतिदेशिकामेव प्राप्तिं
प्रतिषेधतीति तथेहाप्यातिदेशिक एवाल्विधिः प्रतिषिध्यते न च स्वाश्रय अहदितामित्यत्रातिदेशात् पेशाल्यमेव यज्ञादित्वात् दलाधिक्ताच्चतत्र अपत्र स्थानिन एवाला
श्रयते स एव निषिध्यते यथा प्रपद्येत्यत्र ल्यपः स्वरूपं वलादित्वमिति। ननु च गुरुपुत्रस्य स्वयं गुरुत्वे उच्छिष्टभोजनादौ न मात्रपाद्यतिदेशापेक्षा रहतु मत्तपितृवयमेव यज्ञा
दित्वेनांतरेणातिदेशं दीर्घः स्यादिति असुप्त्वात्। अनुदिताभित्यत्रापि स्वरूपं वलादित्वे सार्वधातुकत्वादतिदेशेनैवेट्प्रार्थनीयः। सत्यं। हेत्वन्तरकार्येषु संज्ञाच
दीर्घत्वं च न हि प्रयोगसमवाय्येव कार्यमतिदेशेनेति नियमोऽस्तिपदानुशासनीयं तेद्वातिदिश्यते न च सुप्संज्ञालाश्रयेति तस्मात् अतिदिष्टायां स्वाश्रयं यत्रादित्वमा

स्थान्यलाश्रयाणि कार्याणि वर्जयित्वा। किमुदाहरणं। धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः। धात्वादेशो धातुवद्भवति। अस्तेर्भूः।
ब्रुवो वचिः। आर्धधातुकविषये प्रागेवादेशेषु कृतेषु धातोरिति तत आद्यो भवतीति भविता। भवितुं भवितव्यं। वक्ता। वक्तव्यं। अङ्गादेशोऽङ्गव
द्भवति। केन। काभ्यां। कैः। किमः कादेशे कृते ऽङ्गाश्रयत्वेन दीर्घत्वैस्भावा भवन्ति। कृदादेशः कृद्वद्भवति। प्रकृत्य। प्रहृत्य। ल्यबादेशे कृते कृ
त्त्वमपि तिकृतिति तुगिति तुग्भवति। तद्धितादेशः तद्धितवद्भवति। दाधिकं। अद्यतनं। कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञा भवति ५१

श्मिन् दीर्घत्वं भविष्यति अहदितामित्यत्राप्यातिदेशिकं सार्वधातुकत्वं स्वाश्रयं च वलादित्वमाश्रित्येड् भविष्यति। ननु च हक्षापेक्षत्र स्थानिन एकारस्याल्त्वा
त्तदाश्रयं स्वस्वमलाश्रयमेव उच्यते। कार्यापेक्षमाल्विधित्वं नोदाहरणापेक्षं न तु नं भवति यस्मिन् कार्ये विधीयमाने अल एवासाधारणं किंचिद्रूपं निमित्ता
दिरूपेणाश्रीयते इह हि हलि लोपे च लिहल इत्यादिः अयं च वाप इति स एवाल्विधिः सुपि चेत्यत्र तु नैवंविधं किंचिद्रूपमिति केवलं हक्षापेक्षत्रोदाहरणे आलात्मकः
स्थानी स्वेताङ्गत। किमुदाहरणमिति प्रश्नः। धात्वाद्यादेशाः प्रयोजनमित्युत्तरं तत्र प्रयुज्यते अनेनेति प्रयोजनं उदाहरणे न प्रयुज्यत इत्यस्य धीत्यमा अनुरूपं प्रति
वचनं। ननु चास्ति ब्रुवो एरूधातुके परतः भवति भ्यां आदेशाभ्यां भाव्यं ततः किमतिदेशेनेत्यत आह आर्द्धधातुके विषये इत्यादिदाधिकं दध्निसंस्कृतं ठक्छक्॥

॥ ॥५१॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

। अमयादेश इति । यावन्मात्रस्यापवादेशः क्रांतस्याप्यपसंज्ञा स कथम् अयादेशः त[illegible] स्यात्काग्रहणेनस्येयोग्रहणात्तदंतस्यापि संज्ञा भवतीत्येवं परमेतत् ।
तत्रापि ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति प्रकृत्येति संघातस्य भवति ।। वत्[illegible] करणं किमिति । विना वतिं नतदेव गम्यते यथा इङ् । तत्किं एतस्या इति प्रश्नः
स्थानी आदिग्रामति वत्करणे संज्ञाप्रकरणत्वात् स्थानी आदेशस्य संज्ञा विज्ञायेत मेवं विज्ञाधीनि वत्करणमित्यर्थः । किमर्थं पुनः स्थानी आदेशस्य संज्ञा नेष्यत इत्या
ह स्वाश्रयमपीति संज्ञायां हि स्थानिस्वरूपनिबंधनमाङो यमहन इत्यादि कार्यमादेशस्य स्यात् न स्थानिनि न हि संज्ञे चारिता स्वयं कार्यार्थं युज्यते । आत्मनेपदेष्व म
तस्याम् इति च विषयसप्तमी विज्ञायेत स्वाश्रयमपीति कोर्थः स्थानिस्वरूपीत्यर्थः । तथा चोत्तरग्रंथे उभयत्रेति सप्तमी निर्देशः । आदेशग्रहणं किमिति । यथा घित्व

।। अजयादेशोऽपवद्भवति । प्रकृत्य । प्रहृत्य । तुपकृतस्य अव्ययादिति सुब्लुग भवति । सुबादेशः सुबद्भवति । वृक्षाय ।
सुप्याप सुपि चेति दीर्घे भवति । तिङादेशस्तिङ्वद्भवति । अकुरुतां । अकुरुत । सुप्तिङन्तं पदमिति पदसंज्ञा भवति पदादेशः
पदवद्भवति । ग्रामो वः स्वं जनपदो नः स्वं । पदस्येति रुत्वं भवति । वत्करणं किं । स्थानी आदेशस्य संज्ञा मा विज्ञायीति । स्वाश्रय
मपि यथा स्यात् । आङोऽपमहनः । आहत । आवधिषि आत्मनेपदं सुभयत्रापि भवति । आदेशग्रहणं किं आनुमानिकस्याप्या
देशस्य स्थानिवद्भावो यथा स्यात् । पचतु एरुः । अनल्विधाविति किं ।। ।। श्रीः ।। ।।

स्य लङ्लुङ्ज्ञेषु वधि शाद्त्वात् सूत्र इति गम्यते न यो हापि स्थानिवदित्युक्ते क इत्यपेक्षायां पदरूपेण स्थानित्वं स एवादेश इति गंस्यत इति प्रश्नः । आनुमानिकस्यापी
त्यादि । द्विविधो ह्यादेशः प्रत्यक्षश्चानुमानिकश्च । आनुमानिकश्च एरुरित्यादि । अत्र ही कारेण इ कारांतः स्थान्यनुमीयते विधानेनेव गोः उकारेण ओकारान्त
आदेशः ततस्ते स्कारिति संपद्यते तत्रासत्यादेशग्रहणे प्रत्यक्षस्यैव ग्रहणं स्यात् नानुमानिकस्य पुनः श्रुतेस्त्वसामर्थ्यात् आदेशमात्रं स्थानिवद्भवतीति न
पवतिस्त्वत्ति इ. तं पदमिति पदसंज्ञा सिद्धा भवति । ननु च एकारमात्रस्यो कारमात्रं आदेशोक्तः किंतदंतानुमानेन एवं हि एहरिमेत त्व यथा कृतमेव स्यात्
तं भवति आदेशग्रहणं च न कर्तव्यं भवति एकदेशविकृतस्यानन्यत्वात् पदसंज्ञा भविष्यतीत्येवं तर्हि पुनः श्रुतिरेव लिंगं एकदेशविकारः शास्त्रे नाप्या
पतत इति तेन सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः एकदेशविकारे हि नित्यत्वं नोपपद्यत इति सिद्धं भवति ।।

© Dharmartha Trust J&K. Digitized by eGangotri

॥घुपथित्यदादेशा इति किं पन्थाः पथिमथ्यृभुक्षामात् त्यदादीनामः इत्यनेन तु सामान्यातिदेशो विशेषानतिदेशः ततश्च पथाबालनाव दस्मिन् क्षत्रिये वर्त्तते असि
तिबालस्य नामत्वकार्यमेव भवति न मातृ इति विशेषणकार्यं तथा स्थानिवदादेशः रमुके पः स्थानीयदाकारविशिष्टस्तत्रैव पुनः तदादेशस्य तदाकारप्रयुक्ते नैव
कार्येण भवितव्यं केल्पविस्तत्र चव स्वस्थितस्य सन्निहितमपि वलादित्वं स्थानिरूपेण नाश्रितं तथाहि रुजादिरपि क्वाभवत्येव क्वा केवलोऽपि त्वापेति पाणिनो
पिरष्टी नानितिद्दिष्टं तोऽपि तत्र क्वामात्रप्राप्तिव इंप कार्यं कृत्त्वप्रसंगत्वादितदादेशे त्वानिदिष्टे प्रतीवलादित्वस्य तु कुतो निर्देशः। एवं करिष्यति सादौ गपि चयरा
इकभवतीति द्विवो लोमस्य उत्वोत्वे भवतः पथ्यादीनामंत्यस्याद्भवति त्यदादीनामंत्यस्याकारः विसर्जनीयस्य सत्वमिसेवं पथ्याणापि रूपेण स्थानि न आश्रयणे

॥घुपथित्यदादेशानस्थानिवद्भवंतीति घोः पंथाः स इति। हल्ड्याबिति सुलोपो न भवति॥ ५१ ॥ ॥

ततश्च तदाकारप्रयुक्तस्यैव कार्यस्यापि न्यतिदेशो न ह्रस्वादिविशेषनिबंधनस्येति नार्थो निल्विधाविति मनेन पत्र तत् हि विशेषरूपमेव स्थानित्वेनाश्रीयते प
थाच्छ्रोः स्यादिति वक्ताः तत्र तत्कार्यमादेशस्य माभूत् अस्त्यप्रसांबलिलोपो न भवति। अथात्रापि वकारेण संगास्यालोंमस्योरिति अंतरूपेण स्थानि न आ
श्रयणां एवं परविविशेषातिदेशज्ञापनार्थमिदमुच्यते अन्यथाल्पयोवलादित्ववत् किं च स्याप्यतिदेशो न स्यात् देवि चेस्मादावकितोऽपि ह्रः संभवात् अनुबंधा
श्रयस्तु निमित्तं तत एव कार्ये प्रयुज्यंत इति न कार्ये षिनाल्विधाविति निषेधो न भवति। लिंगाद्भपद्यं सेल्येपिच्चे स्याहन तज्ज्ञापयति भवसनुबंधकार्याणामतिदे
शइति॥ ५२॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥अचः परस्मिन्॥ ॥अच इति स्थानिनिर्देश इति यद्यप्यन्न षष्ठ्या मानादेशविशेषणत्वात् स्थानषष्ठी न लभ्यते तथाप्य चो पदमादेश इत्युक्ते तत्स्थानिक एव
प्रतीयत इति। परस्मिन्निति निमित्तसप्तमीति। न परसप्तमी परशब्दे नैव परत्वस्योक्तत्वात्। परस्मिन्नादेश इति अनुवादत्वाच्च। कृतेषि गुणे ह्रीति वत्। पूर्ववि
धाविति विषय इति। महत्त्वात् स्थानिवत्त्वस्य पूर्वविधौ कर्तव्ये स्थानिवदिति। एवं च पदत्वात्स्यपदमित्यपि वाक्यार्थमाह अजादेश इत्यादि। किमर्थमिदमुच्यते पूर्वत्र
स्थानिकार्यमादेशे अतिदिष्टं इह तु स्थानिनिमित्तं पूर्वस्य यत्कार्यं तदादेशेऽपि सति पूर्वस्य भवतीत्यतिदिश्यते ननु तत्रापि स्थानिनिमित्तमन्यस्य यत्कार्यं तदप्यतिदि
श्यते यथा ह्वः आयेति सुपि वेति दीर्घत्वं एवं तर्हि ल्लिङ्गर्थमिदं। तथाहि। वञ्चश्चेत्सुरदत्वे न संप्रसारणे संप्रसारणमिति वकारस्य संप्रसारणप्रतिषेधः स्थान्यला
श्रयोऽ स्यादेवमाद् भवति इदं च संप्रसारणे परतः प्रतिषेध इति पक्षे प्रयोजनं संप्रसारणाभाविनियमात्पेव प्रतिषेध इति तु पक्षे न प्रयोजनं। इहा चितीकः बहुचितीकः
इति चितेः कपि दीर्घत्वे कृते दूरत्वात् तस्मात्पूर्वमिति स्थान्यलाश्रयः स्वरो भवति एवं यातेर्यङ्गतात् क्विचि अतो लोपे यलोपविधिं प्रति स्थानिवत्त्वनिषेधात्यलो

॥अचः परस्मिन्पूर्वविधौ॥ ॥आदेशः स्थानिवदिति वर्तते॥ अच इति स्थानिनिर्देशः परस्मिन्निति निमित्तसप्तमी॥ पूर्व
विधाविति विषयसप्तमी। अजादेशः परनिमित्तकः पूर्वविधौ कर्तव्ये स्थानिवद्भवति॥ ५३ ॥ ॥ ॥

पे यायातीति स्थिते परकारलोपस्य स्थानिवत्त्वात्सतो लोपः इति चेत्याकारलोपे पुनर्यलोपे यातीति रिति भवति न च पुनराकारलोपः पुनश्च यलोप इति प्रसज्यमा
नत्वमश्रवणाप्रसंगः। आल्लोपस्य स्थानिवत्त्वाच्चिणो लुगाप्येनासिद्धत्वात्। तथा चवरीवि धौ स्थानिवत्त्वं निषिध्यते यावर इति स्थानिवद्भावाद्यतो लोपो माभूदि
ति तथा तिष्ठते र्यङ् तात् क्विच अल्लोपयलोपयोः तेष्ठीति इति स्थिते अल्लोपस्य स्थानिवत्त्वादियङ् भवति तथा चोत्तरसूत्रे कंडूतिरित्यत्र उवङ् प्रसंगो वोदपितास्मत्
तस्यैव ब्रूः भुवि ऊठ् करिष्यन्नर सुके इयङि वक्रते यलोपे च तेष्ठीति रिति भवति न च पुनरियङ् आदिष्टादचः पूर्वत्वात् तथा पेपीयतेः क्विपि अल्लोपयलोपयो
रेते न का च इति यणो मल्लोपे पेपिरिति भवति। शोतन् का ल्लोपङ्‌ता चित्र अल्लोपयलोपयोरल्लोपे पुनः पूर्वत्रासिद्धीयेन स्थानिवदिति स्थानिवत्त्वनिषेधाच्छश्चा
ष इति षत्वे शास्तिरिति भवति। एवं चेचीयतेश्चेकि रिसे वादिः तथा तितउमा च इति णिचि टिलोपस्य स्थानिवत्त्वादचो ञ्णितीत्यस्याभावे अत उपधाया
इति स्थान्यलाश्रयाद्वृद्धिर्भवति न चात्र क्विलुगुपधात्वचुपधा विधिं प्रति स्थानिवत्त्वनिषेधः तस्य प्रत्ययविधिविषयत्वात्तस्मात् ह्रेपुक्किसति तितापयतीति
भवति॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ १२
५३

नच पुनरपि स्थानिवत्त्वमादिष्टादचः पूर्वत्वात्। ननु पूर्वस्य कार्ये कर्तव्ये सति स्थानिवत्त्वेन भवितव्यम्। अत्र च सर्वत्र स्थानिवत्त्वे सति पूर्वस्य कार्यप्राप्तिरितीतरेत
राश्रयं नात्र स्थानिवत्त्वात्। प्रागेव पूर्वस्य कार्यप्राप्तेः स्थानिवत्त्वं किं तर्हि प्राग्वायश्चाद्वा पूर्वस्य कार्ये चिकीर्षिते तत एव च परे विधौ स्थानिवत्त्वनिषेधः न देवमलित्यर्थ
मिदं किंच ब्राह्मणाय दत्त्विमिन् पत्रियेवर्जितिरमित्यत्र ब्राह्मणाय कार्यप्राप्ते न तु स्वाश्रयं पुद्वादिकं मध्यमे पूर्वसूत्रे विस्थानमाश्रयं प्राप्यते न स्वाश्रयं वा
वर्सते यथा वृक्षायेति दीर्घत्वमादेशाश्रयं भवति नाभिवितुं भवितव्यमिति गुणः। इह तु स्थान्यलाश्रयमेवेष्यते स्वाश्रयं नेष्यते तथा च पटयतीति टिलोपे कृते माम
उपधावृद्धिर्भवति अवधीदिति हलन्तलक्षणा वृद्धिः स्यात् कुर्वन्ति ह्रस्वान्तेस्मात् सर्वमिति स्थानेन भवति वाघोः पलोपोन भवति तत्त्वंतीति रूपं न भवति एवं बहूनि
स्वाश्रयानि ह तेरुदाहरणानि अत एव वृद्धिर्वचनादिविधौ स्थानिवत्त्वनिषेधः। अतो जादेशः परनिमित्तकः पूर्वस्य विधौ स्थानिवद्देव यथासाक्तमाभूत्स्वर्यनिमि
त्तमिति नियमार्थमपीदमारब्धव्यं। कथं पुनरेकेन यत्नेनोभयं लभ्यं विधिश्च नियमश्च विधिग्रहणसामर्थ्यादिति निरूपणेव साम॥ अथवा विधिग्रहण
विधिमात्रे स्थानिवत्त्वादेवोपयास्यान शास्त्रीयेचवि परीतेन परयतीर्थ दोषस्यानिनिदृष्टोह स्थापावादि शास्त्रीयो यथ दिति ख्यते तत्र हृतिकारेणायत्नसाध्यत्वा
द शास्त्रीयोदाहरणानि दर्शितानि विधिशब्दः कर्मसाधनः पूर्वस्येति शेषलक्षणा षष्ठी पूर्वस्य व्यवस्थितस्य सतः संबन्धिनि कार्ये कर्तव्ये इति। पूर्वत्वं चात्राज
पेक्षमाश्रीयते नादेशापेक्षं निमित्तापेक्षं वा। न चाजपेक्षे पूर्वत्वे विधिशब्दो भावसाधनः संभवति। भावसाधने हि तस्मिन् पूर्वस्येति कर्मणि षष्ठी विज्ञायेत तत्र
वस्मिन्विधाने पूर्वस्मिन् विधातव्ये स्थानिवदित्यर्थः स्यात्तत्र अवच्छिन्नेवाचितः पूर्वं किंचिद्विधेयं भवति इह च आदेशास्थानिवदिति वचनात् आदेशेनस्थानी निवर्तितः
इति नायमर्थः संभवति अजादेशः परनिमित्तकः तस्यैवादेशस्य स्थानिभूतोयोच् ततः पूर्वस्मिन्विधातव्ये इति। तथाहि अचोयस्मादेशस्तस्मादेशात्प्राग्वस्था
न यते तस्य सन्निधानात्प्रतीयमानमवधित्वमपि तद्वस्थस्यैवाचो युक्तमत एवोच्यते योनादिष्टादचः पूर्वः तस्य विधिं प्रति स्थानिवद्भाव इति। आदेश
न मादिष्टं तदकृतं पञ्चम्यास्तिर्दिष्टः अकृतादेशादचः पूर्वस्येत्यर्थः आदेशात्प्रागवस्थायां यावत् न वा प्राप्नोत्यवस्थायाः पूर्वस्मिन् विधातव्ये तदादेशः स्थानि
वदिति संभवति। ननु कर्मसाधने अजादेशः स्थानिवद्भवति अकृतादेशादचः पूर्वस्य विधाविति नायमर्थः संभवति स्थानिद्वावस्थायामचश्चादेशेनानि
वर्तितत्वात्। नात्र संप्रत्ययः पूर्वस्येत्ययमर्थः किं तर्हि अचो वस्था नदशायां प्रवर्तिनः पूर्वस्याजवस्थाप्रभृति पूर्वस्येत्यर्थः न स्थेमजये स्वस्य पूर्वत्वं स्वाश्रयणा

रा॰ म॰
५३

© Dharmartha Trust J&K. Digitized by eGangotri

किंपुनः कारणं अजपेक्षमेव पूर्वत्वमाश्रीयते न पुनरादेशापेक्षं निमित्तापेक्षं वा उच्यते नैतदपेक्षे पूर्वत्वे वैयाकरणाः सोऽवक्ष्यत्स्तत्र यणः स्थानिवद्भावादेवोराया
वोऽप्राप्नुतः। तावपि हि यणादेशान्निमित्तात्परस्मादचः पूर्वस्य कार्ये न च वाच्यं सत्यपि स्थानिवत्त्वे अन्तर्भूतान्निमित्तत्वात् अन्तरङ्गयोरायावोः कर्तव्ययोः बहिर्भू
ततद्धितापेक्षतया बहिरङ्गो वै वाव् सिद्धाविभाषपावोन भविष्यत इति। नाजानन्तर्ये बहिष्ट्वप्रकृत्तिरिति वचनात् यथा अक्षद्यूरिति बहिर्भूतकिवपेक्षो ऊठ् अन्तर्भूता
जपेक्षे यणि नो सिद्धो भवति अजपेक्षे तु पूर्वत्वे विद्याकारणः सुजेश्वरस्त्वज वस्थायो यौवौर भावेन एचोरदर्शनात् प्रसंगः। तदाह आचः पूर्वविज्ञानादेचोः सिद्धमि
ति। किं च निमित्तापेक्षे पूर्वत्वे हृभ्यां देपल वनमित्यत्र अत्वे लघुगुणाः स्वनिमित्तात्पूर्वेषां तेषामेव कार्ये वृद्धिर्गुणा वादेशेषु स्थानिवत्सु तयोभयोरपि पक्ष
योरपीपचदित्यादौ सन्वल्लघुनीति सन्वद्भावो न स्यात् उपधाह्रस्वस्य स्थानिवत्त्वात् अजपेक्षे तु पूर्वत्वे णाविअत इति स्थिते द्विर्वचनमुपधाह्रस्वत्वं णिलोपः इते
तेषु प्राप्तेषु परत्वादन्तरङ्गत्वाच्च णिलोपे कृते परत्वान्नित्यत्वाच्च ह्रस्वत्वे पश्चाद्द्विर्वचने अभ्यासस्य स्थानिनो यः पूर्वत्वेनादृष्टत्वान्नास्ति स्थानिवद्भावः तथा
चतत्रतत्रोच्यते योनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः आदिष्टाच्चैषोचः पूर्व इति तस्मादजपेक्षमेव पूर्वत्वं पर्येवं तन्वंतीत्यत्र इटि कर्तव्ये यणः स्था
निवत्त्वं न स्यात् तनु उअंतीत्यजवस्थायां यस्तव्यं गानभस्येट् किं तर्हि ततः परस्मादेशस्य च निमित्तपेक्षे तु परणो निमित्तादंसकारात्पूर्वस्यत्वस्यैव यणः इडि
षेप इति कर्मसाधने भावसाधने व विधिशब्दे स्थानिवत्त्वं लभ्यते आदेशापेक्षेपि भावसाधने यणः पूर्वस्येटोविधेयत्वात्सिध्यति। नैष दोषः आर्द्धधातुकस्येडिति
त्र एकाचउपदेशइत्यतउपदेशइत्यनुवृत्तेः यदेशे वलादौ इड्भविष्यति नेटः कृतत्वात्पिताहि प्राप्नोतीति नेड्वशि कृतीति निषेधो भविष्यति तत्राप्युपदेश इत्यनुवृत्तेः
एवमपि चोरिष्यत इत्यादौ वलादिलक्षणो णिचि परतः दिति च प्राप्ते नित्यत्वाच्चिणवदिडिति व स्तितिनित्यत्वात्पर्वत्वात्निमित्तो विघात इति तन्नोपपद्यते उक्तेन प्रकारेण
वलादिलक्षणस्याप्रीठो नित्यत्वात्। एवं तर्हि बहिरङ्गस्य यणो सिद्धत्वादिड्भावः। पद्धा पूर्वस्मादिधिः पूर्वविधिरिति पंचमीसमासोऽथाश्रीयते तेन पूर्वस्मादि
गादिरो निमित्तत्वेनाश्रितात्परस्य यण इटि कर्तव्ये स्थानिवद्भविष्यति कानि पुनः पंचमीसमासप्रयोजनानि इदं तावत्प्रयोजनं तत्तन्वन्तीति। किं च
वेभिदितामाचिति कः अपीपचन्बेभिद्यतेर्यङः तान्त कि अल्लोपयलोपयोः कृतयोरेकाच उपदेशेनुदात्तादिति इट्प्रतिषेधः स्यात् अल्लोपस्य स्थानि
वत्त्वान्न भवति नेनदस्ति वेभिद्यतेरिति स्थिते अल्लोपश्च प्राप्नोति इट्परत्वादिट् कृते अल्लोपः कृतेपीटि प्राप्नोतिश्रू पुनरनित्यः न हि कृते अल्लोपे प्राप्नोति नित्येन
ल्लोपेन बाध्यते यस्य च निमित्ते लक्षणं तोरणविहन्यते तेन तदनिसं अन्तरङ्गयोर्नित्ययोः परत्वादिडेव भविष्यति।।

© Dharmartha Trust J&K. Digitized by eGangotri

।इ॒दंत॒र्हि म॒थितं पण्यमस्य माथितिक इति वस्येकारे ग्रोहर्तेयस्येति लोपे च इक स्यास्थानिवद्भावेन व ग्रहणेन ग्रहणादिसुसुक्तांतात्काइति कादेशः प्राप्नोति यस्येति लोप स्यास्थानिवद्भावत्वान्न भवति। एतत्पिस्त्रिपातपरिभाषया पठस्येतिवर्णग्रहणेन। विधित्वेन स्थानिवद्भावाभावात्सिद्धं इदंतर्हि अयीयवन् अयीयवन्नित्य इतिस्थि तेऽभ्यंसकस्य ङ॰ कारस्य चातो गुणोपस्प॒य त्वे तस्य परं प्रत्यादिवद्भावान्निग्रहणेन ग्रहणेऽसति सिजभ्यस्तविदिभ्यश्चेति जुस प्राप्नोति णिलोपस्यैकादेशस्यवास्थानिव द्भावान्न भवति। तदेवमजपे स्त्रमेव पूर्वत्वमाश्रीयते विधिशब्दश्च कर्मसाधनः शेषषष्ठ्याश्च समासइति न कश्चिद्दोषइति स्थितं। पटयतीति णाविष्टवत्तिति टिलोपः। अवधी दिति। हनो वधलिङि लुङि चेति वधादेशः। हलंत लक्षणेति। वदव्रजेत्यतो हलंतस्येत्यनुवृत्तेः हलंतक्षणा वृद्धिः। ढकइत्यत्र स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानि

।पट्पति। अवधीत्। बढ्रुषाढ्वकः। पटुमाचष्टे इति णिचि टिलोपे कृते तस्य स्थानिवद्भावात् अत उपधाया इति वृद्धिर्न भवति। अ वधीदिति अतो लोपस्य स्थानिवद्भावात् अतो हलादेर्लघोरिति हलंतलक्षणा वृद्धिर्न भवति। बढ्रुषेढ्वकइति भाषायां मतस्य आमि ति ह्रस्वस्य स्थानिवद्भावात् ह्रस्वांते स्यात्पूर्वमिति स्वरो न भवति। अच इति किं। प्रश्नः। विश्नः। अकाष्टां। आगत्य। प्रश्न इति प्रच्छेर्न ङ् प्रत्यये छ्वोः श्रूडनुनासिके चेति छकारस्य शकारः परनिमित्तकस्य कित्कर्ततोऽमेन स्थानिवद्भवति। अकाष्टामिति झलो झलीति सिचो लोपः परनिमित्तकः। षढोः षकारस्य षढोः कसीति ककारेक कर्ततोऽमेन स्थानिवद्भवति॥ ५४ ॥ ॥

वदिति वचनात्स्वरविधावप्यत्र स्थानिवत्त्वं मवसेव प्रश्नइत्ययज पाचयते त्यादिना नङ् तुकि न स्थानिवद्भवतीति। तुकि कर्तव्ये न स्थानिवद्भवतीत्यर्थः। नन्वत्रांतरंगत्वात् पूर्वं उकाभावं पत्रचे कंनिमित्री हत्य युगपद्योगग्णयोः प्रसंगः तत्र वार्णादांगंबलीयः यथा कुरोतेर्लिटि णालि कृञ इति स्थितेगो रित्यत्र सावकाशामचो ञ्णितीति वृद्धिवा धित्वाऽन्तरंगत्वात्सार्वधातुकार्धधातुकयोरिति गुण एव बाधते प्रश्नइत्यत्र नुडागमस्य नङ् निमित्तं तु कस्तच्छः भिन्नकालत्वादानयोः प्राप्तिरिति नायमस्य विषय इति तु किमसति छ्वोः शूडित्यत्र सतुकच्छकारनिर्देशे तस्येवादेशः एवं च सत्यपि स्थानिवत्त्वे सतुकच्छग्रहणेन ग्रहणाते न केवलं छग्रहणेनेति कृतस्तुकः प्रसंगः अत एव नङो ङित्वमपि विश्न इ ति गुणो मा भूदिति तस्माद्युदाहरणमेतदिति प्रत्युदाहरणांतरमाह। अकाष्टामिति। सः शमवाहृषत्पदपांसिद्धावन्कः इति कापवादः। पक्षेऽसिद्धम् अनुदात्तस्ये सम्। पाणिवद्व्रजेति वृद्धिः। सर्वत्रासिद्धेन स्थानिवद्वचनादत्राप्यन्नाहजागमेति बाल्यपि॥ ५४ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

गपुवतिजारितिवद् व्रीहौ पुंवद्भावः युवतिश्शब्दस्य वयोवचनत्वेनाजातिवाचित्वाज्जातेश्चेति प्रतिषेधो न भवति। यलोपे न स्थानिवदिति ननु योऽत्रादेशः न्यासो लोपस्य नि
मित्तं तस्य वर्णमात्रनिमित्तत्वात् पञ्चनिमित्तं नकारः नासावादेश इति स्थानिवत्त्वं न भविष्यति न च न्यायाश्शब्दस्याजन्तरोपादि केऽपि पूर्वस्य पञ्चविभाषेत्यत्वेच सुप्तादित्वा
त् निङः स्थानिवत्त्वे समासान्तो लोपप्रसङ्गः न स्युण्णादिषु सुप्तन्ति कार्यमवश्यं भवतीत्यत उदाहरणान्तरोपन्यासः वैयाघ्रपद्य इति व्याघ्रस्येव पादावस्येति पादावस्येति पा
दस्य लोपो हस्त्यादिभ्य इति अपरनिमित्तः गार्ग्यादिभ्यो यञ् ननु सत्यपि स्थानिवत्त्वे वचनात्पद्भावो भविष्यतीत्यपि चेवं पादस्य त्रापि प्राप्नोति सति तु परस्मिन्निति स्मिन्नेवेति वैया
घ्रपद्य इत्यत्र पद्भावस्यावरितार्थत्वात् पादेस्य लेकादेशस्य स्थानिवत्त्वात् पद्भावाभावः कथं पुनरेकादेशस्य स्थानिवत्त्वं न त्वयमचश्च इदंशः किं तर्हि अचोः उच्यते न
एनि देशो जातिग्रहणात् अच इत्येकत्वस्याविवक्षितत्वात् अचोरयादेशः स्थानिवत्। द्वयोरपि वास्थानिस्ले परेकस्यस्यानित्वं न दाश्रयं तस्य स्थानिवत्त्वं भविष्य

।परस्मिन्निति किं युवजानिः वधूजानिः। वैयाघ्रपद्यः। आदीध्ये जायायानिङ् नपरनिमित्तकस्तेन पलोपेनस्थानिवद्भव
ति। वैयाघ्रपद्य इति न परनिमित्तकः पादस्यान्तलोपः पद्भावं न प्रतिबध्नाति। आदीध्ये इति दीधीङ् उत्तमपुरुषैकवचने टेरेत्व
स्यापरनिमित्तकत्वात् यीवर्णयोर्दीधीवेव्योरिति लोपो न भवति। पूर्वविधाविति किं। हे गौः। बाभ्रवीयाः। नैधेयः। हे गौरिति वृद्धि
रजादेशः संबुद्धिलोपे कर्तव्ये न स्थानिवद्भवति। बाभ्रवीयाः गार्ग्यस्य स्वामी छात्रा इति वृद्धाच्छ इति छः हलस्तद्धितस्येति य
कारलोपे कर्तव्ये उवादेशो न स्थानिवद्भवति॥ ॥

।तात्अत एव न्यायसोगो मतो चातुरो ध्याडु हावितिश्यामपसादिभ्यः एतेभ्यः ओ प्रत्यये एकादेशस्यादिवत्वात् मा सो नु मा मो न भवतः। उद्कं वहतिकम्मण्यणसंता
यामुदभावः सम्मेकवचने एकादेशस्यादिवत्वान्द्रत्वे सति प्राप्तो वाह ऊठ् न भवति उदवाहेरिति। आदीध्ये इति। अदादित्वाच्छपो लुक्परस्मिन्निति लुक्स्मानेस्थानिव
द्भावाभावात् कृते टेरेत्वे लोपो न प्राप्नोति टेरेत्वं तु कृतार्थतम संगित्वान्निमित्तं देव भवति ननु च परस्मिन्निति सति श्लुको पि स्थानिवत्त्वात् तत्र व्यवधाना देव
लोपो न भविष्यति न। किं लुगुपधात्वचङ् परनिर्ह्रासकुत्वेष्विति लुक्लुप्तस्य स्थानिवत्त्वप्रतिषेधात्। हे गौरिति गोतो णित्। बाभ्रवीया इति ओः पपसिति मधु
बभ्रुवो वीलक्षणकौशिकयोरिति यञ् अगुणः वान्तो यि प्रत्यय इत्यवादेशः अवादेशो न स्थानिवद्भवतीति ननु चासत्यपि स्थानिवद्भावे संनिपातपरिभाषयानभ
वितव्यमेवात्र यलोपेनैतदस्ति अवत्यय संघातो यादि सन्निपातकृतः न च सलोपस्य तिमित्तं किं तर्हि वकारमात्रं। पूर्वं स्थानिवद्भावस्याप्रसङ्गः। योऽत्रादेशो

© Dharmartha Trust J&K. Digitized by eGangotri

नैधेय इति निर्द्दिश्यमानत्वात् उपसर्गयोः किः आतो लोपः अचः इतश्चानिञ इति ढक् । ननु च पूर्वस्मादपि विधौ स्थानिवदित्युक्तं तत्कथमेतान्युदाहरणानि । नैष दोषः अत्राप्य
सजपेक्षस्य पूर्वस्याश्रयणात् योनादिष्टादचः पूर्वः ततः परस्येति एवमपि हेगोरित्यत्र प्राप्नोति अवहितेऽपि परशब्दे हन्तेर्गकारस्यापरस्य मोल्लोपः एवमितरयोरपि नैतदेवं पूर्वस्य
विधिरिति षष्ठीसमास एवायं तत्रानुक्तत्वात् स्थानषष्ठ्यभावात् संबंधसामान्ये षष्ठी पूर्वसंबंधिनि विधाविति संबंधश्चाद्विविधः कार्यित्वे न निमित्तत्वे न वा यत्र कार्यित्वेन
स पूर्वस्य विधिः यत्र निमित्तत्वेन स पूर्वस्मात् ततश्च योनादिष्टादचः पूर्वः तन्निमित्तत्वेनाश्रित्य कार्यं प्राप्तं स एव पूर्वस्माद्विधिः यथाऽयीपचन्नित्यत्र हि योनादिष्टो
णिचकारस्ततः पूर्वपीपचत्यस्य [illegible] हेतुर्भवति । तच्चेतीत्यत्र योनादिष्टोच उपधायः ततः पूर्वं यत् तल्लिंगं तन्निमित्तत्वेनाश्रीयते तद्विधावग्लोपस्य तु
वृत्तेः । एतदेव तत्राग्लोपाधिकारस्य प्रयोजनं । हेगोरित्यादौ तु योनादिष्टादचः पूर्वो गकारादिः न तत्संबुद्धिलोपादेर्निमित्तं यच्च निमित्तं मोकारादिर्नासावनादिष्टादचः
पूर्व इति न दोषः । इह तर्हि वितन्वन्नित्यत्र टिलोपस्य पूर्वविधौ स्थानिवत्त्वात् सकारात्पूर्वस्यानुपधात्वात् मादुपधायाश्चेति वत्वं न स्यात् । न चास्य स्थानिवद्भावे सन्निहितमकार

नैधेयः आतो लोप इटि चेत्याकारलोपः ॥ इतश्चानिञ इति
ढग्लक्षणे प्रत्ययविधौ न स्थानिवद्भवति ॥ ५५ ॥ ॥

मपेक्ष्याकारांतादित्ति लक्ष्यते तस्यानादिष्टादचः पूर्वत्वाभावात् तदपेक्षेऽपि वत्वे स्थानिवद्भावाभावात् । नैष दोषः पूर्वत्रासिद्धे न स्थानिवत् । विधिग्रहणं किं न पूर्वस्य त्रादेवानुव
र्तते । समासद्वयपरिग्रहार्थं असति हि तस्मिन् पूर्वस्येत्युक्ते पूर्वस्माद्विधौ न स्यात् । पूर्वस्मादित्युक्ते पूर्वस्य विधौ न स्यात् । नैतदस्ति पूर्वस्येत्युक्तेऽपि अनुवादत्वात् स्थानष
ष्ठ्यभावात् सर्वः पूर्वसंबंधी विधिः प्रतिपत्स्यते एवं तर्हि विधिमात्रे स्थानिवद्यथा स्यात् शास्त्रीये विपरीते । चायद्वा विधिग्रहणं द्वितीयो यत्नः तत्र च अचः परस्मिन्पूर्वस्मि
न्नेको योगाः विधाविति केवलमनेन [illegible] इत्युपतिष्ठते ततो विधौ अचः परस्मिन्पूर्वस्येत्येव नियमार्थमेतत् तत्र आदेशः परनिमित्तकः पूर्वविधौ
स्थानिवदेव न तु स्वपरनिमित्तमिति तेन यायतीत्यादि सिद्धं भवतीति तेन च सत्यपि द्वितीययत्ने यथा चोलवत् काश्मीरे बृब्रीहयः मरुभूमिवदस्मिन्प्रदेशे जलमि
त्यादौ दृष्टांते प्रसिद्धस्य भावस्याभावस्य वा यथा दर्शनमतिदेशः एवमत्रापि भविष्यति । विषम उपन्यासः पुक्तं तत्र भावस्य वाभावस्य वा च प्रसिद्धत्वात् इह तद्वा
हरणे भेदेन भावाभावयोः प्रसिद्ध्या विषयानिर्द्धारे दैवाद्युक्ते अतत्क्रियापदे श्रुतको श्रुभवतीत्येवाध्याहारस्य प्रसिद्धत्वात् भावातिदेशः स्यात् इत्यलमतिप्रबंधेन ॥

॥ नपदांत ॥ ॥ द्विर्वचने यलोपादेशे च तावत्‌ न देव विधेयं ननु तस्मिन्नवस्थितस्य किंचित्कोस्त इत्यादेशोनुपदांतस्य सतः कार्यमावादिपदांतस्य वा अच आवादेर्विधाना
मिति भय यथा संभवः एवं वरे विधावपि तथापि सर्वानुग्रहाय भावसाधन एव विधिशब्दः। एतेष्विति। पदांतादि विधेयभेदेन भिन्नानि यानि विधानानि एतेष्विति सप्तम्यर्थः। पू
र्वविधावित्यादि। यद्यपि आकरणे नपदांतेति नियमः किं तेन वाक्ये तथापि तत्र कायगतेस्तत्त्वमादिके पदे सुसाधमाने काविसादेः पदस्यासत्त्वपि निमित्तत्वे सन्निधानमविरुद्धं
स्थानादिष्टादचः पूर्वत्वसंभवात्‌ अस्ति स्थानिवत्त्वप्रसंग इति भावः। दध्यत्रेति। स्थानिवद्भावप्रतिषेधसामर्थ्यात्‌ सिद्धं बहिरंगमंतरंगे इत्येतदपि न प्रवर्त्तते इत्याविसादाव

॥ नपदांतद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। पूर्वेणातिप्रसक्तः स्थानिवद्भावः एतेषु विधिषु प्रतिषिध्यते।
पदांतविधिं प्रति अजादेशो न स्थानिवद्भवति। कौ स्तः। यौ स्तः। तानि सन्ति। यानि सन्ति। श्नसोरल्लोपः क्ङिति सार्वधातुके इति परनि
मित्तकः स पूर्वविधावावादेशे यणादेशे च कर्तव्ये स्थानिवत्स्यात्‌। अस्माद्वचनान्न भवति। द्विर्वचनविधिं प्रति न स्थानिवत्‌। द
ध्यत्र। मध्वत्र। यणादेशः परनिमित्तकः तस्य स्थानिवद्भावात्‌ अचि चेति धकारस्य द्विर्वचनं न स्यात्‌ इत्यस्माद्वचनाद्भवति। वरे यो
ऽजादेशः स पूर्वविधिं प्रति न स्थानिवद्भवति। अप्सु यायावरः प्रवपेत पिंडान्‌। यातेर्यङ्‌। ताच्छील्ये यश्च यङः इति वरच्‌। इहातो लोपः
परनिमित्तकस्तस्य स्थानिवत्त्वादातो लोप इटि चेत्याकारलोपः स्यात्‌ अस्माद्वचनान्न भवति। यलोपः। यलोपविधिं प्रति अजादेशो
न स्थानिवद्भवति। कंडूतिः॥

पिबाहिर्भूतातत्त्वे सत्याघपवहिरंगएवा वरेइति निपातनात्‌ लुक्‌। पायावर इति नित्यं कोटस्लेरितावितियङ्‌। अतोलो
पः परमे यो रनिमित्तक इति। कण्डूञ्‌ धातुक इति परसमीपस्थ इति भावः। तथा चानुदात्तेतश्च हलादेरित्यत्रादिग्रहणं असति हि किं न हलंतादिति विज्ञायेत तत्र जुगुप्स
नो मीमांसानं इत्यत्र पुन्नस्यादिति। यद्विवसा विषयसप्तमी स्यात्‌ प्रागेव प्रत्ययोत्पत्तेरतो लोपे सति हलंतत्वादत्रापि युवृ सिद्धः स्यात्‌। यत्तवो पदिस्तत्र वृत्स्यतिअन्यग्रहणं किं
भवताहलंतास्यपततं व सतिअज्झंतभूतपूर्वादपि यथा स्यात्‌ इत्येवमर्थमिति द्विविधसप्तमीपक्षे इति वेदितव्यं परसप्तमीपक्षे हि प्रागेव प्रत्ययोत्पत्तेरतो लोपाभाव

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ ५८.११

५६

।कंडूयतेः क्विनि कृतः इति। क्विन्नावादिभ्यो वक्तव्य इत्यनेनेति भावः। क्विनि इति नुपुक्तः पाठः कंडूतिरिति। अत्रालोपस्य स्थानिवत्त्वादूठ् न प्राप्नोतीत्यत आह। ऊठिप्रसङ्गे वि
ध्यतिनेचो अपि स्थानिवत्त्वं आदिष्टादचः पूर्वत्वात्। अत एवोठः पुनरुक्तं भवति। परसवर्णेन स्थानिवद्भवतीति। ननु वभ्रमोरल्लोपे कृते पश्चादनुस्वारो भवन्नादिष्टाद
चः पूर्व इति कथमस्य परसवर्णे कर्तव्ये स्थानिवत्त्वप्रसंगः। स्यादेतत्। स्थानिनो नकारस्यानादिष्टादचः पूर्वत्वात् ततो अनुस्वारेऽपि स्थानिवद्भावात् अनादिष्टादचः पूर्वे

ऊव

।कंडूयतेः क्विनि कृते अतो लोपः परनिमित्तको लोपो व्योर्वलीति यलोपे स्थानिवत्स्यात् तस्मात् ऊठ् च न भवति। स्वरः। स
रविधिं प्रति अजादेशो न स्थानिवत्। चिकीर्षकः। जिहीर्षकः। रघु लिङ्कृते अतो लोपः परनिमित्तको लिति प्रत्ययात्पूर्वं
मुदात्तमिति स्वरे कर्तव्ये न स्थानिवद्भवतीतीकारः स्वरः। सवर्णः। सवर्णविधिं प्रति अजादेशो न स्थानिवद्भवति। शिण्ढि। पि
ण्ढि। शिषेः पिषेश्च लोण्मध्यमपुरुषैकवचने रुधादिभ्यः श्नम् हिल धिल ष्टुत्व जश्त्वेषु कृतेषु श्नसोरल्लोपः क्ङिति
सार्वधातुके परनिमित्तको नो नुस्वारस्य यथि परसवर्णे कर्तव्ये न स्थानिवद्भवति। अनुस्वारः। ~~अनुस्वारः~~ अनुस्वारविधिं
प्रत्यजादेशो न स्थानिवद्भवति। शिंषन्ति। पिंषन्ति। नश्चापदान्तस्य झलीति अनुस्वारे कर्तव्ये श्नसोरल्लोपो न स्थानिवद्भवति ५६

एम ४

५६

ति तन्न। नत्वनादिष्टादचः पूर्वत्वं नाम स्थानीयं यदिति दिश्यते। एवं तर्हि अनादिष्टादचः पूर्वत्वाये स्वेचः परस्मिन्नित्यतिदेशो कर्तव्ये स्थानिवदादेश इत्येतत्प्रवर्त्तते अ
तः सवर्णग्रहणं कृतं। शिंषन्तीति यद्यपि शिंषन्तीत्येवानुस्वारविधेरुदाहरणं तथापि तत्र क्विन्नेवोदाहृते परसवर्णविधौ स्थानिवत्त्वनिषेधस्तस्य स्थानिनो नुस्वारस्यापि
विधौ स्थानिवत्त्वप्रतिषेधमंतरेणानुपपन्न इति प्रथमानुस्वारग्रहणं न कर्तव्यमित्याशंकानिराकरणाय केवलानुस्वारोदाहरणं दर्शितं॥ ५६ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।प्रतिदीव्नेति। प्रतिपूर्वाद्दिवेः कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन्प्रत्ययः। भस्येत्यधिकृत्येति। परनिमित्तकाल्लोपस्यादन्नार्थमिदमुक्तं हलि च उपधायाञ्चेति
दीर्घत्वं न स्यादिति। उपधायाञ्चेत्येतन्न लेखकैः प्रमादाल्लिखितं तथा चोपधायाञ्चेत्यत्र व इति प्रतिदीव्न इत्यत्र हलि चेति दीर्घत्वमिति। अस्मात्द्भ्वनाद्भवतीति। न भकुर्छुराम्

॥दीर्घादीर्घविधिं प्रति अजादेशो न स्थानिवद्भवति। प्रतिदीव्ना। प्रतिदीव्ने। प्रति दिव् इत्येतस्य भसंज्ञकस्य तृतीयैकवचने चतु
र्थ्येकवचने च ■ अल्लोपोऽन इति अकारलोपः परनिमित्तकस्तस्य स्थानिवद्भावाद्धलि चेति दीर्घत्वं न स्यात्। नलोपं च कारे हलग्रह
ति। अस्मात्द्भ्वनाद्भवति। जग्ध्वा। जक्षिविधिं प्रत्यजादेशो न स्थानिवद्भवति। मग्धिश्च मेसपो तिस्त्र मेव ब्रोते हरी। धानाः। अदेः क्तिनि वद्कु
लं छन्दसीति घस्लादेशः। घसिभसोर्हलि चेति उपधालोपः। झलो झलीति सकारलोपः। झषस्तथोर्धोऽध इति धत्वं उपधालोपस्य स्था
निवत्त्वात्। झलां जश् झशीति घकारस्य जश्त्वं न स्यादस्मात्द्भ्वनाद्भवति। समानानाग्धिः समानस्य सभावः। सग्धिः। बब्धामिति भसे
र्लोट् द्विवचनं तां। शपः श्लुः। द्विर्वचनमभ्यासकार्यं। घसिभसोर्हलि चेति उपधालोपः। झलो झलीति सकारलोपः। झषस्तथोर्धोऽध इति
धत्वं उपधालोपस्य स्थानिवत्त्वात् झलां जश् झशीति जश्त्वं न स्यादस्मात्द्भ्वनाद्भवति। बब्धाम्। चर्विधिं प्रत्यजादेशो न स्थानिवद्भवति।
जक्षतुः जक्षुः। अक्षन्नमीमदन्त पितरः। लिट् द्विवचनबहुवचनयोरदेर्घस्लादेशः। गमहनजनखनघसां लोप इत्युपधालोपः। द्विर्वच
नमभ्यासकार्यं। अत्रोपधालोपस्य स्थानिवत्त्वात् खरि चेति घकारस्य चर्त्वं न स्यादस्मात्द्भ्वनाद्भवति। शासिवसिघसीनां चेति षत्वं।
अक्षन्निति अदेर्लुङ् बहुवचने घस्लादेशः। मन्त्रे घसेति च्लेर्लुक्। गमहनजनखनघसामित्युपधालोपः। तस्य स्थानिव
त्त्वात् खरि चेति चर्त्वं न स्यादस्मात्द्भ्वनाद्भवति। अक्षन्। स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद्भवति। अन्यत्र तु स्थानिवदेवा॥

तिनुप्रतिषेधो रेफवकारान्तस्य भस्येत्यत्र न प्रवर्त्तते। झलो झलीति सलोप इति धिसकारे सिचो लोप इत्येतत्त्वनाश्रीयते तस्मिंस्त्वाश्रिते छान्दसत्वाद्दलोपः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

बङ्कुरवङ्कुरः इति। अत्र स्थानिवद्भावात् ह्रस्वान्तत्वात्पूर्वमिति खकाराकारस्य दीर्घत्वं न भवति कपि पूर्वमित्येतदेव तु भवति। किर्योः गिर्योः इति छयोरिच्चेति सुत्रस्त्रिपक्ष एव
तुदादिकृतं उपधायास्त्वेवत्रापि सुत्रस्त्रिपक्ष एव तु दादिकृतं उपधायाश्चेत्यत्रापि सुत्रस्त्रिपक्षमाश्रित्य वक्ष्यति उपधायाश्च इत्यत्र निपातितः इका इति तेन जित्रिः किर्योः गिर्योः
इत्यादिषु दीर्घो न भवतीति किं तु उपधायां च वह्वः परनिर्द्धासकृत्वेषु अजादेशो न स्थानिवद्भवतीति वक्तव्यं किं कोपदिधीयते तत्र कर्त्तव्येयत्र कुत्रचित् कृतो जादेशो
न स्थानिवद्भवतीति लवमाचक्षाणो लोः अत्रापि चियच्छिलोपः यश्चक्कोशिलोः तदुभयमपि छ्वोः शूडिति वकारस्य किं निमित्ते ऊठि कर्त्तव्ये न स्थानिवद्भवती
ति एत्येधत्यूठ्स्विति वृद्धिः ये तु छ्कोलुप्तं न स्थानिवदिति पठन्ति तेषामेतन्न स्यात् तथा पिपठिषते इको अतो लोपेन पुमसके वद्धवचने जसि हल्लक्षणे नुमि जस् नि
मित्ते पि कर्त्तव्ये अतो लोपस्य स्थानिवत्त्वनिषेधः स्यात् कौ कृतत्वात् कौ विधिं प्रतीत्यत्र तु पक्षे प्रतिषेधो न भवति पियठि पिन्ना हलोऽणकुलानि नुम्प्रसङ्गे तिसान्तमहतः इति

।तेन बङ्कुरवङ्ककः। किर्योः गिर्योः वाघोरिति स्थानिवत्वात् स्वाङ्गे दीर्घयलोपा न भवन्ति॥ ५७ ॥

दीर्घत्वं न भवति दिवयतेर्द्यूरित्यत्रोभयथापि सिध्यति लुक्लुकालुप्तं न स्थानिवत् आमलकाविकारः फलं नित्यं वृद्धशरादिभ्य इति मयट् फले लुक् लुक्तद्धितलुकि
तिङीपो लुक् पर निमित्तकः प्रसज्येत लोपेन स्थानिवद्भवति। के विशेषतः शेषस्त्रेण्या द्विरेर इतीकारप्रश्लेषं व्यापयन्ति। ईकिविधिं प्रतिन स्थानिवदिति। उपधात्वं उपधाति कर्त्त
व्ये न स्थानिवत् पारिखाशब्दाच्चातुरर्थिके अण् कृते पारिखेभवः पारिखी परुत्तिह्रद्र इत्ये केकीन खोपधादिति छोन स्यात् आकारलोपस्य स्थानिवत्वात् नुपधात्वका
रइति। प्रसयविधि विषयं चैतत्। यत्रोपधामेत्तानिबन्धनः प्रत्ययो विधातुमिष्यते तत्रैवेसर्थः। घटयतीत्यादौ तु तन्न भवति। वह्रः परो योनिर्द्धासिः ह्रसः तत्र न स्था
निवद्भवति। वारितवंतं प्रयोजितवान् अवीवदत् वीणां परिवादकेन णौ णौ णिर्लुप्यते तस्य स्थानिवद्भावास्येच ह्रसुपधाया ह्रस्वो न स्यात्। यश्चह्रः परो णि न्निसि
न्नगस्योपधाया स्थिर्यागस्योपधान सचवह्रः परः इति। कुत्वं णचयतेः क्विपार्त्तिः कुत्वमुपलक्षणं लेह यतेर्लेटिः। दोह यतेर्दोग्धिः। पाजयतेर्याष्टिर्वेशायतेर्वैष्टिरित्या

दि॥ ५७ ॥ ॥श्रु श्री॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥द्विर्वचनेचि॥ ॥अचापरस्मिन्निमित्तत्रयो नादिष्टात्सूर्वः पूर्वस्यैतिद्धितं साक्षात्पद्विर्वचनं नतत्रचः पूर्वस्मिन्प्राप्तं स्थानिवत्त्वं विधीयते तस्यातिदेशार्थं चात्र षड् दृश्यानि संभवंतित्रु चीत्यादेशोपलक्षणं द्विर्वचन इति विषयनिर्देशः आचियोजादेशः स द्विर्वचने स्थानिवद्भवतीति प्रथमः पक्षः अचीत्येतदपि स्थानिवद्भावेनैव संबध्यते द्विर्वचन इति विषयनिर्देशः द्विर्वचने कर्तव्ये स्थानिवद्भवत्यचि परत इति द्वितीयः द्विर्वचनमिति नलादजेव द्विर्वचनग्रहणेन विशेष्यते द्विर्वचनमस्मिन्नस्तीति पञ्चम्याद्यं चूर्णस्याप्यतेनार्थ अधिकरणसाधनेन वाप्येवं विशेषितं चाज्ग्रहणं आदेशोपलक्षणं द्विर्वचननिमित्ते चियोजादेशः सस्थानिवदितित्तीयः एवं विशेषितं चाज्ग्रहणं द्विर्वचननिमित्ते चियोजादेशः सस्थानिवदितित्तीयः एवं विशेषितं चाज्ग्रहणं स्थानिवद्भावस्य विशेषणं अजादेशः स्थानिवद्भवति द्विर्वचननिमित्ते चि परत इति चतुर्थः द्विर्वचनग्रहणमावर्ततेतत्रैके नान्विदोष्यते अपरेणविषयो निर्दिश्यत इति द्वितेन विशेषितमज्ग्रहणं स्थानिवद्भावस्य विशेषणं द्विर्वचने कर्तव्ये अजादेशः स्थानिवद्भवति द्विर्वचननिमित्ते चि परत इतियं पंचमः एवमवस्थिते अज्ग्रहणमादेशोपलक्षणं द्विर्वचनमिति निमित्ते चियोजादेशः स द्विर्वचने कर्तव्ये स्थानिवद्भवतीति षष्ठः अत्राद्यपक्षेऽचो द्विर्वचने

॥द्विर्वचनेचि॥ ॥द्विर्वचननिमित्तेऽचि अजादेशः स्थानिवद्भवति द्विर्वचन एव कर्तव्ये॥ ५८ ॥ ॥

नाविशेषितत्वाद्द्विर्वचननिमित्तेऽप्यचि आदेशः स्थानिवत्स्यात् ततश्चा चिकीर्त्तत् इत्यत्रणिचि उपधाया इत्वेतीत्त्वस्य चङीति द्विर्वचने स्थानिवद्भावात्सचकीर्तदिति स्यात् दुद्यूषतीत्यूठियणादेशः स्थानिवत्स्यात् भवनमिच्छतीभवनीयतेः सनि बिभवनीयिषति लुङिकृतयोर्गुणावादेशयोः स्थानिवत्त्वे बुभवनीयिषतीत्यनिष्टं रूपं प्राप्नोति द्वितीये तु अचिकीर्त्तदित्यत्र न दोषः इत्वस्य तकारेणाव्यवहितत्वात् स्थानिवद्भावमाजो हादेशस्य स्थानिवत्त्वविधानवेलायामचनंतरस्थानिवत्त्वेन भवितव्यं एवं त्यचि परतः स्थानिवद्भावः कृतो भवति दुद्यूषतीत्यादौ तु स्यादेतत् यपाविषजआत जोणल इत्योकारेण वृद्धौ कृतायां संप्रसारणे स्थानिवत्त्वं न स्यात् जग्मतुरित्यादौ च गमहनेत्युपधालोपस्य अव्यवहितत्वात्स्यात् तृतीये तु कालावधारणं कर्तव्यं अन्यथा द्विर्वचनादुत्तरकालमपि स्थानिरूपमेवावतिष्ठेत चतुर्थे तु पपोजग्मतुरित्यादौ एवंविधप्रापेन स्थानिवद्भावो न प्राप्नोति कालावधारणं च कर्तव्यं पंचमेऽपि पपोजग्मतुरित्यादौ न स्यात् अत एते षु पक्षेषु एवं दोषसंभवात् षष्ठे पक्षे स्थित्वा द्विर्वचननिमित्तेचीत्यादि अत्र हि पक्षे द्विर्वचनेनाचो विशेषणात् अचिकीर्त्तत् दुद्यूषति बिभवनीयिषतीत्यादौ न दोषः आदेशोपलक्षणत्वात् पूर्वपक्षादावपि न दोषः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पुनश्च द्विर्वचनग्रहणात् कालावधारणमपि लभ्यते । ननु द्विर्वचननिमित्ते वियोजादेश इत्युच्यमाने अवनुनावपिषानि चुक्षाव पिषति हुस्मारपिषती स्यारैणोर द्विर्वच
ननिमित्तत्वात् निमित्ताभावे आकारस्य न स्थानिवत्स्यात् । ततश्चाभ्यासे उकारेण श्रूयेत नैष दोषः । ओः पुयण्ज्यपरे इति ज्ञापकात् द्वित्वनिमित्तेपि णौ स्थानिवत्त्वावसाया
त् । तथा हि । नहि णौ कृतस्य स्थानिवद्भावमन्तरेण ओः परतः पुयणजो ऽवर्णपराः संभवंति । यियविषति पिपविषते इत्यत्र संभव इति चेत् । किमेतावता ज्ञापुग्रहणं प्रत्या
हारग्रहणं ज्ग्रहणं चार्थवद्भवतीति ज्ञापकमुक्तार्थस्य । यद्येवमपि विकीर्तिरित्यत्र त्वस्य स्थानिवत्त्वादचकीर्तदिति स्यात् । नैष दोषः । ज्ञापकस्य तुल्यजातीयविषयत्वा
त् । यत्रोऽन्त्यभागस्य ओः वर्णपरो भावी तत्रैव स्थानिवत्त्वज्ञापनात् । नन्वेवमपि ओः पुयण्ज्यपरे इत्यत्र णौ इति ग्रहणात् साधकमुक्तार्थस्य । यद्येवमपि मान्यैनाद्वित्वनि
मित्ते स्थानिवत्त्वं विज्ञायेत ततश्च अभिभवनीयिषतीत्यत्रापि स्यात् । नैतदस्ति । येन नाव्यवधानमित्येके नैव ग्रसये न तत्र व्यवधानाश्रयणात् णेरेव केवलस्य अवधाय
कस्यासंभवात् । ननु चावादीत्युच्यमाने चक्रतुरित्यादौ न स्यात् । न सत्राज्मात्रं द्विर्वचननिमित्तं कृतं हि स्यात् न च कारचक्रे इत्यादौ यत्राज्मात्रं प्रत्ययः स्यादेतत्परस्मि
न्निमनु हन्तं अचीत्यनेन न विशेष्यते तत्र यस्मिन्विधिस्तदादावल्ग्रहणे इति तदादिविधिर्भविष्यति अजादौ परस्मिन्निति द्विर्वचननिमित्तत्वेनापि अजाद्येव विज्ञास्यते इ
ति । एवमपि चक्रतुः इत्यत्र न स्यात् । यद्द्विर्वचननिमित्तमजादि न तदादेशस्य निमित्तं अभ्येतुयणो विधानात् यच्चादेशस्य निमित्तं न तद्द्विर्वचनस्य निमित्तंपय
तुः । चक्रतुरित्यादावेव तु स्यात् । किंच यस्मिन्विधिरिति वचनात् यत्र किंचिद्विधीयते तत्रैव तदादिविधिः । इह तु अचि योजादेश इत्यनुवादत्वात् तदादिविधे
रसंभवः । तस्मादजेव गृह्यते न तदादिः । उच्यते च चक्रतुरित्यादावनुमो द्विर्वचनं प्रति निमित्तत्वेनाश्रयणेपि आचिपरत्वावच्छिते द्विर्वचनं द्रष्टमित्येतावता
जेव द्विर्वचननिमित्तमित्युच्यते । स्मृतयोऽप्य यं द्विर्वचनशब्द उपचारेण प्रवर्तते एवमपि ययतुरित्यत्र न स्यात् । आल्लोपस्याजादिनिमित्तत्वं नाज्मात्रे नैष दोषः ।
अचि योजादेश इति कोऽर्थः । अचि योदृष्टः इत्यर्थः । यश्चाचि विधीयते यश्चाजादौ द्वावपि अचि दृष्टावेवेति सर्वत्र सिध्यति । अथवा अजादावाल्लोपः नहलादौ तत्र
प्राप्ताप्राप्तविवेकेनाच एवानिमित्तत्वं । द्विर्वचनकर्तव्य इति एवकारेण दर्शयति द्विर्वचनग्रहणामवेचविशिनष्टि कालंचावधारयतीति एकस्योभयसंबंधे
हि भवंतिव क्राः । देवदत्तो ग्रामं गच्छतु स एव ग्राममानयत्विति ५८ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।यघञापि पूर्वविप्रकार्यनिर्देशः स्यात् चक्रतुरित्यादावनज्कालात् प्राप्ते द्विर्वचनं स्थानिवद्भावाद्दवदपि यणादेशयुक्तस्यैव स्यादिति अभ्यासे स्थानिरूपं न श्रू
येत तदर्थमाह रूपातिदेशश्चायमिति च शाठ्वेव भाष्ये कथं पुनरवगम्यते रूपातिदेशोयमिति अज्ग्रहणात् तद्धि ज्ञीप्सते रूपत्रे ई घाध्मोरिति हलादेः
विहितस्येत्वस्य स्थानिवत्त्वं माभूदित्येवमर्थं क्रियते यदि च रूपस्थानिवत् ततो । सत्यज्ग्रहणे घ्रा यूथा पृ ध्मी प इति द्विर्वचनं स्यादिति तान्निवर्तयेत् अन्
ग्रहणमर्थवत् भवति अथ हि कार्यस्थानिवद्भवति तत स्सत्यपि स्थानिवत्त्वे ईकारयुक्तस्यैव वचनमिति नार्थोज्ग्रहणेन भंसे स्त कमो घसि भसो र्हलि चे
त्युपधालोपे कृते समस्तानिवा द्विर्वचने स्यादिति अतो विशेषाभावः छां दसस्थ बसुः छंदसि दृष्टानुविधानं अतो ज्ञापकमेवाज्ग्रहणं तत्र य
घपि स्थानिवद्भावे रूप मायघते आतिदेशिकानातिदेशिक रूपमेदाश्रयत्कवति द्विर्वचन एवक र्तव्ये इत्येतद्देवस्पष्टयति नियतकालश्चायं कृते द्वि

रूपातिदेशश्चायं नियतकालः कृते द्विर्वचने पुनराट्देशरूपमे
वावतिष्ठते । आल्लोपोपधालोपणिलोपयणायवायावादेशाः
प्रयोजनं ॥ ॥श्री:॥

वचन इत्यादिना नियतकालत्वमेव दर्शयति । यदि कृते द्विर्वचने पुनराट्देशरूपमेवावतिष्ठते यथा चक्रतुरित्यादौ द्विर्वचनादूर्ध्वं पूर्वकृतो यणादेशः
एव श्रूयते तथा निन्युरित्यादावपि द्विर्वचनात्पूर्वमेकाच्त्वादियङादेशे कृते स्थानिवद्भावात् द्विर्वचनेपि पश्चादियङ् न स्यात् ङेः कस्मात् । अकृतत्वस्मासिद्धु
वदन्त्राभादित्यसिद्धत्वात् एरनेकाचइति यणि सति अवर्णं न भविष्यति यद्यप्यूर्ध्वमल्लोपोपीङ् द्विर्वचनकाले यदन्त इति पुनः प्रवर्तयितव्यः तस्योचदर्शा
यामनेकाच्त्वाद्यणा बाध्येते येवं इयेष उवोषेति इषेरुषेश्च लिटि तिपि णलि प्रहत्स्यापि गुणस्य द्विर्वचने कालेप्रहृतत्वात् कृते द्विर्वचने पुनः प्रहृतिः
ततश्चानादिष्टाद् चः पूर्वत्वेनाभ्यासो हस्व इति न स्यात् प्रसपडि कर्तव्ये गुणस्य स्थानिवद्भावादसवर्णइति प्रतिषेधः स्यात् । असवर्णग्रहणात्
मर्थ्यात्स्थानिवत्त्वं न भविष्यति । अस्ति वचनस्यावकाशः इयन्ति इयृतः न त्येकमुदाहरणमसवर्णग्रहणं प्रयोजयति यघेतावत्प्रयोजनं स्यात्तत्र जीवि
स्येव ब्रूयात् । किं तर्हि उच्यते द्विर्वचने पुनरादेशरूपमेवावतिष्ठत इति अत्र हि पुनः शब्दोवतिष्ठत इति वचनाच्च पूर्वकृतस्येवादेशस्योन्मज्जनमेवो

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰११

५९

आल्लोपेत्यादि।उपलक्षणमेतत्।ननु तिः पपुरित्यादौ स्थितत्वात्तो द्वेष्यप्रवर्तस्यैव कुलं छन्द सिति इल्लोपयोरपि स्थानिवत्वं भवति।आटिटदिति।अट तेर्णपन्ताल्लु ङि चङि अजादेर्द्वितीयस्येति टिशब्दस्य द्विर्वचनं आउजादीनां।नियेत्यादि।णालुनमो वेति यदा णित्वं नास्ति तदा गुणः।णित्वपक्षे वृद्धिः।नेनैल्लो लौ इति द्विर्वचनमि ति।एतदनुक्तस्थानिवद्भावोविशेषाभावात्कोऽर्थः।जघ्ने मस्ल इतिभावे लिट् अनैमित्तिकमात्वं गिति तु प्रतिषेधइति आत्वस्य स्थानिवत्वं न भवति।श्रवणमित्यादि।

जघ्नुः॥

।आल्लोपापपतुः।पपुः।आतो लोप इटि चेत्याकारलोपे कृते तस्य स्थानिवद्भावादेकाच इति द्विर्वचनं भवति।उ
पधालोपः जघ्नतुः।गमहनजनखनघसामित्युपधालोपे कृते अनच्कत्वात् द्विर्वचनं न स्यात् अस्माद्वचनाद्भवति।णि
लोपः।आटिटत्।अटतेर्णौ विलुङि चङि णिलोपे कृते तस्य स्थानिवत्वादजादेर्द्वितीयस्येति टिशब्दस्य द्विर्वचनं भव
ति।यण्।चक्रतुः।चक्रुः।करोतेरतुसि उसि च यणादेशे कृते अनुक्तत्वात् द्विर्वचनं न स्यात् स्थानिवत्वाद्भवति।अथवा
पावादेशाः।निनयानि नाय।लुलव।लुलाव।नयतेर्लुनातेश्चोत्तमे णलि गुणे कृते वृद्धौ च अयवायावादेशाः तेषां स्था
निवत्वान्नैलो नैलाविति द्विर्वचनं भवति।द्विर्वचन इति किं।जघ्ने।मस्ले।श्रवणमाकारस्य न भवति।पराणवमहहद्विरेवी
निवद्धिर्न भवति।द्विर्वचननिमित्त इति किं।दुद्यूषति।ऊठि यणादेशो न स्थानिवद्भवति।अचीति किं।जेघ्रीयते।देध्मी
यते।ईघ्राध्मोः यङि चेतीईकारादेशः तस्य स्थानिवद्भावादाकारस्य द्विर्वचनं स्यात्।अन्यग्रहणान्न भवति ५९ ॥

ए॰म॰
५९

यदिकालोनावधार्यतेतदोन्तरकालमपि स्यान्निरूपं प्रसज्येत तस्याकारस्य श्रवणे सतिपरेण सह हद्विरेवीति वृद्धिः स्यात्।इहापि जगाइत्तिगाङ्लिटीतिङिल
कारनिर्देशेन लकारादेलिटि गाङादेशविधानादज्निमित्तत्वाभावात्स्थानिवत्त्वाभावः॥ ५९ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥अदर्शनं॥ ॥दर्शनंज्ञानमुपलब्धिस्तच्च शब्दानुशासनप्रस्तावाच्छब्दविषयं सच्छ्रवणं भवतीत्याह। अश्रवणमिति श्रवणं च श्रोत्रव्यापारस्तन्निषेधे लोपो व्योर्वलि
तस्य वकारयकारयोर्वल्यपि न श्रोत्रव्यापारविषयत्वं स्यात् ततश्च प्रयोक्तृव्यापारस्योच्चारणस्यानिषिद्धं स्यात्। अत आह अनुच्चारणमनर्थकमेव स्यादिति श्रवणनिषेधेन तत्र हेतुभू
तमुच्चारणमेव निषिद्धं भवतीत्याह अनुच्चारणमिति लोपो व्योर्वलीति कोऽर्थः वकारयकारयोर्वल्यनोच्चारयितव्यावित्यर्थः। अकारेणास्मिन्विषये तयोरभाव एव ख्यापितो भव
ति न हि विद्यमानयोरनुच्चारणमुपपद्यते तस्मादाह अभाव इति स्वाभाविक एवाभाव इत्यर्थः। विनाश इति कार्यशब्ददर्शनमेतत्। अनर्थान्तरमिति। शब्दविवक्षाणामेषामर्थो
नाभिधानमित्यर्थः। स्वं रूपमिति वचनात् अदर्शनशब्दस्यैव संज्ञायां लोपप्रदेशेषु अदर्शनशब्दस्य वादेशः स्यादित्यत आह एतैः शब्दैरित्यादि तच्च नवेति विभाषेत्यत इतिकरणा

॥ ॥अदर्शनंलोपः॥ ॥अदर्शनमश्रवणमनुच्चारणमनुपलब्धिरित्यनर्थान्तरमेतैः शब्दैः योऽर्थोऽभिधीयते तस्य
लोपइतीयंसंज्ञाभवति।अर्थस्येयंसंज्ञा।नशब्दस्य।प्रसक्तस्यादर्शनंलोपसंज्ञंभवति।गोधायाढ्रक्।गौधेरः।पचेरन्।जीवे
रदानुक्।जीरदानुः।स्रिवेः।आस्रेमाणं।वकारयकारयोरदर्शनमिहोदाहरणं।अपरस्यानुबंधादेः॥ ॥ ॥

नुवर्तते लभ्यते। अथवा महतीयं संज्ञा क्रियते अन्वर्थापि यथा विज्ञायेत लोपनं लोपः नलोप इति न चादर्शनशब्दे लोपनक्रिया भवति। यद्येवं प्रदेशेष्वेवार्थग्रहणमस्तु किं
संज्ञया नन्वत्र तु संज्ञाकरणे स्वं रूपमिति वचनात् प्रदेशेषु लोपशब्दस्य वादेशः स्यात्। सति तु शब्दसंज्ञेति निषेधात् न स्वरूपग्रहणं भवति न शब्दस्येति अर्थसि
द्धमप्येतद्विस्पष्टार्थं पुनरनुविधिप्रदेशेष्वितरेतराश्रयः प्राप्नोतीति सतोऽदर्शनस्य संज्ञा संज्ञया चादर्शनं भाव्यत इति। तेन न हि लोपविधानात् प्रागसदेवादर्शनं वक्तुं तेन
भाव्यते अनुनिष्पन्नत्वप्रसंगात् किं तर्हि सदेवादर्शनं साधुत्वेनाचार्येण ख्याप्यते। यद्येवं सर्वस्य स्वविषयादन्यत्र स्वभावतोऽदर्शनमस्तीति लोपसंज्ञा स्यात्। ततश्च दद
धिमध्विति तिचोऽदर्शनस्य लोपसंज्ञायां प्रत्ययलक्षणेन वृद्धिः स्यात् अंगस्य वृद्धिः अंगसंज्ञा च विधानप्रतिबद्धा क्विप्रत्ययस्य सर्वादर्शनस्य लोपसंज्ञायां नुक् प्राप्नोतीत्यत
आह ॥ ॥७॥ ॥

प्रसज्यसेति। एवं मन्यते स्थान इति वर्त्तते स्थाने च प्रसंगः तेन प्रसंगे यददर्शनं तस्य संज्ञा न च दधीत्यत्र क्विपः केनचित्प्रसंगोस्ति। एवमपि ग्रामणीरित्यत्र कर्म्मधातुकर्त्तृसन्निधाना
दस्ति श्रवणः प्रसंग इति तददर्शनस्य संज्ञायां वृद्धिः स्यात् योत्राणः प्रसंगः क्विपो योयं क्विपतेः सामान्यशास्त्रं हि विशेषसन्निधौ नस्यतिरिक्त एवं विषये प्रतीतिं जनयतीति तेन सत्स्व
द्विषेत्यस्य सन्निधौ कर्मण्यणोऽनेन न रयते अण् भवतीति वृद्धिरेव न जन्यते॥ ॥प्रत्ययः॥ ॥अदर्शनमितिसंबंधात् प्रत्ययस्येति कर्मणि षष्ठी। यदि प्रत्ययादर्शनस्य लुगा
दिसंज्ञासंकरः प्राप्नोति। विधानदशायां पायया कया च न संज्ञया भावितस्य प्रत्ययादर्शनस्य अनुवादप्रदेशेषु यत्किंच न संज्ञोच्चारणेपि ग्रहणप्रसंगः ततश्चाग्नीतीति लुक्संज्ञ
या भावितस्यापि श्लोर्दर्शनस्य श्लाविधत्र ग्रहणाद्द्विर्वचनं स्यात् जुहोतीत्युतो वृद्धिर्लुकि हलीति वृद्धिः स्यात् हरीतकाः फलानि लुक्तद्धितलुकीति ईयो लुक् स्यात्। ल
वणात् लुक् लवणः सूपः पुंवद्भावः स्यात्। तथा लोपसंज्ञया भावितस्यापि लुक्संज्ञायां अग्नोमती गोमतीसंपन्ना गोमतीभूता ब्राह्मणीति चेल्लोपे लुक्तद्धितलु

प्रसक्तस्य लोपप्रदेशाः। लोपो व्योर्वलीत्येवमादयः॥ ॥प्रत्ययस्य लुक्श्लुलुपः॥ अदर्शनमिति वर्त्तते। प्रत्ययादर्श
नस्य लुक्श्लुलुप इत्येताः संज्ञा भवन्ति। अनेकसंज्ञाविधानाच्च तद्भावितग्रहणमिह विज्ञायते। लुक्संज्ञाभावितं प्रत्ययादर्श
नं लुक्संज्ञं भवति। श्लुसंज्ञाभावितं श्लुसंज्ञं भवति। लुप्संज्ञाभावितं लुप्संज्ञं भवतीति तेन संज्ञानां संकरो न भवति। विधिप्रदेशे
षु च भाविनी संज्ञा विज्ञायते। अत्ति। जुहोति। वरणाः॥ ६० ॥

कीति लुक् स्यादित्यत आह। अनेकसंज्ञाविधानाच्चेत्यादि। यथा तद्भावितस्याप्येताः संज्ञाः स्युः अनेकसंज्ञाकरणमनर्थकं स्यात्। एकामेव संज्ञां कृत्वा तयैव सर्वाणि का
र्याणि विधीयेरन्। तस्मादनेकसंज्ञाविधानाद्यया संज्ञया यददर्शनं भावितं तस्यैव सा संज्ञेति। यद्येवं विधिप्रदेशेष्वितरेतराश्रयं प्राप्नोति न चात्र नित्यतया परिहारः संभ
वति अदर्शनमेव हि नित्यं न लुगादिसंज्ञया भावितत्वं तत्र यदि तया संज्ञया भावितस्यादर्शनस्य सा संज्ञेति मुक्तमितरेतराश्रयं भवतीत्यत आह विधिप्रदेशेषु चेति। अस्मि
न्निति यः परस्य शपः तद्भवति यस्य लुक्संज्ञा भविष्यतीत्येवं भाविन्याः संज्ञाया विज्ञानान्न भवतीतरेतराश्रयदोषः। लोपसंज्ञा त्वदर्शनमात्रस्य विधीयत इति लु
गादिसंज्ञाविषयेपि भवत्येव न च लुगादिसंज्ञापि विरोधः एकसंज्ञाधिकाराद्यत्र संज्ञानां समावेशात् अत एव न लुमताङ्गस्येति निषेधः। वरणा इति अदूरभवश्चेत्यणो
दिष्यश्चेति लुप्॥ ६० ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रत्ययग्रहणं किमिति न तावद् प्रत्ययनिवृत्त्यर्थं लुगणिञोः तद्राजस्य यञञोश्च शपः पड़ः सिचः लेः सुपः इति सर्वत्र प्रत्ययस्यैव निर्देशात् अनुवादेषु चानङ्गीकृतस्यैव तस्य संप्रत्य
यात्। गोस्त्रियोरुपसर्जनस्येत्यत्र यो गो विभज्यते गोरुपसर्जनस्य स्त्रियाः इति ततो लुक् तद्धितलुकीति स्त्रियाः स्यैव गोरिति निवृत्तेः। इतरथा कृतेऽपि प्रत्ययग्रहणे गामेर्लुक् स्या
त्। कंसीयपरशव्ययोर्यञञौ लुक् चेत्यत्र ङ्याप्प्रातिपदिकाधिकारात् कंसीयपरशव्ययोः प्रातिपदिकात्मकस्य भागस्य लुग्विज्ञास्यते न प्रकृतिभागस्य अन्यथा कृतेऽपि प्र
त्ययग्रहणे कंसेः परशोः प्रातिपदिकस्य लुगिति उकारस्य एकारस्य वो लुक् स्यात् ननु प्रत्ययनिवृत्त्यर्थं तावत् प्रत्ययग्रहणं न कर्तव्यं यत्र तर्हि न कश्चिन्निर्दिश्यते। अत्रिभृगुकुत्सव
सिष्ठगोतमाङ्गिरोभ्यश्चेत्यत्र प्रत्ययप्रतिपत्त्यर्थं प्रत्ययग्रहणं। अत्रापि यस्कादिभ्यो गोत्रे इत्यतो गोत्रग्रहणानुवृत्तेः स्वादिभ्यो गोत्रे यो विहितस्तस्य लुक्। तथा जनपदे
लुबित्यत्र ङ्याप्प्रातिपदिकात्प्रत्यय इत्यनुवृत्तेः जनपदे विहितस्य चातुरर्थिकप्रत्ययस्यैव लुप् लवणात् लुगित्यादिष्वपि प्रकृतस्य अतः प्रत्ययस्य प्रतिपत्त्यर्थमपि न

॥ ॥प्रत्ययग्रहणं किं॥ ॥श्रीरामचंद्रायनमः॥

कर्तव्यं भवति· सर्वत्र चा ङ्याप्प्रातिपदिकात् लवणाद्वितिं पञ्चम्यधिकारेणांशे निहितस्य षष्ठीं प्रकल्पयिष्यति सा चानिमित्तयोगत्वात् स्थानषष्ठी भवतीति स्थानष
ष्ठी प्रतिपत्त्यर्थमपि न कर्तव्यं भवति। एवं तर्हि सर्वादेशार्थं प्रत्ययग्रहणं असति तस्मिन् उपत्रजोश्च सुपो धातुप्रातिपदिकयोरित्यादिषु पत्राने कालप्रत्ययः तत्रालोऽन्त्यस्य स्या
त् लवणाल्लुगित्यादौ तु आदेः स्यात् सति तु प्रत्ययग्रहणे तत्सामर्थ्यान् सर्वादेशो लुगादिर्भवति। ज्ञापकात्सिद्धं यदयं घोर्लोपो लेटि वेति लोपे प्रकृते लुग्वा दुहदिहेति लुकं शा
स्तितत् ज्ञापयति लुगादयः सर्वादेशा इति अलोऽन्त्यस्य त्यदर्शनं प्रकृते न लोपेनापि सिद्धं विपर्ययस्तु न भवति। घोर्लोप इत्यत्र तावद् संज्ञानविरोधित्वात् अलोऽन्त्यस्ये
ति प्रवर्तते। यस्माल्लुग्ग्रहणं तस्यैव सर्वादेशतां गमयति सामान्येन च ज्ञापकं समर्थयिष्यते लोपश्च अतिरिक्तमदर्शनं सर्वादेश इति। अतः। सर्वादेशार्थमपि प्रत्य
यग्रहणं न कर्तव्यमिति प्रश्नः एतदपि विदिताभिप्रायः परिहरति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

गस्त्यगस्तयः कुंडिनाः इति । अत्रापि प्रत्ययग्रहणे आगस्त्यकौंडिन्ययोरिति सूत्रे लुग्ग्रहणं मन्तव्यं नेति वा न वा अनुवृत्तेः तस्मान्निवृत्तौ लुकः सह त्रय आदेशा इति
वैषम्यादस्तीति यथासंख्यं एकैकस्य त्रय आदेशाः पर्यायेण स्युः ततश्चागस्त्यपि कुंडिनाः स्युः कुंडिना अगस्तयः स्युः लुक् क्रियमाणे परिज्ञापकात् सर्वादेशः तत उभयत्रा
पि विभक्तिमात्रश्रवणप्रसंगः । अथ निवृत्ते ततो गस्तयः कुंडिनाः इत्यत्र न कश्चिद्दोषः आगस्तीनां छात्रा आगस्तीयाः इत्यत्र तु प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते अगस्त्या
देशस्य निषेधाभावात् अगस्त्य हन्त तावद् वृत्वाछो न स्यात् प्रत्ययग्रहणे सति लुग्ग्रहणे तु वृत्त्या आगस्त्यकौंडिन्ययोः प्रत्ययांशस्य लुग्भवति परिशिष्टयोः भागयोः यथासंख्य
मगस्तिकुंडिनवादित्यर्थः संपद्यते तेनागस्तयः कुंडिना इति वक्ष्यति आगस्त्यानीयेव विवक्षिते गोत्रे लुग् वीति लुकि प्रतिषिद्धे तस्मिन्नियोगशिष्टत्वादगस्त्यादेशोऽपि
निवृत्ते आगस्त्यशब्दस्य वृद्धत्वाच्छे कृते सर्वं तिष्यागस्त्ये इति यलोपे आगस्तीया इति सिध्यति कौंडिन्ये च नास्ति विशेषः निवृत्तेऽपि कुंडिनजादेशे कौंडिन्यवद्वृद्धत्वात्पिकएवा
दिभ्यो गोत्रे इति अणि कृते आपत्यस्येति यलोपे कौंडिनाः इत्येव भवति अस्त्वत आगस्त्य आगस्त्यकौंडिन्ययोरित्यत्राप्यसमनुवर्त्ते लुग्ग्रहणं तत्र पूर्वोक्तदोषपरिहाराय

॥ आगस्तयः ॥ कुंडिनाः ॥ लुक् श्लुलुप्प्रदेशाः लुक् इति लुकि । जुहोत्यादिभ्यः श्लुः । जनपदे लुप् इत्येवमादयः ॥ ॥ प्रत्ययलोपे प्रत्ययलक्षणम् ॥ प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये कथं नु नाम स्यादिति सूत्रमिदमारभ्यते । प्रत्ययलोपे कृते प्रत्ययलक्षणं प्रत्ययहेतुकं कार्यं भवति ॥ ६१ ॥ ॥

प्रत्ययग्रहणमपि कर्त्तव्यं वयं तु ब्रूमः सर्वादेशार्थमपि प्रत्ययग्रहणं सामान्येन ज्ञापकमगतिकागतिरिति ॥ ॥ प्रत्ययलोपे ॥ ॥ सूत्रारंभस्य प्रयोजनमाह ॥
प्रत्ययनिमित्तमित्यादि लक्षणशब्दोऽयमस्मिन्भावसाधनः प्रादुर्भाववचनः अस्ति वा करणसाधनो निमित्तवचनः तत्राद्यस्य ग्रहणे प्रत्ययलोपे सति प्रत्ययस्य प्रादुर्भावो
भवतीत्यर्थः स्यात् तत्र लुप्तस्यैव प्रत्ययस्य पुनः प्रादुर्भावविधौ लोपनिषेधोऽर्थः स्यात् ननु यः प्रत्ययस्यैव लोपो योगेन निर्दिष्टस्तस्यैवायमर्थो नाभासकप्रत्ययस्य कथं लोप
दिना सामान्येन विहितः स तदा प्रत्ययस्य भवति मिश्रुमाचष्टे मिश्रयतीति तदा पुनः प्रादुर्भावेऽपि न तस्यैव पूर्वं प्रत्यये चरितार्थत्वात् । एवं तर्हि लुप्तस्यैव प्रत्यय
स्य पुनः प्रादुर्भावः स्थिते न प्रत्ययस्य लोप इति वक्तव्यं सामान्यविहितो लोपः प्रत्ययस्य न भवतीति । अथ प्रत्ययान्तरस्य लुप्तप्रत्ययनिमित्तकस्य प्रादुर्भावो विधीयते तथ
थाग्रामणीरिति क्विपो लोपे तन्निमित्तस्यो विधिः एवमपि प्रत्ययलोपे प्रत्ययस्यैव वक्तव्यं प्रत्ययस्य लोपे तन्निमित्तकः प्रत्ययो भवतीति अतो निमित्तपर्याये
णो लक्षणशब्दे न बहुव्रीहिः कार्यं चान्यपदार्थ इत्याह । प्रत्ययहेतुकं कार्यमिति प्रत्ययः सत्त्वे यः प्रत्ययो यस्य कार्यस्य निमित्तं तस्य लोपेऽपि तद्भवतीत्यर्थः ॥ ६१ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।पदसंज्ञा भवतीति। ननु च स्थानिवद्भावेनापि सिद्धा पदसंज्ञा। इह तर्हि त्वां तां पिंग नामिमिति तत् छन्दसि ब्राह्मणास्य जन्मः शेशे शश्छन्दसि बहुलमिति लोपे नपुंसकस्य झलचः इति नुम सर्वनाम स्थानः इति दीर्घश्च भवति अत इदं न संज्ञोपे आम् भवति। अधोक् अत्र दुह्गो भवतः समर्द्दि मृजेर्वृद्धिः। उदेः … इति लोपे धमादौ भवतः दुहान्म लोपः ओनतः। अग्निचित्। अग्निचि ता क्विपो लोपे नुग्भवति। एतान्यपि स्थानिवद्भावेनैव सिद्धानि। निमित्ते अल्विधित्वात् सर्वत्रैवाल्मात्रप्रत्ययः न तदाश्रयो विधिः अल्विधिः अल्विधिरिति नेत न स्पष्टयते। उक्तं हि कार्यापेक्षमल्विधित्वं नोदाहरणापेक्षमिति नु मादि विधौ च सर्वत्र … सर्वनामस्थाने सार्वधातुकेपि तिङ तिसुप्तिङन्तमिति साधारणं तदलाश्रयानल श्च केवलं तां जां पिंग नामिति साधुदाहरणं अर्थाद्दीर्घात्मकं तद्दीर्घेऽवत्। इह तर्हि अतणो … इति तिरोहल्ङ्याब्लोपे हलादौ पिति सार्वधातुके ईडीयमाने … विधि न णाह … इति तथा आश्रीः तत्र … हलोरिति तिङलुप्तेपि क्विपि किति हलीति भवति। ननु च वर्णाश्रये नास्ति प्रत्ययलक्षणं नैवं विधं वचनमस्ति। वि तीयस्य प्रत्ययग्रहणस्य प्रयोजनमिदं यस्मात् अत्र हि प्रत्ययलोपेन लक्षणापि सेव सिद्धे पुनः प्रत्ययग्रहणं यत्र कार्यं प्रत्ययस्यैव साधारणं रूपं निमित्तत्वेनाश्रीयते सुपिस र्वधातुके इति सुप्तिङन्तमिति तदेव यथा स्यात् तेन गोहितमित्यवादेशो न भवति। न स्थेचोपवापावर संपू … स्य यस्या साधारणं किंचिद्रूपमुपात्तं किं तु पर इत्यनुमच्चीति न इहापि

।।अग्निचित्। सोमसुत्। अधोगित्यत्र सुप्तिङोर्लुप्तयोः सुप्तिङन्तं पदमिति पदसंज्ञा भवति। अधोगि
तिदुहेर्लङि तिपि शब्लुकि इति लोपे वत्तमभावेन श्चत्वे सुस्कने सूत्रं ६२ ॥ ॥

नामित्यस्मिन्नुदाहरणे … प्रत्ययान्तमिति तावत् … हलादौ किति हलादौ पिति सार्वधातुक इति प्रत्यय एव प्राधान्येन निमित्तं हल् तु तद्विशेषणमि ति नैसौ वर्णाश्रयो लक्ष्यालिङ्गदर्थमिदमारम्भणं यद्येवं भसंज्ञा … दोषः। भसंज्ञापि तावद्राज्ञः पुरुषो राजपुरुष इति अयमारोपप्रत्ययेयथा भसंज्ञा भवतिए वं लुप्तेपि स्यात् ततश्च तया पदसंज्ञाया बाधितत्वात् नलोपो न स्यात्। ननु च इह अत्र पदसंज्ञे स्वादावितिच सुप्तिङन्तमिति च तत्रयास्वादौ पदमिति पदसंज्ञा सा अयचा दिष्वेतया भसंज्ञया बाध्यतां या तु सुप्तिङन्तमिति पदसंज्ञा सा न बाधनीया यथा अयमागोपत्यये एव इति समुदायस्यानेन देनं अयमणोपत्यये ततः पूर्वस्य भागा स्य भसंज्ञा समुदायस्य तु विसर्जनीयान्तस्य पदसंज्ञेति पुरुषं विभिन्ना वधिक … भसंज्ञया पदसंज्ञा न बाध्यत इति। लुप्ते तु प्रत्यये यस्यैवावधेः स्वादौ पदं इति पदसंज्ञा सुबन्तं पदमित्यपि तस्यैवावधेः पदसंज्ञा तत्रैवावधौ भसंज्ञा भवतीयथाः पवादत्वात् स्वादिलक्षणां पदसंज्ञां बाधते तथा सुबन्तलक्षणामपि परत्वात् बाधते। एवं तर्हि न लुमताङ्गस्येति प्रतिषेधात् भसंज्ञा न भविष्यति यचीति सप्तमीनिर्देशात् ततः पूर्वस्य भागस्य … तेऽङ्गस्य च … भसंज्ञाप्रयोजनं कार्यमेव। एवं च बुध्यानङ्गेन
संबुध्यौ इत्यत्र … नलोपः प्रतिषिध्यते॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का. प्र. ११

६२

पादिप्रत्ययलक्षणेन भसंज्ञा स्यात् अपत्यादेवादिकर्मसु इति लोपेन भविष्यतीति किं तेन प्रतिषेधेन। इह तर्हि चित्रायां जाता चित्रा रेवतीरोहिणीभ्यः स्त्रियामुपसंख्या
नमिष्यते लुकि लुक्तद्धितलुकीति इपि लुप्ते चित्रा इति स्थिते प्रत्ययलक्षणेनाणन्तत्वात् ङीप् प्राप्नोति नैष दोषः। टिड्ढाणञिति अत्रानुवर्त्तते। तत्र चाणा अका
रो विशेष्यते अणो योकार इति तस्याकार एव ङीपो निमित्तं अणन्तविशेषणामिति प्रत्ययलक्षणाभावात् ङीबभावः। इह तर्हि वतंडस्यापत्यं स्त्री वतंडा वलुक् स्त्रियां वात
ण्डी आङ्गिरसाद्रिलक्षणां ङीनं बाधित्वा आवाञ्च तद्धितः सर्वत्रेति सर्वत्रग्रहणस्य पूर्वत्राय कर्मार्थमाचां मतेन यञन्तलक्षणः ष्फः प्राप्नोति। यथा आवटायनीति। अ
वघाच्चेति चापं बाधित्वा ष्फ एव भवतीति। नैष दोषः। अत्रापि यञाकारो विशेष्यते यञो काकार इति यञवयवीयो काकारः तदन्तादिति तेनात्र ष्फ कार एव निमित्तं तद्धि
लोपशास्त्रनिष्फो न भवति। अयं तर्हि दोषः परिखीरिति परिमृद्भ्योऽञः क्रियो लोपे यञादित्वात् ह संप्रसारणे प्रवृत्ते च तु क प्राप्नोति हलः इति दीर्घस्तत्र विप्रति
षेधेन दीर्घश्चान्तेन विप्रतिषेधो न भविष्यति। किं कारणं इह प्रत्ययलोपे प्रवृत्ति प्रत्यया अप्रागिणा पर्यवपन्ना नितान्ये नेन प्रसुस्याथं ते अनेनैव नु कृत् अनेनैव दीर्घः
तदेकयोगलक्षणयो रप्युक्तो विप्रतिषेधः। नैष दोषः। अवस्थिते प्रत्यये तन्निबन्धनं यत्कार्यं भवत्येव तदेवानेन लुप्तेन स्मिन्नप्रत्ययाऽनेन नु पस्यप्रासिमात्रं तदपि प
रिलोपे स्यादीर्घप्रत्यये दीर्घ एव प्राप्तत्वात् भवति ननु कनकथा अत्रापि यदि क्विवे वास्थास्तन्दीर्घ एव भविष्यतीति स एवानेन प्रसुस्थाप्यते तदेव समरस्वव्यहृतंत्र
व कश्चिद्दोष इति स्थितं। अत्रोच्यते पदुकृतरणाहरमलाभ्यत इति नापं हलाभ्यः हली तित्र निवर्तिष्यते। परिनिवृत्तेन तरणाहानिप्रत्ययापि प्राप्नोति। नान्यत्र तत्र
चीत्यतो नाचीसनुवर्त्तते तत्र आनल्विधित्वात् स्थानिवद्भावेन। सिद्धरमागमः। आशीरित्यत्राप्याशास इत्युपसंख्यानमित्यस्मादेव वचनात् सिद्धं इत्वं आस्त्वेऽपि रव
ल्विसिं स्त्वस्वरूपं व क्त्वां परिनिष्पन्नेय वश्चास रहद हलो रत्नत्र शासिमात्रस्य ग्रहणं ततो नियमार्थं आशासः क्वावेव यथा स्यात् आशास्तरस्तादे मा भू
दिति। अथ यस्मात् शासेर्ङ्गिहितः न स्याद्ग्रहणं ततो यथाशाशास्तरसादौ न भवति तथा क्विय पिन स्यादिति निषधार्थमिदं। इह तर्हि विदस्यापत्यानि वल्लि अनृष्या
नन्तर्यै विदादिभ्यो अञ् विदाः विदानामपत्यं युवा अत इञ् तस्य एव क्षत्रियार्षञित इति लुकि कृते अत्र गोत्रे बहुत्वे उत्पन्नस्य लुकि प्राप्ते गोत्रे लुगचीति प्रतिषे
धः स्यात्तेनासौ दाविति लुप्तेऽस्मात् वचनाद्भवति। एतदपि नास्ति प्रयोजनं अचीति विषयसप्तमी ते निविवक्षिते अनुत्पन्न एव लुकि प्रति। पिद्धपश्चादिञो लुगिति सि
द्धं। नन्वेवमभिधेः कस्यचिद्दर्शनात् स्थानिवद्भावे नैव सिद्धमिति नार्थेन। एवं तर्हि नियमार्थमिदं प्रत्ययलोपे प्रत्ययलक्षणमेव यथा स्यात् प्रत्ययाप्रत्ययलक्षे
णं माभूदिति। एतदुक्तं भवति तस्मिन् कार्ये विधीयमाने प्रत्ययस्य वा साधारणं किंचिद्रूपं निमित्तत्वेनाश्रीयते तदेव प्रत्ययलोपेऽपि भवति न पुनः स्वप्रत्ययसाधा
रणं रूपमाश्रित्य यद्विधीयते तदिति तेन वणोभना इत्य दोषस्य पुर्षदिति सोमनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं न भवति अमिनस्मन्ग्रहणान्यर्थवन्ति वानर्थ
+ नि। अमसान्तु सेपि जासिद्धं स्थानिवद्भावेनासंनयु अरपरमिति साव्रतं गः। प्रत्ययलक्षणं तु नेत्थ भवति। १

© Dharmartha Trust J&K. Digitized by eGangotri

।आघ्नीतेति। आङो यमहनः। संगमीयेति। समो गम्यृच्छीभ्यामात्मनेपदं स्मृतेः। बहुलं छंदसीति शपो लुक्। उभयत्र गमहनेत्युपधालोपः॥ ॥न लुमताङ्गस्य॥ ॥लुमतेति।
लुग्ग्रहणे यस्मिन्नस्तीति स लुमान्। लुगादिः संज्ञाशब्दः। करणे च तृतीया लोपे च करणत्वं प्रत्ययलोपप्रत्ययलक्षणमनुवृत्तेः लुमता शब्देन प्रत्ययलोपे सति अङ्गस्य प्रत्ययलक्षणं न भवति तत्र च
प्रत्यासत्तेः लुप्तप्रत्ययापेक्षं यदङ्गं तस्य प्रतिषेधात् एतन्निमित्तं कार्यं न भवतीत्यर्थः। एतदेव वक्तुं दर्शयति। लुमता लुप्ते प्रत्यये यदङ्गमिति। तेन उक्ता मेसत्रातो हे
गिति लुकि कृते परस्मैपदापेक्षया यदङ्गं ऊर्वं तेन न तस्य दीर्घत्वं यस्य च दीर्घत्वं न तत् परस्मैपदापेक्षयाङ्गं किं तर्हि शब्वपेक्षयेति निषेधाभावात् प्रत्ययलक्षणेन क्रमः परस्मैपदेषु
इति दीर्घो भवति। तथा तमेरिट्परस्मैपदेषु न इत्यत्र क्रमुर्भ्य इति इडो विधिप्रतिषेधौ ज्ञिगमिषति इत्यत्र इति परस्मैपदे लुक्यपि भवतः लुमता लुप्ते परस्मैपदे यदङ्गं तदनन्तरं न तस्येय इ
डिधिनिषेधौ किं तर्हि सकारादेः प्रत्ययस्येति॥६३॥ इदं चास्मदाग्रिनिर्ग्रंथे दर्शितं नाङ्गस्येत्यनेनाङ्गाधिकारः प्रतिनिर्दिश्यते तेन लुमता लुप्ते प्रत्यये यदङ्गं तस्याङ्गमन्ना

॥प्रत्यय इति वर्तमाने पुनः प्रत्ययग्रहणं किं। कृत्स्नप्रत्ययलोपे यथा स्यात्। इह माभूत्। आघ्नीत। संगमीय। हन्निगम्यो लिङ्यात्मनेपदे लि
ङः सलोपोऽनन्त्यस्येति सीयुट्सकारलोपः प्रत्ययैकदेशलोपः प्रत्ययैकदेशलोपः तत्र प्रत्ययलक्षणेन झलीत्यनुनासिकलोपो न भवति। प्रत्ययलक्षणमि
ति किं। रायः कुलं रैकुलं। गवे हितं गोहितं। आयवादेशो न भवतः वर्णाश्रयत्वात्॥ ॥न लुमताङ्गस्य॥ पूर्वेणातिप्रसक्तं प्रत्ययलक्षणमिति विशेषेण प्र
तिषेध उच्यते। लुमता शब्देन लुप्ते प्रत्यये यदङ्गं तस्य प्रत्ययलक्षणं कार्यं न भवति। गर्गाः। मृष्टः। जुहुतः। अत्र यञो लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भवतः
॥६३॥ लुमतेति किं। कार्यते हार्यते॥ अङ्गस्येति किं। पंच। समाद्यः। साम॥६४॥ ॥

गं च सर्वं प्रतिषिध्यते इति तेन गार्ग्याः बिदाः यञञोर्लुक् उष्ट्रग्रीवाः इवे प्रतिकृताविति कनो देवपथादिभ्यश्चेति लुप्। पंच्याः। प्रियो सप्तधि प्रियः सुपो धात्विति सर्वनामस्थानस्य लु
क्। अत्र जित्याद्विर्नित्यं पथिमथोः सर्वनामस्थाने इति चाद्युदात्तस्याङ्गस्यापि निषेधो भवति सत्यमोति दं ह्रस्वेन रूढस्तु नाङ्गस्य कार्यं तथाऽत्र हृद्ध्रस्वत्वत् सुपोऽतिरत्र प्रतिषेधो
न भवति। पद्यताङ्गमपि प्रति। सिध्यते अवधिभवनादस्तुः आगमापि भवता यामः अध्यागापि भवता नुवाकः। लुङि परतोऽङ्गस्य विधीयमाना हन्निगिणोङ्गादेशाश्चिणो लुगिति लु
ङो लुङि न स्युः न लुङि हनिणिङोदेशा विधीयन्ते किं तर्हि लुङि परार्धधातुके तत्र तत अघ्न लुङि परताङ्गं न तस्य हन्निणिङादेशाः प्रसज्येरन् ते न तत लुप्ताङ्गमिति निषेधाभावः। इह न
हि मा हि दात्तो सर्पि गाद्धेति सिज्जां मे त्रितयोर्लुकि कृते अदिः सिचोलस्को आमंत्रितस्य चेति आद्युदात्तत्वं न स्यात्। नैतदङ्गस्य कार्यं किं तर्हि तदन्तस्य बहुव्रीहेर्देशात्। तेन
पद्यः सा पैतासेप संज्ञा च भविष्यति। ननु यद्यपि तदन्तस्याद्युदात्तत्वं पदसंज्ञापित थापि लुप्तेऽपि भविष्यतः एवं वरातः पुरुष इति अयमारोडु सितनः पदस्य भसंज्ञा न तदन्तस्येति अंग
+ सः इदानी प्रत्यये वलस्त तो गंस्य प्राप्नुत इति भवितव्यं निषेधेन नात्र लुप्तेऽप्रत्यये पदं गस्य प्राप्नोत। निषिध्यते किं तर्हि अवस्थिते पि प्रत्यये यतः पदसंज्ञकस्य कार्यं न तत् निषिध्यते नतो ह साः

© Dharmartha Trust J&K. Digitized by eGangotri

कार्यत्वात्तल्लुप्तेपि तस्मिन्प्रत्ययलक्षणेन प्राधान्येन निर्दिश्यते। इह तर्हि अत्रेन यत्या निरूत श्वानि अर इति रुक अत्रिभृ भिति लुकि कृते अत्र य इत्तित स्मिन्सकित इत्यंतलोदात्तत्वं स्यात्
तदंतकार्यत्वात्। नैष दोषः। तद्धितस्यैवांतोदात्तत्वं न तदंतस्य। इह तर्हि सर्वः स्तोमोपस्य सर्वस्तोमः सर्वस्य सुपीत्याद्युदात्तत्वं न स्यात्। सुपीति सप्तमीनिर्देशात्। कर्त्तव्योत्र यत्नः। य
लश्च सर्वस्य सुपि इति षष्ठीनिर्देशः। सप्तमीति दर्शने तु तदंतकार्यत्वात्सिद्धस्य वत्सिध्यतीति। ननु द्वयोरपि प्रत्ययोः भूवन् प्रत्ययलक्षणेन नुम् प्राप्नोति। आत इति नियमान्न भविष्यति।
इह तर्हि देवदत्तं याज्याचकाः अम इति लुकं बाधित्वा परत्वान्नित्वादिषु कृतेषु तेषां च लुकि प्रत्ययलक्षणेन नाति इति तत्त्वादाम्नं तस्य च निघातः। ततः परस्यानिघातत्वप्राप्नोतीति लेशिम्स्तु
हन्तेर्लीवस्थायामेव लुग्भविष्यति। इह च देवदत्तो गुरुस्तत्र इति षष्ठ्यंतस्य विधीयमानो वस्तावोक्तिद्वितीयाद्यपेक्षितत्वग्रहणान्न भवति षष्ठीचतुर्थीद्वितीयास्थस्य स्थानं श्रूयमाणं
स्वस्वं भवति। इह तर्हि परमवाचा परमगोदुहा परमश्वलिहा परमदंडिना परमदिवा परमकुमार्येति समासार्थ्यायाविभक्तिः तामाश्रित्योत्तरपदस्य पदसंज्ञा यांस्यामायांचोः कुंदा
देर्घातोर्घः हो ढः नलोपः प्रातिपदिकांतस्य दिव उत् इको सवर्णे शाकल्यस्य ह्रस्वश्चेति एते विधयः प्राप्नुवंति। नैष दोषः। भसंज्ञाविषये तावत्सैव पदसंज्ञा बाधिष्यते। ननु च समुदा
यस्य पदसंज्ञा स्वादिष्विति मामाक्षा तुल्यावधिकया भसंज्ञया बाध्यतां यत्तूत्तरपदस्य सुबंतमिति प्राप्ता सा कथं बाध्यते। भिन्नावधित्वात्। एवं तर्हि सुप्तिङंतमित्यतः सुबंतमित्यनु
वर्त्तनीयं तत्रश्चायमर्थो भवति पजादावसर्वनामस्थाने परतः सर्वसमुदायो भसंज्ञो भवति तत्र च समुदायेयत्सुबंतं वर्त्तते तदपि भसंज्ञं भवति यज्ञादावनन्तरस्य सति। तत्र च समुदा
यस्य भसंज्ञा प्रधाने शिष्टा अवयवस्य त्वन्वाचयशिष्टा यत्र च सुबंतं यच्छपि तत्र न स्यादिति तेन राजन् इत्यादौ सुबंताभावेपि भवति सुबंतस्य ह्यभावे तु तस्य समुदायस्य चेति विवेक्त
व्यं। सर्वनामस्थानेपि असर्वनामस्थान इति प्रतिषेधात् पदसंज्ञा न भविष्यति। ननु स्वादिष्विति या प्राप्तिः समुदायस्य तस्या एव सप्रतिषेधः नेत्याह तत्रापि सुबंतमित्यनुवर्त्तते
यत्तु प्रतिषेधश्चाश्रीयते तत्सामर्थ्यादनन्तरस्य विधिर्वा भवति विप्रतिषेधो वेति नाश्रीयते तत्रश्चायमर्थो भवति सर्वनामस्थाने परतः सर्वस्य समुदायस्य स्वादिष्विति प्राप्ता
पदसंज्ञा न भवति तत्र च यत्सुबंतमवयवत्वेनावर्त्तते तस्य सुबंतस्य पदसंज्ञा न भवतीति। यद्येवं सुवाक् सुराजेति सावपि समुदायस्यावयवस्य च स्वादिष्विति वा सुबंतमिति वा प
दसंज्ञाया अभावात् कुत्वादि न स्यात्। एवं तर्हि सर्वनामस्थान इत्यत्र उत्तरसूत्रात् यचीत्यपकृष्यते ततो यजादौ सर्वनामस्थाने यादौ चाजादौ च यपदसंज्ञा सर्वा प्रतिषिध्यते सौ
तु स्वादिष्विति च सुबंतमिति च भवत्येव। यद्येवं श्रूयमाणेपि सौ एव स्य पदसंज्ञा प्राप्नोति। तत्र को दोषः। एवोपग् इत्यस्मोत्तरपदांतग्रहणं चोदयिष्यति भद्रं कर्णेभिर्गोरिसन्त्रमा
भृदिति तत्र क्रियमाणेपि पदांतग्रहणे स्तुत विकारः प्राप्नोति। नैष दोषः। वाक्पदयोरंत्यस्येत्येनमेतद्विज्ञायते तदेवं समासेक्षतरपदस्य पदत्वं नास्तीति स्थितं। यद्येवं दधि
सेचौ दधिसेचः सास्यदाघोरिति षत्वनिषेधो न प्राप्नोति। नैवं विज्ञायते पदस्यादिः पदादिः पदांतेजिकथं तर्हि पदादादि पदादिः पदादेर्नेति। कथमग्निषुकाक्षुत्वक्षुसाहप्रति
षेधो ज्ञापयति स्वादौ पदस्य ततः परस्येति। अवग्रहे पदादावरिस्थे ष्वितिज्ञेयं अन्यथा पानिकारकोपपदानां छन्दिः सहस्समासवचनं प्राक्सुबुत्पत्तेरिति यत्रासुबंतमुत्तरपदं त
त्र प्रतिषेधो न स्यात्। इह तर्हि बहुसेचौ बहुसेचं बहुवो परत्वान्न प्रतिषेधो न प्राप्नोति वचनमेवैतत् बहुपूर्वस्य नेति तत्र च यस्त्वन्यासः सातेः सः षत्वं न भवति। ततो बहुच्प
राप्यां बहुच्प्रत्ययपरस्य षत्वं न भवति। आपिग्रहणं न कर्त्तव्यं सारेः परस्येत्येव सिद्धं तदिदं बहुजनग्रहणमादिग्रहणेन निमातव्यं। कार्यं न इति। एषंता कर्म्मणि लकारः यकृणि

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥अचोऽन्त्यादि टि॥ अन्ते भवः अन्त्यः दिगादित्वाद्यत् अन्त्य आदिरिति बहुव्रीहिः पचध्यमित्येतद्रूपेण सोमशब्दः तथापि संबन्धिशब्दत्वेन निमित्तापेक्षत्वात् विग्रहः समासः। निर्धारणे षष्ठीति। यद्येवं निर्धारणस्यानेकापेक्षत्वात् अच इत्येकवचनमनुपपन्नं तत्राह जाताविति। योऽन्त्यो हि ति निर्धारणस्य सजातीयविषयत्वात् इति लभ्यं। इच्छद्दित्यादिनूपोदाहरणं कार्यत्वग्निचिन्मात्र सेणिविण्णमिष्टवदिति टिलोपः। पचेते इत्यादिकायोदाहरणे॥ ॥अलोऽन्त्यात्पूर्व उपधा॥ ॥समुदाय एवान्त्यो भवतीत्याह। धात्वादाविति। अल इति जसन्तं चेत् अन्त्यस्याविशेषितत्वात् समुदायादपि पूर्वस्य संज्ञा स्यात् शिष्ट इति शकारस्येत्वं स्यात् अस्त्वेहार्थमलित्येवचनं स्यात्। अन्त्यो स्यादिना यथा समानाधिकरणं पञ्चमी स्याहा। अन्त्यादल इति। यद्येवं पूर्वस्याविशेषितत्वात् समुदायस्यापि संज्ञायां शिष्ट इति शा इति समुदायस्येत्वं प्राप्नोति। अल्ला लोपस्येत्यस्य प्रसज्यते। नानर्थकेऽलोऽन्त्यविधिरनभ्यास

॥अचोऽन्त्यादि टि॥ ॥अच इति निर्धारणे षष्ठी। जातावेकवचनं। अचां संनिविष्टानां योऽन्त्योऽच् तदादि शब्दरूपं टिसंज्ञं भवति अग्निचित्। इच्छद्दः। सोमसुत्। उक्थ्वः। आतां। आथां। आमशब्दः। पचेते। पचेथे। टिप्रदेशाः टित आत्मनेपदानां टेरे इत्येवमाद यः॥ ॥अलोऽन्त्यात्पूर्व उपधा॥ धात्वादौ वर्णसमुदाये अन्त्यादलः पूर्वो यो वर्णः सोऽलेवोपधासंज्ञो भवति। पच्। पठ्। अकारः भिद्। छिद्। इकारः। बुध्। युध्। उकारः। वृत्। वृध्। ऋकारः। अल इति किं। शिष्टः। शिष्टवान्। समुदायात्पूर्वस्य मा भूत्। उपधाप्रदेशाः अत उपधाया इत्येवमादयः॥ ॥६५॥ ॥

विकारेषु तत्र यथा आत्मानमित्यत्र हलि लोपः इद्‌ पयस्य विधीयमानो लोपो योऽन्त्यस्य न भवति तथात्रापि न स्यात्। अन्तो लोऽन्त्यात्पूर्वो लिति वक्तव्यमित्यत आह। अलेवेति। एव कारः प्रयोजनं चनिकः यथान्त्यो लू एवं पूर्वोऽप्यलेवेति। कथं पुनर्द्वितीयमलग्रहणमन्तरेण अयमर्थो लभ्यते। लोकतः लोके यमीषां ब्राह्मणानामन्त्यात्पूर्व आनीयतामि त्युक्ते एक एवान्त्यात्पूर्वो नीत आनीयते न समुदायः। संयोगोपधग्रहणं कजर्थमित्यत्र अवयवधर्मेण समुदायस्य संयोगस्योपधाव्यपदेशः। अकार इत्यादीनि प्रयोद हरणानि कार्यं तु यथाचकरत्यादावत उपधाया इति वृद्धिः भेदकं इत्यादौ पुगन्तलघूपधस्य चेति गुणः। शिष्ट इति शासेर्निष्ठा शास इदङ्हलोरितीत्वं शासिवसिघसी नां चेति षत्वं॥ ॥६५॥ ॥६६॥ ॥

तस्मिन्निति॥ ॥इतिकरणस्य गोत्त्यय माहेत्णरो सत्स्वरूपपदार्थकत्वेनव्यवस्थापकत्वदर्शनात्। तस्मिन्नणि चेत्यत्रोपात्तस्येदमनुकरणं ततश्च तत्रैवास्य प्रवृत्तिः स्यात् अग्निचित्त्रय
वच्छेधं दे यौष्माकीण आस्माकीयं दे हि आस्माकीनपु क्ष्मर्थं दृष्टा मी तिपरनिवृत्तिः तास्मिन्नं प्रत्यनि भयाकरोतिति तस्मिन्निति सप्तम्यर्थनिर्देश इति एतेन तस्यापत्तं तत्र भवद्गणादिवत्स्व
तंत्रस्य सर्वनाम्नोर्थं निर्देशः तद्देवतस्मिन्निति सामान्यविशेषाणामचिहलीत्यादीनामुपलक्षणं नत्वनुकरणमिति दर्शयति। एतच्चेतिकरणात् लभ्यते स हि पदार्थविपर्यासकृ
त् शास्त्रे च स्वरूपं पदार्थस्तस्य विपर्यासोर्थपदार्थकता यदिवत स्मिन्नणि चेत्यत्रैवैतदुपास्यास्यत तत्रैव पूर्वग्रहणमकरिष्यतेतिभावः। किमर्थं पुनरिदमारभ्यते इकोयणचीत्या
दौ संदेहः स्यात्सप्तमी किं वा गंगायां घोष इति वदौपश्लेषिके अधिकरणे सप्तमीति तत्र सत्त्वे परस्येव पूर्वस्यापि स्यं भवति। एवमुपश्लेषो पि तत्र पूर्वस्य परस्य च व्यवहितानंतरस्य च प्रा
प्तः दध्युदकादिषु तु पुणपदेकस्य कार्यित्वानिमित्तत्वायोगात् यथायोगं प्राप्तः इष्यते च पूर्वस्यैव साव्यवहितस्यैवेति तत्र नियमार्थमिदं सप्तमीति निर्देशे पूर्वस्य भवति अनंत

॥तस्मिन्निति निर्दिष्टे पूर्वस्य॥ तस्मिन्निति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति नोत्तरस्य॥ ॥
इको यणचि। दध्युदकं। मध्विदं। पचत्योदनं निर्दिष्टग्रहणमानंतर्यार्थं। अग्निचित्त्रेति व्यवहितस्य
माभूत्॥ ६५ ॥ ॥

रस्यैवेति। इकोयणचीत्यादेः उभयत्र प्रवृत्तिः सा चैवं विशेषितेति न कश्चिद्विप्रतिपत्त्याशंकात त्राधं नियमं दर्शयति पूर्वस्यैवेति। व्यावर्त्यं दर्शयति नोत्तरस्येति। पचत्योदनमिति य
यप्यत्रानियमप्रसंगो नास्ति तथापि इकोयणचीत्यस्मिन्सूत्रे नियमप्रसंगे नियमः क्रियत इत्येतदपि भवत्येवोदाहरणं। द्वितीयं नियमं दर्शयति निर्दिष्टग्रहणमिति। दि
शिरुचारणक्रियः निःशब्दो नैतत्र्येनिरंतरदिष्टो निर्दिष्ट इति एवमानंतर्यमर्थो भवति। तत्रैवं वचनव्यक्तिः अचिहलीत्यादौ पूर्वस्यैव कार्यं भवति तत्रानिर्दिष्टे निरंतरए
वोच्चारिते इति तत्रार्थात्पूर्वस्यानंतरस्येत्यर्थो भवति तदाह व्यवहितस्य माभूदिति। अन्यथा व्यवहितेनमाभूदिति विकल्पं पूर्वपदस्य व्यवहितेपि प्रवृत्तेः तस्य प्रसंगः ६५

॥ ॥छ छ॥ ॥छ छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥तस्मादित्युत्तरस्य॥ ॥निर्दिष्टग्रहणमनुवर्त्तत इति। तेनात्रापि व्यवहिते कार्यं न भवतीति भावः। अत्रापीति परस्यादेरनुकरणमिति कस्यचिद्भ्रान्तिः स्यात् तस्मात्तु ङ् द्विह
लम्ब्रात्तत्राद्देरिति दीर्घोपूर्वस्याङ्गस्यासंभवात् प्रयोजनाभावात् यद्यपि तस्यानुकरणं न भवति तस्मात् छन्दो नः पुंसि तस्मान्नुड् चेत्यत्र नुण्व च्छे यमस्ति उच्चरतत्रानुप
लभ्यते गोतोणिक्ष्व इति पूर्वस्याभाभूदिति अतस्तयोरेवेदमनुकरणमिति तामिमां भ्रान्तिमपाकरोति तस्मादिति पंचम्यर्थनिर्देश इति। एतेन पूर्वसूत्रवदस्यतंत्रस्य सर्वनाम्नो यं नि
र्देशः तद्देववत्तस्मादिति सामान्यमतिङ· इत्यादौ नो विशेषणाप्युपलक्षणं तत्त्वनुकरणमिति दर्शयति। एतच्चेति करणा त्वम्भत इत्युक्तं। किमर्थं पुनरिदमारभ्यते॥ तिङ्ः तिङ·
इत्यादौ कारकविभक्तेरसंभवाद्दिग्योगलक्षणां पंचमी। तिङि कृष्ठ? ... स्त्व अध्याहार्यः। तत्र पूर्वोत्तरशब्दयोरुभयोरध्याहारः संभवतीति नियमार्थं यद्यपि भाषेयं तदाह उत्त
रस्यैव कार्यमिति। तदेवं पूर्वस्य चास्य च हन्ति कारेण नियमार्थत्वं दर्शितं। षष्ठी प्रकल्पिप क्षोपि भाष्ये प्रदर्शितः। कथं षष्ठीति वर्त्तते सप्तम्यर्थनिर्देशे पूर्वस्यानंतरस्य षष्ठी।

॥ ॥तस्मादित्युत्तरस्य॥ ॥निर्दिष्टग्रहणमनुवर्त्तते। तस्मादिति पंचम्यर्थनिर्देशे उत्तरस्यैव कार्यं
भवति। न पूर्वस्य। तिङ् तिङः। उदनं पचति। इह न भवति। पचत्योदनमिति॥ ॥श्रीः॥ ॥

पंचम्यर्थनिर्देशे उत्तरस्यानंतरस्य षष्ठीति तत्रेको यणचीत्यादौ यत्र पूर्वमेव षष्ठी विधते तत्र पूर्वस्यानंतरस्य नोत्तरस्यानंतरस्येत्साषष्ठीत्युच्यते आनेमुक् ईदास इत्यादौ तु
यत्र षष्ठी नास्ति तत्र षष्ठ्यपि प्रकल्प्यते सा चानियतधोगत्वात् स्थाने षष्ठी भवति यस्य च स्थाने षष्ठी तस्यैव कार्यमिति सर्वत्र कार्यनियमो विशिष्यति। यत्र तूभयनिर्देशः तत्र
यानवकाशाद्धि तत्रस्थाः षष्ठीप्रकल्पयति यथा आने मुगिति सप्तमीनिरवकाशा अतो येय इति पंचम्याः पूर्वसूत्रेणावकाशायाः एवमीदास इति पंचमी आनेमुगिति सप्त
म्याः उभयोरत्र नवकाशयोः परत्वात्पंचमी सप्तम्याः षष्ठी प्रकल्पयति यथा आमि सर्वनाम्नः सुडिति सर्वनाम्न इति पंचम्य नवकाशा आमीति सप्तम्या अनवकाशायाः। अथ सप्त
म्युत्तरार्थं तथाप्यादित्यनुवर्त्तते यथा पंचम्याः समानाधिकरणा सर्वनाम्न इति पंचम्यपि सावकाशा षष्ठीप्रकल्पयति एवं नियमपक्षेपि परत्वानवकाशात्वाभ्यां व्यवस्थाद्रष्टव्या
दीर्घाच्छे तुक् भवतीत्यत्र षष्ठ्याः स्थाने पंचमीत्याख्यानानादीर्घस्यैव तुक् भवति न तु ह्रस्वस्य तथा चतुराच्छाप्येतिनिर्देश उपपद्यते॥ ॥ ७ ७॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ स्वं रूपं ॥ ॥ स्वरूपस्य पर्यायाणां च ग्रहणे प्राप्ते नियमार्थो परिभाषेयं शास्त्रं गतत्वात् परिभाषाणां शास्त्र एव नियमो ललोकवत्साह शास्त्रे स्वमेव सादृग्राह्यमिति छिमंतात्प
त। एतस्याध्याहारेणाल स्वं शब्दस्येति हृतां नांकर्त्रीविशेषष्ठीशब्दः स्वमेव रूपं ग्राहयति बोधयतीत्यर्थः संज्ञायर्थे तु ह स्वावेव शब्दः संज्ञानुशासनं चनोपपद्यते सूत्रे षष्ठीनिर्देशो
पि नातीव युक्तः स्यात्। संज्ञासंज्ञिसंबंधे प्रायेण सामानाधिकरण्यदर्शनात् तद्रूपवादे नचेहाग्निशब्दत्वादिकं सुकुमारिकापुरुवादितिः उदीरितासु भिन्नासु भिन्नासु शब्दव्यक्ति
सु समवेतं सामान्यमभिधीयते। अग्नेर्ढगिति सूत्रकारेणा व्यक्तिरुच्चारिता तस्याः सर्वोच्चारणेष्वनुगतं सामान्यमेवाभिमतमित्यर्थः सामान्यस्य कार्ययोगो व्यक्तिद्वारक इति तेन

॥ स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ शास्त्रे स्वमेव रूपं शब्दस्य ग्राह्यं बोध्यं प्रत्याय्यं भवति। न बाह्योऽर्थः। शब्दसंज्ञां वर्ज्ज
यित्वा। शब्देनार्थावगतेरर्थे कार्यस्यासंभवात् तद्वाचिनां शब्दानां संप्रत्ययो मा भूदिति सूत्रमिदमारभ्यते। अग्नेर्ढक्। आ
ग्नेयमष्टाकपालं निर्वपेत्। अग्निशब्दोऽग्निशब्दस्यैव ग्राहको भवति। ज्वलनः पावको धूमकेतुरिति नातः प्रत्ययो
भवति। उदश्वितोऽन्यतरस्याम्। औदश्वित्कं। औदश्वितं। तक्रमरिष्टं कालशेयं दण्डाहतं मथितमिति नातः प्रत्ययो
भवति ६६ ॥

तेनोच्चारितायास्तस्या व्यक्तेर्ढञ् भवतीत्यर्थः संपद्यत एव कार्यस्य व्यवच्छेदं दर्शयति न बाह्योऽर्थ इति शब्दसंज्ञां वर्ज्जयित्वेति। शब्दसंज्ञासु स्वरूपं ग्राह्यं न भवतीत्यर्थः। अनि
यमप्रसक्ते नियमः कर्तव्यः तं दर्शयति शब्देनेत्यादि लोके गौरुपलभ्यतामित्युक्तेऽर्थ एव कार्ययोगो गम्यते न हि शब्दरूपमुपलम्भकं भवति। व्याकरणे तु प्रत्ययविधाना
दिकार्यमर्थेन संभवतीति तेन स्वरूपे वा पर्याये वा गाते। नाग्नेर्ढगित्युक्ते लौकिकवदर्थ एव तावत्प्रतीयते तत्र संभवो नास्ति अतस्तद्वाचिनां सर्वेषां संप्रत्ययः स्यात् यथाग्नाकृति
चोदनायां व्यक्तीनां मा भूदेव दोषः उपात्तादेव यथा स्यात् इति नियमार्थमिदमारभ्यत इत्यर्थः। औदश्वित्कमिति। उदश्विति संस्कृतमिति संस्कृतं भक्षा इत्यर्थे तत्र ठक्। इसुसुक्तान्तात्
कः॥ ६६ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।घुग्रहणे घिपादि। अन्यथा उपसर्गयोः किरिति किप्रत्ययो धातोरेव घोः शब्दार्थत्वात्सा अनुदात्तघाम्मः ईद्धस्य घोरित्यत्र तु घुशब्दस्य नाकारांतत्वात् दाघामेव ग्रहणं सि
ध्यति। कुमारी घरूपत्र घरूपेति ह्रस्वप्रसंगः। ननु च प्रदेशेषु संज्ञिसंप्रत्यायनार्थं संज्ञाकरणमिति सामर्थ्यात् स्वरूपग्रहणं न भविष्यतीत्येतदस्ति उभयगतिरिह शास्त्रे संभ
वतीति संख्याकर्मकरणादि। स्विवस्वरूपस्य स्वरूपस्य संज्ञिनश्च प्रदेशेषु ग्रहणं स्यात्। ज्ञापकात्सिद्धं पदयं स्नोनायांडितिषकारांतायाः संख्यायाः षत्वं तां विदधाति तत्
ज्ञापयति संज्ञाशब्देन स्वरूपस्य ग्राहक इति अन्यथा षड्भ्यो लुक् षट्चतुर्भ्यश्चेत्यादौ स्वरूपस्यापि षडित्यस्य ग्रहणात् षकारांतायाः संख्यायाः षट्संज्ञां न विदध्यात्। ननु
षट्कारांतानां ष्णांतसकारांतस्य कार्यमिष्यते संज्ञापि षकारांतेवक्ष्यमाणेनार्थेन षट्संज्ञोपनेन। सत्यं प्रतिपत्तिगौरवपरिहारार्थः प्रतिषेधः। शब्दशब्देन चाभेदोपचा

॥ अदाप्संज्ञेति किं दाघाघ्वदाप्॥ तरप्तमपौ घः॥ घुग्रहणे घग्रहणे षु व
संज्ञिनां ग्रहणं न संज्ञायाः॥ भिन्न हि शेषाणां वक्ष्याम्यर्थे॥ ॥ ॥

रात् व्याकरणमुच्यते शब्दसंज्ञा एवं च कर्मकरणमित्यादिष्वर्थसंज्ञास्वपि शास्त्रीयासु स्वरूपग्रहणं न भवति। अथ रूपग्रहणं किमर्थं इह यावता प्रतीतावुपदेशान
पेक्षत्वाद् साधारणत्वान्निःसंबंधित्वाच्च तदेव शब्दस्य स्वं अर्थो हि सप्रतीतौ संबंधग्रहणमपेक्षते पर्यायैरपि प्रत्यायनात्साधारणः प्रत्यानिःसंबंधश्च अनु
करणाद् आपाम भावात् न चार्थोग्राहकः शक्यते नुग्रात्यत्वे च सूत्रमनर्थकं स्यादिति नार्थो रूपग्रहणेन। एवं तर्हि एतत् ज्ञापयति। शास्त्रे स्वरूपेण समानक
स्योऽर्थ इति तेनार्थवद्ग्रहणेनानर्थकस्येत्युपपन्नं भवति तत्र ज्ञापकार्थोऽपि ग्राह्यः स्वं रूपमिति वचनात् रूपं चेतिसामर्थ्याद् अर्थवनो रूपस्य ग्रहणं तेन का
शोकुशेरन्यत्र शेप्रगत्स्य संज्ञाभावः सिद्धः। अस्ति च ह्रिशेषाणामितिवार्त्तिकं व्याचष्टे ॥ ॥छ छ॥ ॥छ छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰८॰११
६६

सिन्निर्देशः कर्त्तव्य इति। वृक्षस्य इत्येवं॥ ततो वक्तव्यमिति। स्वं रूपमित्यस्यानन्तरं। ननु किं प्रयोजनमित्युक्ते वृक्षादीति वक्तव्यं किमुच्यते वृक्षाद्यर्थमिति। वृक्षादिषु प्रयोजनमस्ये
त्युक्ते वृक्षादयस्य प्रयोजनमित्यर्थो दुक्तं भवतीत्यदोषः। अस्यार्थस्य माप्तः सिद्धिं विभावेत्यत्रैव वक्ष्यामः। पित्पर्यायवचनस्य चेति। चकारात्तस्य रूपस्य विशेषाणां च। इदं वाचनि

सिन्निर्देशः कर्त्तव्यः। ततो वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति। किं प्रयोजनं। वृक्षाद्यर्थं। विभाषा वृक्षमृगतृ
णेति। प्लक्षन्यग्रोधं। प्लक्षन्यग्रोधौ। पित्पर्यायवचनस्य च स्वाद्यर्थं। पिन्निर्देशः कर्त्तव्यः। ततो वक्तव्यं पर्यायवचनस्य
च ग्रहणं भवति स्वस्य च रूपस्य तद्विशेषाणां चेति· किं प्रयोजनं· स्वाद्यर्थं· स्वे पुषः। स्वपोषं पुष्टः· रैपोषं·
धनपोषं· अश्वपोषं· गोपोषं॥ जित्पर्यायवचनस्यैव राजाद्यर्थं। जिन्निर्देशः कर्त्तव्यः। ततो वक्तव्यं। पर्यायवचनस्यैव ग्रहणं भ
वतीति। न स्वरूपस्य। नापि तद्विशेषाणां। किं प्रयोजनं। राजाद्यर्थं। सभा राजामनुष्यपूर्वा। इनसभं। ईश्वरसभं। त
स्यैव न भवति। राजसभा। तद्विशेषाणां च न भवति। पुष्यमित्रसभा। चन्द्रगुप्तसभा। झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थं। झि
न्निर्देशः कर्त्तव्यः। ततो वक्तव्यं तस्य च ग्रहणं भवति तद्विशेषाणां चेति। किं प्रयोजनं। मत्स्याद्यर्थं। पक्षिमत्स्यमृगान्हंती
ति ठक्। पाक्षिकः। मात्स्यिकः। तद्विशेषाणां। शाकुनिकः। पर्यायाणां न भवति। अजिह्मान्हंति। अनिमिषान्हंतीति
अथैकस्य पर्यायवचनस्येष्यते मीनान्हंतीति मैनिकः॥ ६७॥

कमेवा। जित्पर्यायस्येत्यस्याप्यस्याप्यतः सिद्धिं वक्ष्यामः। झित्तस्य चेति। इदं वाचनिकमेवा। मृगपक्षिणोस्तु विन्निर्देशः कर्त्तव्य इत्यादुः। अथैकस्येति। इयमिष्टिरेव॥ ६७॥

॥—— ——

राम॰

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥अणुदित॥ ॥संज्ञासूत्रमेतन्न परिभाषा अप्रसिद्धार्थविनियोगात्। परेणैवाकारेणेति एतच्च बलादेव प्रतिपादितं। स्वस्य च रूपस्येति। यद्यपि प्रथमान्तं प्रकृतं तथा
पि सवर्णस्य चेति षष्ठ्यन्तस्यानन्तरं प्रयोगाच्च शब्दो ऽमस्य षष्ठ्यन्तस्याभावात् तस्येव षष्ठ्यन्ततां प्रकल्पयतीति भावः। प्रत्ययं वर्जयित्वेति। नेनतत्रोच्चारितमेव रूपं गृह्यते। आ
दुणः इत्यादिः यथेह भवति दिवं दुः उ इति एवं वृद्धे ऊः इत्यादावपि भवति। अस्य च्वौ यथेह भवति शुक्लीभवतीति एवं मालीभवतीत्यादावपि भवति। यस्येति च यथेह भवति दाक्षिः
प्लाक्षिरिति एवं चौडिर्बालाकिरित्यादावपि भवति चूडा बलाका शब्दौ व्रीह्यादी। ननु वाक्यः अचीत्यादौ प्रत्याहारग्रहणे कथं मध्यवर्त्तिभिरिकारादिभिः सवर्णग्रहणमुच्चो
रितो हि संज्ञा शब्दः संज्ञित्वेन प्रत्याययति न च मध्यवर्त्तिनामुच्चारणमस्ति ते त्वगादिसंज्ञाभिः संज्ञित्वेन प्रत्याय्यन्ते किं तर्हि स्यात् अस्य च्वौ यस्येति चेत्यत्र संज्ञायामुच्चारण
मस्ति प्रत्याहारे च आद्यो वर्ण उच्चारितत्वात् सवर्णग्राहकः स्यादेतत्। अक्षरसमाम्नाये उच्चारिता इकारादयः सवर्णानां ग्राहका इति आगादिवोऽन्त्यासु ईकारादयोऽपि द्वि

॥अणुदित्सवर्णस्य चाप्रत्ययः॥ परेणैवाकारेणप्रत्याहारग्रहणं। अण्ग्रहणमाणउदिच्च सवर्णानां ग्राह
को भवति स्वस्य च रूपस्य प्रत्ययं वर्जयित्वा। आ दुणः। अस्य च्वौ। यस्येति च॥ ॥श्रीः॥ ॥७॥ ॥

सवर्णसंज्ञित्वेनैव प्रतीयन्ते नान्यि कारादिभिः प्रतीतेः प्रत्याय्यं न स्ति न। अपरकालत्वात्। इह वर्णानामुपदेशस्तावत् उपदेशोत्तरकाला इत्संज्ञा इत्संज्ञोत्तरकालमादिरन्त्येने
त्यत्र वर्त्तिते ततो ऽणसवर्णस्येति तदनेनोपदेशादिषु योगेषु निष्पन्नेषु अस्य च्वा इत्यादौ सवर्णानां ग्रहणं भवति नांगेषु तापि स्यात्मनिष्पन्नत्वात्। यदि तस्मिन्नपि सू
त्रे सवर्णग्रहणं स्यात् आह नमहनः ऋदोरित्यादौ आकारादयोऽपि सवर्णा न गृह्णीयुः अतोऽस्मिन्सूत्रे अक्षरसमाम्नाये चागृहीतसवर्णानां ग्रहणं ततश्च तदेव
स्थितं प्रत्याहारेषु मध्यवर्त्तिभिः सवर्णग्रहणं न स्यादिति। नैष दोषः। उच्चार्यमाणो हे व प्रत्यायकैर्न विनश्यमिति नास्ति नियमः बुधयुयान् दाक्प्रत्यायकाः अस्ति च मध्य
वर्त्तिनां बुध्युपारोहः ततश्च संज्ञित्वेन प्रत्याय्यमानस्यापि प्रत्यायकत्वं भविष्यति। अत्र ज्ञापकं दीधीवेवीटामिति प्रतिषेधः स हि कुमार्यावित्यादौ प्रथमयोः पूर्वसवर्ण इति दी
र्घो मा भूदिति तत्र चाकरतिवर्त्तते। खट्वे इत्यादौ तु नादिचीत्येव सिद्धः प्रतिषेधः। दीधी वेवीटां त्वा विप्यरस्याद यच्चानिर्दिशेत् एवमेवो यद्यपि मध्यवर्त्तिभिरपि सवर्णग्र
हणं भवति। ॥ ॥श्रीः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।स्वरानुनासिकेत्वादि। उदात्तः सूत्रे गृहीतः स्वरांतरभिन्नमपि गृह्णाति एवमनुदात्तस्वरितौ च तथा सानुनासिको निरनुनासिकं सोपि नं। दीर्घो न भवतीति। असतित्वप्रस
य इत्यस्मिन् प्रत्ययेनापि सवर्णग्रहणात् दीर्घोपि स्यात्। असत्वमिह मुच्यते अप्रत्यय इति अप्रत्ययादेशादि। किमिति इति वक्तव्यं। प्रत्यये प्रत्युदाहृतं। तत्रादेशो इदम स्म इत ३
ह विशेषविहितत्वात् स्वराघत्वं वाधित्वा त्रिमात्रिक आदेशः प्राप्नोति इति। अग्निधातुकस्येदुलादेः पठितः दीर्घोपि स्यात् ग्रहो लिटि दीर्घ इत्येतत्तु ग्रहेर्दीर्घ एव नद्द

स्वरानुनासिका अणुदित्सवर्णस्य चाप्रत्ययः॥ परेण णकारेण प्रत्याहारग्रहणं। अण् गृह्यमाण कालभिन्न
स्य ग्रहणं भवति उदिच्च सवर्णानां ग्राहको भवति स्वं च रूपमस्य भवति। उदित् खल्वपि। चुटू लशक्वतद्धिते। चवर्गटवर्ग
योः कवर्गस्य च ग्रहणं भवति। अप्रत्यय इति किं। सनाशंसभिक्ष उः। आशंसां प्रति के दीर्घो न भवति॥ ६ ॥ ॥

स इति नियमार्थं स्यात् हनो वेत्येतदपि व वरिष्यते इथे ति लिटि दीर्घो मा भूदित्येवमर्थं स्यात्। किति मुवो वुस्लुङ्कि। दोर्दभूवच्च अनुनासिकोपि स्यात्। मिति। असमं बुद्धे हे
अनडुन् अनडुन् आमपि स्यात्। एवं तर्ह्यप्रत्यय इति नेह संज्ञाग्रहणं किं तर्हि अन्वर्थग्रहणं प्रतीयते विधीयते इति प्रत्ययः भाव्यमानः सवर्णान्न गृह्णातीत्यर्थः इत्या
दयो विभाव्यन्ते संज्ञाप्रत्ययस्य तु नावश्यकः प्रतिषेधः येनार्थः प्रतीयते स प्रत्ययः न च दीर्घप्लुतयोरर्थस्याभिधानमस्ति कुहो स्वरितादौ भाव्यमानस्याप्युदित्त्वसामर्थ्या
त् अप्रत्यय इति निषेधाभावः। तेनाणेवाप्रतिषेधः तथा च पठ्यते। भाव्यमानोण् सवर्णान्न गृह्णातीति॥ ६८ ॥ श्रीरघुवंसदीपकाय नमः॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ तपरस्तत्कालस्य॥ तः परो यस्मादिति बहुव्रीहिं दर्शयति। तादपि परस्तपरः इति पंचमीतत्पुरुषं। स पुनः अस्मादेव निपातनाद्बोद्धव्यः। एकस्यापि तपरशब्दस्य तंत्रावृत्त्योरन्यतरा-
श्रयणादर्थभेदो न विरुद्धः। तत्र बहुव्रीहेर्लिंगमतो भिस ऐस् इति परकरणं। तत्पुरुषस्य लिंगं वृद्धिरादैजित्यैजर्थं हि तदित्युक्तं। तपरो वर्ण इति। वर्णस्यैव सवर्णसंभवाद्धर्मी इति
उक्तं। तत्कालस्येति बहुव्रीहिः स कालो यस्येति। अपुक्तोयं निर्देशः। तदित्यनेन तपरो वर्णः परामृश्यते प्रसिद्धपरिमाणा च क्रिया अप्रसिद्धपरिमाणस्य क्रियान्तरस्य परिच्छेदिका का-
लः। यथा द्विप्रमथीन इति द्विप्रशब्दे नोदयादेरस्तमयान्त आदित्यगतिप्रबंध उच्यते। स वाध्ययनस्य परिच्छेदकत्वात् कालशब्देनोक्तः क्रियात्मको न भवती। तस्य युक्तं वर्णा-
वाचिनस्तच्छब्दस्य कालशब्देन सामानाधिकरण्यं। एवं तत्संयुक्तरपदलोपी समासो द्रष्टव्यः। उष्ट्रमुखवत् गम्यमानार्थत्वादप्रयोग एव लोपः। यथा उष्ट्रो मुखमस्येत्येव विग्रहः।
न च प्राणिभाषत्रेन तस्य मुखमिति सामर्थ्यान्नाहृत्य प्रतीतिः। उष्ट्रस्यैव मुखमस्येति मुखेनैव मुखस्य साहचर्यात् प्रसिद्धं न तत्त्वेनोष्ट्रेणेति सामर्थ्यादयमर्थो भवति उष्ट्रमुखमि-

॥ तपरस्तत्कालस्य॥ तः परो यस्मात्सोयं तपरः। तादपि परस्तपरः। तपरो वर्णस्तत्कालस्यात्मना तुल्यकालस्य गुणान्त-
रयुक्तस्य सवर्णस्य ग्राहको भवति स्वस्य च रूपस्य॥ ॥श्रीः॥ ॥श्री४४॥ ॥४४४॥ ॥ ॥

वमुखमस्येति। एवमिहापि वर्णः कालो न भवतीति सामर्थ्यात्तदीया क्रिया क्रियान्तरेण निमेषादिनापरिच्छिन्ना सती वर्णान्तरस्य परिच्छेदिकेति वर्ण एव परिच्छेदक इत्युच्य-
ते। स कालोऽस्येत्यस्य कोऽर्थः तत्कालसंबंधिनी क्रिया परिच्छेदिका अस्येत्ययमर्थः। एतदेव दर्शयति आत्मनेत्यादिना। तपरवर्णसंनिधावुच्चारितोऽप्ययमात्मशब्दः तत्सहचरिता-
यामुच्चारणक्रियायां वर्तते वर्णेन क्रियायास्तत्त्वस्यानुपपत्तेः। यादृशी तपरस्य वर्णस्योच्चारणक्रिया निमेषादिपरिच्छिन्ना तादृश्युच्चारणक्रिया यस्येत्यर्थः। गुणान्तरयु-
क्तस्येति यद्गुणकरणात्तस्ततो गुणान्तरयुक्तस्येत्यर्थः। किं पुनरिदं तिप समर्थ्यं अहोस्विद्विध्यर्थं तत्राणित्यनुवर्तते नियमार्थं तपरो वर्णस्तत्कालस्यैवेति। निवृत्तौ विध्यर्थं
तत्रापि पक्षे ज्ञातो धातोः आतां पुट् रो यस्मैति च विहृतो र अनुनासिकस्यापि ह्रस्वादेर्भेदका गुणाः तस्मिन्दर्शने यद्गुणकरणात्तस्ततो गुणान्तरयुक्तस्य ग्रहणं तस्मा-
दिति द्वितीयपक्षमाश्रित्याह॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।विधिपर्य्यमिति। अत्रहेतुमाह। अणीति तिनानुवर्त्तत इति। यदिति विध्यर्थमिदं ततोऽस्यानणस्सुवरित्वार्थत्वादणस्सु पूर्वमेव प्रवर्त्तेत तत्राह। अणामन्येषां चेति। एतदेव विवृणयति।
अतो भिस्स ऐसित्येवमादिष्विति न प्रवर्त्तत एवेति। परेणानेन बाधितत्वादिति भावः। विरोधो ह्यत्र वर्त्तते पूर्वसूत्रेणास्य सदृशानां ग्रहणं अनेन तु षष्ठ्यामिति। किमुदाहरण-
मिति अभेदकत्वात् गुणानामनणस्सु सिद्धमिष्टमिति प्रश्नः। अणस्सु भिन्नकालत्वेन सवर्णता वदसम्बन्धे सत्यन्तस्वानणस्त्वपि विधिषु स्वेन प्रवर्त्तमानमिष्टं साधयतीत्युत्त-
रं। विद्वनोरनुनासिकस्यादिति। कस्य पुनरत्र सवर्णस्य ग्रहणमिष्यत इति चिन्त्यं तस्मादुपलक्षणमेतत्। आतो धातोः यस्येति चेत्यादावेव प्रयोजनं। तत्कालस्येति किं। भिःप्रधा-
नावयवद्वारेण सूत्रमेतल्लक्ष्यते। खट्वाभिरिति। वर्णाश्च यथा विधावन्तादिवद्भावो न भवति॥ ॥आदिरन्त्येनेत्यादि। इदमपि संज्ञासूत्रं। आद्यन्तयोर्मध्यापेक्षत्वात् मध्यवर्त्तिनः

॥ ॥विध्यर्थमिदं। अणीति तिनानुवर्त्तते। अणामन्येषां च तपराणां इदमेव ग्रहणकशास्त्रं अतो भिस ऐसित्ये-
वमादिषु पूर्वं ग्रहणकशास्त्रं न प्रवर्त्तत एव। अतपराणामणां तस्यावकाशः। किमुदाहरणं। अतो भिस ऐस्। वृक्षैः।
विद्वनोरनुनासिकस्यात्। अब्जाः। गोजाः। तत्कालस्येति किं। खट्वाभिः। मालाभिः॥ ॥आदिरन्त्येन सहेता। आदि-
रन्त्येनेत्संज्ञकेन सह गृह्यमाणस्तन्मध्यपतितानां वर्णानां ग्राहको भवति स्वस्य च रूपस्य। अण्। अक्। अच्। हल्।
सुप्। तिङ्। अन्त्येनेति किं। सुडिति तृतीयैकवचनेन टा इत्यनेन ग्रहणं माभूत ६९

संज्ञित्वं विज्ञायते स्वं रूपमित्यनुवृत्तेः स्वरूपस्य चेत्याह। मध्यवर्त्तिनामिति। यद्यप्याद्यन्तावयवौ अवयविनः समुदायरूपस्य संबन्धिनौ तथापि तस्य युगपदुभयस्य प्रयो-
गाभावात्समुदायिनां ग्रहणेन तद्दर्शयति वर्णानामिति स्वस्य च रूपस्येति। स्वरूपमादेरेव गृह्यते तेनास्य साक्षाद्भावादिति। अजेति केवल एव यकारः प्रवर्त्तते न णकारेण
सहितः। सहग्रहणाद्यन्तौ समुदितौ संज्ञेति समुदायादेव विभक्तिर्भवति। एकोयणावीति नादिमात्रात्। टा इत्यनेन ग्रहणं माभूदिति। तावतो वर्णस्याविवक्षितत्वान्नाप्र-
मत्तः टाङसिङसामिनात्स्याः इति पाठोऽस्येन इति तृतीयैकवचनस्याऽस्ये विशेषणार्थः॥ ६९ ॥ ॥श्रीः॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥ येनविधि॥ ॥स्वरूपविधिपरिहाराणायमारंभः॥ इदमपि संज्ञासूत्रं॥ येनेति करणे तृतीया॥ विधीयत इति विधिः॥ कर्मसाधनः किप्रत्ययः॥ विधिर्विधीयत इति॥ विधिशब्देन विधानयोग्यं वस्तु अभिधीयते॥ तेन सः सोपपत्तिक क्रियाविशेषोऽत्र नाप्रख्यानप्रयोगः॥ आसने आस्तिके करणेन करोति इतिवत्॥ तदंतस्येति बहुव्रीहिः॥ तदिति येन तयेति निर्दिष्टः कारणभूतः शब्दो निर्दिश्यते तदाह॥ आत्मांतस्येति॥ अंतशब्दः स्वावयववाचि तांतदा॥ विशिष्टस्य समुदायस्येयं संज्ञेत्याह समुदायस्य संज्ञा भवतीति॥ अवयव लाघमिति॥ मयूरव्यंसकादित्वात्समासः॥ लुपेरवश्यमः कृत्ये इति मलोपः॥ अथेह कस्मात् इजंतस्य संज्ञा न भवति एवोचवाया वर्इति किंच स्यात् अनेकाल्त्वादपादयः सवर्णाः स्युः तत अवयवनादिष्टपतनमिति प्राप्नोति प्रसारणे श्विशब्दाश्वादिवर्ष्याविशेषागतिः स्यात्॥ नैष दोषः॥ निर्दिश्यमानस्यादेशा भवंतीति एव एव भविष्यति॥ अथवा यथा एवात दंतविधिः एवमयादिभिरपि भविष्यति॥ एवमघाद्गुणे इमत्र आदित्यवर्णितो गृह्यते अचीति चाजादिरिति षष्ठीइत्यादावव्यवर्णांतस्य समुदायस्याजादेश्च गुणप्रसंगः षष्ठ्यनिर्दिष्टानां निर्दिश्यमानस्येत तदपि नास्ति॥ एवं तर्हि नैवं विधोऽस्य योगस्य विषयः येनेति करणे पतृतीया पिसुक्कं करणे च परतंत्रं कर्त्राधिष्ठितस्यैव करणत्वात्॥ नचैर

॥येनविधिस्तदंतस्य॥ येन विशेषणेन विधिर्विधीयते स तदंतस्य आत्मांतस्य समुदायस्य ग्राहको भवति स्वस्य च रूपस्य॥ एरच्॥ इवर्णांतादच् प्रत्ययो भवति॥ चयः॥ जयः॥ क्षयः॥ उरुणवृष्णके॥ उवर्णांतात् एवं भवति॥ अवक्लृप्यलाव्यं॥ अवरूपणामं॥ ॥

जित्यादौ इकारादीनां णातंत्र्यं धात्वादीनां च स्यात् अंतं स्वरूपतीव भासते का इत्यादि विधिवत् स्यादीनां अतो विवक्षा निबंधनं तद्भूयमिति विशेषणत्वेन विवक्षितं परतंत्रम प्रधानं विशेष्यत्वे विवक्षितं स्वतंत्रं प्रधानं तेन विशेषणं विशेष्यस्य तदंतस्य संज्ञे लुप्तं सं भवति विशेष्यसंनिधौ च विशेषणं भवति संनिधिश्च कुत्राचित्स्थानिर्देशेन यथा इकोऽचि द्विवचनं प्रगृह्यमिति द्विवचनस्य क्वचिदधिकारात् यथेर इतिनि धातोः क्वचित् आक्षेपात् यथा इकोझलिति सनाधातोः एवोपवायावृइत्यादौ तु न कुर्यात् इति विशेष्यसंनिधिरिति नैतत् अवर्त्मतं॥ यदि विशेषणांतदंतस्य संज्ञा न तत उदोष्ठ्यपूर्वस्येत्यत्र अरकारस्तदंतस्य धातोः संज्ञेति ओष्ठ्यपूर्वग्रहणं धातोरेव विशेषणं स्यात् नककारस्य संज्ञायाः संनिहितस्यापना र्थित्वात्॥ ततश्च इह च स्यात् संकीर्णमिति ऋतश्च सिसादौ च न स्यात्॥ एवमुतश्च प्रत्ययात् इसंयोगपूर्वादि त्यत्रासंयोगपूर्वग्रहणमंतस्य विशेषणं स्यात् नोतः नैष दोषः॥ इयं हि संज्ञा गुणप्रधानभावापेक्षा तत श्वोतश्च प्रत्ययादित्यादौ विशेषणसंबंध वेलायां गुणभावापुरणात्

मनुभूय पश्चात् विशेष्येणाभिसंबंधे संज्ञा भवति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का. पद. ११
६९

समासेति। अनेनैतदाह। श्रितादयो विशेष्याः तद्विशेषणं च सुप्। एवं नडादिभ्यः फगित्यादौ नडादिविशेष्यं प्राति पदिकं विशेषणमिति। कष्टं परमश्रित इति श्रितान्तमेतत्क
र्वृत्तं न भवतीति संबध्यते पठितं श्रितादि प्रत्ययलक्षणेन प्रवृत्तं भवति श्रितान्ते व्यपदेशे। तदाहेति। कः पुनराह उगित्वादीत्यनापीवा। उगिद्वर्णेति। उगिता वर्णेन च प्रा
तिपदिकं विशेष्यमित्यर्थः। यस्मिन्विधिरिति तत्तदं विध्यपकारस्तदादिविधिः आगो विशेषणेन भवति॥ ॥वृद्धिर्यस्य॥ ॥समुदायस्यैवाचामादिः संभवतीति स एव
सोत्पनेनोच्यत इत्याह। यस्येति। समुदाय उच्यत इति। संप्रति निर्दिशार्थे चेदं अस्य धातद्वृद्धेन किं परामृश्येत तत्सिद्धस्यानुपाशनेह दृष्टे वसा वृद्धसंज्ञा स्यात्। अचां मध्य इ
त्यादि। अत्र यस्येत्यस्याचामित्यनेन संबंधः आदिश्च निर्धार्यते हि विधेयो धर्मः आदित्वं प्रोपक्रमवचनः। उपक्रम्यते इत्युपक्रमः प्रथमं उच्चार्यत इत्यर्थः। यस्स स

समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः। द्वितीया श्रितादिभिः सह समस्यते। कष्टश्रितः। इह मा भूत्। कष्टं परम
श्रित इति। प्रत्ययविधौ। नडादिभ्यः फक्। नाडायनः। इह मा भूत्। सूत्रनडस्यापत्यं सौत्रनाडिः। किमविशेषेणैतत्। ने
ह। उगिद्वर्णग्रहणवर्जमिति वाच्यं। उगितश्चेति ङीप्प्रत्ययस्तदन्तादपि भवति। भवती। अतिभवती। वर्णग्रहणं। अत इञ्। दाक्षिः
प्लाक्षिः। यस्मिन्विधिस्तदादावल्ग्रहणे। यस्मिन्विधिस्तदादाविति वक्तव्यं। अचि श्नुधातुभ्रुवां य्वोरियङुवङाविति। श्रियः। भ्रुवः। वृ
द्धिर्यस्याचामादिस्तद्वृद्धं। यस्येति समुदाय उच्यते। अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतस्तच्छब्दरूपं वृद्धसंज्ञं भवति। अचामि
ति जातौ बहुवचनं। शालीयः। मालीयः। औपगवीयः। कापटवीयः। आदिरिति किं। सभासंनयने भवः साभासंनयनः ७०

मुदायस्य संबंधिनामचां मध्ये प्रथममुच्चार्यमाणो वृद्धिसंज्ञक इत्यर्थः। अचामिति जातौ बहुवचनमिति। तेन द्वयोरपि भवतीति भावः। एकस्यापि च यद्येकोऽचिः बह्वावाम
भवति। शालीय इति। अत्र समुदायस्य हलादित्वेऽपि अजपेक्षया प्रथमो वृद्धिरिति संज्ञा भवति। ननु च निर्धारणस्य तुल्यजातीयविषयत्वात् निर्धार्यमाणानामजादि
त्वमेव प्रतीयते तेन वाकारेण च ओष्ठ्यस्य मात्रायेनुपदेशानत। कथं न हि सोमपंचालानां कुलमिति अच्कार्यं दृष्टं तत्त्वं भवति। सवर्णग्रहणान्नत्वं तलात। इहापि न हि
सवर्णत्वात् भवति। स्यादेवं यदि स्वजन्यग्रहणमुच्चारितं स्यात्। इह तु निर्धारणस्वभावात् प्रतीयते। अस्मात् तथा प्रतीयमान एव सवर्णग्रहीष्यते यथा जग्रहणे मध्य
वर्तीकारादिः किं चाचामिति निर्धारणात्र ये तावदकारस्योच्चारितत्वात् आकारोऽपि प्रतीयते तेन निर्दिष्टमाणस्याप्याकारादेस्तथा भूतमेवात्तं प्रतीयत इति ये तु किं चि

॥ १७० ॥ सिद्धिः ॥

राम ६९

© Dharmartha Trust J&K. Digitized by eGangotri

।गोनामधेयस्येति। नामधेयशब्दः संज्ञापुरुषः देवदत्तीया इति। काश्यादिषु देशवाची देवदत्तशब्दः पठ्यते एङ् प्राचां देशे इति वृद्धसंज्ञकः काश्यादिभिः साहचर्याद् देशवाचिन
स्यैव भवति। वाहीकग्रामवाचिनोऽपि देवदत्तशब्दस्यानादित्वेनासांकेतिकत्वं न प्राग्देशे। ग्रामिवाच हि वृद्धसंज्ञाया अभावात् काश्यादिलक्षणौ ठञ्ञिठौ न भवतः। गोत्रान्ता
दित्यादि गोत्रशब्देन गोत्रप्रत्ययान्तं गृह्यते तदन्तात् समस्तवत्केवलात् गोत्रान्ताद्यः प्रत्ययो भवति स एव तदन्तादपि भवतीत्यर्थः। घृतरौढीया इति। रूढस्यापत्यमत इञ् इ
षिकेष्वपि च तस्य गौ न छा च: प्राग्भरतेषु इति निषेधात् वृद्धाच्छः। एवं हरिहुंभीयाः अंभस्यापत्यं भूयोंभस्यः मल्लोपश्चेति बाह्वादिषु पाठादिञ् सलोपश्च। औद
नपाणिनीया इति। पणिनोऽपत्यमिति मिलशणाद्यिविरधीतिप्रकृतिभावात् टेरिति टिलोपाभावः पाणिनस्यापत्यं पाणिनो युवेति इञ् तस्य छात्रा इति विवक्षिते अनि
लुगिति इञो लुकि कृते पिप्पलादयलक्षणेन इञ् श्चेति अण् प्राप्तो गोत्राधिकारात् भवति कणवादिभ्यो गोत्र इत्यत्र तावत् पारिभाषिकं गोत्रं गृह्यते तदेव तस्येसत्राप्यनुवर्त्त

।गोनामधेयस्य वृद्धसंज्ञा वक्तव्या। देवदत्तीयाः। दैवदत्ताः। गोत्रान्तादसमस्तवत्प्रत्ययो भवतीति वक्तव्यम्। घृतप्रधानो रौढिः घृतरौ
ढिः। तस्य छात्राः घृतरौढीयाः। ओदनप्रधानः पाणिनिः ओदनपाणिनिः। तस्य छात्राः ओदनपाणिनीयाः॥ वृद्धाम्भीयाः। वृद्धका
श्यपीयाः। जिह्वाकात्यहरितकात्यवर्ज्जं जैह्वाकाताः। हारितकाताः॥ ॥त्यदादीनि च॥ ॥यस्याचामादिग्रहणमुत्तरार्थ
मनुवर्त्तते। इह न संबध्यते। त्यदादीनि शब्दरूपाणि वृद्धसंज्ञानि भवन्ति। त्यदीयं। तदीयं। एतदीयं। इदमीयं। अदसीयं। त्वदीयं।
मदीयं। त्वादायनिः। मादायनिः। भवदीयं। किमीयं॥ ॥

तेनेन पुनीञो न भवति। कश्यपस्य शाखोपसेदादिः। कतस्यापत्यं गर्गादिः जिह्वाकात्य पलाश इति मस्य अकासा न तोणे व भवति। कः पुनरत्र प्रत्ययातिदेशप्रस्तावः पाणिताद्येषुपि
कोऽप्राग्दीव्यतोऽणित्यत्र चैतद् वक्ष्यते। सत्यं केचित्तु गोत्रान्तस्य वृद्धसंज्ञा विहिताः एवमपि वृद्धाम्भीया इति सिद्धे वार्त्तिककारस्तु वृद्धसंज्ञार्थं मत्वा पिनलका एव सछात्राः पैणा
लकायना इति वृद्धाच्छः स्यात्। प्रत्ययातिदेशेऽनु कणवादिभ्यो गोत्र इत्यण् लभ्यते इति मन्यमानः पूर्ववाक्येन परमत मुपन्यस्यानेन वाक्येन निरस्यति स्मान्तरेव पठितं न त्विति कारेण॥ ॥
त्यदादीनि च॥ ॥उत्तरार्थमिति। तत्र प्रयोजन वक्तव्यम् यस्याचामादिरिति संबन्धसंभवाच्च। इह तु न संबध्यत इति। अयोग्यत्वात् तनि वृद्धत्वस्य सजातीयविषयत्वात् त्य
दादीनां चाजात्मकत्वाभावात् अन्वयासंभवः यस्याचामादेः स्यात् तदैव त्यदादीनां च सदादिष्वेवि चित्स दादि शब्दा वर्त्तत इति क्लिष्टकल्पना युक्ता उत्तरार्थमप्यनुवृत्तिसं
भवात् न तु क्रमुत्तरार्थमनुवर्त्तत इति। त्वादायनिरिति। उदीचां वृद्धादगोत्रादिति फिञ् मपर्यन्तस्य ह्योश्च॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।एङ् प्राचां देशे॥ ॥प्राचां देशे॥ ॥प्राचां देशाभिधान इति। प्राचि देशे ये वसन्ति ते प्राञ्चः पुरुषाः तेषां संबंधी यो देशः तदभिधानस्येत्यर्थः एतेन अजनपदस्य देशस्य विशेष
णं प्राचां ग्रहणं न तु वर्णिनामिति दर्शयति। तथा हि सति मतेनेत्यध्याहार्यं स्यादिति भावः। एणीपचनीय इत्यादि। एणीपचनादिभ्यश्छः देवदत्ता इति। वाहीकग्रामेभ्यश्चेति हृद्धादि
तिविहितौ ठञ्ञिठौ न भवतः काश्यादिभ्यः ठञ्ञिठौ अपि न भवतः तत्रापि वृद्धाधिकारात्। एवं कौडो नाम ग्रामः तत्र भवः कौड इत्यणेव भवति। कुशिनां तु प्राग्ग्रहणं आचार्यनिर्देशार्थं व्या
ख्यातं भाष्यकारोपितथैवाश्रियत। तेन सैपुरं स्कोनगरं च वाहीकग्रामौ तत्र वाहीकग्रामेभ्यश्चेति ठञ्ञिठौ भवतः सैपुरिकी सैपुरिका स्कौनगरिकी स्कौनगरिका। आसाव
वस्थितविभाषाविज्ञानाच्च कौडदेवदत्तदाक्षयोः प्राग्देशवाचिनोष्ठञ्ञिठौ न भवतः। दौषिके चार्थे द्वैयर्थं वृद्धत्वं ज्ञेयं तेन तेनापत्यविकारयो रूढीचां वृद्धात् गोत्रात् निसंबद्धशा
दिभ्य इति वृद्धलक्षणप्रत्ययाभावः। एतदपि मवस्थितविभाषयैव सिद्धं। वृत्तिकारस्य पक्षे त्वेतत् सर्वं वचनात् साध्यं। गोमतीति। गोमती प्राग्देशेन दीनच नदी देशग्रहणेन ग्र

।एङ् प्राचां देशे॥ ॥यस्याचामादिर्ग्रहणमनुवर्त्तते। एङ् यस्याचामादिस्तत्प्राग्देशाभिधाने वृद्धसंज्ञं भवति। एणीपचनीयं
भोजकटीयः। गोनर्दीयः। एङिति किं। आहिच्छत्रः। कान्यकुब्जः। प्राचामिति किं। देवदत्तो नाम वाहीकेषु ग्रामः तत्र भवः
दैवदत्तः। देश इति किं। गोमत्यां भवा मत्स्या गौमताः। प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा। विदुषां शब्दसिद्ध्यर्थं सा नः पा
तु शरावती॥ ॥इति जयादि काशिकायां वृत्तौ प्रथमाध्यायस्य प्रथमः पादः॥ ७१ ॥ श्रीः ॥ ॥

त्यतेनदीदेशौ ग्रामा इति न घाः पृथग्ग्रहणात्। एङ् प्राचां देशे उदीचां वृद्धादगोत्रादित्यादिषु प्रागुदञ्चौ आक्रान्तौ तयोर्विभागज्ञानार्थमाह प्रागुदञ्चाविति। शरावती नाम नदी
उत्तरपूर्वाभिमुखी तस्या दक्षिणपूर्वस्यां दिशि अवस्थितो देशः प्राग्देशः उत्तरापरस्यामुदग्देशः तौ शरावती विभजते तयोर्विभागो ज्ञायते। क्षीरोदकमिति जातिरप्राणिनामि
त्येकवद्भावः। क्वचित् क्षीरोदके इति पाठः तत्र नियतव्यक्तिविवक्षया जातिपरत्वाभावात् द्विवचनं। किमर्थं विभजते विदुषां शब्दसिद्ध्यर्थं। यद्यपि न घा एवमुद्देशेन भवन्ति विदुषां
शास्त्रावस्थिताः सिद्धं त्विति तथापि तद्धाहेतुभूतया अवस्थितं शब्दसाधुत्वं इति उद्देशोपारोप्यते येवं भूता सा नः अस्मान् पातु। क्वचित् प्रागुदञ्चाविति पाठः तत्रापि स च
वर्णविधिस्त्वाजिति योगविभागात् समासः। उत्तरदिक्त्वं प्रागुदीचमिति पाठे समाहारद्वन्द्वः द्वन्द्वाच्चुदषहान्तात् समाहार इति टच्। क्वचित् प्रागुदीच्याविति पाठः तत्रावयववद्भूत
स्य समुदायस्यारोपः प्राग्देशानुदग्देशांश्चेत्यर्थः॥ ॥७१॥ ॥इति हरदत्तविरचितायां पदमञ्जर्यां प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः॥ ॥७१॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥गाङ्कुटादिभ्यो ञ्णिन्ङित्॥ ॥कुट आदिर्येषामिति बहुव्रीहावंतर्वर्तिन्या विभक्त्या अपहृतत्वेपि तत्त्वं न भवति अनुक्रियमाणानुपूर्वीविनाशप्रसंगात् अथवा कुटकोटिल्य इति
धातुपाठे योकारः तेन सह सानुबंधानुकरणं द्रष्टव्यं अत्र चत्वारः पक्षाः संभवंति इत्संज्ञकेन ङकारेण सह संबंधप्रतिपादनं । ङित् इति वा विधिः संज्ञाकारणं । नन्वत इति देशो वे
ति । तत्राद्ये पक्षे गाङ्कुटादिभ्यः परो ञ्णित् प्रत्ययो ङित् इत्संज्ञकङकारयुक्तः इत्संज्ञको ङकारो यस्य सोयमिति यथाः अत्र ये धामत्ति ङकारः युडादीनां तेषु व्यर्थो नुवादः येषां नास्ति तत्मादी
नां तेषु मिथ्योपमितु प्रक्रममात्रमयं यश्च । अथ द्वितीयः गाङ्कुटादिभ्य इति पंचम्या अञ्णिदिति प्रथमायाः षष्ठ्यां प्रकल्पितायां ङिदादेशः प्राप्नोति न च प्रथमायावैयर्थ्यं लाघवा
र्थत्वात् तत्र ङित् इति कर्मधारये असमासे वा देः परस्येति तत्वादीनामादेः ईकारः प्राप्नोति । कथं पुनरित्संज्ञको नामादेशः स्यात् स्वयं निवृत्तत्वम् अमुरत्र कोदोषः स्यान्निनं नि

॥ ॥गाङ्कुटादिभ्योऽञ्णिन्ङित्॥ ॥श्री॥ ।१। ॥

वर्त्य निवर्त्यिष्यते । स्यादेतत् इड्ग्रहणसामर्थ्यादादेशो न भविष्यति आरे शच्चेहिल्व शङ्कत ङित इत्येवमादि ङित्संज्ञेत्यागमो ङकारो विधास्यत इति तन्न अनेनेत्संज्ञापथ्या
स्यात् तेन माभूदित्येवमर्थं इड्ग्रहणं स्यात् । कः पुनरत्र विशेषः तेन वा सत्या मनेन वा । अयमस्ति विशेषः तेन सत्संज्ञायः स्यात् अनेन पुनर्नास्येति प्रकृतपरामर्शात् ।
तस्यैतस्य प्रकृतस्येत्संज्ञकस्येति एवं च श्रूयमाण एव ङकारो ङित्कार्याणि भवंति तत्र नेदुरिहकर्त्तीसत्रवासनीरो कृतीति यदि परिगणनं तदात्र प्रतिषेधाभावात्
कुटिङ्। कुटिङ् मिति प्राप्नोति अथ तु संभवोदाहरणप्रदर्शनं तदात्रापि प्रतिषेधात् कुटुङ्। कुटुङ्मिति प्राप्नोति । बहुव्रीहौ तु येभ्यः प्रसिद्धा ङित स्तत्पर एव तत्
जादीनामादेशाः स्युः नचांतर्यतो व्यवस्था यत्र स्थानेंतरतमस्य च प्रसंगः तत्रांतरतमपरिभाषा न चात्रांतरमानांतरमदादीनां प्राप्तिर्लोके शास्त्रे वा तेषा
मप्रसिद्धेः । न चान्तरतमपरिभाषयैव तान् कल्पयितुमर्हतीति नियामकत्वात्तस्याः । संतु वा तथाप्यदरूपः तेपि स्तादेशभवंतो ङिच्चेत्संभाव्येव स्युः ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ननु च नात्र श्रोतः स्थान्यादेशभावः किं तर्हि गाङ्कुटादिभ्यः परोऽञ्णित्प्रत्ययो ङित् तत्संज्ञकः ङ् कप्रयुक्त इति सिद्धानुवादमात्रे व्यापारः सनु सिद्धानुवादो विधानमन्तरे
णानोपपद्यते इति ङकारस्येत्संज्ञकस्य विधिः कल्प्यते किमतो यद्येवं इदं ततो भवति विधिवाक्यस्याश्रुतत्वात् कपरिभाषांगतामुपेयात् षष्ठीस्थानेयोगेति वाऽस्मादेः पर
स्येति वा ङिच्चेति वा नेतदस्ति परिभाषा न षष्ठीप्रकल्पनेन श्रोतः एवस्थान्यादेशभाव उपपादितः। अस्तु वा कल्पितं विधानं यएवत्वसौ विधिः कल्प्यते तेनैत्रैव प
रिभाषांगभावमुपैतीति विप्रसङ्गात्तामपरिभाषाणां परिभाषाः खलु विधेरङ्गभूताः अनुवादवाक्यश्रुतार्थास्य यथानुपपत्त्या विधिवाक्यमेव कल्प्यते सर्वथा दुष्ट
राधापंपक्षः संज्ञाकरणे ङित्ति चेत्तत्रास्य ग्रहणं न स्यात् संज्ञारूपस्यानुच्चारितत्वात् ङिच्छब्दः संज्ञा ङिच्छब्दश्चोच्चारितः प्रत्येकसंबंधमपि ग्रहणं कृत
पस्य ङ् इत्यस्येत्संज्ञकस्य संपादयेत्। न वान्यर्थो व्ययवद्ध प्रयुक्तः संज्ञेति यस्याभिज्ञाभावान् क्ङिति देशेऽप्यस्य ग्रहणं न स्याद्देव। तथा केवलो ङिच्छब्द उच्चारितः तत
स्यैव ग्रहणं स्यात् न गाङादीनां कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययात्। ततश्च यहि ज्यादि संप्रसारणं गाङ्क्षातीतारावेवस्यात् न जरीगृह्यते इत्यादौ।

॥ अतिदेशोऽयं गाङादि तिङादेशो गृह्यते। न गाङ्गतावितीङकारस्यानन्यार्थत्वात् १

न च पङ्गादीनां ङित्करणस्यैवेप्सं। क्ङित्यदेशेषु पत्रसंज्ञारूपं न प्रत्याभिज्ञापते तत्र ग्रहणार्थत्वात्। ननु चैवं गाङादिभ्यः परस्य ङित्संज्ञाविधानमनर्थकमापद्यते कथं
क्ङित्यदेशो घस्य ग्रहणं नास्ति मुख्यमेव केवलस्य ङिच्छब्दो ग्रहिज्यादिसूत्र एव न च तत्र गाङ्ग्रहणं ते नापि सर्वे कुटादयः किं त्ववधिरेक एव। सत्यं न्याया गतेर्थे किं कुर्मः
तत्र ताम पंपपक्षः तदेवमेतेषां पक्षाणां दुष्टत्वात् चतुर्थपक्षमाश्रित्याह अतिदेशोऽयमिति। ङिति देशो गृह्यत इति। इङश्चार्थे गाङ् लिटि विभाषा लुङ्लृङोरिति विहितः इङ्का
रस्यानन्यार्थत्वादिति। इङादेशस्य हि योङकारः तस्यैतदेव प्रयोजनं यदुत स्यैव ग्रहणं यथा स्यादिति। अथ सामान्यग्रहणं कस्मान्न भवति। अप्रमाणत्वात्। आदेशस्य ङ
कारो नन्यार्थः। आत्मनेपदस्य स्थानिवद्भावेनैव सिद्धत्वात्। धातोस्तु चरितार्थः। यद्येवं आग्रहणे चापरावग्रहणं प्राप्नोति पकारस्यानन्यार्थत्वान्न। एवं हि चापो
नुबंधावनर्थकौ स्याताम्। टापश्च टकारः अतोऽयं च्चणावच्चसमानं संभवति चरितार्थोऽपि त्वम् चरितार्थोऽपि त्वमपि तत्सर्वमाश्रीयते चात्र प्रपत्त्येव॥ १ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

। यावत् कुङ् शब्द इति। तदनन्तरं हलन्तात् आकृतमिति प्रयोगदर्शनात्। कुङ् दीर्घान्तः। ङित् ङिद्वद्भवतीत्यर्थ इति। अन्तरेणापि वतिं विस्पष्टार्थो गम्यते यथा सिंहो माणवक इ
ति। यद्यप्यतिदेशः असंयोगाल्लिट् किदिति प्रकरणेऽपि कित्कार्यातिदेशो गौरवभयात् तत्र स्मृतिरस्ति त्वत्र प्रसज्यमानं [illegible] प्रत्ययः किदाश्रयमकित्त्वमा
श्रित्य सजिदृशोरित्यमागमः प्राप्नोति। अतिदेशेनाहि परत्वादयं कार्यं प्राप्य तेन तुल्या अयं निवर्त्स्यते। सिद्धं तु प्रसज्यप्रतिषेधात् किति न भवतीति तत्र स्वाश्रयस्य
कार्यस्याभावात् अतिदेशिकं कित्त्वमयं प्रतिषेधो भविष्यति। इह न हि [illegible] चुकुटिषतीति। ङितः इत्यात्मनेपदं प्राप्नोति। ङितो धातोरात्मनेपदमुच्यते इह चातिदेशेन सन

॥ कुटादयोऽपि कुट कौटिल्ये ॥ एतदारभ्य यावत् कुङ् शब्दे इति। एभ्यो गाङ्कुटादिभ्यः परे ञ्णितः प्रत्ययाः ङितो भवं
ति। ङिद्वद्भवन्तीत्यर्थः। गाङः। अध्यगीष्ट। अध्यगीषातां। अध्यगीषत। कुटादिभ्यः। कुटिता। कुटितुं। कुटितव्यं। उत्पुटि
ता। उत्पुटितुं। उत्पुटितव्यं। अञ्णिदिति किं। उत्कोटयति। उत्कोटकः। उत्कोटो वर्तते। व्यचेः कुटादित्वमनसीति वक्तव्यं।
विचिता। विचितुं। विचितव्यं। अनसीति किं॥ ॥

एव ङित्त्वं न धातोः यत्रावयवे लिङ्गमचरितार्थं तत्र समुदायस्य विशेषकं भवतीति इह त्ववयवस्य गुणप्रतिषेधादि सप्रयोजनमस्ति यङन्तादपि तर्हि न प्राप्नोति तस्मा
न्नैवंशङ्कनीयं। तुदि ङितो धातोरिति तत्रैकं मनमेव ङितमाश्रित्यात्मनेपदं प्राप्नोति। नैष दोषः। सप्तमी समर्थाद्धि तिङ् इतीव ङिद्भूत्। न तु वचनात्त्रवतिर्निर्दि
श्यते समसं। यस्त्वपरशब्दप्रयोगात् कल्प्यमानो वतिर्व्याख्यानात् सप्तम्यन्तात् सिध्यते। एवमपि प्रतियोगिनि सप्तमी प्राप्नोति अन्तर्णीतेति। एवं तर्हि नुदादेः
ङितः इत्यत्र उपदेश इति वर्तते उपदेशे यो ङित् ततः आत्मनेपदं भवति। अध्यगीषतेति। विभाषा लुङ्लृङोरिति गाङादेशः आत्मनेपदेष्वनतः घुमास्थे त्ये ए
त्वं कर्त्तरि आदित्वं व्याख्यानीकरणे तु तदादेः कुटादिभ्यः प्राक्पठ्यन्ते विचितेति। ग्रहिज्यादिना संप्रसारणं॥ ॥ ॥ ७॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

उरुव्यचा इति बहुव्रीहिः । कथं विभक्ति ष्यात् । अनसीति पर्युदासोयं अप्रत्ययस्य कृत्वा तत्सदृशो कृतिकार्यं विज्ञायते । कथं लिखितुं स्वपमेव लिखिष्यत इति यावता कुटेः पर्द
लिखिः पठ्यते । कस्चिदाह कुटस्यादिः कुटादिः कुटस्यादिर्येषां ते कुटादयः कुटादिश्च कुटादयश्चेति वद्रुव्रीहितस्य रूपयोः सह विवक्षायां स्वाभिन्नानां यस्यो न रस्त्वर्विधिः ग्र
हिष्यत इति बहुव्रीहिः दोषः तत्र तत्पुरुषहसमासं गृहीतोलिखिः पिङित्वस्य निमित्तमिति । एवं तु लिखिता लेखिता लिलिखिषति लिलेखिषति शकुनिष्वालेखनइ
स नुपपन्नं स्यात् । तस्मात् घघवग्य मुपपादनीयं संज्ञापूर्वको विधिरनित्य इत्यगुणो न भविष्यति । धूविधूनने कुटादिः तस्माच्चिलुक्षस्वन सहचरइत्र इतीत्रप्रत्यये गुणो न
प्राप्नोति । गात्र गुण इष्यते धुविञ्ञमित्येवति कल्पसूत्रकाराणां तु प्रयोगाः । कवरसला दुपपास्त्रीपाः अयथवा अंजभाखामिदोघुरवावित्रिमिरिष्विदे ङिं हितिवक्तव्ये प्रसंगांतर

उरुव्यचाः ॥ विजइट् ॥ ॥ ओविजी भयचलनयोः । अस्मात्परस्येडादिः प्रत्ययो ङिद्भवति । उद्विजिता उद्विजितुं उद्विजित
व्यं इति ङित्त्वं किं । उद्वेजनं । उद्वेजनीयं ॥ ॥ विभाषोर्णोः ॥ ॥ इडिति वर्त्तते । ऊर्णुञ् आच्छादने अस्मात्परस्य इडादिः प्रत्ययो
विभाषा ङिद्भवति । प्रोर्णुविता । प्रोर्णविता ॥ इडित्येव । प्रोर्णवनं । प्रोर्णवनीयं ॥ २ ॥ ॥ श्रीः ॥ ॥

करणं ज्ञापकं आतिदेशिकं ङित्वमनित्यमिति ॥ विजइट् ॥ ओविजी भयचलनयोरिति । यस्कः सजिविद्यनिष्यरानितिविजिः नसंगत्यते अनिष्टात् इतरत्नदिति सामर्थ्यात्
सेटा दृष्ट संज्ञा सूत्रात्पस्यादिरितिवर्त्तते तेनेड्विध्य शोते यस्यादिरिड् तितेनोक्तमेकवचनस्य ग्रहणं न भवति न सर्वोकस्य विदादिः । अत एवाग ममात्रस्यायं ङित्वविधिर्न भव
ति किं तर्हि नदादेः प्राप्य पस्येत्याह इडादिः प्रत्यय इति । उद्विजितेति । ङित्वाल्लघूपधगुणाभावः ॥ ॥ विभाषा ॥ ॥ ऊर्णुञ् आच्छादने जितनोपधः रथाभ्यामिति णत्वे
नपाठः प्रोर्णुनावरेफवियोगे अभ्यासस्य सरस्य नकारस्य श्रवणं भवति ॥ प्रोर्णुविनेति । ङित्वपक्षे उवङ् अन्यत्र गुणः २ ॥ ॥ ७ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥सार्वधातुकमपित्॥ ॥अपिदिति पर्युदासश्चेत् अवयवं तस्तत्र चुक्रुशतुरित्यादौ तरनिस्थिते नित्यत्वादन्तरङ्गत्वाच्चैकादेशः न च वार्णादाङ्गं बलीयः। नानाश्रयत्वात् तत्र हन्ते परस्मैहावितस्याश्रि-
तत्वात्प्रत्ययादिवद्भावात् पिदपितोरेकादेशोपि ङिद्ग्रहणे न ग्रहणमिति शब्देकादेशवतः सार्वधातुकस्य ङित्त्वात् गुणनिषेधः प्राप्नोति। प्रसज्यप्रतिषेधे तु पित्त्वनिमित्तो निषेधः पूर्वस्य कार्यमिति
पूर्वप्रत्ययवद्भावात् ङित्त्वाभावात्। अस्तु तर्हि प्रसज्यप्रतिषेधः यद्येवं तुदतीत्यत्र विकरणेन समयोः पिदपितोरेकादेशः परस्य पितो ङित्त्वनिषेधे कर्तव्ये आदिवत्स्यादिति ङित्त्वमु-
त्वमप्राप्नोति गुणः प्राप्नोति। अन्तादिवच्चेत्यत्र पूर्वपरयोः समुदायावभिप्रेतौ न तावेकैकौ किं कारणं आद्यन्तयोरवयवत्वात् तस्य त्वाभिनिवेशः स्थानिनोरेकादेशेन निवर्त्यते त्वाच्चात्र तः स्थानिनावेवोपूर्वप-
रोपयोः समुदाययोः अन्तादिवदेकादेशोपि तयोरेवान्तादिवद्भवतीत्ययमत्रार्थः अत एव वृक्षवन्धूरित्यत्र एकादेशोपि नियत्किंप्रत्ययेऽन्तवद्भवति। अवेनुदेशस्यात्र च अन्तमेकव-
चनेकृत्स्नयोरेवपि दृपितोरेकादेशाश्रित्यिर्वावेव प्रत्ययादिवत्वेस्यादेवदोषः। एवं तर्ह्येकादेशस्य एवेदेवोस्थानिवद्भावात्स्वरूपे पिय यास्थानिकालेयथापोगुणस्य प्रहृत्तिनिहत्ती
भवतः तथा हन्तेथे कादेशो स्थानिवुद्धाभवेप्यतः एव मुभयेनिर्देशित्वेपि प्रसज्यप्रतिषेधस्वाश्रयणीयः तत्र हि तदाश्रयणसाम र्थाद्यस्वणावच्चायितो ङित्त्वं प्राप्तं तस्य सर्वस्यानि-

॥सार्वधातुकमपित्॥ ॥सार्वधातुकं यदपित् तद् ङिद्वद्भवति। कुरुतः। कुर्वन्ति। चिनुतः। चिन्वन्ति। सार्वधातुकमिति किं।
कर्ता। कर्तुं। कर्तव्यं। अपिदिति किं। करोति। करोषि। करोमि॥ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

षेधादिष्टमपि सिद्धं भवति अपचिनो त्वं अविनवमिति अत्र हि ङितो लङः आदेशस्य स्थानिवद्भावेन प्राप्तस्यापि ङित्त्वस्य निषेधो भवति। पर्युदासे त्वनिर्देशेनैकवाक्यत्वात् तस्ये-
वपर्युदासात् स्थानिवद्भाववहलं तं ङित्त्वं स्यादेवेति णलुटो ङिद्वचनं ज्ञापकमाश्रयणीयं स्यात्। किंच ङित्त्वपि न भवतीत्ययमप्यत्रार्थ इष्यते तेन अनुनाडिद्वानिमित्ततानउः
स्थानिवद्भावात्प्राप्तस्य पित्त्वस्य निषेधात् पिदाश्रयो ब्रुव ईडभवति त्वरातु भवान् त्वणाहश्च भवतीत्येवादिकं। अत एतदर्थमपि प्रसज्यप्रतिषेध आश्रयणीयः। तत्र हि एव कृ-
तस्य नजो यथेष्टमभिसंबंधो भवति पित् ङिन्न भवति ङित्त्वपिन्न भवति तत्र यस्योपदेशो किं पित्त्वं तस्यातिदेशात् प्राप्तं स्थानिवद्भावप्राप्तं च ङित्त्वं निषिध्यते। यस्य पुनरोपदेशिकं
ङित्त्वं तस्य स्थानिवद्भावप्राप्तं पित्त्वं निषिध्यत इति विवेक्तव्यं। कुरुत इति। ङित्त्वाट्किङ्गुणाभावः अत उत्सार्वधातुक इत्युत्वं च भवति। अत्र च तनोत्यादिभ्यस्तद्धितेराश्रयणी-
यः न पूर्ववत्समासमर्थात्तेन पचेत इत्यत्राशो ङित्त्वेति ङितोपलक्षणं न दृष्टिभवति। यद्येवं चित्रत इति नास्य तुदतोद्देशेति लसार्वधातुकानुदात्तत्वं प्राप्नोतीति नैष दोषः उपदेश-
ग्रहणमनुभाष्याम पिसंबध्यते ङित्त्वपदेशादनुपदेशादिति अङ्क्ति ऊरिति वा पर्युदासात्तत्त्वदृष्टास्योपदेशाङ्कारवतो ग्रहणमिति सर्वमनवद्यं॥ ॥ ॥ ॥

॥ असंयोगात्॥ ॥ लिटश्चाशिषो धातुरसंयोगग्रहणेन विशेष्यत इत्याह असंयोगान्ताद्धातोरिति। ननु चात्र पर्युदासमत्वमुक्तं प्रतीयते तत्र संयोगोत्तरसदृशात्‌ हल्लन्तादेव स्या
त् बिभिदतुः बिभिदुरित्यादौ निन्यतुरित्यादौ तु न स्यात्। न्यायकात् सिद्धं यस्य मतेऽसंयोगादेर्गुण इति सस्रंसतुरित्यादौ गुणं विधत्ते तत् ज्ञापयति नात्र नञिवयुक्तन्यायः।
धातुमात्रस्यैव ग्रहणमिति। ङि॰ त्वेऽसकृतेऽकित्वातिदेशस्य प्रयोजनं ईजतुः ईजुः यजादीनां किति सम्प्रसारणं यथा स्यात्। जजागरतुः जजागरुः जाग्रोऽविचिण्णल्ङि॰ त्स्वि
ति गुणो यथा स्यात्। यद्यपि नगीङ्कुः गरिति मोपि कित्त्वमेवातिदिश्येत नैवं शक्यं इह हि दोषः स्यात्। ण्लस्कृतोऽधूविधननेत्वचनु वितथ्युविता श्युः कितीति रधू निषेधः प्रा
प्नोति पघाल्लृत्वाल्लृः नैष दोषः पूर्वस्य कार्यातिदेशोयमित्युक्तो इह तर्हि कुटित्वा पुटित्वा नक्तापेद्‌ इत्यातिदेशिकस्यापि कित्त्वस्य प्रतिषेधः स्यात्। ननु च सनि

॥ असंयोगाल्लिट् कित्॥ अपिदिति वर्त्तते। असंयोगान्ताद्धातोः परो लिट्प्रत्ययः अपित् किद्भवति। बिभिदतुः।
बिभिदुः। चिच्छिदतुः। चिच्छिदुः। ईजतुः। ईजुः। असंयोगादिति किं। सस्रंसे। दध्वंसे। अपिदित्येव। बिभेद॥ ५ ॥

ग्रहणं ज्ञापकं वक्ष्यते न क्त्वा सेडिति निषेधो नातिदेशिकस्य भवतीति सत्यं असति क्त्वाग्रहणे सति तु तस्मिन् न सनो न सेडिति निषेधो न लभ्यते इत्यज्ञापकं तत्र न ल्यग्र
हणं। तथा सार्वधातुकमपिदिति कित्त्वातिदेशाज्जाग्रतः जाग्रतीति गुणः स्यात् ङि॰ त्वादितिदेशे त्वविचिण्णल्ङि॰ त्स्विति पर्युदासो भवति। अनुपधे भोल्लिटः कित्त्वं गुणात् पू
र्वविप्रतिषेधेन। कित्त्वस्यावकाशः ईजतुः ईजुः नन्वत्र विध्यन्तरस्यकस्य चित्प्रसंगः गुणस्यावकाशः वर्त्तित्वा वर्धित्वा वर्त्तते वर्धते इत्यत्रोभयप्रसंगे कित्त्वं भवति पूर्वविप्रतिषेधेन।
इह तु बिभिदतुः बिभिदुः नित्यत्वादेव कित्त्वं सिद्धं तद्धि कृतेपि गुणे प्राप्नोति अकृतेपि। गुणस्तु कित्वे सति न प्राप्नोति। वक्तव्यमत्र तु गुणे कृते संयोगान्तत्वात् कित्त्वं न प्राप्नोतीत्युभयम
नित्यमिति पूर्वविप्रतिषेध उच्यते। सचायं कार्यातिदेशः पक्षे स्फुटमेव वक्तव्यः तथा हि अनेनैव किल कार्यातिदेशः ईजतुरित्यादौ यत्र विध्यन्तरस्याप्रसंगः तत्र सम्प्रसारणमतिदिश्य
चरितार्थमतिदेशं परत्वात् गुणो बाधेत। शास्त्रातिदेशे कुङ्किति चेत्स्मेत न च्छाद्ममतिदिश्यते तच्च पर्यायेण गुणस्यापवादभूतं तथाप्यनेनात्र चरितार्थत्वात् दुर्बलेनातिदेशो नातिदिष्टः

© Dharmartha Trust J&K. Digitized by eGangotri

॥ इंधिभवतिभ्यांच॥ इंधेर्णंतुककारः नत्विकारः श्रियोधातुनिर्देशइतीकप्रत्ययः तेनानिदितामितिनलोपोनभवति। समीधुरिति निरिंधी दीप्तौ अनुदात्तेत् एडः किंत्वादनिदि
तामितुपधालोपः द्विर्वचने सवर्णदीर्घत्वं। बभूव बभूविथेति। कित्वाद्यथाक्रमं वृद्धिगुणौ नभवतः। इंधेः संयोगार्थमित्यादिना एवं णलोमिद्धिर्दीपन सूत्रारंभसमर्थ्यते। अयं
योगःशक्योवक्तुं। कथं इंधेरनंतरस्थं दसेवालिट् भवतिभाषायांत्विजासेश्चेसामाभवेति तथा च्छंदसुभयथेति लिटः सार्वधातुकसंज्ञा सार्वधातुकमपिदिति डित्वादुपधालोपः।
आमितुकर्त्तव्ये आर्धधातुकसंज्ञा छांदसत्वाद्वाम्नमभावः भवतेरपिभुवोवुग्लुङ्लिटोरिति वुग्विधीयते तत्र भू अभू इयइतिस्थिते वुक् प्राप्नोति वृद्धिगुणौ च कृताकृतप्रसंगित्वेन
नित्योवुक् न च शक्यं वक्तुं स्मार्तिः एकदेशविकृतस्यानन्यत्वादिति नजं तत्वात् एकघूपधला च वृद्धिगुणौ न भविष्यतः अवकुपेचैतदेवं विज्ञेयं वुकावृद्धिगुणौ बाध्येते इति यो हि म
न्यते किंत्वादिमे गुणवृद्धी न भविष्यत इति तस्यणालि वृद्धिः स्यावेवनत्यचोञ्णितीति वृद्धेः किति नेति प्रतिषेधः अनिल्वृणत्वात्। एवं तर्हि ज्ञापकार्थं इंधिग्रहणमेन
तज्ञापयति इंधेर्भाषायामप्यनित्य आमिति समीधे समीधांचक्र इतिभाषायामपिभवति। भवतेरपिवुगनित्यः किंकारणं वुरितिवर्त्तते न च गुणवृद्धोः कृतयोरुवर्णोतिभ

॥ इंधिभवतिभ्यांच॥ ॥ इंधिभवतीत्येताभ्यांपरोलिट् प्रत्ययः किद्भवति। समीधेदस्युहंतमां पुत्रइंधेअथ
र्वणः। भवतेः खल्वपि। बभूव। बभूविथ। इंधेः संयोगार्थंग्रहणं। भवतेःपिदर्थं। अत्रेन्धिः॥ ॥ ॥

वतिर्भवति। वुरितिनिवर्तिष्यते यदि निवर्त्तते बोभाववोभविथ अहं किल बोभवयङ्लुकापि नित्यत्वात् वुक्प्राप्नोति अनुवर्त्तमाने पुनः वुरित्यस्मिन् उभयोर्नित्ययोः परत्वा
त् गुणवृद्ध्योः कृतयोः अनुवर्णोतत्वात् वुङ् भवति। अथेदानीं यङ्लुक्यनेनैव लिटः कित्वं कस्मान्नभवति श्तिपा निर्देशात्। यदि पुनर्वुग्विधावेव श्तिपा निर्देशः क्रियते
तेनैवं शक्यं वक्तुं इह हि दोषः स्यात् बोभवतुः बोभूवुः। यदा पुनः कित्वविधौ श्तिपानिर्देशः क्रियते तेन वुग्विधौ तदा यङ्लुक्यपि इत्यत्र वचने पुलिटः कित्वाभावाद् गुणवृद्ध्योः कृतयोः
वुरित्यधिकाराद्वुङ् भवति। अपित्वचनेषु असंयोगाल्लिट्किदिति कित्वे सति गुणाभावादुवर्णोत्वात् वुग्भवति। ननु चोक्तं आरभ्यमाणेपि कित्वे वृद्धेः प्रतिषेधो न सिध्यति अ
किल्लक्षणत्वात् इति। नैव दोषः। इङ्ग्रहणमनुवर्त्तते तत्वामर्थ्यात् इनिग्लक्षणापि वृद्धेः प्रतिषेधो भविष्यति। समसमतिअपंभुक्षतर्कः वार्त्तिककारस्तु नस
मते यदाह इंधेश्छंदोविषयत्वात् भुवो वुकोनित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रन्थिग्रन्थीत्यादि । श्रन्थ ग्रन्थ सन्दर्भे दम्भु दम्भे ष्वञ्ज परिष्वङ्गे । श्रेथतुः श्रेथुः श्रेथुरिति कित्त्वादुपधालोपः एत्वाभ्यासलोपावत्र कृतौ । देभतुरिति नलोपे कृते अत एकहल्मध्येना-
देशादेरित्येत्वाभ्यासलोपौ न च लोपस्यासिद्धत्वं आभाच्छास्त्रीयस्यासिद्धत्वस्यानिमित्तत्वात् । परिषस्वजे इति । ष्वञ्ज परिष्वङ्गे । श्रेथतुः श्रेथुरिति कित्त्वादुपधालोपः एत्वाभ्यासलोपावप्यत्र कृतौ ।
अनुदात्तेत् उपसर्गात्सुनोतीति षत्वं सदिरप्रतेः स्वञ्जेः परस्य लिटीति परस्य प्रतिषेधः । अत्र केचिद् ग्रन्थिपठन्ति । श्रन्थ ग्रन्थी त्यागेऽपि भवति । अथ यित्तु वचने पृथक्योगादिसंयोगार्थमेव वचनं पित्सु नभा-
षां । असंयोगान्तार्थे पि दर्थं च पित्त्वपि भाव्यं किं पुनरत्रार्थतश्चेदेवा ज्ञातुमर्हति । मृड उमृद ॥ ॥ मृड उमृद ॥ ॥ क्लिश हिंसायां अनुदात्तेत् दिवादिरकर्मकः क्लिशू विबा-

॥ श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम् । श्रेथतुः श्रेथुः ग्रेथतुः ग्रेथुः देभतुः देभुः परिषस्वजे । परिषस्वजाते ॥ ॥ मृडमृदगु-
धकुषक्लिशवदवसः क्त्वा ॥ ॥ मृडमृद । गुध । कुष । क्लिश । वद । वस इत्येतेभ्यः परः क्त्वाप्रत्ययः किद्भवति । न क्त्वा सेडिति प्रतिषेधं
वक्ष्यति । तस्यायं पुरस्तादपकर्षः । गुधकुषक्लिशीनां तु रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं वचनम् । मृडित्वा । मृदित्वा । गुधित्वा । कु-
षित्वा । क्लिशित्वा । उदित्वा । उषित्वा ॥ ॥ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ रुद विद मुष ग्रहि स्वपि प्रच्छ इत्येतेभ्यः संश्च क्त्वा च किन्तौ
भवतः । रुदविदमुषीणां रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं ग्रहणं ग्रहेर्विध्यर्थमेव । स्वपिप्रच्छ्योः सन्नर्थं ग्रहणं किदेव हि क्त्वा । रुदि-
त्वा । रुरुदिषति । विदित्वा । विविदिषति । मुषित्वा । मुमुषिषति । गृहीत्वा । जिघृक्षति । सुप्त्वा । सुषुप्सति । पृष्ट्वा । पिपृच्छिषति । ग्रहादीनां
कित्त्वात्संप्रसारणं भवति । किरश्च पञ्चभ्य इति प्रच्छेरिडागमः ॥ ८ ॥ ॥

धने क्र्यादिः सकर्मकः परस्मैपदी द्वयोरपि ग्रहणं । किमर्थं पुनरिदं यावता किदेव हि क्त्वा तत्राह न क्त्वा सेडित्यादि । अयमपवादः । नन्विदमेव नियमार्थं भविष्यति मृडादिभ्य
एव क्त्वा किद्भवति नान्येभ्य इति नार्थो न क्त्वा सेडित्यनेन । कथं लवित्वा पूत्वा तुल्यजातीयस्य सेटो नियमः । ननु क्लिशः क्त्वानिष्ठयोरिति विकल्पेनेड्विधानादनिट् क्त्वा संभवति । ए-
वं तर्हि मृड उमृद वद वस कित्त्वविधानं नियमार्थं इतरेषां तु रलो व्युपधादिति विकल्पबाधेन विधिसंभवान्नियमो न भविष्यति । एवमपि विपरीतोऽपि नियमः स्यात् मृडादिभ्यः
सेडेव किदिति । उदित्वा उषित्वेति । यजादित्वात्संप्रसारणं शासिवसिघसीनां चेति षत्वं वसति सुधोरिट् ॥ ॥ रुदविद ॥ ॥ सन्नर्थमिति । तत्र चरितार्थत्वाद्दनिटः क्त्व-
कित्त्वविधानं नियमार्थं न भवति ॥ ८ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥इको झल्॥ ॥सनाश्रित्य धातोरिका विशेषणात् तदन्तविधिर्भवतीत्याह इगन्ताद्धातोरिति। इक्स्मरणादिकस्य तु धातोर्ग्रहणं न भवति न त्वतः परो झलादिः सन् संभवति। कथं इणो
गा लुङि। णौ गमिरबोधने सनि च इत्यादिकृतविकल्पं णावेरिङ्पास्मे यदेषु अधिजिगमिषतीति। ननु च भावकर्मणोरात्मनेपदे अनुदात्तोपदेशे सनुनासिक लोपार्थमेतत् स्यात् तत्
त्र तु रूपे विप्रतिपत्तिः। गमेरिङादेशस्य ग्रहणमिति वचनादज्झनगमां सनीति दीर्घो न भवति अधिजिगांस्यते इति केचित् अन्ये त्वाहुः अज्झनगमामित्यत्राजग्रहणं न कर्तव्यं कथं
सनि दीर्घ इत्येकोयोगः। अच्च अवं एवं सिद्धे अज्ग्रहणं प्रवृत्तिभेदेन गामेः। पिपठिषो बाणार्थं अजादेशस्य गमेरिति तेनास्यापि दीर्घेण भाव्यं अजादेशत्वात् अधिजिगांसते इति रूपमिति तत्
देवं धातोरपि ग्रहणं प्रक्रमेव। एवं तर्हि झलादावित्यर्थे गोरिषु जिगीषुशब्दस्य पाठाच्च प्रत्याहारस्य ग्रहणं। उत्तरसूत्रे च रसनीप झलः परइति अनुपपन्नेन तु ग्रहणे। झला
दिरिति। कथं पुनरसति सप्तमीनिर्देशे तदादिविधिः शक्यो विज्ञातुं झल्मात्रस्य सनोः संभवात्। ननु च चिकीर्षितेत्यादावनोलोपे घति संभवति अपूर्वविधित्वाच्च न लोपस्य

॥ ॥इको झल्॥ ॥सनित्यनुवर्त्तते। क्ङिति निवृत्तं। इगंताद्धातोः परो झलादिः सन् किद्भवति। चिचीषति। तुष्टूषति।
तुष्टूषति। चिकीर्षति। इक इति किं। पिपासति। तिष्ठासति। झलिति किं। शिशयिषते। किमर्थमिदमुच्यते। गुणो मा भूदिति।
अज्झनगमां सनीति दीर्घत्वं गुणस्य बाधकं भविष्यति॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

निवृत्तं। एवं तर्हि वृद्धसंज्ञासूत्राद्यस्मादिरिति वर्त्तते सन् किद्भवति कीदृशः यस्य झलादिः इति एतेन तदन्तविधिरपि निरस्तो वेदितव्यः। चिचीषतीति। एकाच इतीट्प्रतिषेधः। तु
ष्टूषतीति। शर्पूर्वाः खयः। शिशयिषत इति। पूर्ववत्सनः। किमर्थमिति। योगविभागविषयः प्रश्नः सूत्रं तूत्तरार्थं कर्तव्यं। दीर्घत्वं गुणस्य बाधकं भविष्यतीति। ननु कुङ् शब्दे कुर
दिः चुकूषत इत्यत्रापि दीर्घस्यावकाशः। दीर्घत्वोपमित्यवोचाम। एवं तर्हि गुपुरीषोत्सर्गे धुरगति र्वयोः कुराहीति जुगूषति दुद्रूषति। एवमपि प्रत्याहारग्रहणमनर्थकं उत्तो दीर्घ इति व
क्तव्यं। प्राप्ते प्रत्याहारणे प्रयोजनं किं प्रतिभेदे न गमिमपि विशेषयिष्यामीति। पघेतावत्प्रयोजनं स्यात् उत्तो दीर्घ इत्युक्ते इङ् हन्मोरिति वक्तव्यं येषां गमेरिङादेशस्य ग्रहणमिति प
क्षः येषामनिङादेशस्यापि ग्रहणं तेषामिहन्मोरिति वक्तव्यं हनात्वा हच रिति धानुग्रहयते नेकारः तस्मादज्ग्रहणसामर्थ्याद्दीर्घत्वं गुणस्य बाधकं भविष्यतीति सुष्ठूक्तं। ॥य
द्येवं तर्हि झलादौ गुणो बाध्यते एवमिडादावपि बाध्येत पिपठिषति। नात्र दीर्घः प्रवर्त्तते किं कारणं झलिति वर्त्तते अनु नास्ति कस्मात् किं झलोरिति॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ११
७५

यथैव तर्हीत्यादि। असति हि क्त्विते नाप्राप्ते विध्यन्तरे आरभ्यमाणं दीर्घत्वं यथा गुणं बाधते एवं णिलोपमपि बाधेत। ननु च नाप्राप्ते तस्य बाधकः। कथं नाप्राप्ते दीर्घे आरभ्यते गुणो णिलो-
पे तु ज्ञीप्सतीत्यत्र प्राप्ते चिचीषतीत्यत्राप्राप्ते। यास्ति कुत एव परिहारः। यत्र बाध्यं भवेत्तेनापेक्ष्यते। इदमस्मिन् विषये प्राप्तं इदमस्मिन् विषये इति तत्रैक बाधने योग इत्सत्यामनेकबाधो नत्वाथ इति
किमेकं बाध्यतामिति ये प्राप्ते नाप्राप्ते सर्वं बाधनीयं सुखमते एवं घपेक्षितविधिर्भवति। यदि तु नाप्राप्ते विध्यन्तरे इदमारभ्यत इति कार्यसामान्यमपेक्ष्यते तदा सर्वमेव बाधनीयं स्यात् नपु-
रस्तादपवादन्यायेन णिलोपमेव दीर्घत्वं बाधेत न गुणमित्यपि चोद्यं निरस्तं यस्माद्यमपि न्यायः कार्यसामान्य विषयो नात्येव अलः सुष्ठूक्तं णिलोपमपि बाधेतेति। दीर्घत्वस्याव-
काशप्रदानायेत्यत देव स्फुटयति चिचीषतीत्यादि ष्विति असति हि क्त्वे चिचीषतीत्यादौ क्त्वेनैव गुणो बाध्यते न दीर्घेण तत्र बाधित्वेन विभ्रंतरस्यावकाशो दीर्घः परत्वात् णिलोपेन न
बाध्यत इत्यर्थः। ज्ञीप्सतीति मारणतोषणनिशामनेषु ज्ञा मिज्ञेति चुरादिषु पाठात् णिचि उ किमित्तो द्वस्वः स न स्वरी वर्तते ॥ आपज्ञप्यृधामीदिति ईत्वं अत्र लोपोऽभ्या-
सस्य। किमर्थो योगविभाग इत्याशंक्य प्रयोजनमाह। इकः क्त्वमित्यादि। गुणो मा भूदित्येवमर्थं इक उत्तरस्य सनः क्त्वं विधीयत इत्यर्थः। दूषयति दीर्घारंभादिति। गुणो न भविष्य

यथैव तर्हि दीर्घत्वं गुणं बाधेत तथा णिलोपमपि बाधेत। तस्माद्दीर्घत्वस्यावकाशदानाय क्त्वमिदमारभ्यते। चिचीषतीत्यादिषु
सावकाशं दीर्घत्वं परत्वात्तस्मिन् णिलोपेन बाध्यते। ज्ञीप्सति। इकः किं त्वे गुणो मा भूत्। ईवर्थि भाक्ते भवेत्। अनर्थकं तु ह्रस्वार्थे दीर्घाणां
तु प्रसज्यते। सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयं। दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनं॥ ५॥ ॥८ ७॥ १॥

तीति दोषः। कृते भवेदिति। शास्त्रमात्रं नामात्रं यथादिवद्धर्मसाधनमिति भावः। अनर्थकं त्विति। शास्त्रपूर्वकालप्रयोगात् दृमि नतु प्रवृत्तिमात्रादिति भावः। ननु च सन्निमीमा-
घ्वित्यत्र मिनोते एपि मग्रहणेन ग्रहणार्थं दीर्घविधिः स्यात् नाम्भूत् मीग्रहणेन ग्रहणं मीनातिमिनोति दीङां ल्यपि चेत्यात्वे कृते यामा दाग्रहणे सन् विशेषः इति माग्रहणेन ग्रहणं
भविष्यतीति तत्राप्यमय्यर्थः मीग्रहणमपि न कर्तव्यं भवति। ह्रस्वार्थमिति। ह्रस्वानामेव दीर्घविधानसामर्थ्यात् गुणो न स्यात् दीर्घाणां तु पुनः प्राप्नोति लुलूषतीत्यादि दीर्घेषु दी-
र्घशास्त्रं प्रवर्तते पूर्वमेव तद्रूपसद्भावादिति भावः। सामर्थ्याद्धि पुनर्भाव्यमिति। सामर्थ्यप्रयोजनसद्भावः यथा मोराजिसमः क्वाविति मकारस्यैव मकारे विधीयते विकारात्
रंभाभूदिति तथा दीर्घस्यापि गुणो मा भूदिति पुनर्दीर्घो भविष्यति। यदि तर्हि प्राप्नुवंश्चिधिः दीर्घेण बाध्यते तर्हि क्त्वमयं न प्राप्नोति चिकीर्षतीति तत्राह ऋदित्वं दीर्घसंश्रय-
मिति। दीर्घः संश्रयो निमित्तं यस्य तत्तथोक्तं यं विधिं प्रति सुपदेशोनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव न्यासेन बाध्यते न च तत्राकृते दीर्घे ऋदित्वं प्राप्नोति। इह तर्हि इति तीर्घ-
त्वम् कृतेपि दीर्घत्वे ऋदित्वं प्राप्नोतीति ऋदित्व निहस्वर्थमेव दीर्घत्वं स्यात् अत आह दीर्घाणां नाकृते दीर्घ इति दीर्घाणामप्य कृते दीर्घत्वे ऋदित्वं न प्राप्नोति किं का-
रणं इलो ताभ्यां गुणाभ्यां गुणाव ऋ भवतो विप्रतिषेधेन अतोण पदीर्घेण गुणो न बाधितः तावदित्वं न प्राप्नोति तस्मान्नानर्थक एतेनेति स्थितेप्रयोजनमाह णिलोपस्त्विति॥ ५॥

रास॰
७५

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥हलंताच्च॥ ॥समीपवचनोंतशब्द इति। अवयववचनस्तु न भवति धातावन्यपदार्थे येन निर्दिश्यमानस्तदंतस्यैव तदंतविधेः सिद्धत्वात् इकान्त्वन्यपदार्थत्वे नैव संभवतीति न हि वर्णो वि
र्णांतरस्यावयव उपपद्यते। हल्चासावंतश्चेति कर्मधारयं दर्शयति निपातनाद्धि सोऽत्र पूर्वनिपातः तत्र च कस्यांतो हलित्यपेक्षायामिक इति यच्च संपीतं मनिहि तं च स्थितं विपरीत
मंतशब्दस्य वृत्तिमाह। इगंतादिति। इकमपेक्षमाणस्यांतशब्दस्य नित्यसापेक्षत्वात् समासे कर्मधारयः बहुव्रीहौ तु धातोरन्यपदार्थत्वं नैव संभवतीत्यंतशब्दो हि नियतदेशमेव समीपमा
चष्टे तन्नाव्यनन्तसमीपमात्रं न च धातोः परं समीपावस्थिते हलि ततः परः सन् संभवति। किं त्वन्यपदार्थे परस्मिकः परः समीपे हल् न ततस्मानंतरः सन् संभवतीत्येकेन हलाव्यवधानेऽवि
ज्ञापेतेति धिप्सतीत्यत्र न स्यात् हलीति जातिग्रहणात् सिद्धाव पि प्रतिपत्तिगौरवप्रसंगः। ननु चमाभूदंतग्रहणं हल इत्येवाक्त इकोहल्विशेष्यतेन न च धातुः इकः परो योहलंत
दंताद्धातोरिति। न चैवमत्र शंकनीयं ञसस्तंतग्रहणेऽपवतो हलंतादिति विज्ञायेत ततश्चापज्ञेः सन् स्यतःपिपसतत्र इत्यत्रापि कित्वे सति संप्रसारणं प्राप्नोतीत्युक्तिः। नहि इक छुवस्स

॥हलंताच्च॥ ॥इकः सन् झल् किदिति वर्त्तते। समीपवचनोंतशब्दः हल् चासावंतश्च हलंतः इगंतादिक् समीपाद्धलः परः
सन् झलादिः किद्भवति। बिभित्सति। बुभुत्सते। इक इत्येव। यियक्षते। झलित्येव। विवर्त्तिषते। दंभेर्हल्ग्रहणस्य जातिवाचकत्वा
त्सिद्धं धिप्सति॥ ॥ ॥ ॥ ॥ ॥

मुखेऽर्थे संभवतीति तद्वृत्तिर्वृत्तिर्युक्ता किंच इग्वत इत्यस्य व्यावर्त्यमपि न संभवति यायज्यतेः सनि यायजिषत इत्यत्र सन् झलादिः तस्मादंतग्रहणं चिंत्यप्रयोजनं। इहधिप्सती
ति परे इक् समीपे हल् न नकारः न ततः परः सन् यतश्च परः सन् लकारात् न स इक् समीप इति कित्वं न स्यादित्यत आह दंभेरिति। दंभेरपि परस्य सनः कित्वं सिद्धं कुतः हल्ग्र
हणस्य जातिवाचकत्वात् न प्रयोजकः इति वक्ष्यमाणः जातिवाची हल्शब्दः एकैव च जातिर्नकारभकारयोः अक्लिष्टकं च जातेरिक् समीपवर्त्ते तद्रूपेक्षयात्र सनः परत्वं
नकारव्यक्तिरिक् समीपे वर्त्तत इति जातिरपि वर्त्तते भकारव्यक्तेः परः सन्निति जातेरपि परः। विपर्ययस्तु सन्नपि शास्त्रे गणनाश्रितत्वात् किंचित्करः भकारव्यक्तिरिक् समीपे न
वर्त्तत इति जातिरपि न वर्त्तते नकारव्यक्तेः परः सन्न भवतीति जातेरपि परो न भवतीति। धिप्सतीति। दंभ दंभे सनि कित्वादुपधालोपः एकाचो बशो भष् झषंतस्य स्ध्वोरिति
भष्भावः द्विर्वचनमत्र लोपोऽभ्यासस्य॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥लिङ्सिचौ॥ ॥आत्मनेपदेषु परत इति। एतत्सिच एव विशेषणं न लिङः असंभवात्। लिङ् परस्मैपदस्य झलग्रहणानुवृत्तेश्चैव व्यावर्त्तितत्वात्। भित्सीष्टेति। भिदिः स्वरि
तेत्। लिङः सीयुट्। सुट्तिथोः। भुत्सीष्टेति। बुधिर्नुदात्तेनेत्पूर्वं गतम्। अबुद्धेति। झलो झलि इति सिचो लोपः। झषस्तथोर्धोऽधः। झलां जश् झशि इति धकारस्य दकारः। यक्षीष्टेति। स्वरिते
त्वादात्मनेपदं व्रश्चादिषत्वं षढोः कः सि। अद्राक्षीदिति। अमागमे यणि च कृते च रद्धवृद्धिः॥ ॥उश्च॥ ॥लिङ्सिचावात्मनेपदेष्विति वर्त्तते

॥लिङ्सिचावात्मनेपदेषु॥ हलन्तादिको झल्किदिति वर्त्तते। सिचिति निवृत्तं। इगन्तादिक्तमीपाद्धलः परौ झलादी लिङ्सिचावात्मने
पदेषु परतः कितौ भवतः। भित्सीष्ट। सिचि खल्वपि। अभित्त। अबुद्ध। इकः इत्येव। यक्षीष्ट। अयष्ट। संप्रसारणं ह्नि स्यात्। आत्मनेपदेष्विति
किं। अस्राक्षीत्। अद्राक्षीत्। सृजिदृशोर्झल्यमकितीत्यमागमो न स्यात्। हलन्तादित्येव। चेषीष्ट। अचेष्ट। गुणो न स्यात्। झलित्येव। व
र्त्तिषीष्ट। अवर्त्तिष्ट। गुणो न स्यात्॥ ॥उश्च॥ ऋवर्णान्तात् धातोः परौ लिङ्सिचावात्मनेपदेषु झलादी कितौ भवतः। कृषीष्ट। हृषीष्ट। सि
च खल्वपि। अकृत। अहृत। झलित्येव। वरिषीष्ट। अवरिष्ट। वृतो वा। अवरीष्ट॥ ॥वा गमः॥ ॥लिङ्सिचावात्मनेपदेष्विति व
र्त्तते। गमेर्धातोः परौ लिङ्सिचावात्मनेपदेषु झलादी वा कितौ भवतः। संगंसीष्ट। संगसीष्ट। समगत। समगंस्त। कित्वपक्षे अनुनासि
कलोपो भवति। अनुदात्तोपदेशवनतितनोत्यादीनामिति ६ ॥

मविधिरित्याह ऋवर्णान्तादिति। आगता विभक्तिस्य अनुग्रहणं न भवति मन्निर्दिश्यत्वान्निमित्तसङ्गो विधानेन सिचोऽसंभवात् न च वृद्धिः घोकर्त्तरीत्यनुवृत्तेः कर्म्मणि सिजपि
संभवति एवं तर्हि इडो लीयमाचार्यस्य यथा तोर्ग्रहणमिव तितत्र लिपा निर्देशं करोति अजीर्यिषीष्टेषु स्व मन्निर्दिश्यत्वान्निमित्तश्च गुणो निसंयोगादेरिति निर्दिष्ट
सिद्धं त्वशंसनिक्रम छद्य नामिति स्वरूपेणापि ग्रहणं दृष्टं एवं तर्हि व्याप्तिमाश्रयाद्गुणोग्रहणं अकृतेति। ह्रस्वादङ्गादिति सिचो लोपः। अवरिष्टेति लिङ्सि
चोरात्मनेपदेष्विति इट्॥ ॥वा गमः॥ ॥संगंसीष्टेति समो गम्यृच्छिभ्यामात्मनेपदं॥ ६ ॥ ॥ ७ ७॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ हनः सिच्॥ ॥ सोऽत्र लक्ष्मीदर्शितोऽस्याः ग्लोपो न स्यात्। आहसतेति। आङो यमहन इत्यात्मनेपदं आत्मनेपदेष्वनत इत्यदादेशः। सिज्ग्रहणं लिङ्निवृत्त्यर्थमिति। प्र
कृतं सिज्ग्रहणं लिङः सन्नद्धमिति तदनुवृत्तेः तस्याप्यनुवृत्तिः स्यादिति भावः ननु चेह हनो वध लिङीति लिङि वधादेशो नित्यः घातिषीष्टेति चिण्वदिटि वधादेशाभावे
फलादित्वात् प्रसंगः तत्र किं लिङि वृत्तेन ततः ह उत्तरत्रेति। उत्तरार्थमत एव सिज्ग्रहणं कर्तव्यं तदिहैवाक्रियते मा यानुस्यौ प्रतिपत्तिगौरवं माभूदित्येवमर्थमिति
र्थः। आत्मनेपदग्रहणमिसादि। यमः परस्मैपदेषु यमरमनमातामिति सगिटौ भवत इति फलादिः सिच्न भवति। उपयमने तु नित्यमात्मनेपदं स्वाङ्गो घोः प
रस्मैपदेषु सिचो लुक् भवति गामगात् अत्रापि परस्मैपदेष्वेव भवतीति लिङि यासुट् क्रियत्वसमर्थमेव वृतस्य ग्रहणमनुवर्त्स्य एवमस्मिन्नप्य घानिषाताम् इति चिण्वदिटि
भा भूदिति देवं गागमत्तामात्मनेपदग्रहणं चिन्त्यप्रयोजनं किमर्थं पुनरिदं यावता आत्मनेपदे ङि। तिसिजन्तस्याङ्गस्यासिद्धितामिति वृत्तिलोपः सिद्ध उच्चारणार्थो

॥ हनः सिच्॥ ॥ हन्तेर्धातोः परः सिच् किद्भवति। आहत। आहसाताम्। आहसत। सिचः कित्वात् अनुनासिकलोपः। सिज्ग्रह
णं लिङ्निवृत्त्यर्थम्। उत्तरत्रानुवृत्तिर्मा भूत्। आत्मनेपदग्रहणमुत्तरार्थमनुवर्तते। इह तु परस्मैपदे हन्तेर्वधभावस्य नित्यत्वात् कि
त्त्वस्य प्रयोजनं नास्ति॥ ॥श्रीः॥ ॥७॥

हि सिचस्कारो नानुबन्धः। ज्ञापनार्थमेतत् ज्ञापयति न सिजन्तस्योपधालोपो भवतीति तेनायमन्ते नेति सिद्धं भवति ननु चास्ति अनुदात्तोपदेशेति लोपो यथा स्यात्
आत्मनेपदे उपधालोपो मा भूदित्येवमर्थमिदं स्यात् कः पुनरत्र विशेषः। सिचि वा लोपो भवत्वात्मनेपदे वा। अयमस्ति विशेषः आत्मनेपदे लोपे सति अन्तलो
पः प्राप्नोति सिचि तु न आभीयस्यानुनासिकलोपस्यासिद्धत्वात् यद्यपि उपधालोपोऽप्याभीयः तथापि व्याश्रयत्वात् असिद्धत्वं न प्राप्नोति आत्मनेपदे उपधालोपः
सिच्यन्तलोपः। यद्येवं बहिरंग उपधालोपः बहिर्भूतात्मनेपदापेक्षत्वात् अन्तरंगो ह्लोपः अन्तर्भूतसिजपेक्षत्वात् असिद्धं बहिरंगमन्तरंगे न तु ध्वेयापाभिषाभाष्य
त्रीयावाहऊ ठ इत्यत्र ज्ञापितेति तिन सामान्तरंगबहिरंगयोरसिद्धत्वात् यथायुपधस्तावोऽत्र अल्लोपादिषु वसोः संप्रसारणस्यासिद्धत्वं न भवति तथात्रापि न स्यादन्तलोपा
तो लोपः स्यादिति सिच्येवानुनासिकलोपः एषितव्यः इति वक्तव्यमेव सिचः कित्त्वमिति ज्ञापकानुपपत्तेरेतस्मात्सूत्रादनुपधालोपः स्यात्। तस्मात्। सिचस्कारेऽनुब
न्ध एव नोच्चारणार्थः तेनाङ्गिपितामिति निप्रतिषेधालोपाभावः॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰११

७७

।इदितोनुमित्यत्रधातुग्रहणंमित्रंतंनिरस्यार्थमेवक्रियतेनधातुःपरेशावस्याणमेवनुमप्याप्तस्यास्तिसेवमर्थकुंडेत्यादिसिद्धयेचपलंनायाखेयंशतिकेचि।न्नेतित्रयांउप
धालोपेपिनातोलोपेनमपितर्थंकिंकारणंउपदेशइतिवर्त्ततेउपदेशेयोणेकारांतःतस्यलोपः।इहापितर्हिनप्राप्नोतिविचिकरणेसोरवधिनुतःकृणुतःनोपदेशग्रहणेनप्रकृ
तिभिसंबध्यतेउपदेशेयाप्रकृतिरकारांतेतिकिंतर्हिआर्धधातुकमभिसंबध्यतेअर्द्धधातुकोपदेशेयदकारांतंतस्येतितदेवमुपधालोपेपिनकश्चिद्दोषइति॥

यमोगंधने॥ ॥सिचआत्मनेपदेष्वितिवर्त्तते।यमेर्धातोःगंधनेवर्त्तमानात्परःसिचप्रत्ययःकिद्भवति।आत्मनेपदेषुपर
तःगंधनंसूचनं।परेणाप्रच्छाद्यमानस्यावद्यस्याविःकरणं।अनेकार्थत्वात्तत्रायमिहत्रवर्त्तते।उदायत।उदायसातां।उदाय
सत।सूचितवानित्यर्थः।सिचःकित्वादनुनासिकलोपः।आङोयमहनइत्यात्मनेपदं।गंधनइतिकिं।उदायंस्तपादं।उदायंस्तकू
पादुदकं।उद्धृतवानित्यर्थः।सकर्मकत्वेपिसमुदाङ्भ्योयमोग्रंथइत्यात्मनेपदं॥ ॥विभाषोपयमने॥ ॥यमःसिज्यात्मने
पदेष्वितिवर्त्तते।यमेर्धातोःउपयमनेवर्त्तमानात्परःसिचप्रत्ययोविभाषाकिद्भवति।आत्मनेपदेषुपरतः।उपायतकन्यां।
उपायंस्तकन्यां।उपायंस्तभार्यां।उपयमनंस्वीकरणंविवाहःदारकर्मपाणिग्रहणमित्यर्थः।उपाद्यमःस्वकरणइत्यात्मनेप
दं॥ ॥स्थाघ्वोरिच्च॥ ॥आत्मनेपदेष्वितिवर्त्तते।तिष्ठतेर्धातोःघुसंज्ञकानांचइकारश्चांतादेशःसिच्चकिद्भवतिआत्म
नेपदेषुपरतः।उपास्थित।उपास्थिषातां।उपास्थिषत।घुसंज्ञकानां।अदित।अधित ७

राम॰

७७

पकार्यमेववचनमितिसर्वमनाकुलं॥ ।यमोगंधने॥ननुयमिरुपयच्छतेकथंगंधनेवर्त्ततइत्यतआह।अनेकार्थत्वादिति।उदायतेति।परावद्यंस्तयंप्रकाशितवा
नित्यर्थः।उदायंस्तपादमिति।अपकृष्टवानित्यर्थः॥ ॥स्थाघ्वोरिच्च॥ ॥चकारेणकित्वंसमुच्चीयतइत्याहइच्चकिदिति।प्रयोजनंगुणोमाभूत्इतित्वंगुणु
णविधानार्थमेवस्यात्।उपास्थितेति।उपान्मंत्रकरणेऽकर्मकाच्चेत्यात्मनेपदं।ह्रस्वादंगादितिसिचोलोपः।नचैवंसिचीतुच्यतेकिंतर्हिइकारश्चांतादेशःसिच्च
किद्भवतीत्येतावतैवनेत्वंस्यादितिजिमितहत्वातभगवत्येवलोपः॥ ७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

रवेत्यादि। तकारः रःघस्तस्याभावस्तकारेत्त्वं इ चेत्तत्र निर्दिष्टो कस्य कार्यस्य सिद्धये इकारस्तकारे त्वं क्रियत इत्यर्थः। दीर्घो माभूदिति। आंतर्यतः प्राप्नोतीति भावः।
अनेनेति। इकारविधानेनापि विनिर्णयस्यार्थः किं त्वेहि घुमास्थादिसूत्रेणैव दीर्घः तस्मादित्व विधानसामर्थ्यात् अनेन रमो पि ह्रस्व एव भविष्यतीत्यर्थः। भाष्यमाणो
ण सवर्णान्न गृह्णातीतिआश्रयमत्र परिहारः संभवति। अनंतर इति। असह त्वात् इति दोषं क्रियमाणे हृस्व एव प्लुतोपि स्यात् समा भूदित्यर्थः। प्लुतश्चेति। अनेनन
परत्वेप्रसा व्याप्यते। यथेनेन प्लुतो विधीयते तत दापत्रापि विषये नंतरस्यापि प्रसक्ता स्यात् येशित्वादिना प्लुतो विहितः तत्रायनेनैव स्यात् अस्मिन् कर्ते येनस्या सिद्ध
दित्तिपक्षेनुवादोषः प्राप्नोति तत्तो ह्रस्व एव भविष्यति। अन्ये तु तपरत्वमनेनसमर्थितं मन्यंते असति तकारे आंतर्यतो दीर्घस्य दीर्घः प्राप्नोति। ननु चोक्तं पि
ह्नोत्र दीर्घ इति। सिद्धेसत्यारंभो नियमार्थः स्यात् दीर्घ एव यथा स्यात् प्लुतो माभूदिति नन्वित्युक्तं अनंतर इत्यादिना घुमास्थादि सूत्रेणानेनवा दीर्घे सति घपि विशेषो
नास्ति तथाप्यनंतरे अविधमानेपि विशेषे प्लुतो माभूदिति दीर्घः स्यादित्यर्थः। माभूत् प्लुत इति चेत् तत्राह प्लुतश्चेति। सचा स नितपरत्वेन प्राप्नोति सति तु तास्मिन् दीर्घ

॥ इत्वक स्यतकारेत्वं दीर्घो माभूदितेपि सः। अनंतरे प्लुतो माभूत् प्लुतश्च विषये स्मृतः॥ ॥न क्त्वा सेट्॥ ॥क्त्वा प्रत्ययः सेरान
किद्भवति। देविता। वर्तित्वा। सेडिति किं। कृत्वा। हत्वा। क्त्वा ग्रहणं किं। निगृहीतिः। उपस्निहितिः। निकुचितः। नसेडिति कृते कि
त्वे निष्ठायामवधारणात्॥ ॥श्रीः॥ ॥

सप्रसंगादिधिरेव संपद्यत इति स्वविषये प्लुतो न व्यावर्तते। तदेवमन्यत्र भिन्नकालनिवृत्त्यर्थं तपरकरणं इह तु दीर्घनिवृत्त्यर्थं प्लुतप्रवृत्त्यर्थं च वक्तव्यलात् समयादि
॥ ॥न क्त्वा सेट्॥ ॥न किद्भवतीति। किता पि न क्रियत इत्यर्थः। न पुनः ककारस्येत्संज्ञाभावात्। किन्न भवतीति प्रकृतो हि किं छत्रः। कित्कार्यं का रोणवर्तत इत्यर्थः
सेवनिषेधो युक्तः। देवित्वेत्यादौ गुणप्रतिषेधाद्यं कित्कार्यं न भवतीति। निगृहीतिरिति। अत्र तिनुत्रेत्यादि प्रतिषेधो न भवतीति तितुत्रेष्वग्रहादीनामिति वचनात्।
निकुचितिरिति। कुंच कौटिल्याल्पीभावयोः। एवं स्य हस्योपधस्य समप्रसारणं गुणाभावे निषेधः उपधालोपश्च कित्वाद्भवति। नसेडित्यादि। पूर्वाद्धि मिको ग्रंथ उत्तरार्द्धं च
नेत पठ्यते नसेडि सेतावता पि योगेना कित्वे कृते गुधितः गुधितवानित्यत्र निष्ठायामवधारणान्निषेधो न भविष्यति। नि ष्ठा शीङ् स्विदिमिदिक्ष्विदिधृषः इति
नियमः शीङादिभ्य एव परा निष्ठा न किदिति। विपरीतस्तु नियमो निषेधे वेतिव्याख्यानान्न भवति। लिङि तर्हि प्रतिषेधः स्यात् ततश्च जग्मिवज्जाग्मिमगा महत्ते
तु उपधालोपेन स्यात् अत आह ज्ञापकादि। पूर्वाचार्यप्रसिद्ध्यापरोक्षा लिड् अते यथा भवंतीलट् इत्यस्तनी लुङ् किंज्ञापकमित्यत आह ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्नीतिरुक्तौ फलितस्यत्र फलग्रहणास्यैतत्प्रयोजनं शिशापिषतरत्वत्र माभूदितियदि चनसेडितिप्रतिषेधः आनिर्देशिकस्यापि कित्वस्य स्यात् फलग्रहणमनर्थकं स्या
त् प्राप्नोत्यत्र कित्वं नसेडितिप्रतिषेधो भविष्यतीति देतत् फलग्रहणमोपदेशिकस्य कित्वस्यायं प्रतिषेधो नातिदेशिकस्येत्यस्यार्थस्य ज्ञापकं विदुः। ननु च उत्तरार्थं फलप
हणं स्यात् स्थाघोरित्वं फलादेर्यथा स्यात् चितावदिति माभदिति उपास्थापिषातां अत्र हि उपात्स्वास्। आनामिति निष्ठिते इत्वं च प्राप्नोति चितावद्वास्वपरत्वाच्चित्र एकदेशे पु
प्राप्नोति त ढिस्न अपवादत्वात् पुकि कृते यकारस्येत्वप्रसंगः नचपुनर्हढ्डिर्लभ्यते एवमेव पुका बाधितत्वात् तस्मादुत्तरार्थं फलग्रहणं। नैतदस्ति यस्मादित्वं कित्वसंयोगे नो
च्यते न चात्र कित्वमस्ति नसेडितिप्रतिषेधात् तदयं ज्ञापकः फलग्रहणस्य ज्ञापकत्वं स्थितमित्यातिदेशिकस्यापि कित्वस्यायं प्रतिषेधो भवति। रेणतुल्यं सुधीवनी
ति शोभना धीर्यस्येत्य सुधीवास्त्री अनोवद्वुब्राहेरितिप्रकृतस्य ङीपो निषेधे सति संनियोगशिष्टानामन्यतराभावे उभयोरप्यभाव इति पयाऽरेफोन भवतितद्वदिहापि

ज्ञापकान्नपरोक्षायां प्रतिफल्ग्रहणं विदुः इत्वं कित्वं नियोगेन रेणातुल्यं सुधीवनि। वक्तव्यं
कित्वतीदेशात्रिगृहीतिः प्रयोजनं॥ ॥८॥ ॥श्रीः॥ ॥श्रीः॥ ॥

सर्थः। कस्वर्थमिति। अर्थशब्दो निवृत्तौ तन्मिवानिसत्र कसोः कित्वप्रतिषेधे माभूदित्येवमर्थं तर्हि क्वाग्रहणमितस्वर्थः। द्वृयातेकिदतीदेशादिति सिद्धमिति शेषः। अ
त्र चौपदेशिकस्य कित्वस्य प्रतिषेध आतिदेशिकं कित्वं भविष्यति। पत्रतर्हि तत्प्रतिषिध्यते संयोगीतेर्घज्ञे; आजिज्ञान् अत्र हि नतोये हते द्विर्वचने एकादेशेचस्वेका
जाद्वसामिति ज्ञागमः तत्र हते कित्वप्रतिषेधात् नलोपनिवृत्तौ ढिहलत्वात् नुडिम्सेकात्वाभावादिति निवृत्तौ कित्वनलोपादीनां चक्रकप्रसंगः। एवं तर्हि छांसः
क्वसुः लिट्पूर्वं दसिसार्वधातुकमपि भवति सार्वधातुकमपिदिति ङित्वे ङिःस्फधालोपः नचसंयोगान्ते पुकित्वङित्वपोः कश्चिद्विशेषः तस्मादस्वर्थमपि क्वाग्रहणं न
भवति। एवं तर्हि निगृहीतिः प्रयोजनं। किन्निह सर्थत्वाग्रहणमितस्वर्थः। पदिद्युनतुर्गस्वा योगविभागः क्रियतेनतसे। निष्ठा शीङः। स्विदिति दिस्विदिधृषः। मृषस्तिजि
क्षायां उदुपधाद्भावादिकर्मणोरन्यतरस्यां। ततः पूङः अपराणि निष्ठासेणा नकिद्भवति ततः क्वा च सेट् किन्न भवति अत्र पूङ इतिति वर्तमिति ततः क्वाग्रहणं ह्यकामक
र्तुं॥ ॥९॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥निष्ठाशीङ्स्विदि॥ ॥ञिष्विदा स्नेहनमोचनयोरित्यस्य भौवादिकस्य ञीतो ग्रहणं न तु ञिष्विदा गात्रप्रक्षरण इति दैवादिकस्य ञीद्भिः साहचर्यात् अस्य वा ञीत्त्वा
त् । ञिमिदा स्नेहने । ञिक्ष्विदा स्नेहनमोचनयोरिति भौवादिकस्य ग्रहणं न तु ञिक्ष्विदा अव्यक्ते शब्दे इत्यस्य भौवादिकस्य । मिति दिना साहचर्यात् । ञिधृषा प्रागल्भ्ये । शयि
तवानिति । अलसंतस्येति दीर्घः । प्रकृतिग्रहणोपलक्षणं तस्यापि ग्रहणं भवति स एव धातुरुदिरुभ्यन्त इति कृत्वा । तत्रायमर्थः स्मर्यते तिपा [illegible] अनुबन्धेन निर्दिष्टं यद्गणेन च
यत्रैकाच्ग्रहणं किं [illegible] शीङोऽनुबन्धनिर्देशोपलक्षणं । [illegible] शेषितः शेषितवान् एकाच इति यणः ॥ ॥मृषस्तितिक्षा॥ ॥उदु

॥निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः ॥ नसेडिति वर्तते । शीङ् स्विदि मिदि क्ष्विदि धृष इत्येतेभ्यः परो निष्ठाप्रत्ययः सेण्न किद्भवति ।
शयितः शयितवान् । प्रस्वेदितः प्रस्वेदितवान् । प्रमेदितः प्रमेदितवान् । प्रक्ष्वेदितः प्रक्ष्वेदितवान् । प्रधर्षितः प्रधर्षितवान् । से
डित्येव । स्विन्नः स्विन्नवान् । स्विदादीनामादितश्चेति निष्ठायामिड् निषिध्यते । विभाषा भावादिकर्मणोरिति पक्षेऽभ्यनुज्ञायते तस्य विषये
कित्त्वप्रतिषेधः ॥ ॥मृषस्तितिक्षायां ॥ ॥मृषेर्धातोस्तितिक्षायामर्थे निष्ठा सेण्न किद्भवति । तितिक्षा क्षमा । मर्षितः मर्षितवा
न् । तितिक्षायामिति किं । अपमृषितं वाक्यमाह ॥ ॥उदुपधाद्भावादिकर्मणोरन्यतरस्यां ॥ निष्ठा सेण्न किदिति वर्त्तते । उदुपधाद्धा
तोः परो भावे आदिकर्मणि वर्त्तमानो निष्ठाप्रत्ययः सेडन्यतरस्यां न किद्भवति । द्युतितमनेन । द्योतितमनेन । प्रद्योतितः प्रद्युतितः । मु
दितमनेन । मोदितमनेन । प्रमुदितः प्रमोदितः । उदुपधादिति किं । लिखितमनेन । भावादिकर्मणोरिति किं । रुचितं कार्षापणं । सेडि
त्येव । प्रभुक्त ओदनः । व्यवस्थितविभाषा चेयं तेन शब्विकरणानामेव भवति । गुधपरिवेष्टने । गुधितमित्यत्र न भवति ॥ ॥

वतीति क्षायग्रहणं ज्ञापकमनेकार्था धातव इति अन्यथा मृषितितिक्षायामेव यदि स्यात् तदर्थकं स्यात् । अपमृषितमिति । अविस्पष्टमित्यर्थः ॥ ॥उदुपधाद्भा
वादिकर्मणोरन्यतरस्यां ॥ ॥द्युतितमिति । द्युतदीप्तौ नपुंसके भावे क्तः । प्रद्युतित इति । आदिकर्मणि क्तः कर्त्तरि चेति कर्त्तरि क्तः । मुदितमिति । मुद हर्षे ।
लिखितमिति । शब्विकरणानामेवेति नन्वा [illegible] क्षुधितमिति अत्र श्विकरणोऽपि [illegible] प्रत्युदाहृतः । एवं प्रभुक्त इति । [illegible] किरीट [illegible]
[illegible] किट [illegible] मिति प्रत्युदाहर्तव्यं ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥पूङः क्त्वा च॥ ॥इहान्यतरस्यांग्रहानुवृत्तौ सेट् इत्यस्य च निवृत्तेर्द्विधौ पूङश्चेति शकाम कर्तुमुत्तरसूत्रे च वाग्रहणं॥ कथं॥ अनिटो रेव क्त्वानिष्ठयोरनेन कित्त्वं विकल्प्यते तत्र पक्षे कित्त्वं तदा श्र्युकः किती ति प्रतिषेधात् पूतः पूतवान् पूत्वेति अकित्पक्षे त्विट् पवितः पवितः पवितवान् पवित्वेति भवति। सेड्ग्रहणे नु विधि येन तस्मात्क्त्वो डित्य क्त्विन्नुत्तरार्थमनुवर्तमाने पूङश्चेमारभ्यं उत्तरत्र वाग्रहणमिह नित्यत्वात् सिद्ध्यर्थं पुवितः पुवितवान् पुवित्वेति पक्षे माभूत् तदाह अन्यतरस्यां ग्रहणं न स्वर्यते उत्तरसूत्रे पुनर्वा ग्रहणादिति। सेडिति वर्तत इति। ननु पूङः परयोः क्त्वानिष्ठयोरिड् न भवितव्यं श्र्युकः किती ति प्रतिषेधादत आह पूङश्चेति। पूङः परो निष्ठाप्रत्यय इत्यादि। किं पुनः कारणं सा श्यात श्रुतं क्त्वाप्रत्ययमपहायानुवृत्तस्य निष्ठाप्रत्ययस्यान्वयो दर्शितः। उदाहरणं च अत ऊर्ध्वं क्त्वाप्रत्ययस्येति। एतदेव द्रढयति। तथा चोक्तं इति। इडागोः क्त्वानिष्ठयोर्नित्यम

॥पूङः क्त्वा च॥ ॥अन्यतरस्यामिति न स्वर्यते उत्तरसूत्रे पुनर्वावचनात्। न सेडिति वर्तते। पूङश्चेद्विहितः क्लिशः क्त्वानिष्ठयोः पूङश्चेति। पूङः परो निष्ठाप्रत्ययः क्त्वा च सेडेव किद्भवति। पवितः। पवितवान्। क्त्वाप्रत्ययस्य न क्त्वा सेडिति सिद्धरूपप्रतिषेधः। तस्य ग्रहणमुत्तरार्थं। तथा चोक्तं। नित्यमकित्त्वमिडाद्योः क्त्वो ग्रहणमुत्तरार्थमिति॥ ९ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

कित्त्वमिष्यते। ततश्च क्त्वाग्रहणमुत्तरार्थमिति भाष्ये ह्याज्ञीयैरेवमुक्तं उत्तरार्थमपि पतरिहैव क्त्वार्थं मिसेट् इत्यनेन संबंधार्थं अन्यथा निष्ठानिवृत्तौ तत्संबद्धं सेट् इत्येत दपि निवर्तेत। अनुबंधोच्चारणं विस्पष्टार्थं न पुत्रो निवृत्त्यर्थं। इड्विधौ पूङः एव ग्रहणात्तत्रः क्त्वानिष्ठयोः इडभावात् नापि पङ्कु कि निवृत्त्यर्थं इडेव इत्येतदपि निवर्तेत डिधावप्यनुबंधनिर्देशे न पङ्कु कापि पूङो पीडभावादिति केचित्। अन्ये तु श्र्युकः किती ति अत्रैकाचश्च मनुवृत्त्येयाङ्कु कि तस्यामवृत्तेः आर्द्धधातुकस्येट् इत्येवेड्भवति तत श्च पङ्कु कि निवृत्त्यर्थं अनुबंधोच्चारणमिति अत्रापि पक्षे क्त्वाग्रहणं उत्तरार्थमेव पङ्कु कापि न क्त्वा सेट् इति प्रतिषेधस्य स्थितत्वात् न च क्त्वाग्रहणसामर्थ्यात्तस्यापि प्रतिषेधः तस्योत्तरसापुपयोगासंभवात् अनुबंधनिर्देशस्य च निष्ठापंचायितार्थत्वात् एवं च क्त्वाग्रहणमुत्तरार्थमिति ग्रन्थग्रन्थस्याविरोधः। तेन पोपुवितः पोपुवित

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥नोपधा॥ ॥निष्ठेति निवृत्तमिति। पूर्वसूत्रे चानुवृत्तत्वात्। गुफित्वेति। गुफ गुम्फ ग्रंथने रेफित्वेति। रिफ कत्थनयुद्धनिंदाहिंसादानेषु अस्यार्थे तद्विकल्पाभावेपि
रलो व्युपधादिति विकल्पोत्र कस्मान्न भवति नोपधग्रहणसामर्थ्यात्। ननु अकारोपधो नोपधग्रहणसामर्थ्यावशेषं भवति अंफ हिंसायां अफित्वेति। नेतद्विति त्रैह
व्यंत्य न योधीत्योर्भवति अर्फित्वा अफित्वा अंफित्वेति एतच्च सत्यप्यति वा नोपधग्रहणे भवत्येव सति तावत् नोपधस्य न क्त्वा सेडिति प्रतिषेधसति अर्फित्वेति भवति
नोपधस्य त्वस्मिन् विकल्पे अफित्वा अंफित्वेति असत्यपि नोपधग्रहणे सर्वत्रास्मिन् विकल्पे प्रवृत्ते यदिदमेव रूपत्रयं भवति। अंतग्रहणं ज्ञापनार्थं पक्षांतरेण।

॥ ॥नोपधात्थफान्ताद्वा॥ ॥निष्ठेति निवृत्तं नकारोपधाद्धातोः थकारान्तात् फकारान्ताच्च परः क्त्वाप्रत्ययः सेड्वा न किद्भवति। ग्रथित्वा
। ग्रंथित्वा। श्रथित्वा। श्रंथित्वा। गुफित्वा। गुंफित्वा। नोपधादिति किं। रेफित्वा। गोफित्वा। थफान्तादिति किं। स्रंसित्वा। ध्वंसित्वा॥ ॥वंचिलुं
ञ्च्यृतश्च॥ ॥वंचि। लुंचि। ऋत। इत्येतेभ्यः परः क्त्वाप्रत्ययः सेड्वा न किद्भवति। वचित्वा। वंचित्वा। लुचित्वा। लुंचित्वा। ऋतित्वा। अर्तित्वा।
ऋतेरीयङार्धधातुके विकल्पितः स यत्र पक्षे नास्ति तत्रेदमुदाहरणं। सेडित्येव। वक्त्वा॥ ॥तृषिमृषिकृशेः काश्यपस्य॥ ॥न क्त्वा से
डिति प्रतिषेधे प्राप्ते कित्त्वं विकल्प्यते। तृषि। मृषि। कृशि। इत्येतेभ्यः परः क्त्वाप्रत्ययः सेट् काश्यपस्याचार्यस्य मतेन वा न किद्भवति। तृ
षित्वा। तर्षित्वा। मृषित्वा। मर्षित्वा। कृशित्वा। कर्शित्वा। काश्यपग्रहणं पूजार्थं वेत्येव हि वर्तते॥ ॥रलो व्युपधाद्धलादेः संश्च॥ ॥
वेति वर्तते। सेडिति च। उश्च इश्च्वी। वी उपधे यस्य स व्युपधः। उकारोपधादिकारोपधाच्च धातोः रलन्ताद्धलादेः परः संश्च क्त्वा च सेटौ वा
कितौ भवतः। द्युतित्वा। द्योतित्वा। दिद्युतिषते। दिद्योतिषते। लिखित्वा। लेखित्वा। लिलिखिषति। लिलेखिषति। रल इति किं। देवित्वा। दि
देविषति। व्युपधादिति किं। वर्त्तित्वा। विवर्त्तिषते। हलादेरिति किं। एषित्वा। एषिषिषति। सेडित्येव। भुक्त्वा।

सिन्न्यकारस्योतदंत विधिर्न भवतीति तेनोत्तरस्य रेफस्य न तृतीयानुर्गृह्यते न त्वृदन्तः॥ ॥वंचि॥ ॥वंचु गतौ भौवादिकः वंचु प्रलंभने चुरादिः सोपि गृह्यते अनित्यण्णं
तात् चुरादयः इति। लुंच अपनये। ऋतिः सौत्रो धातुः ऋतेरीयङ् इति सम्बद्धणायां वर्त्तते॥ ॥तृषिमृषि॥ ॥ञितृषा पिपासायां॥ मृष तितिक्षायां। कृश तनूकरणे
काश्यपग्रहणं पूजार्थमिति। काश्यपस्येतद्विषयं विज्ञानं नान्येषामित्यसाधारणज्ञानोऽयं न भाचार्यस्य पूजा द्वारेण शास्त्रस्यापि पारंपर्य प्रतिपादनेन प्रामाण्यप्रति
पादनात् पूजा भवति॥ ॥रलो व्युपधा॥ ॥क्त्वाप्रत्ययस्य न क्त्वा सेडिति कित्त्वप्रतिषिद्धे सनो प्यकित्त्वे स्यात् तः सिद्ध उभयत्र विधिमुखेनेदं प्रवर्तत इत्याह। वा कितौ भवत इ

© Dharmartha Trust J&K. Digitized by eGangotri

॥ऊकालोग्रस्व॥ ॥ऊकालोपस्यस ऊकालः। तपरस्तत्कालस्येति वन्निर्देशः समर्थनीयः। एतच्च संज्ञिनो विशेषणं। तत्र च ऊ इत्येकस्यैव शब्दस्योच्चारणाद्विशेषणस्यैक
त्वात्संज्ञाप्येकैवेति पश्चाद्रूपेण तत्संज्ञा ह्रस्व इति त्रयाणामित्यादि। प्रश्लेषणं प्रदर्शितं तेन निर्देशः प्रश्लिष्टनिर्देशः तेन विशेषणत्रयपरिच्छिन्नास्त्रयः संज्ञिन इत्यर्थः।
प्रश्लेषणे प्रमाणमाह। ह्रस्वेति। ह्रस्वदीर्घप्लुत इति न तावदेकासंज्ञायोगेऽवादं नाहं तेषु अतत्त्विसृणां संज्ञानां द्वंद्वोयं न चैकस्यानेकसंज्ञाकरणे प्रयोजनमस्ति।
लुगादिसंज्ञास्वपि तद्भावितत्वेन प्रसङ्ग्यादर्शनस्सम्भेदऽप्याश्रितः प्रकारान्तरासंभवात्। इह तु निर्देश एव त्रयाणां संभवति तस्मात्संज्ञानां त्रित्वात् संज्ञिनामपि त्रित्व
मनुमीयत इति भावः। बहुवचननिर्देशार्थमेकवद्भाव इत्युक्तं समाहारद्वन्द्व इत्यर्थः। स नपुंसकमिति तेन तु न भवतीत्याह पुंलिङ्ग इति सौत्र इति भावः। प्रश्लेषेकममाह ऊ
ऊ इत्येवं काल इति। उकारादीनां परिच्छेदकोऽयः कालो निमेषादिः तत्काल इत्यर्थः। कुतः पुनरवसितं एष एव क्रम इति। आदौ मध्ये चान्त्रिमात्रे प्लुताश्रयः प्रकृति

।ऊकालोच् ह्रस्वदीर्घप्लुतः॥ ॥उ इति त्रयाणामयं मात्रिक द्विमात्रिक त्रिमात्रिकाणां प्रश्लेषनिर्देशः ह्रस्वदीर्घप्लुत इति द्वंद्वै
कवद्भावे पुंल्लिंगनिर्देशः उ ऊ ऊ३ इत्येवंकालोच् यथाक्रमं ह्रस्वदीर्घप्लुत इत्येवं संज्ञो भवति।उकालो ह्रस्वः।दधि मधु।ऊकालो
दीर्घः।कुमारी गौरी।ऊकालः प्लुतः।देवदत्ता३ अत्र न्वसि॥ १० ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

भावः प्राप्नोति तथा मध्ये ते वा मात्रिके ह्रस्वे दीर्घे सेत द्वा ध्येते ति चेन्न। अनेन हि प्लुतसंज्ञा न तथा चादौ मध्ये वा य दित्तस्य त्रिमात्रस्य प्लुतसंज्ञैव न कुतः प्रकृतिभावः।
यदि च मात्रिको मध्येऽन्ते वा स्यात् ह्रस्वसंज्ञैव न स्यात् कुतो घिसंज्ञाकृतं तत्राऽपूर्वनिपातः। एवं तर्हि ज्ञापकास्ति द्वंयद्द्वयं विभाषा एष प्रतिवचने हेरितिहेः प्लुतं
ज्ञापितत्वात् ज्ञापयति नान्ते मात्रिक इति। कथं यो नेत्र प्लुतः प्लुतस्य प्लुतवचनमनर्थकं। अनंतरस्तमप्लुतार्थमेतस्यादिति चेत् न तन्हि प्लुतांगतो परिभाषावाध्या
म च्च प्लुपि चेति दीर्घत्वं ज्ञापितं न ह्रस्वं ज्ञापयति न मध्ये मात्रिक इति कथं यो मध्ये स दीर्घः दीर्घस्य दीर्घवचनमनर्थकं। यच्च तु माध्या दान र्सोमः प्लुतं ज्ञापितं दत्ता
पयति द्विमात्रिको नास इति कथं यो नेत्र स प्लुतः प्लुतस्य प्लुतवचनमनर्थकं। दधि मधु इति रूपोदाहरणे। कुमारीत्यादि कार्योदाहरणं हल्ङ्याब्भ्य इति दीर्घाश्रयः सुलो
पो भवति॥ देवदत्ता३ अत्र न्वसीति। अनंत्यस्यापि प्रश्नाख्यानयोरिति प्लुतः देवदत्त त्वमत्र भवसीति प्रश्नः नु शब्दः प्रश्नं द्योतयति। देवदत्त शब्दात् सम्बोधने सम्बुद्धौ

© Dharmartha Trust J&K. Digitized by eGangotri

।।उकारोऽयमणानेन द्विमात्रयोरपि ग्रहणात् ह्रस्वसंज्ञाप्राप्नोति न चदीर्घप्लुतसंज्ञाभ्यां बाधः एकसंज्ञाधिकारादन्यत्र संज्ञानां समावेशाभ्युपगमात् अत आह कालग्रहणमिति। कालग्रहणं तावदुकारादिभिः प्रत्येकमभिसंबध्यते। उकाल इत्यस्मिंश्चाके समस्तपि सवर्णग्रहणे कालशब्दस्य न पुनः प्रत्येकपरिसमाप्तिर्युज्यते कुतः एकस्यैव श्रुतत्वात् द्विमात्र त्रिमात्रे हि संज्ञित्वेन प्रतीयेते न तु सा त्रादुमाणिते। एवं चैकत्वाद् द्वन्द्वो हि हेः एक एव संज्ञी तत्रैकस्य विरुद्धकालद्वयासंभवेन सवर्णग्रहणाभावात्प्लुतएवोकारः कालविशेषणमिति कालग्रहणं संज्ञिनः परिमाणार्थं। यद्यउ अ जितिसेव कालार्थो लभ्यते कथं उकारादयो ह्रस्वं न अभिचरन्तीति ना ह्रस्वेन ते विशेष्यन्ते अपि तु तेरचनया आत्रणोकारादित्वमुपपद्यत इति सामानाधिकरण्यान्यथानुपपत्त्या तत्तद्दृशाश्चः प्रतिपत्तिः तत्र च स्थानसाम्यमसंभवान्न गृह्यते प्रयत्नसाम्यं वाभिचारादिति कालसाम्यमेव गृह्यते नार्थः कालग्रहणेन तत्क्रियते आयमाणे नैव कालं विशेषयितुमिति कालग्रहणं परिमाणार्थं। आलूयेति। ह्रस्वा अपत्यकुद् भवति।

।।कालग्रहणं परिमाणार्थं। दीर्घप्लुतयोः ह्रस्वसंज्ञा माभूत्। आलूय। ह्रस्वस्यपिति कृति तुगिति तुङ् भवति।। अज्ग्रहणं संयोगावसमुदायनिवृत्त्यर्थं। प्रतत्क्ष्य। प्ररक्ष्य। ह्रस्वाश्रयस्तुग्माभूत्। तितउ छत्रं। दीर्घान्तसदृशं तितउ इति विभाषानुग्माभूत्। ह्रस्वदीर्घप्लुतप्रदेशाः ह्रस्वो नपुंसके प्रातिपदिकस्य। अकृत्सार्वधातुकयोर्दीर्घः। वाक्यस्य टेः प्लुत उदात्तः।। ।।अचश्च।। ।।परिभाषेयं स्थानिनियमार्था। ह्रस्वदीर्घप्लुताः स्वसंज्ञया शिष्यमाणा अच एव स्थाने वेदितव्याः। वृक्ष इति। ह्रस्वो नपुंसके प्रातिपदिकस्य। रै। अतिरि। नौ। अतिनु। गौ। उपगु। अचः इति किं। सुवाक् ब्राह्मणकुलं। अकृत्सार्वधातुकयोर्दीर्घः। चीयते। श्रूयते। अच इति किं। भिद्यते। छिद्यते। वाक्यस्य टेः प्लुत उदात्तः। देवदत्ता३ यज्ञदत्ता३ अच इति किं। अग्निचि३त्। सोमस्तु३त्। तकारस्य माभूत्। संज्ञया विधाने नियमः।।

तितउच्छत्रमिति अयमज्ग्रहणेन समुदायस्य प्रत्येकवर्णकालसंकलनया द्विमात्रत्वाद्दीर्घसंज्ञाप्रसङ्गः यस्मान्मध्ये ईमात्राकालः सवर्णकालो न भवतीति समुदायस्य द्विमात्रत्वं नास्तीति स्यादेव प्रसङ्गः अज्ग्रहणे तु न भवति अच समुदायस्याजत्वात् यद्यपि वर्णग्रहणे जातिग्रहणं स्यात् जातिरेकैकस्मिन् परिसमाप्यते न समुदाय इत्यतो न दीर्घसंज्ञाप्रसङ्गः अभावात् दीर्घान्तसदृशं तितउ इति तुग्विकल्पो न भवति नवसमयपि विकल्पेन तेन मुक्ते ह्रस्वाश्रयस्तुगलभ्यते समुदायस्य ग्रहणे तु न भवति कार्यमारभ्यमाणे अवयवानां स्वकार्यप्रसङ्गाभावात्।। ।।अचश्च।। ।।ह्रस्वोऽगुणवृद्धी इत्यनेन समानमिदं। स्वसंज्ञया विधाने नियमार्थमित्यत्र युक्तिमाह।। ।। ।।छ छ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ २१

८१

अजितिवर्त्तत इति । ततश्च ह्रस्वादिशब्दा इहानुवर्त्तमाना अचमुपस्थापयन्ति न स्वरूपमुपस्थानाय इति स्वरूपपदार्थका आश्रीयन्ते तेन ह्रस्वइत्येवं योऽच् विधीयते सोऽचः स्थाने भवतीत्ययमर्थः संपद्यते एवं दीर्घप्लुतयोः । द्यौरित्यादि । दिव औत् पश्चिमण्णूपमुत्तामात् तस्य द्यौ दीनामः ॥ दिव उ इति उकारादयो न संज्ञयाविधीयन्ते इति हलएव स्थाने भवन्ति ॥ उच्चैरुदात्तः ॥ ॥ ननु उदात्तादयः शब्दा लोकवेदयोः प्रसिद्धा एव तत् किं संज्ञाकरणेन तत्राह उदात्तादिशब्दा इत्यादि । सत्यं प्रसिद्धा एव ते कुत्र प्रसिद्धाः धर्ममात्रे स्वरे न तु तद्वत्य वितत श्चोदात्तादनुदात्तस्य स्वरित इति स्वरितोऽव्यवस्थधर्मस्यैव विधिः स्यात् । न च धर्मधर्मिणोः स्थानादेशभावः संभवतीति षष्ठी स्थानेयोगेत्यस्या अनुपस्थानात् तदंशाभूत्तस्मादित्युत्तरस्येत्येतदपि न प्रवर्त्तेत इति शब्दस्थाप्यत्र स्वरितप्रसंगः । स्यादेतत् यथा क्षेपरोलरस्त त्रकारस्य रेफस्य लकारस्य लकारो विहिते कृतस्य वर्णस्य कृतत्व एव वर्णो भवति तद्वदिहापि धर्म्मिणोरेवस्थानादेशभावो भविष्यतीति । युक्तं तत्र रेफलकारयोः कालकारयोरम् भूतो न तथा वर्त्तते एतानु चारयितुं शक्यो इह त्वदात्तादिकम्

॥ अजितिवर्त्तते । इह मा भूत् । घोः पन्थाः । सः । धुमान् धुभिः । अत्र नियमो मा भूत् ॥ ॥ उच्चैरुदात्तः ॥ ॥ अजितिवर्त्तते । उदात्तादिशब्दाः स्वरवर्णधर्म्मे लोकवेदयोः प्रसिद्धा एव तदिह तद्गुणोऽच् परिभाष्यते । उच्चैरुपलभ्यमानो यो ऽच् स उदात्तसंज्ञो भवति ११

तरेणापि अचमुच्चारयितुं शक्यं इहं षष्ठभाषणामितिधर्ममात्रमेव विज्ञः स्यात् । नन्वेवं स्थिते स्यान्मपि धर्म्मिएवेति युक्तएव परिभाषा आपारः सत्यं वर्णमात्रधर्मोपमुदात्तादि रिति आमोह निवर्त्तनेनाचामेवायं धर्मो न हलामिति दर्शयितुमिदमारब्धं । अत एव वर्णधर्म इति सामान्येनोक्तं । तद्गुणोऽचीति । स उदात्तादिर्गुणो यस्य एतेन वस्तुतो वर्णधर्मत्व मुदात्तादेर्दर्शितं । तथा हि । अन्तरेणापि हलं अच एव धर्म्मो दृश्यते आतेपितमरुत्तां सुम्नमेतुपयामाकारस्य । नान्तरेणाचं व्यंजनस्योच्चारणमपि भवति कुत एव स्वरः । यदि वहलामप्येते गुणाः ततो हलामचां च एष स्वरो यदुपलभ्येत यत्र खल्वचामेव स्वरमनुविदधति हलस्ततो निश्चीयते अजुच्चारणादेषु स्वरप्रतिभासो न स्वतर इति अनुपपन्नाश्चएवं पंसनिधानेपि परेणैव भवति न पर्वेण । फीभाष्यं तर इति । कोविदा ह्युः प्रदेशे लोकप्रसिद्ध्या हलामचां च ग्रहणे प्राप्ते अचामेव ग्रहणं निष्पत्त इति परिभाष्यमिति । अस्मेतु धर्मिणः प्रसिद्धत्वात् संज्ञात्वेन परिभाष्येत इत्याचक्षते । उच्चैरित्यस्याधिकरणप्रधानत्वात् क्रियापेक्षत्वाच्चाधिकरणस्योपलभ्यमा

नइत्युक्तं ॥ ११ ॥ ॥

ग्रा॰ सं॰

८१

© Dharmartha Trust J&K. Digitized by eGangotri

।श्रुतिप्रकर्षो न गृह्यते। परिगृह्यते तु यांशुप्रयोगेन स्पष्टितस्यासिः श्रुतिप्रकर्षस्य चानवच्छिन्नत्वात् देवं कश्चित्प्रयुङ्क्ते देवं चित्प्रतिनिवेशीति सर्वमुदात्तं स्यात् सर्वं चानु
दात्तमित्यसतिव्याप्तिः अव्यवस्था च स्यात् इति भावः। स्थानकृतमित्यादि। उच्चता नाम प्रयत्नविशेषः ऊर्ध्वतापर्यायः तत्र ताल्वादिषु बंधो वर्णा नामं तत्र गाः इति स्थानसंबन्धि
मुच्चतारूप्यते तत्कृतमुच्चत्वं संज्ञिनो विशेषणं। ननु एवमुच्चैरुपलभ्यमान इति ताल्वादिस्थानं हन्ति रुच्चैः शब्दो दर्शितः इह तु उच्चैः स्थाननिष्पन्नत्वात् अर्जनेनोच्चैरित्यु
च्यत इति उक्ति विरोधः नपुंसकस्य रार्थ उक्तः इह तु उच्चत्वं स्थानाख्यातः। ननु चोच्चैः स्थाने उपलभ्यमान इत्याश्रितेऽपि प्राप्नुवन्ति पुरुषोच्चारितोऽनुदात्तोऽप्युदात्तः स्यात् वामन
पुरुषोच्चारितस्तूदात्तोऽप्यनुदात्तः स्यात् तत्रोच्यते उच्चत्वनीचत्वयोगात् अत आह ताल्वादिषु हीति। ताल्वादीनि स्थानानि भागवन्ति भागाश्चोत्तराधर्येण ॥

॥उच्चैरिति च श्रुतिप्रकर्षो न गृह्यते। उच्चैर्भाषते। उच्चैः पठतीति किं तर्हि स्थानकृतमुच्चत्वं संज्ञिनो विशेषणं ताल्वादिषु
हि भागवत्सु स्थानेषु वर्णा निष्पद्यन्ते। तत्र यः समाने स्थाने ऊर्ध्वभागनिष्पन्नः अच् स उदात्तसंज्ञो भवति। यस्मिन्नुच्चार्यमाणे गात्रा
णाम् आयामो निग्रहो भवति। रूक्षता अस्निग्धता स्वरस्य संवृतता कण्ठविवरस्य। ये ते के उदात्तप्रदेशाः आद्युदात्तश्चेत्येवमादयः॥
॥नीचैरनुदात्तः॥ ॥अज् इति वर्तते। नीचैरुपलभ्यमानो यो च स अनुदात्तसंज्ञो भवति। समाने स्थाने नीचभागनिष्पन्नः अ
च् अनुदात्तः। यस्मिन्नुच्चार्यमाणे गात्राणाम् अन्ववसर्गो भवति मार्दवं स्वरस्य मृदुता स्निग्धता कण्ठविवरस्य उरुता महत्ता। त्वाम
मा हिमा नेमे। त्यनुच्चानि। नमस्ते रुद्र नीलकण्ठ सहस्राक्ष। अनुदात्तप्रदेशाः अनुदात्तौ सुप्पितावित्येवमादयः॥

पिताः। तत्र यः समान इति। एक इत्यर्थः। पर्यायोऽयं समानशब्दः तेनायमर्थः। एकस्मिंस्ताल्वादिके स्थाने ऊर्ध्वाधरभागयुक्ते ऊर्ध्वभागेनोच्चार्यमाणोऽनुदात्तसंज्ञो भवति ए
वं वो नीचैरित्यस्योर्ध्वभाग इत्यर्थः सर्वस्यापमर्थो लोकप्रसिद्धो वलभ्यते सूत्रं नुव्यामो हन्निदृत्यर्थः। ऊर्ध्वभागनिष्पन्ने रप्रयत्नत्वात् तन्निश्चयो लिङ्गो मा हमस्मि
न्निति। आयाम इत्यस्य विवरणं निग्रह इति वृत्ता इह तेनस्य विवरणं अस्निग्धतेति संवृतता इति अणुता। अत एव वायुः शनैर्निष्क्रामन् गलावयवान् छोषयती। तिस्व
रस्य रूक्षता भवति। येते के इति यत्र क्लिभ्योऽन्ममित्यदाद्यत्वं जसः शीश्राकुम्भाः एकादेश उदात्तेनोदात्तः॥ ॥नीचैरनु॥ ॥अजिति वर्तत इति। तेन हल
न्स्य धर्मेणानुदात्तसंज्ञो न भवति। अन्ववसर्ग इत्यस्य विवरणं मार्दवमिति। शैथिल्यमित्यर्थः। मृदुतेत्यस्य स्निग्धतेति। उरुतेत्यस्य महत्तेति। महत्त्वादेव वशीघ्रं

अनुदात्तानीति सर्वादात्तेवमेवगणात्। किं षितु सिमस्याथर्वणोऽप्युक्तं न उदात्तः स्यात् अनाथर्वणोऽपि तु छन्दसि तोदात्तत्वं दृश्यते आद्युदात्तो वा सत्त्वनुते सिमसे उच्छुत्रमक
मज्जते सिमस्मादिति। नेमयाचेकवचनस्येत्यत्रानुदात्तत्वं दृश्यते पविस्मिताधिकारात्तेऽशब्दोऽनुदात्तः रुद्रादयो यामं न्निति निघातेनापद्मकाले वानुदात्तस्य श्रवणं संहितायांतु स्व
रितात्संहितायामित्येकश्रुतत्वं भवति। समाहारः स्वरितः॥ ॥सामर्थ्याच्चात्रेति। पारिभाषिकयोरुदात्तानुदात्तयोः स्वयोः समाहाररूपस्याचः क्वचिदप्यसंभवः सा

अनुदात्तप्रदेशाः अनुदात्तौ सुप्पितावित्येवमादयः॥ ॥समाहारः स्वरितः॥ ॥अजितिवर्त्तते। उदात्तानुदा
त्तस्वरसमाहारो योऽच् स स्वरितसंज्ञो भवति। सामर्थ्याच्चात्र लोकवेदयोः प्रसिद्धावेव वर्णधर्मावुदात्तानुदात्तौ गृह्ये
ते नाचौ। तौ समाह्रियेते यस्मिन्नचि तस्य स्वरित इत्येषा संज्ञा विधीयते। शिक्यं। कन्या। सामन्यः। क्व। स्वरितप्रदेशाः ति
स्वरितमित्येवमादयः॥ १२ ॥ ॥ श्री ॥ ॥ श्रीः॥ ॥ छ छ॥ ॥

मर्थ्यं। ननु च समाहरणं समाहारो विप्रकीर्णानामेकत्राशीकरणं एकधर्मियोगो वा यथा पंचपूली पस्सा गरीदृष्टेति॥ तत्र पूर्वो मूर्त्तानामेव उत्तरस्त्वेकध
र्मियोऽपि संभवति किं उभयथा सामानाधिकरण्येन घटेन हि वह्नि वह्निर्धर्मयोरुदात्तानुदात्तयोः समुदायरूपः कश्चिद्धर्मो भवतीष न च आहतो समाह्रियेते यस्मि
न्नचीति। नानेनाधिकरणसाधनत्वं समाहारशब्दस्य दर्शितं न तत्र हि करणाधिकरणयोश्चेति ल्युट् भवितव्यं। वासरूपविधिश्च नास्ति कृद्भ्युन स्त्र्यर्थे पु
वासरूपविधिर्नास्तीति वचनात् तस्मादर्थकथनमात्रमेतत् सामानाधिकरण्ये त्वइत्यादिलाट्चप्रत्ययांतत्वेन समर्थनीये। शिक्यं कन्येति। शिल्पिशिक्षा
कारूपर्यं धान्यकम्मारा जनममनुष्याणामनन्तरूतिफिटूस्त्रेणांतस्वरितत्वं। सामन्यसुति। साम सु साधुः मन्त्र साधुरितियन्तरितित्स्वरितत्वं। क्वेति। किमोत्। क्वाति

॥१२॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥तस्यादित॥ ॥आदौ आदितः सप्तम्यर्थात्तसिः। अर्धह्रस्वमिति। अर्धं नपुंसकमिति समासः ह्रस्वशब्द उभयलिङ्गः ह्रस्वो नपुंसके ह्रस्वं लघीति तदिह परवल्लिंग-
त्वेन नपुंसकत्वं। अर्धमात्रोपलक्ष्यते। इह समाहारस्वरितस्य विभागारम्भाने सिद्धे तस्येति वचनं स्वरितमात्रपरिग्रहार्थं। यदि वा ईषद्ग्रहणमर्द्धमात्रापरिमाणस्या-
थो ह्रस्वसंज्ञा कृतेऽपि त्रैव ह्रस्वः तत्रैव तस्यादि मिति दीर्घप्लुतयोरेतद्विभागवचनं न स्यादित्याशंक्याह अर्धह्रस्वमिति चेत्स्यादिति। ह्रस्वस्य हि मात्रा भवति अतो ईषद्ह्रस्वग्र-
हणेनार्धमात्रोपलक्षणं ततः स्वरितमात्रपरिग्रहोऽर्थवान्भवति। ह्रस्वग्रहणमतन्त्रमिति। अप्रधानमुपलक्षणत्वात् यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकाः। न चे-

॥ ॥तस्यादित उदात्तमर्धह्रस्वं॥ ॥उदात्तानुदात्तस्वरसमाहारः स्वरित इत्युक्तं। तत्र न ज्ञायते कस्मिन्नंशे उदात्तः कस्मिन्ननुदा-
त्तः कियान्वा उदात्तः कियान्वा अनुदात्त इति तदुभयमाख्यायते। तस्य स्वरितस्य आदावर्धह्रस्वं उदात्तं। परिशिष्टमनुदात्तं। अर्धह्र-
स्वमिति चार्धमात्रोपलक्ष्यते। ह्रस्वग्रहणमतन्त्रं। सर्वेषामेव ह्रस्वदीर्घप्लुतानां स्वरितानामेष स्वरविभागः। शिक्यमित्यत्रार्धमात्रादि-
त उदात्तार्धमात्रानुदात्ता। एकश्रुतिर्वा। कन्या इत्यत्रार्धमात्रा आदित उदात्ता अध्यर्धमात्रानुदात्ता। माणवका३ माणवकेत्यत्रा-
र्धमात्रा आदित उदात्ता अर्धतृतीयमात्रा अनुदात्ता॥ ॥ ॥

वं यथा शिक्यमिति स्वरितस्य विभागो न सिध्यतीति स्यादित्वात् नैष दोषः इत आरभ्य नवसूत्राणि शिक्षासिद्धं कंडे उदात्तादनुदात्तस्येत्यस्मात्पराणि पठितव्यानि किं
प्रयोजनं इदं तावद्विभागाख्यानमाशिक्यमिकस्यापि भवति उत्तरत्रापि प्रयोजनं तत्र तत्र वक्ष्यामः। एकश्रुतिर्वेति। उदात्तभागस्य पटुत्वादपटुत्वकृतो विकल्पः षष्ठ-
त्वे हि तदुपरागान्नरूपतामित्यनुदात्तो नानुदात्तव्यपदेशमर्हतीति नाप्युदात्तव्यपदेशं उपरागमात्रत्वात् तेन भेदतिरोधानलक्षणमैकश्रुत्यं परो भागः प्रतिपद्यते।
अन्वर्थं वा एकश्रुतित्वं पूर्वभागश्रुतेरेकात्म्यभिन्ना काणश्रुतिरस्येति कृत्वा। अध्यर्धमात्रानुदात्तेति। एकश्रुतिर्वेति नोक्तं पूर्वमनुसारेणागम्यमानत्वात्।
लघुनावामहत्तोनुपरागात्। माणवका माणवकेति। स्वरितमात्रे इति तेषु सेति प्लुतः स्वरितः॥ ॥ ॥छ छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥एकश्रु॥ ॥इह यद्यप्यामंत्रितान्तस्य पदस्याप्यभिमुखीकरणं प्रतिसामर्थ्यं तथाप्यर्थविशेषस्य निर्दे नुष्ठेयत पा संबोधनात्संबुद्धिः अन्तर्भावितण्यर्थो बुधिर्गत
या च संबोधयतीत्येनेति णिच् प्रयुक्तः। नत्र वा बाधा स्ये नकरणाभावो न पदस्येति मिलाहा एकश्रुति वाक्यं भवतीति। कुतः पुनरस्त्वाशिमतं आह दूरादिति। संबोधनं संबु
द्धिरिति अनेनान्वर्थस्य संबुद्धिशब्दस्य ग्रहणं न पारिभाषिकस्येति दर्शयति। पारिभाषिकस्य हि ग्रहणे ऐवान्नाह्वाणे स्यत्र न स्यात्। अन्वर्थग्रहणं च दूरादित्य
नेन संबंधाल्लभ्यते न सामंत्रिते कथं च नस्य दूरत्वमदूरत्वं वा संभवति। संबोधनस्य तु क्रियारूपत्वात् अपादानेनया दूरादिति विशेषणासंभवाद्दूरत्वं वचनदेश
स्य दूरत्वं न माश्रीयते अनवस्थितत्वात् किंतु संबोधनक्रियापेक्षया पावति देशे प्राकृतप्रयत्नो च्चारितं संबोध्यमानेन न श्रूयते किं त्वधिकं प्रयत्नमपेक्षते

॥एकश्रुति दूरात्संबुद्धौ॥ ॥त्रैस्वर्येण पठितानां प्राप्ते दूरात्संबुद्धावैकश्रुत्यं विधीयते। एका श्रुतिर्यस्य तदिदमेकश्रुति। एकश्रुति वाक्यं
भवति। दूरात्संबोधयति येन तत्संबोधनं संबुद्धिः नैकवचनं संबुद्धिः। स्वराणामुदात्तादीनामविभागो भेदतिरोधानमेकश्रुतिः आग
च्छ भो माणवक देवदत्त३। दूरादिति किं। आगच्छ भो माणवक देवदत्त॥ १३ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

न संबुद्धो दूरे भवति। स्वराणामित्यादि एकश्रुतिः स्वरूपाख्यानं भेदतिरोधानमित्यनन्तरोक्तस्यैव विवरणं आगच्छ भो इत्यादि दूराद्धूते चाकस्मादिति प्लुत उदात्तः प्र
शिष्टमेकश्रुतिः। ननु च प्लुतैकश्रुत्योर्द्वयोरपि दूरात्संबोधनं योगमिति फले का द्विकल्पो युक्तः कथं समावेशः। उभयं तेवाक्यमेव प्रतिपादकत्वात् संबुद्धेः कारणं
प्लुतैकश्रुतीत स्यैव संज्ञा मात्रं यथा विषयग्रहणे चक्षुष उन्मीलनादि तत्कुतः समानफलत्वमिति। वाक्यापेक्षया च समावेशः अंत्यापेक्षया तु बाधक
बाधकभाव एव। प्रत्युदाहरणे त्रैस्वर्यमेव भवति तत्राङ् उपसर्गोऽभिव्याप्तिमित्याथ उदात्तः गच्छतीति तिङ् तस्य तिङ् तिङ इति निघातः भो इति निपाता अघुदा

यज्ञकर्म्मणि ॥ ॥ एकचक्रमिति बहुव्रीहेर्विग्रहः एकमप्रतिहतं चक्रं यस्य स एकचक्रः ॥ यज्ञकर्माण्येव ऋत्विजां चक्रं रथाङ्गमिव । संपाठ इति । स्वाध्यायकाले । अग्निर्मूर्धा दिवः क
कुत्पतिरिति मन्त्रे निर्लोपश्च अग्निशब्दः प्रातिपदिकस्वरेणान्तोदात्तः मूर्धन् शब्दः कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः इति कनिन्प्रत्ययान्तः श्वन्नुक्षन्पूषन्निति सूत्रेण मूर्धन् शब्दः कनिन्प्रत्ययान्त
तो न्तोदात्तो निपातिताः । दिवु क्रीडादौ दिवेर्डिवः षष्ठ्येकवचनस्य ङसि इति सुदात्तत्वं ककुत् शब्दः प्रातिपदिकस्वरेणान्तोदात्तः पातेर्डतिः पति
शब्दः प्रत्ययस्वरेणाद्युदात्तः प्रथेः षिवन् संप्रसारणं च पृथिवी षष्ठ्येकवचनस्योदात्तयणो हल्पूर्वादिति सुदात्तत्वं रेतस् शब्दः प्रातिपदिकस्वरेणान्तोदा
त्तः आप्नोतेः क्विप् ह्रस्वश्च उदित्यसिति विभक्तेः उदात्तत्वं रेतसि इति इन्नुडभावश्चेति असुन्प्रत्ययः नित्स्वरेणाद्युदात्तो रेतः शब्दः जिन्वति जिन्वतेः प्रीणन

॥ ॥ यज्ञकर्म्मण्यजपन्संपाठे वा ममसु ॥ ॥ ये सर्वेण वेदे मन्त्राः पठ्यन्ते तेषां यज्ञक्रियायां प्रयोगे प्राप्ते एकश्रुतिर्विधी
यते । अजपन्यूङ्खसामानि वर्ज्जयित्वा यज्ञकर्मणि मन्त्राणामेकश्रुतिर्भवति । अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं अपां
रेतांसि जिन्वति ॥ यज्ञकर्मणीति किं । संपाठे मा भूत् । अजप इति किं मम आग्ने वर्चो विहवेष्वस्तु । जपोऽनुकरणमन्त्रः उपांशु
प्रयोगः । अन्यूङ्खेष्विति किं ॥ ॥ श्रीः ॥ ॥

यस्य स्तीति पि निपातः प्रणवश्चेति प्रयोगकाले प्रणवः । मम सति पुष्मदस्मदोर्ङसि सीत्याद्युदात्तत्वं अग्नेः शब्दस्य आमन्त्रितनिघातः वर्चः शब्दो सुन्प्रत्ययान्तः विहू
यन्ते ह्वयतेः ह्वयतेर्द्धः संप्रसारणं चोपसर्ग प्रत्यये यथाधारं इति सूत्रेणान्तोदात्तत्वं । जपोऽनुकरणमन्त्र इति । यद्यपि स एव मन्त्र उच्चार्यते तथापि वर्णाभिव्यक्तेरभि
व्यक्त्यभावे परिकल्पनया अनुकरणव्यवहारः अत एवाह उपांशुप्रयोग इति । यथा जले निमग्नस्य पाठः । क्वचित् करणमन्त्र इति पाठः अनेनेदं कुर्या
दिति चोदितः करणमन्त्रः ततोऽनोकरणमन्त्रः । प्रसिद्धस्तु पाठः अतः करणमन्त्र इति । ननु वागिन्द्रियेण शब्द उच्चार्यते स कथं अतः करणेन सर्वेन्द्रियाधार
त्वेन प्रतिपद्यते ॥ सत्यं वागिन्द्रियस्याबलोपादान उपांशुप्रयोगे नास्ति स एव चतत्र्यापमलेन प्रसिद्ध इति मनस्य व्यापारो मन एव प्रधानं मन्यते ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्वरास्सामानि षोडशेति पाठः उकारा इति च। नत्वेते मकारान्ताः तेषु प्रथमसप्तम त्रयोदशास्त्रय उदात्तास्त्रिमात्राः इतरे त्रयोदशानुदात्ताः अर्द्धैकाराः एवमाश्वलायनेन चतुर्थे
नोक्तम्। न खलु उकारेण हलन्तेन रूपमुदाहृतं। न च। यतो कारा इति पाठे मूलान्तरं मृग्यं। एवि श्वमित्रादि। एतान्यौगीति प्रत्ययाः। निपातनं स्यात् विश्वशब्दः कर्मप्रत्यान्त आद्युदात्तः। ति
श्व प्रमत्रिणो पाप्मानं संदेह इति सम्बन्धः। गीति विशाख मा दृग्विनेकमात्रः। वाक्यविशेषस्य गीतय इति। तदुक्तम् पिलिंगागीतिषु सामाख्येति॥ ॥उच्चैस्तरां॥ ॥वषट्कारेण
चात्र वौषट् शब्दो लक्ष्यत इति। समानार्थत्वात् द्वावपि हि तौ देवतासंप्रदानस्य द्योतकौ। कास्यग्रहणं नुज्ञापकं अवर्णान्तस्यापि कार्यप्रत्ययो भवतीति तेन एव कारस्स्यादि इति भव
ति। यथेदमिति। लक्षणार्थो हि प्रतिपत्तिगौरवं भवतीति भावः। विचित्रा हीति। क्वचित् स्वल्पलाघवमाश्रीयते क्वचित्तु अतियत्नेन लाघवमिति वैचित्र्यं। उच्चैस्तरामिति उच्चैः श

॥स्वराः उकाराः षोडश। तेषु केचिदुदात्ताः केचिदनुदात्ताः॥ उ उ उ उ उ उ उ उ उ उ उ उ उ उ उ उ सामस्थिति किं। एवि
त्रं समभिगांदहार। सामानि वाक्यविशेषस्य गीतय उच्यन्ते। तत्रैकश्रुतिर्न भवति। उच्चैस्तरां वा वषट्कारः॥ यज्ञकर्मणि
निवर्त्तते। यज्ञकर्मणि वषट्कारः उच्चैस्तरां वा भवति एकश्रुतिर्वा। वषट् शब्देनात्र वौषट् शब्दो लक्ष्यते वौषडित्यस्यैव दे
स्वरविधानात्। यथेदं वौषड्ग्रहणमेव कस्मान्न कृतं। विचित्रा हि सूत्रस्य कृतिः पाणिनेः। सोमस्याग्ने वीही३ वौ३षट्। सोमस्या
ग्ने वीहीवौषट्॥ ॥ १४ ॥ ॥छ॥ ॥

ब्दात्तमवने वर्त्तते तत्र भवनक्रियापेक्षया प्रकर्षप्रत्ययः उदात्ततर इत्यर्थो विवक्षितः प्रकर्षश्च वौषट्शब्दे त्रयं हि प्रेष्यश्रौषड्वौषडावहानामादेरिति यः प्लुतो विहि
तः तदपेक्षया वेदितः स॥ प्लुत उदात्तः अयं तूदात्ततरः अन्तस्य देशस्येत्येके। प्लुतोदात्तस्य च विधानसामर्थ्याच्छेषनिघाताभावः अस्तित्वाद्वा। द्वयोरप्यचोरुदात्ततरो
भवतीत्येके। तदा याज्यान्तोयस्सः प्रकर्षः। स्वार्थिकस्तरविस्तम्भे। तत्रोदात्तमात्रं प्रथमस्यासिद्धमिति द्वितीयस्याचो विधीयते। वषट्कारशब्दोयं मन्त्रब्राह्मणयोः कल्पसूत्रेषु
च वौषट्शब्दे निरूढः वषड्क्रियते नेनेति वषट्कारः। सामांप्रमतरतिमंत्रे। त्रयोदेवषट्काराः वौषडिति वषट्कारो नीति ब्राह्मणे वषट्कारोस्य सर्वत्रोच्चैस्तरां बलीयान्माज्याय
इति सूत्रेणात्रोच्चैस्तरामिति श्रुतिप्रकर्षो विधीयत इत्याहुः॥ ॥१४॥ ॥छ छ॥ ॥छ छ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥विभाषा छंदसि॥ ॥यज्ञकर्मणीत्यस्य निवृत्त्यर्थमिति। ननु पघ पंयोगो यज्ञकर्मणि स्यात् पूर्वी योगो निर्विषयः स्यात् न च जपन्यूंखसामान्यस्य विषयः। जपादिष्विति। ज्ञक
पूर्वस्य विषय इति वाच्यं। तथा हि सत्यत्रैव जपादिग्रहणं कर्तव्यं स्यात् किं छंदोग्रहणेन छंदोग्रहणात्तु छंदोमात्रे यं विकल्प इति गम्यते तेन यज्ञकर्मणः स्यात् अनुवृत्तो पूर्वो नि
र्विधिर्निर्विषयः स्यात्। एवं मन्यते ऊहमंत्राणामछंदस्त्वात्तेपूर्वयोगस्य विषय इति छंदोरूपेषु मंत्रेषु अयमेव विकल्पः। स्यादिति। यद्यूहमंत्रेषु सावकाशः पूर्वीयोगस्त
दा यज्ञकर्मणीत्यस्य विभाषा ग्रहणेन निवृत्तावपि छंदोरूपेषु न्यूहितेषु मंत्रेषु परत्वादयमेव विकल्पः प्राप्नोति। न एष दोषः यज्ञकर्मणीत्यत्र कर्म ग्रहणाद्यज्ञानुष्ठानमात्रे स
र्वत्र नित्यो विधिर्यथा स्यादित्येवमर्थं प्रयुज्यमानानां मंत्राणां भवति तथाप्यमंत्राणामेव तेषां यज्ञकर्मणि प्रयुज्यमानानां पूर्वयोगस्य विषयत्वं भवत्येव। येनु जपादिषु दासेन मंत्रा

॥विभाषा छंदसि। छंदसि विषये विभाषा एकश्रुतिर्भवति। पक्षांतरे त्रैस्वर्यमेव भवति। वेति प्रकृते विभाषा ग्रहणं यज्ञकर्मणीत्यस्य
निवृत्त्यर्थं। तेनायं स्वाध्यायकालेपि पाक्षिक एकश्रुत्यविधिर्भवति। इषे त्वोर्जे त्वा। इषे त्वोर्जे त्वा। अग्न आ याहि वीतये। अग्न
आ याहि वीतये। अग्निमीळे पुरोहितं। अग्निमीळे पुरोहितं। शन्नो देवीरभिष्टये। शन्नो देवीरभिष्टये॥ ॥श्रीः॥ ॥

र्प
णामेव तत्र ग्रहणमिच्छंति तेषां सामर्थ्यलभ्या यज्ञकर्मणीत्यस्य निवृत्तिरिति विभाषाग्रहणमनर्थकं स्यात्। इषे त्वेत्यादौ इट्। त्वं ऊर्क् वलं च तुर्थ्येकवचनस्य सावेकाचइ
त्युदात्तत्वं त्वामोद्वितीयाया इति त्वादेशोनुदात्तः। अग्न इत्यामंत्रिताद्युदात्तत्वं आ उपसर्गः। याहीति। तिङः तिङ इति। वीतय इत्यादिषु मंत्रेष्वेषय एव चेत्यादिना क्तिन्नुदात्तः।
अग्नि इत्येतोदात्तः अभिपूर्वत्वं एकादेश उदात्तेनोदात्तः ईळिइति ईड स्तुतौ लडुत्तमैकवचनं। बह्वृचाः द्वयोश्चास्य स्वरयोर्मध्यमेत्य स्थितस्य डकारस्य लकारं विदधति पुरोहितं पु
रोव्ययमितिगतिसंज्ञा गतिरनंतर इति पूर्वपदप्रकृतिस्वरः पुरः शब्दोपि प्रत्ययांतोदात्तः शं नो निपातः नमारे शोनुदात्तः देव इति पचादिषु पाठे। टित्वात् ङीप् अनु
दात्तस्य च यत्रोदात्तलोपः अभिपूर्वादिषेः क्तिनि शकंध्वादित्वात् पररूपे अभिष्टिः तादौ च निति कृत्यतौ इति पूर्वपद प्रकृतिस्वरेणाभिशब्दस्यांतोदात्तत्वं। चतुर्थ्येकवच
नं॥ ॥श्रीरामः॥ ॥६॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ानसुब्रह्मस्य ॥ सुब्रह्मण्या नाम निगद इति। अपादत्वं येन गादिवर्जितेय याग घमिति निशब्दः प्रकर्षे ऽ चैरपादत्वं धंयतु राज्ञकं पन्मंत्र वाक्यं पद्य नेस निगदः । नितरां गद्यत इतिक
र्मणि नो गदन देतप्। तस्यच सुब्रह्मण्या शब्दोपलक्षितत्वात् सुब्रह्मण्या शब्दोपरितिक्तं स्त्रीलिंग एव नाम— कारस्तितत्व रेणास्वरितइत्ति । सुब्रह्मणि साधुरितियत्प्रत्ययः
तिनस्वरेणात्स्वरितः तस्यच येकादेशः स्वरितानुदात्तयोरंतर्यति स्वरितः ततो निपातेनो दात्ते नत्रुमाङो स्पेसुदात्तस्वरितयोरेकादेशः स्वरितएव। आमंत्रितमाद्युदात्त
मिति। अष्टमिकस्वानियातोः समान वाक्यत्वान्न भवति। तस्यानेनेति। नवत स्पासिद्धत्वं उदं हिस्रिकयाम सिद्धको उउ ऋक्शर्मामिनुक्तेन एवास्मिन्नुदात्ते स्तेशेष

॥ नसुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥ सुब्रह्मण्या नाम निगदः । तत्र यज्ञकर्मणीति विभाषा छंदसीति च एक श्रुतिः प्राप्ता प्रतिषिध्यते सु
ब्रह्मण्यायामेकश्रुतिर्न भवति । यथालक्षणं प्राप्तः स्वरितस्तस्योदात्त आदेशो भवति । सुब्रह्मण्यों ३ इंद्रागच्छ हरिव आगच्छ मेधातिथेर्मे
षवृषणश्वस्य मेने गौरावस्कंदिन्नहल्यायै जार कौशिक ब्राह्मण गौतम ब्रुवाण श्वः सुत्यामागच्छ मघवन् । अत्र सुब्रह्मण्यामित्योकारः नित्त्व
रेणस्वरितः तस्योदात्तो विधीयते । इंद्र आगच्छेत्यामंत्रितमाद्युदात्तं । द्वितीयो वर्णउदात्तादनुदात्तस्य स्वरितः इति स्वरितः प्रसक्तः तस्यानेनोदा
त्तः क्रियते । द्वावप्युदात्तौ संपन्नौ । आगच्छेत्याकारउदात्तः ततः परो ऽनुदात्तः स्वरितः तस्यानेनोदात्तः क्रियते । तदेवमिदं आगच्छेति चत्वार उदा
त्ताः पश्चिम एको ऽनुदात्तः । हरिव आगच्छेत्यत्र पैवं क्रियया चत्वार उदात्ताः द्वावनुदात्तौ । मेधातिथेरित्यत्र षष्ठ्यंतं परमामंत्रितं अनुप्रविश
ति । सुबामंत्रिते पराङ्गवत्स्वरे इति ततः सकलस्यामंत्रितस्याद्युदात्तत्वे कृते द्वितीयमक्षरमनुदात्तं तस्योदात्तादनुदात्तस्य स्वरित इति स्वरितत्वे
प्राप्ते ऽस्मिन्सुदात्तत्वं विधीयते । तेन द्वावप्युदात्तौ भवतः । शेषमनुदात्तं । वृषणश्वस्य मेने इति समानं पूर्वेण । गौरावस्कंदिन्नित्यत्रैवं हे अहल्यायै
अस्सेउदात्ते शेषमनुदात्तं । अहल्यायै जारेति सुबंतस्यामंत्रितानुप्रवेशे कृते द्वावुदात्तौ शेषमनुदात्तं । कौशिक ब्राह्मणेति
मस्ते मामंत्रितमाद्युदात्तं । तत्र पूर्ववत् द्वावुदात्तौ शेषमनुदात्तं । एवं गौतम ब्रुवाणेति द्वावुदात्तौ शेषमनुदात्तं । श्वः सुत्यामागच्छ मघवन्निति
श्वः शब्द उदात्तः । सुत्यामित्यंतोदात्तः । समजनिषदेति क्यपो विधानउदात्त इति वर्तते । आगच्छेति द्वावुदात्तौ अंत्यो ऽनुदात्तः । मघवन्निति

निघातो ऽपि न भवति यथोद्देशपक्षेनुदात्तपरिभाषायां कर्त्तव्यायां असिद्धत्वेन वर्जमानाभावात् । तेनेह द्वावप्युदात्तौ संपन्नौ इति । पश्चिम एको ऽनुदात्त इति नवतस्योदात्तादनुदात्त
स्येति स्वरितप्रसंगः प्रकरणोत्कर्षेणाप्यासिद्धत्वात् तनोदात्तस्वरितोदयमिति निषेधाच्च । द्वावनुदात्तावेव इति । वकारद्धकारौ । शिष्टं स्पष्टं । असमासे पुष्यतः । एतस्मिन्नेव सुब्रह्म
ण्या निगदे प्रथमांतस्य च पदस्य तस्य चांत उदात्तो भवति । गार्ग्यो यजते दाक्षेः पिता यजते इत्यत्र स्यात् वचनं । सांतस्यो यज्ञमं च सर्वशब्दांतस्यापो यज्ञमसु यज्ञं चो भय मुदात्तं भवति ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥देवब्रह्मणोः॥ ॥स्वरितस्योदात्ते प्राप्त इति। कथं प्राप्तः यावतासिद्धः स्वरितः एवं तर्ह्येतज्ज्ञापयत्याचार्यः तस्मादित इत्यारभ्य नवसूत्री उदात्तादनुदात्तस्य स्वरित इत्यस्मात्पराद् दृश्येति
उक्तानि प्रयोजनानि उत्तरस्त्र चव स्यापि प्राप्तामान्याऽपेक्षत्वात् ज्ञापकस्य नवसूत्र्यपुनरुक्ष्यते तेन सुब्रह्मण्यायामेव। द्वयोरपि पदयोरिति। द्वितीयस्य पदस्य परस्यापि निघातो न भवति आमं
त्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानत्वात् प्रथमस्यापि न भवति भिन्नवाक्यत्वात्॥ ॥स्वरितात्। अनुदात्तानामिति जात्यो बहुवचनं तेनैकस्य द्वयोर्बहूनां च भवति एकस्यापव
ति द्वयोः आग्निविद्यः बहूनां तु प्रत्ताये वदर्शितं इममित्यन्तोदात्तमिति। इदमशब्दः। प्रातिपदिकस्वरेणान्तोदात्तः विभक्तिरनुदात्ता नामदाघत्वे आमि पूर्वः एकादेश उदात्तेनो

॥देवब्रह्मणोरनुदात्तः॥ ॥सुब्रह्मण्यायामेव देवाब्रह्माणाऽइति पठ्यते तत्र पूर्वेणास्वरितस्योदात्ते प्राप्तेऽनेनानुदात्तो विधीयते देव
ब्रह्मणोः स्वरितस्यानुदात्त आदेशो भवति। देवा ब्रह्माणः आगच्छत इत्योरपि पदयोः आमन्त्रिताद्युदात्तत्वे शेषनिघाते चोदात्तादनुदा
त्तस्य स्वरितः कृतः तस्यानुदात्तो भवति॥ ॥स्वरितात्संहितायामनुदात्तानां। एकश्रुतिरिति वर्त्तते। संहितायां विषये स्वरितात्परे
षामनुदात्तानामेकश्रुतिर्भवति। इमं मे गंगे यमुने सरस्वति शुतुद्रि माणवक जटिलकाध्यापक क्व गमिष्यसि। इममित्यन्तोदात्तं मे
इति अनुदात्तं विधिकाल एव निघातविधानात्। तत्पुनरुदात्तादनुदात्तस्य स्वरित इति स्वरितं संपद्यते। तस्मात्स्वरितात्परेषामनुदा
त्तानां गंगेप्रभृतीनामेकश्रुतिर्भवति सर्व एते आमन्त्रितनिघातेनानुदात्ताः। माणवक जटिलकेति प्रथममामन्त्रितमाद्युदात्तं त
स्य द्वितीयमक्षरं स्वरितं। ततः परेषामनुदात्तानामेकश्रुतिर्भवति। संहिताग्रहणं किं। अवग्रहे मा भूत् इमं। मे। गंगे। यमुने।
सरस्वति॥ ॥१२३९॥ ॥

दात्तः। विविधिकाल एवेति यद्यप्यत्र विहितस्यानुदात्तविधानेऽपि न कश्चिद्दोषः तथापि तत्त्वेन अवहर्त्तव्यमित्येवमुक्तं। तस्मात् स्वरितादिति। न च तस्यासिद्धत्वं उत्कृष्टत्वात्
नवसूत्र्याः तेन कार्यं दृढं सूत्रे स्याद् गिर्वैकश्रुतिर्भवत्येव। गंगेप्रभृतीनामिति। न च यमुनेप्रभृतीनां प्रभृतीनामव धानं ज्ञात्वे एकत्वात्सर्वासीनां समीनामप्यनाश्रितत्वात् अ
किंचित्करत्वं। ततः परेषामिति। नामन्त्रितसमानाधिकरणे इति मा एवेक शास्त्रविद्यमानत्वं न भवति। अवग्रहे मा भूदिति। इदमेव च संहिताग्रहणं ज्ञापकं पदं च मीनि
दृष्टो कालो न अवधार्यं कर इति तेनाति दु तिउ इत्यवग्रहेऽपि भवति अग्निमीळे॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥उदात्तस्वरित॥ ॥परशब्दः प्रत्येकमभिसंबध्यत इत्याह उदात्तः परो यस्मादिति। सन्नशब्देन नीचैरर्थ उच्यते तेनानुदात्तत्वं लक्ष्यत इत्याह। अनुदात्ततर इति। प्रकर्षस्त्वस्यानुदात्ता
पेक्षः। मातर इत्यनुदात्त इति। समासैकदेशो निघ्नस्यानुवृत्तः। देवा इत्यादीनां त्रयाणामामन्त्रितानामेकीभूतानामाद्युदात्तत्वे शेषनिघातः। विभाषितं विशेषवचने बहु
वचनमिति विद्यमानपक्षे चामन्त्रितान्तनिघातः। जसः सकारस्य तु रुत्वं तस्य संसनयुक्तस्मात्तो रोरि सुप्तादिति उकारोनुदात्तः। आद्गुणः। सोयोनर्थको नुदात्तः। अष्टाका
रस्य शेषनिघातः तयोरनुदात्तयोरेङः पदान्तादतीत्येकादेश आन्तर्यतो नुदात्तः। सरस्वतीकारस्येति। ननु च नवस्य सुलक्ष्यत इति ज्ञापितं न तत्स्वर्गं गोप्रभृतीनामि

॥उदात्तस्वरितपरस्य सन्नतरः॥ ॥अनुदात्तग्रहणमनुवर्त्तते। उदात्तः परो यस्मात्स उदात्तपरः स्वरितः परो यस्मात्स स्व
रितपरः उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नतर आदेशो भवति। अनुदात्ततर इत्यर्थः। देवा मरुतः पृश्निमातरोऽपः। मात
र इत्यनुदात्तः अप इत्येतोदात्त कुविदंग पदाय प्युमेघुभ्य इति। तत्रानुदात्तयोरेकदेश उकारोनुदात्तः तस्योदात्ते परभूते सन्न
तर आदेशो भवति। इमं मे गंगे यमुने सरस्वति शुतुद्रि। इकारोनुदात्तः शुतुद्रि इत्येतदामन्त्रितं पादादौ तस्मान्न निहन्यते अ
नुदात्तं सर्वमपादादाविति तस्य प्रथममक्षरमुदात्तं तस्मिन्परभूते पूर्वस्य सरस्वतीकारस्य सन्नतर आदेशो भवति। माणव
क जटिलकाध्यायक क्व गमिष्यसि क्व इति स्वरितः तस्मिन्परभूते क इति अनुदात्तस्तस्य सन्नतर आदेशो भवति॥ ६६॥

वसरस्वतीकारस्यापि पूर्वेणैकश्रुतिरेव प्राप्नोति कः पुनः सन्नतरस्यावकाशः यः स्वरितात्परो न भवति अग्निमित्रि। न च विप्रतिषेधेन सन्नतरो लभ्यते पूर्वत्रासिद्धेनासि
विप्रतिषेधो भावादुत्तरस्य। एवं तर्हि नेत र्हि नमुनेरित्यत्र नेतियोगविभागात्सिद्धत्वं भविष्यति। इहदेवदत्तमस्यन्यदि तिष्ठ धीचेति पूर्वपदप्रकृतिस्वरे उदात्तस्व
रितयोर्यण इति निघातं चत्यकारस्य स्वरितः पूर्वस्य सन्नतरं प्रति असिद्धो न भवति प्रकरणोत्कर्षात्। उदात्तस्वरितयो रिष्व सिद्धे परग्रहणं बहुव्रीहावेकवचनविवक्षा
र्थमिति निगंगे प्रभृतीनां संनतराभावः॥ ६६ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥अपृक्त एकाल्॥ ॥घृतस्पृगिति क्विन्प्रत्ययस्य कुरिति कुत्वात् अत्र वेरपृक्तस्येति लोपः प्रयोजनं एकाल्ग्रहणं किमिति समुदायद्वारेणायमेकपदविषयः प्रश्नः अन्य
था प्रत्ययमात्रस्य संज्ञा स्यादिति प्रदेशेषु प्रत्ययग्रहणमेव कर्तव्यं स्यात् किं संज्ञया तत्र यघल् तस्य स्यात् केवलस्य चाप्यंत वज्ञाव हल् अल्ग्रहणं सामर्थ्यं स्यादिति तत्सा
मर्थ्यात् अल्समुदायस्य न भविष्यतीति भावः। दर्विरिति। दविदाञ्कोणादिको विन्प्रत्ययः वर्णग्रहणे जातिग्रहणात् अल्समुदायोग्रत्वेनेति भावः। स्यादेतत् वेरपृक्तस्येति हृोऽपृक्तस्येति तत्र
क्विबादिषु च मा भूदिकारः न चायं प्रत्ययो वकारोऽस्तीति तन्नाराजनि युधि कृञः राजकृत्वा तत्र माच व इति णिचिरिलोपे क्विपि णिलोपे च कृते तक्क नियः संबंधी प्रत्ययो वकारोऽस्ति। अव
रूपं वक्किबादीनामुच्चारणार्थः कश्चिदज्ञा मज्जनीयः तत्राकारे श्च गृह्भ्यां डः इत्यादि षष्टिलोपः प्रसज्येत उकारे तु राबुलादिषु अनन्त नुगो स्वमिति यथा। अस्मभ्ये व माधीयः। नतु च

॥अपृक्त एकाल् प्रत्ययः॥ ॥अपृक्त इतीयं संज्ञा भवति एकाल् यः प्रत्ययः तस्य। असहायवाची एकशब्दः। स्पृशोनुदके क्विन्। घृ
तस्पृक्। भजो ण्विः। अर्धभाक्। पादभाक्। एकालिति किं। दर्विः। जागविः। प्रत्यय इति किं। सुराः। अपृक्तप्रदेशाः वेरपृक्तस्येत्येवमादयः
॥ ॥तत्पुरुषः समानाधिकरणः कर्मधारयः॥ ॥ ॥१ ७॥ ॥७ ७॥ ॥श्री ८१॥ ॥

यघल् समुदायोपि गृह्येत अल्ग्रहणमनर्थकं स्यात् अतो यद्यपि निपातस्य काजनादिति अत्रैकग्रहणाच्छर्ग्रहणे जातिग्रहणं तथापि तत्र तथा यत्राल्ग्रहणसामर्थ्यात्समुदा
यस्य न भविष्यतीति चिंत्यं प्रयोजनमेकग्रहणं तथा अपृक्तप्रदेशेषु घल्ग्रहणे नैव सिद्धे नार्थः संज्ञया न तत्राल्ग्रहणं तत्सानन्तरमोपूर्वनिर्देष्टया। सुरा इति। सुरं सुनोतीति क्विपि
तुक् सुतमाच व इति णिचिरिलोपः क्विपि णिलोपः अत्र धातुसकारस्य हल्ङ्याप्भ्य इति लोपो न भवति। प्रत्ययपरिभाषया सिद्धेति पासाहचर्याच्चैकवचनस्य ग्रहणं
सिद्धमिति प्रत्ययग्रहणं चिंत्यप्रयोजनमेव॥ तत्पुरुषः। अत्र तत्पुरुषः समानाधिकरणपदः तिष्ठोपि परमोर्थत्वेनासमानाधिकरणेपि शोभनं इत्यादौ यत्र वा येन पदेन तत्पु
रुषस्य सामानाधिकरण्यं तत्रैव संज्ञा स्यात् न तु परमराज्यमित्यादौ शब्दान्तरस्याप्रयोगादित्यत आह प्रोणार्थमिति। स्थितेकामचाराघदि तत्पुरुषशब्दोगोणः स्यात् तत्पु
रुषार्थानि पदानि समानाधिकरणानीति ततः सहस्रग्रहणाभावात् प्रत्येकं संज्ञा इति शंकेत अत तत्पुरुष इति पदं मुख्यार्थमित्याहं॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तत्पुरुषइतिसमासविशेषसंज्ञेत्यादि। उत्तरसूत्रेणान्वयमित्याह समानाधिकरणपदइति। समानाधिकरणो नियतत्वान्नाश्रयत्वेनपरस्परं निमततयोक्तः अवयवव्यवहारकं सामानाधिकरण्यं
ओघवाचिकमपिपदान्तरनिषेधे स्वस्मिन्नेतराणि मिलितिरेवाश्रयितव्य इति भावः भवतित्येवयवधर्मेण समुदायस्य व्यपदेशः यथा समं चूर्णमिति अत्रत्यवयवव्यवहारकं चूर्णसमानस्य न
गुरुतल्पस्य चूर्णस्यसाम्येन। परमराज्यमिति। अकर्मधारयेराज्यमित्यत्राकर्मधारयइतिनिषेधात्उत्तरपदत्वाभावेसमासांतोराज्ञत्वमेवेति। पाचकवृन्दारिकेति।
नकोपधायाइतिप्रतिषेधं बाधित्वा पुंवत्कर्मधारयेइतिपुंवद्भावो भवति। तत्पुरुषइतिकिमिति। प्रतिपदोक्तत्वादधिकारागतेव समानाधिकरणाधिकारविहितस्तत्पु

।।तत्पुरुषइतिसमासविशेषस्यसंज्ञांवक्ष्यति· सतत्पुरुषः समानाधिकरणपदः कर्म्मधारयसंज्ञेयःकर्म्मधारयेति
सूत्रेणोभवति। अधिकरणशब्दोभिधेयवाची।। समानाधिकरणः समानाभिधेयः। परमराज्यं उत्तमराज्यं पाचकवृन्दारिका। तत्पु
रुषइतिकिं। पाचिकाभार्यः। समानाधिकरणइतिकिं। ब्राह्मणराज्यं। कर्म्मधारयप्रदेशाः कर्म्मधारयेनिष्ठेत्येवमाद
यः।। १७ ।। ।।श्रीरामायनमोनमः।। ।।

रुषएवप्रतिपत्स्यतइतिप्रश्नः। पाचिकाभार्यइति। अयमेवार्थो दुःखधारइतिभावः। ब्राह्मणराज्यमिति। अत्रोत्तरपदाद्युदात्तत्वमेव भवति। अयमर्थःकालेकेतस्य
प्रकाशस्तोतेकर्मधारयइतिकस्मान्नोक्तं योयंसमानाधिकरणाधिकारविहितस्तत्पुरुषः सकर्मधारयइति एवंहितत्पुरुषः सामानाधिकरणइतिनवक्तव्यं भवति।
सत्यंएकसंज्ञाधिकारात्तुकर्मधारयसंज्ञयातत्पुरुषसंज्ञायाबाधःस्यादितिद्विगोरिवपुनस्तत्पुरुषसंज्ञाविधानात्कर्मधारयपदमुपादेयं पुनश्च पर्यायप्रसंगेसमावे
शायचकारोपिवक्तव्यः। नचैवंक्रियतेद्विगुकर्मधारयौचेतिएवंतुनकृतमित्येव।। ।। १७ ।। ।।छ छ।। ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥प्रथमानिर्दिष्टं॥ ॥समास इत्यधिकरणनिर्देशोयं कष्टश्रितातीतपश्च समासाः तेषु किं प्रथमानिर्दिष्टं भवितुमर्हतीति समासे तत्रापि यस्मात्प्रथमा विधीयते तेन च तत्र या भक्तं तं संभव
ति समासे हि कृते तत न एव प्रथमोस्ति यत् तेन तद्वयवान्तर्वर्तिन्याश्च विभक्त्या श्रितशब्द एव प्रथमानिर्दिष्टो न कष्टशब्दः सापि न समासे सत्सु सन्त्या किं तर्हि वाक्यकाल एव निर्दिष्ट
ग्रहणं चानर्थकं स्यात् समासे प्रथमान्तमित्येव वाच्यं स्यात् अतो मुख्यस्यासंभवाल्लक्षणा समासोऽत्र गृह्यत इत्याह प्रथमपेक्षादि कथं पुनः समास इति शास्त्रस्य ग्रहणमित्याह
समास इति समासविधायीति। समासविधायिन्यां शास्त्रे दृष्टमित्यर्थः। निर्दिष्टग्रहणादेव च तत्प्रत्ययोपि समासार्थत्वेवासं न गृह्यते न हि तत्र निर्देशार्थं प्रथमास्त्यपि

॥प्रथमानिर्दिष्टं समास उपसर्ज्जनं॥ प्रथमया विभक्त्या यन्निर्दिश्यते समासशास्त्रे तदुपसर्ज्जनसंज्ञं भवति। समास इति समा
सविधायि शास्त्रं गृह्यते। वक्ष्यति द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति। द्वितीयासमासे द्वितीयासमासे। द्वितीये
त्येतत्प्रथमानिर्दिष्टं। तृतीयासमासे तृतीयेति। चतुर्थीसमासे चतुर्थीति। पंचमीसमासे पंचमीति। षष्ठीसमासे षष्ठीति सप्तमी
समासे सप्तमीति कष्टश्रितः। शंकुलाखंडः। यूपदारु। वृकभयं। राजपुरुषः। अक्षशौंडः। उपसर्जनप्रदेशाः उपसर्ज्जनं पूर्व
मित्येवमादयः॥ १८ ॥ ॥७॥ ॥

पुक्तत्वात्। द्वितीयेत्येतत्प्रथमानिर्दिष्टमिति। प्रथमया विभक्त्या उच्चारितं। यद्येवं तस्यैव संज्ञा स्यात् न कष्टादीनां न हि ते शास्त्रे प्रथमानिर्दिष्टाः। एवं विद्धितो येतस्य प्रथमा
निर्देशः स एव कष्टादीनामपि तत्परत्वात् न स्याद्यथाव स्त्ततस्येति सामान्यं विशेषोपलक्षणार्थं तद्‍ीयप्राथम्यं विशेषाणां विज्ञायत इति कष्टश्रितादिषूपसर्जनत्वात्
पूर्वनिपातः। महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं लोके अप्रधानमुपसर्जनमुच्यते इहाप्यप्रधानमुपसर्जनं॥ ॥७ ७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रधानमप्रधानमिति च संबंधिशब्दावेतौ तेन यत्प्रतियत्प्रधानं तदेव प्रति तदुपसर्जनं भवति तेन राज्ञः कुमारीं श्रित इति द्वितीया श्रिते सत्र प्रथमानि
र्दिष्टस्यापि कुमारीशब्दस्य संज्ञा न भवति परिस्यात् तत्पूर्वनिपातानियमः उपसर्जनह्रस्वत्वं च स्यात् अन्वर्थत्वे तु श्रितादीनेवापेक्ष्य द्वितीयांतमुपसर्जन
मिति न प्रसंगः एवं राज्ञः कुमार्याः इत्यत्र द्वयोरपि षष्ठी तत्र प्रथमानिर्दिष्टोपि कुमारीमपेक्ष्य राज्ञ उपसर्जनत्वं न तत्प्रति तस्याः। यद्यन्वर्थसंज्ञानार्थो
ते न प्रदेशेष्वेवान्वर्थग्रहणमस्तु। गवां केपि तर्हि स्यात् कुमार्या श्रितः गवां कुलं। अथ संज्ञाविधावपि ना॰ कोकस्मान्न भवति यावता समास इति प्र
थमानिर्दिष्टस्याधारेण संज्ञायाः तथा गोकुलं कुमारीपुत्र इत्यत्र समासेपि पूर्वनिपातवत् ह्रस्वत्वं कस्मान्न भवति तस्मात्सत्येवोपसर्जनत्वे उप
सर्जनस्य गोस्त्र्यंतस्योपसर्जनस्त्रीप्रत्ययांतांतस्य प्रातिपदिकस्य ह्रस्वविधानात् समासाधिकारे पूर्वनिपातवचनाच्च वाक्ये तेन भवतीति वाच्यं
।संज्ञाविधाने तन्त्रगंगामित्यादौ द्वयोरप्यप्राधान्ये पूर्वनिपातनियमार्थं यत्र चानन्तार्थः प्रथमानिर्देशः तत्र प्रधानस्यापि यथा स्यादित्ये
वमर्थं च यथा पाचकहंदारकः पुरुषव्याघ्रः अर्द्धपिप्पली पूर्वकाय इति अत्र हंदारकनागकुंजरैः पूज्यमानं उपमितं व्याघ्रादिभिः अर्द्ध
नपुंसकं पूर्वापराधरोत्तरमिति प्रथमानिर्दिष्टस्यैव प्रयोजनं। समासस्य विशेषणं विशेष्येणेत्यत्र प्रीत्येव सिद्धत्वान्न च पूज्यमानतादि
विषय एव यथा स्यादिति नियमार्थस्तदारंभः। उपसर्जनसंज्ञार्थत्वे त्वर्द्धादिपूर्वस्य विशिष्टरूपस्यार्द्धपिप्पलीत्यादेः समासस्य विधिसंभ
वात् तस्मादेतदर्थापि संज्ञा अन्वर्थत्वं तु सत्यपि संभवे व्यवस्थापकं॥ ॥१८॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

॥छ छ॥ ॥छ छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥एकविभक्तिचा॥ विभक्तिशब्दः सुपां वाचकः। कारकशक्तिवचनो वा। विभज्यते ऽनया प्रातिपदिकार्थ इति कृत्वा। समासे विधीयमान इति। यदुपमर्देन समासो भवति तस्मिन्वाक्य इ
त्यर्थः समासस्तूपप्रस्यभिमुखे विपदद्वय इति यावत्। एतेन समासार्थवाक्यमत्र समासेन पूर्वसूत्र इवशास्त्रमिति दर्शयति शास्त्रे। हि सर्वमेकविभक्तिकमिति एकविभक्तीत्यनर्थ
कं स्यात्। मुख्ये ऽपि समासे प्रत्ययलक्षणेनैकविभक्तित्वं समर्थनीयमिति वा क्रममेवात्र समासः। एकस्मिंश्च प्रयोगे सर्वमेकविभक्तिकमिति विशेषणोपादानसामर्थ्याद
योगभेदेनापि यस्य न सर्वविभक्तित्वं तदाश्रीयते इत्याह यन्नियतविभक्तिकमिति। एतदेव स्पष्टयति द्वितीये संबंधिनस्यादि। केचित्त्वाहुः येन सह समस्यते स द्वितीयः सं
बंधीति। एवं तु पंचानां खट्वानां समाहारः पंचखट्वीति वा टावंत इति स्त्रीलिंगपक्षे उपसर्जनह्रस्वत्वं न स्यात् समाहारोर्थत्र नानाविभक्तियुक्तो न यं च नदाह्। तस्मात्प्रधाना

॥एकविभक्ति चापूर्वनिपाते॥ ॥एकाविभक्तिर्यस्य तदिदमेकविभक्ति समासे विधीयमाने यन्नियतविभक्तिकं द्वितीये संबं
धिनि बहुष्वपि विभक्तिषु युज्यमानेष्वेकयैव विभक्त्या युज्यते तदुपसर्जनसंज्ञं भवति अपूर्वनिपाते पूर्वनिपाते पूर्वनिपाताख्यमुप
सर्जनकार्यं वर्जयित्वा। निरादयः क्रांताद्यर्थे पंचम्या। पूर्वपदेनात्र विभक्तिके ऽप्युत्तरपदं पंचम्यंतमेव भवति। निःक्रांतः कौशाम्ब्याः
निःकौशाम्बिः। निःक्रांतं कौशाम्ब्याः निःकौशाम्बिं। निःक्रांतेन कौशाम्ब्याः निःकौशाम्बिना। निःक्रांताय कौशाम्ब्याः निःकौशा
म्बये। निःक्रांतात् कौशाम्ब्याः निःकौशाम्बेः निःक्रांतस्य कौशाम्ब्याः निःकौशाम्बेः। नि[illegible]ते कौशाम्ब्याः निःकौशाम्बौ। एवं निर्वा
राणसिः। अपूर्वनिपात इति किं। न हि भवति कौशाम्बिनिरिति॥ ॥

यीवाचीत्यादेर्द्वितीयः संबंधी। निष्कौशाम्बिरिति कौशाम्ब्या अवयोनिष्क्रमणक्रियापेक्षया ऽपादानत्वं क्रियायोगात्पंचम्यंतः। नतस्य क्रियांतरमेपक्षा ऽन्यांतरावेडाः
संभवतीति निःशब्दस्य निष्क्रांतप्रधानो नार्थ इति पुष्पते। निष्कौशाम्बिरिति कुशांबेन निर्वृत्ता नगरी कौशाम्बी गोस्त्रियोरुपसर्जनस्येति ह्रस्वः। निर्वाराणसिरिति।
अनोजलंतद्वयस्याः सा वरणा गंगा तस्या अदूरभवा नगरी वाराणसी। पुराणे तु वरणा चासिश्च नद्यो ऽर्कवत्यादिः तयोरदूरभवा एषोदरादित्वादिकारस्य दी
र्घः निरसः पूर्वे ऽण्योपसर्जनत्वं। प्रधानस्यापि हि प्रथमानिर्दिष्टसामर्थ्यात भवति इत्युक्तं। इहास्याविकारो प्रथमानिर्दिष्टः पूर्वस्यावकाशो ऽनेकविभक्तिः नीलोत्पला
दिः अर्धपिप्पल्यादिश्च [illegible] एकविभक्तिकाः प्रथमानिर्दिष्टश्चेत्युभयप्रसंगे परत्वादनेनैव प्राप्नोति तत्रश्चा पूर्वनिपात इति निषेधप्रसंगः। नाप्राप्ति
षेधान्नापंप्रसज्यप्रतिषेधः पूर्वनिपाते नेति किं तर्हि पर्युदासो ऽयं पूर्वनिपातेनेति विधिर्न प्रतिषेधः। प्रसज्यप्रतिषेधे ह्यनंतरप्राप्तिः प्रतिषिध्यते कुत एतत् अनंतरस्यावि

© Dharmartha Trust J&K. Digitized by eGangotri

॥अर्थवदधातुः॥ ॥अभिधेयवचनोर्थशब्दइति न प्रयोजनवचनः अव्यभिचारात् न निवृत्तिवचनः स्वयं निवृत्तस्यापि किं संज्ञया न धनवचनः स्वस्वामिभावस्यासंभवात् तत्राभिधेयं च तु र्द्धी जाति गुण क्रिया द्रव्यभेदेन गोः शुक्लः पाचको डित्थः इति यद्यर्थवतः संज्ञा अभाववच्छशविषाणादीनां न प्राप्नोति अर्थाभावात् अभ्यधुनेन समासः इति भविष्यति न अर्थवदिस्मवृत्तेः अन्यथा अनर्थके त्र निमित्तं भवात् समासग्रहणं नियमार्थं न स्यात् उच्यते येषां तावद्भूतलाद्याश्रयं घटादिप्रतियोगिकं नास्ति बुद्धिबोध्यमेतत् तेषां तस्य भावः तस्मात् तेन नार्थेनार्थवत्वं येषामप्यासंयाभिमतं भूतलादिस्वरूपमेव तत्तद्बुद्धिविशेषो वा प्रतियोगिनो घटादेरभावः तन्मतेते नैवं भूतलादिना अर्थवत्वमित्यभावस्य तावत् सिद्धा संज्ञा शशविषाणमित्यत्रापि खरविषाणादिष्वनुभूतविषाणं शशमस्तके वर्तित या बुद्ध्या अपेक्ष्यते तस्यैवाभिधानाय शब्दप्रयोगः बुध्युपारोहएव चार्थस्य शब्द प्रयोगे कारणं न बाह्यः सत्तापि दिवाह्यः संतमेवार्थं शब्दा अभिदधति घटोस्ति घटो नास्तीति प्रयोगो न स्यात् एकत्र योनह्रस्वात् अपरत्र विरोधात् बुद्ध्युपारूढस्य तु

॥अर्थवदधातुरप्रत्ययः प्रातिपदिकं॥ अभिधेयवचनोऽर्थशब्दः॥ अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति धातुप्रत्ययौ वर्जयित्वा॥ डित्थः॥ उवित्थः॥ कुंडं पीठं॥ १९

बाह्यः सत्वासत्वप्रतिपादनायोपपद्यते प्रयोगः एवं च यासीतपक्षे स्तिश्च स्यास्त्रस्येशादर्कं चयेत्पादावपि बुध्युपारूढ एव यच्चादीनामर्थः न तु शब्दप्रयोगकाले बाह्यः सिद्धः॥ डित्थादीनप्यसत्वानामुदाहरणानि॥ व्युत्पत्तौ कदंतत्वादेव सिद्धं॥ सर्वेनामधातुजमित्यत्रापि पक्षे अपार्थमनुकरणशब्दार्थं च स्तत्र मास्थमेवानेनुलौकिके प्रयोगे शब्दानामर्थवत्ताध्यवसायः स च वाक्यस्यैव पदस्य वाविभक्तां तस्य न तु प्रकृतिभागमात्रस्येति कथं तस्य निष्कृष्यार्थवत्वनिश्चयः येषां हि समुहे व प्रयोगः तेषां तं घातस्यैवार्थवत्ताय थावर्णानो॥ उच्यते अन्वयव्यतिरेकाभ्यां शब्दार्थनिश्चयः यस्य शब्दस्यान्वयेयोर्थः प्रतीयते अतिरेके च व्यतिरिच्यते सतस्यार्थः वृक्षो वृक्षाः इत्यादौ च प्रत्ययसामान्यात् अभितारेपि तद्विशेषव्यभिचारः वृक्षोसामान्य व्यभिचारात्स्व वृक्षशब्दं वाक्षशब्दं इत्यर्थस्य मूलस्कंधफलपलाशादिमान्नाधुवृक्षशब्दं प्रतीयते॥

॥१९॥

© Dharmartha Trust J&K. Digitized by eGangotri

नांत स्याद्धेरिति। ननु च वनषणसंभक्तौ धन धा सङ्खेन योर्णौ लोरेतौ शद्वौ पचायचि सुसादित्वेन त्रा धातुरिति प्रतिषेधो भविष्यति। एवं तर्हि अनुत्पन्ने पश्च
एतदुक्तं भवत एवादाहरणात्तेनापि अनयो रूपन्यासः। किञ्च अनर्थकत्वे ग्रहणे प्रति वर्णसंज्ञाप्रसंगः न च प्रति वर्ण धातुसंज्ञा। न चानुत्पत्तौ प्रत्यय इति पर्युदासाश्रयणात् अ
र्थवतो ग्रहणम् अनर्थकयोरपि धातुप्रत्ययोः संभवात् यथा अधीते पावक इति अत्र स्यादिषु एवं से द्योर्थवत्त्वं न तदिति तस्य कश्चिदप्यप्रयोगात्। यावक इत्यत्रापि याश
ब्दस्यैवार्थवत्त्वं न तु कनः। अन्तरेणापि तं तदर्थावगमात् न च ज्ञायते केन धर्मेणास्ये हृष्टमिति। न चार्थवद्ग्रहणाय भिभाषयार्थवतो ग्रहणे एषा हि नियतनृपोप
दाने भवस्थापयति न चात्र नृपतिविशेषापादानं। ननु तत्सामर्थ्यं नर्थकस्य भज्ञाप्यां संख्या कर्मादिषु विधीयमानाः स्यादयो न भविष्यन्तीति नैतदस्ति अविशेषेणानयन्ते
उसत्वात् सामर्थ्यनियमः ततश्चा ह्यपवत् स्यादयः सुरेवा। न लोपो हि स्यादिति। विभक्तेस्त श्रवणं न भवति समुदायस्यापि प्रत्यक्ष्याति पदिकसंज्ञायां तदन्तं भक्ता

॥ ॥ अर्थवदिति किं वनं धनमपि तिनांतस्याद्धेर्माभूत् ॥ अधातु
रिति किं। हंतेर्लङ् ॥ अहन्। न लोपः स्यात् ॥ ॥ ९० ॥ ॥

त्वकोमाभावात्। यद्येवं द्विर्वचनन्यायेनावयवस्य न भविष्यति युक्तं तत्र। पचत्वत्र येनैवावाक्समुदाय एकाचस्तेनैव तदवयवोच शब्दः पशावस्थ न चैकस्यैकदा
नेकं प्रति त्वावयवत्वं निरूपयितुं शक्यं। किञ्च समुदायद्विर्वचनेनावयवा अपि द्विरुच्यन्ते तत्तदात्मकत्वात् नस्य इह त्ववयवानां समुदायस्यैव संज्ञानिबंधनं शब्दत्वं
यगेवतत्र समुदायस्य पत्तेन तस्यैव कार्यं नावयवानां। ननु वण इति आम्भाओ पगवः अअयेहीति धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थ
दर्शनात् हक्षादिष्वपि वर्णा अर्थवन्तः। तथा कपर इति ककारे सति कश्चिदर्थो गम्यते प्रकृतियकारोपजनेऽर्थान्तरं तेन मन्यामहे यः कूपकपार्थः स ककारस्य यो
यपे रूपार्थः स यकारस्येति तथा त्रस्राराः उक्ते योऽर्थो गम्यते नासौ वकारादीनाम् अन्तरापाये धिगम्यते ॥ ॥ ॥ ८ ७॥ ॥७॥ ॥

येषां च संघातोपलक्ष्यार्थं करोतीति प्रत्येकमपि तत्कुर्वन्ति यथा तिलानां खारी तैलमुत्पादयति प्रत्येकं च तिलाः। ये च प्रत्येकमसमर्थाः तेषां संघा-
तोपि तत्रासमर्थः यथा प्रत्येकं सिकतास्तैलं नोत्पादयन्ति तथा खार्यपि तासां। अतः संघातार्थवत्त्वाच्चार्थवन्तो वर्णाः तत्कथमर्थवद्ग्रहणे सत्यपि तेषां
निवृत्तिः अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः। नहि व्राइसुक्केकश्चिदर्थो गम्यते अतो धात्वादीनामेकवर्णानामर्थवत्त्वात् अन्येपि वर्णा अर्थव-
न्त इत्यनुपलब्धिर्बाधितमेतत्। एवमन्येपि हेतवो बाधितविषयाः। किंच कूपो यूप इत्यन्वयव्यतिरेकाभ्यां ककारयकारयोरर्थवत्त्वे उप इति वर्णा-
नामानर्थक्यमभ्युपगतं स्यात्। अथ तेषामर्थवत्त्वं भूयिष्ठः कूपे एषार्थः स्यात्तत्रूपार्थश्च यूपे यत्र भूयसामर्थवतामन्वयः व्यतिरेकस्तु कस्यचि-
त्तत्रार्थानामपि भूयसामनुवृत्तिर्भवति व्यतिरेकस्तु कस्यचित् यथा देवदत्त गामभ्याज शुक्लां देवदत्त गामभ्याज कृष्णामिति। अतः संघाता एव
तेनार्थेनार्थवन्तः। संघातार्थवत्त्वाच्चेति हेतुरनैकान्तिकः तैलाग्निवर्ति संघाते न दीपः न प्रत्येकं यथावप वैश्वक्राटिभिः संहते ब्रीजिक्रिया। किं
चार्थवतां विपर्यासे अर्थप्रत्ययस्यापि विपर्यासः आहरणात्रं पात्रमाहरेति अपाये वा यथा गामभ्याज शुक्लां गामभ्याजेति उपजने चोपजनने गा-
मभ्याज गामभ्याज शुक्लामिति। वर्णेषु तु नैवं हि नस्तीति सिंहः हंति हतः घ्नंति अतः संघाता एवार्थवन्तः। अहन्निति। हन्तेर्लङि तिप् इतश्च
लोपे हल्ङ्यादिलोपः अट् सहहनग्रहणेनैव गृह्यते। अत्र प्रागेव लङुत्पत्तेः संज्ञायां सत्याम् उत्तरकालं पदत्वे सति नलोपः स्यात्। यद्वा प्रातिपदि-
कसंज्ञा पदसंज्ञा समकालमेव स्यात् न चाप्रत्यय इति प्रतिषेधः नङि संबुद्ध्योरिति लिंगात् अन्यथा हि राजन्नित्यादावप्रत्यय इति निषेधाद्प्राति-
पदिकत्वादेव नलोपः संगतः। अधातुरिति शक्यमकर्तुं सुपो धातु इति धातुग्रहणं ज्ञापकं न धातोरियं संज्ञेति। नैतदस्ति ज्ञापकं प्रतिषिद्धा-
र्थमेतत्स्यात् श्येनायत इत्यादावप्रत्यय इति निषिद्धा संज्ञेति। भिद् छिद् धूः प्रतीत्येवमादौ क्विबन्ते कृदन्तत्वादुत्तरसूत्रेण संज्ञा न च तस्या अपि प्र-
तिषेधो यं मध्येऽपवादा इति न्यायात् पर्युदासत्वाद्वा। २०

© Dharmartha Trust J&K. Digitized by eGangotri

कांडे इति। प्रथमाद्विवचनस्य नपुंसकाच्चेति शीभावः अप्रत्यय इति च प्रत्ययग्रहणपरिभाषया तदंतस्य निषेधः यत्र हि प्रत्ययः संज्ञिरूपेणानुप्रविशतीत्यर्थात् तर
प्रमंपो घ इति तत्र यदसंज्ञायामंतवचनेन तदंतविधिप्रतिषेधः इह तु यद्यपि दासे प्रत्ययव्यतिरिक्तः संज्ञी प्रत्ययप्रतिषेधेपि न संज्ञाविधौ प्रत्ययग्रहणं किं तर्हि प्रतिषे
ध इति नाग्तिनिषेधः। ननु तरसूत्रे कृत्तद्धितग्रहणं नियमार्थं भविष्यति प्रत्ययांतस्य यदि स्यात् यदि भवति कृत्तद्धितांतस्यैवेति। उच्यते असत्यस्मिन्प्रतिषेधे सं
ज्ञाविधौ तदंतविधिप्रतिषेधात् प्रत्ययस्य यदि भवति कृत्तद्धितस्यैवेति नियमः स्यात् सति त्वस्मिन् अत्र तावत्प्रत्ययांतस्य निषेध इति उत्तरसूत्रे पि तद्धितांतस्य

॥ अप्रत्यय इति किं। कांडे। कुड्ये। ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः स्यात्। अनर्थकस्यापि निपात
स्य प्रातिपदिकसंज्ञेष्यते॥ अध्यागछति। प्रलंबते। प्रातिपदिकप्रदेशाः ह्रस्वो नपुंसके प्रातिपदिकस्येत्येवमा
दयः॥ ॥२१॥ ॥श्री४४॥ ॥

ग्रहणं भवति। अथ क्रियमाणेप्यप्रत्यय इत्यस्मिन्नपुंसकह्रस्वत्वं कस्मान्न भवति यद्युदासेतावत्प्रत्ययाप्रत्यययोरेकादेशस्य पूर्वं प्रत्यंतवद्भावः प्रसज्यप्रतिषे
धे पर्यंतरंगत्वात् प्रागेव प्रत्ययोत्पत्तेः कांड आइ इस्य प्रवृत्ता संज्ञेति एकादेशस्यांतवद्भाव इति अस्त्येव प्रातिपदिकत्वं तथा च ब्रह्मबंधू इत्युदेः कादेशस्यांतवत्वात् स्वा
द्युत्पत्तिः न वा प्रत्यय इत्यस्यैवैयर्थ्यं अत्र पुण्ये इत्यादौ यत्रैकादेशत्वं नास्ति तत्रार्थवत्त्वात्। एवं तर्हि नपुंसके यद्वर्तते तस्य ह्रस्वः विभक्त्यंतेनु संख्या प्रधानं काके श
क्तिप्रधानं च न च तयोर्लिंगयोगः न चांतवद्भावेनार्थः शक्नोति देष्टुमिति न भवति ह्रस्वः। यद्येवं त्रपुणी इत्यादावप्येवमेव न भविष्यतीत्यर्थेनेनन वान्यः प्रत्य
यांतो व्यावर्त्यः संभवति॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तथा हि षड्विधाः प्रत्ययाः सनाद्यः कृतः तिङः सुपः स्त्रीप्रत्ययाः तद्धिताश्चेति प्रातिपदिककार्यमपि द्वन्द्वो न पुंसके प्रातिपदिकस्य गोस्त्रियोरुपसर्ज
नस्येति ह्रस्वत्वं आप्प्रातिपदिकादिति प्रत्ययविधिश्च तच्च सन्नन्तानां तस्येष्यत एव सन्प्रभृतिषु येषां तावद्धातुत्वं तेषामधातुरिति प्रतिषेधः स्यात्
बादीनामपि विकरणानां लिंगाभावात् संख्याकर्माद्यभावः अपत्याद्यर्थायोगश्च । एवं तिङन्तानामपि यथायः पचतितरूपं तस्यापत्यं इति रूपवत्तत्वात् त्यादि
प्रातिपदिकत्वेऽपि तु संभवंति स्वार्थिकाः तेतिङश्चेति ज्ञापकान्न भवंति । स्त्रीप्रत्ययानां तु विरुद्धेन नपुंसकेनायोग एव । कुमारीपुत्रइत्यत्र गोस्त्रियो
रिति ह्रस्वः स्यादिति चेत् । अथ क्रियपत्यं इति रूपवत्तत्वात् मातोऽपि प्रतिषेधे राजकुमारीपुत्र इत्यत्र कस्मान्न भवति अत्र हि समासत्वादस्त्येव प्रा
तिपदिकत्वं अतोयस्तत्र परिहारः स एवात्रापि भविष्यति । प्रत्ययविधिस्त्विष्यत एव आप्प्रातिपदिकादिति सुबंतस्य ह्रस्वत्वं न प्राप्नोतीत्यु
क्तमेव सुपां चाप्रसंगः तद्धितान्तस्यापि तदंतस्यासंभवात् लिंगाभावात् स्त्रीप्रत्ययाभावः तद्धितास्त्विष्यंत एव समर्थानां प्रथमाद्वेति अतो
नार्थोऽनेनेत्यत्र सूत्रे तद्धितग्रहणेन च । उच्यते बहुषु बहुवचनं कर्माणि द्वितीयेत्यादीनां त्यादिविधिवाक्येन भिन्नवाक्यतापत्तेः सर्वेभ्यः
प्रत्ययेभ्यः स्याद्यः स्युः यथान्येभ्यः विकरणेभ्यो नाप्रस्वार्थिकास्तद्धिताः स्युरेवेत्यतोऽप्रत्ययग्रहणं कृतमिति तद्धितग्रहणं चाकोटेकु
ड्व इत्येतयोः स्मप्रत्युदाहरणत्वं ह्रस्वो नपुंसक इत्यत्रोपपादयिष्यामः । अथ प्रत्ययमात्रस्य संज्ञा कस्मान्न भवति सत्यां हि संज्ञायां द्रुक्के
नन्यायेन बहुपरत्व इत्यादौ स्याद्यः स्युः । उच्यते मध्ये देशी कुंडा वेन प्रत्ययान्तवत अप्रत्यय इति प्रतिषेधो भविष्यति । यद्येवं कृत्तद्धितमात्रे
ऽपि विधिसंभवात् उत्तरसूत्रे तदंतविधिर्न भवति । अत्रयपि हास्वं स्यामः ॥ ॥ २१ ॥ ॥ श्रीकृष्णायनमः ॥४॥ १४॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ कृत्तद्धिता ॥ कृदेताः इति । यस्मात्कृतो विहिताः तदादयः इति वेदितव्यं अत्र हि कृद्ग्रहणपरिभाषा नोपतिष्ठते तेन मूलकेनोपदंशमिति वाक्यस्य संज्ञा न भवति । मध्येऽपवादन्या-
येन स्वप्रत्यय इति निषेधः कृद्ग्रहणेन बाध्यते ननु समासग्रहणेन कृतो नियमः संज्ञाविधौ प्रत्ययग्रहणे च तदन्तविधिर्भवतीत्यत्रोपपत्तिमाह अप्रत्यय इति । पूर्वसूत्रे प्रत्य-
यान्तस्य निषेधः न केवलस्य प्रत्ययस्य सा शिष्यते दुष्यते । अप्राप्तप्रापणं विधिः न च तदा कृत्तद्धितमात्रस्याप्राप्ता सा संज्ञा तदन्तस्य त्वप्राप्तेति विध्यर्थता जदन्तस्यैव ग्रहणं येषा
तु सर्वत्र प्रत्ययमात्रस्यापि निषेधस्तेषामर्थवद्ग्रहणानुवृत्तेः अर्थवद्विशेषणं तदन्तस्य ग्रहणं समासग्रहणमनर्थकं अर्थवत्त्वात्सर्वेषामेव संज्ञासिद्धेः इत्यत आह । अर्थव
त्समुदायानामिति । कर्मधारय एव नियमो आहत्य न नु सुराज्ञा अतिराज्ञेत्यादौ अन्तर्वर्तिन्यां विभक्तौ लुप्तायां समुदायस्य यासंज्ञा तामपेक्ष्यसो हसन्तस्य हल्ङ्यादिलोपे
तत्पामवस्थायां नलोपार्थाया संज्ञा प्राप्नोतीत्यस्याः प्रत्ययलक्षणेनाप्रत्यय इति निषेधप्राप्तेर्विध्यर्थमेतत्स्यात् । ज्ञापकान्ति हन्त इति संबुद्धावित्ति निषेधो न्यायप्राप्तेन प्रत्ययल
क्षणेन नि । षेध इति अन्यथा अकेनमाये न हे राजन्नित्यादौ नलोपप्रसंगात् । नैतदस्ति ज्ञापकं हे सुराजन्नित्यादौ यत्र समासग्रहणेन संज्ञा विहिता तत्र नलोपप्रसंगे निषे

॥ कृत्तद्धितसमासाश्च ॥ ॥ कृतः तद्धिताः समासाश्च प्रातिपदिकसंज्ञा भवन्ति । अप्रत्यय इति पूर्वत्र पर्युदासात्कृदन्तस्य तद्धितां
तस्य चानेन प्रातिपदिकसंज्ञा विधीयते अर्थवत्समुदायानां समासग्रहणं नियमार्थं । कृत् । कारकः । हारकः । कर्ता । हर्ता । तद्धितः ।
औपगवः । कापटवः । समासः । राजपुरुषः । ब्राह्मणकम्बलः । समासग्रहणस्य नियमार्थत्वा
दा स्यात् । एवं तर्हि त्राप्यप्रत्यय इत्यनुवर्त्तते तेन प्रत्ययान्ते समासे विध्यर्थत्वासंभवान्नियमार्थमेव समासग्रहणं यद्यप्यनुदिश्य प्रयोजनविशेषं सकृत्संज्ञा प्रवर्त्तते
तस्मात् नु समासं यस्यामवस्थायां प्रलोपं कार्यं प्राप्नोतीति तस्यां न इवति न प्रतिकार्यमावर्त्तते नीपासंज्ञे त्यपेयं शब्दा श्रीगते । अत्र च पक्षे सुबुत्सर्थं नलोपार्थं च समासे संज्ञान
न्तरमेव सकृत्संज्ञा प्रवर्त्तते न तु नलोपदशायामिति विध्यर्थत्वासंभवान्नियमार्थमेव समासग्रहणं । तुल्यजातीयस्य च नियमेन व्यावृत्तिः कश्च तुल्यजातीयः यस्यार्थवत्
समुदायस्य पूर्वो भागस्तावत्स्वयं अर्थवाहिनि सुबन्तानां समास राजपुरुष इति यश्चावाहिनि इ तानां अव्ययतमाख्यातेन क्रियामात्रस्य आभ्यामपि वृत्तावतो दन्तमो
दतेति यश्च सुबन्तानां तिङः तानाव जहिकर्मणा बहुलमाभीक्ष्ण्ये जहिजोड इति जहि आकर इति यश्च सुबन्तानां प्रातिपदिकानां च गतिकारकोपपदानामिति वक्ष्यती
ती निषेधः क्रोतीति सर्वथात्र पूर्वो भागस्तावत्स्वयं अतः स तुल्यजातीयो नियमेन व्यावर्त्त्यते तेन बहुपटवस्तत्र जसं जसः पुरस्ताद्बहुच्प्रकृते न तत्र संघाते पूर्वो भागः यद्यपि
स्यति । नयमेव एष समासे भिन्न लक्षणेनार्थवत्त्वात्तस्य संज्ञायाः प्रवृत्तिः स्यात् जसः सुपो धातुप्रातिपदिकयोरिति लुकि कृते न घित्त्वरोऽपि भवत्येतत्तः सप्रहृते र्वहुजकजर्थमिति पटुरह्वी

गाकस्यार्थवतइति। प्रत्येकंपदैरप्रतीतस्यसंसर्गस्यवाक्येनप्रतीयमानत्वात् तस्यार्थवत्त्वंसमुदायाच्च प्रत्ययस्याविधानान्नाप्रत्ययइति निषेधः। नचनास्ति
यस्मिन्नप्रत्ययःसोप्रत्ययइतिबहुव्रीहिः अकाआअपितुबहुपदइत्यत्रापिनिषेधप्रसंगान्॥ ॥ह्रस्वोनपुंसके॥ ॥सूत्रेनपुंसकइत्येनतद्द्वृत्त्यंविवक्षितंनलिं
गमात्रंइत्याहनपुंसलिंगेर्थइति। नपुंसकंलिंगमस्येतिबहुव्रीहिः। ग्रामणीरिति। सत्सूद्विषेत्यादिना क्विप्। प्रातिपदिकस्येतिकिमिति। नपुंसकेलिंगंइत्यस्येव
धर्म्मः इत्यवाचित्वंचप्रातिपदिकस्येवनसुबंतस्यउक्तिसंख्याप्राधान्यात्। नधातोः तिङ्‌तस्यवाक्यस्यवाक्रियाप्रधानत्वात् वर्णास्त्वनर्थकाः स्त्रीप्रत्ययानांतुवि
धुद्देननपुंसकेनायोगइतिप्रश्नःकांडेकुड्यइति। अत्राप्रत्ययइतिनिषेधान्नप्रातिपदिकत्वंनास्ति। ननुच एकादेशः पूर्वग्रसंतवद्भावात्प्रातिपदिकग्रहणेनग्रह्य

॥ह्वाकास्यार्थवतः संज्ञानभवति॥ ॥ह्रस्वोनपुंसकेप्रातिपदिकस्य। नपुंसकलिंगेर्थेयत्प्रातिपदिकंवर्त्ततेतस्यह्रस्वो
भवतिआदेशः अलोंत्यस्याचः। अतिरिकुलं। अतिनुकुलं। नपुंसकइतिकिं। ग्रामणीः सेनानीः। प्रातिपदिकस्येतिकिं।
कांडेतिष्ठतः। कुड्येतिष्ठतः। प्रातिपदिकग्रहणसामर्थ्यादेशः पूर्वस्यांतवन्नभवति॥ २२ ॥ ॥३॥ ॥

तइति क्विपमाणोपिप्रातिपदिकग्रहणेह्रस्वत्वंस्यादेवअतआह। प्रातिपदिकग्रहणसामर्थ्यादिति। कथंपुनःसामर्थ्यंयावतायत्रांतवद्भावोनास्ति वाःवारीत्रपु
णीइत्यादौतत आवर्त्स्यात्। अथशक्तिसंख्याप्रधानत्वात् तत्रनपुंसकेनायोगः। कांडेइत्यादावपिएवमेवनभविष्यतिनहिअंतवद्भावेनप्रातिपदिकत्वेसत्यपिशक्ति
क्तिसंख्याप्राधान्यंहीयते। एवंममतेअसतिप्रातिपदिकग्रहणेनपुंसकत्वेनेरननपुंसकत्वेनेव्यएकादेशः सनपुंसकेह्रस्विग्रहणेनगृह्यतेइतिस्यात्त
संतः प्रातिपदिकग्रहणेनुमुख्यप्रातिपदिकग्रहणार्थत्वात्ऐतिदिष्टप्रातिपदिकत्वस्य ह्रस्वाभावइति। उत्तरार्थंचप्रातिपदिकग्रहणंइहवनायवनात्संवना
र्थंवनेभ्यइतिह्रस्वोनभवतिबहिरंगयोर्दीर्घत्वयोरसिद्धत्वात्। कांडीभूतमित्यत्रपूर्वंनपुंसकत्वेपिच्व्यांतदशायांअव्ययत्वेनालिंगत्वात् ह्रस्वाभावः॥ २२ ॥ ॥

अंतादिवद्भिर्यतिदि
द्वित्वर्थः अतोनवनाये
त्यापणिमर्णयविरोधः

© Dharmartha Trust J&K. Digitized by eGangotri

॥गोस्त्रियोरुपसर्जनस्य॥ ॥स्त्री इति प्रत्ययग्रहणमिति। अत्र हेतुमाह स्वरितत्वादिति। स्वरितेनाधिकार इत्यस्य च स्वरितत्वं प्रतिज्ञायते तत्र तदधिकारे यः स्त्व इत्ययमप्यर्थः इ
ह यस्त्रीग्रहणं स्मर्यते तेन स्त्रियामित्यधिकृत्य विहितानां टाबादीनां ग्रहणं भवति नार्थस्य नापि स्वरूपस्य। क्तिनादीनां तु ह्रस्वभाविनामभावात् अग्रहणं। उपसर्जनग्रहणं तयोर्वि
शेषणमिति। प्रत्येकं संबध्यते तु ह्रस्ववचनेन भवति। तो गोरुपसर्जनस्योपाधिः स्त्रीप्रत्ययान्तस्येति पाठः। पारिभाषिकं त्वत्रोपसर्जनं ग्रहणेन च स्त्रीप्रत्ययमात्रस्य पारिभाषिको
पसर्जनत्वं संभवः। ताभ्यामिति उपसर्जनेन गोशब्देन स्त्रीप्रत्ययान्तेन च। तदन्तात्तदन्तविधिर्विज्ञायते तदा उपसर्जनस्य गोशब्दस्य स्त्रीप्रत्ययान्तस्य च प्रातिपदिकस्य ह्रस्व इ
त्यर्थः स्यात् ततश्च गोकुलं राजकुमारीपुत्र इत्यत्रापि स्यादिति भावः। इह च कुमारीपुत्र इत्यप्रातिपदिकत्वादेवाप्रसंगः। उपसर्जनस्त्रीप्रत्ययान्तान्तस्येति पाठः। उपसर्जनं यत्स्त्री
प्रत्ययान्तं तदन्तस्येत्यर्थः। यदि तु लौकिकेनोपसर्जनेन स्त्रीप्रत्ययमात्रे विशेष्यते [illegible] जेन प्रातिपदिकस्य तदन्तविधिर्ज्ञापेत उपसर्जनं यः स्त्रीप्रत्ययस्तदन्तस्य प्रातिपदि
कस्येति तन्नो हरीतक्यः फलानीत्यत्रापि स्यात् स्त्रीप्रत्ययार्थस्य फलं प्रत्युपसर्जनत्वात् ह्रस्वता तेन प्रातिपदिकत्वाच्च अतएवमेवाश्रयणीयं स्त्रीपं स्त्रीप्रत्ययान्तप रत्वात्स्त्रीप

॥गोस्त्रियोरुपसर्जनस्य। प्रातिपदिकस्येति वर्त्तते गो इति स्वरूपग्रहणं स्त्री इति प्रत्ययग्रहणं स्वरितत्वात्। उपसर्जनग्रहणं तयोर्विशेषणं।
गोरुपसर्जनस्य स्त्रीप्रत्ययान्तस्योपसर्जनस्येति। ताभ्यां प्रातिपदिकस्य तदन्तविधिः। उपसर्जनगोशब्दान्तस्य उपसर्जनस्त्रीप्रत्ययान्तान्तस्य च प्रा
तिपदिकस्य ह्रस्वो भवति। चित्रगुः। शबलगुः। स्त्रियाः। निः कौशाम्बिः। निर्वाराणसिः। अतिखट्वः। अतिमालः। उपसर्जनस्येति किं। राजकुमारी॥ स्व

मुपसर्जनं तदन्तस्य प्रातिपदिकस्येति। निष्कौशाम्बिरिति कौशाम्बीत्येकविभक्तिरुपसर्ज ॥रितत्वं किं। अतितन्त्रीः। अतिलक्ष्मीः। अतिश्रीः॥
नं स्त्रीप्रत्ययान्तं तदन्तं समासप्रातिपदिकं। अथेह कथं ह्रस्वत्वं अतिराजकुमारिरिति यावता कुमार्या ह्यानङ्गीभूतहितो न तु राजकुमार्याहात। सत्यं अनुपसर्जनी स्त्री
प्रत्ययेतदादिनियमो नास्ति। अथ गोशब्देन स्त्रीप्रत्ययान्तेन च प्रातिपदिकस्य तदन्तविधौ सत्यपि गोकुलं राजकुमारीपुत्र इत्यत्र कस्मान्न भवति यावता येन विधिस्तदन्त
स्येत्यत्र स्वं रूपमित्यनुवर्त्तते तदाश्रयेन तदन्तविधिः ततस्वरूपस्यापि ग्रहणेन भाव्यं। एवं तर्हि गोशब्देन प्रातिपदिकस्य विशेषणासामर्थ्यात् केवलस्य न भवति अन्य
था गोशब्दस्यैवोपसर्जनस्य ह्रस्वं विदध्यात्। येन विधिस्तदन्तस्येत्यत्र वा स्वं रूपमिति निवर्त्यं [illegible] पदेशिवद्भावोपि प्रातिपदिके नास्ति। राजकुमारीपुत्र इत्यत्र तु प्राधा
न्यः राजकुमार्या यमप्युपसर्जनं सति संभवे न्याय्यमेवाप्रधानमुपसर्जनमिति प्रधानं चापेक्ष्याप्रधानं भवति स्त्रीप्रत्ययान्तस्य च प्रातिपदिकत्वं समासमन्तरेणानुपपन्नं समा
समासश्चावयवद्वयात्मकः रूपं चात्र संनिहितं प्रधानमप्रधानमिति तत्रैवं विज्ञायते यः पततस्त्रीप्रत्ययान्तान्तं समासप्रातिपदिकं तदन्तं भक्तिमेवापेक्ष्य स्त्रीप्रत्ययान्तस्याप्रा
धान्ये सति इह तु तत्रान्तर्भक्तिं पुत्रमपेक्ष्योप्राधान्यमिति न भवति ह्रस्वः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्यमहस्यादि। श्रयमुतं तावः स्त्रीप्रत्ययो विहितः तदंतस्येत्यर्थः। बहुश्रेयसी। नि प्रशस्यश्रः ङीप् बहुश्रेयस्यो सेतिबहुव्रीहिः नद्यतश्चेति कपश्येयसश्चेतिप्रतिषेधः पुंस्यपि सो हल्ङ्याब्भ्य इति लोपः। बहुव्रीहेरिति किं। अतिश्रेयसिः॥ लुक इति॥ ॥ स्त्रीग्रहणमनुवर्त्तते इति। ननु गोग्रहणमनुवर्त्ततः प्रत्ययादर्शनस्य लुक् संज्ञा विधानात् गोश्च स्य चासुत्वन्नत्वात् सुतन्निपक्षेप्याश्रित त्वात। उपसर्जनस्येति चेति। अनुवर्त्तत इत्यपि सते। लौकिकं चात्रोपसर्जनं गृह्यते न शास्त्रीयं। एवं गोह्रस्वत्वे प्राप्त इति किं चित्स ग्रुतेतत्रकं चिदिति शेषः पूर्वसूत्रे हि शास्त्रीयमुपसर्जनं गृहीतं तस्यावकाशः यत्रनतद्धितलुक् निषेधो हिं विदिरितिअस्यावकाशः यत्रशास्त्रीयमुपसर्जनं आमलकादि

इत्यसो बहुव्रीहेः प्रतिषेधोवकाशः। बहुश्रेयसी। विद्यमानश्रेयसी॥ ॥लुक इति लुकि॥ ॥स्त्रीग्रहणम नुवर्त्तते। उपसर्जनस्येति च। पूर्वेण ह्रस्वत्वे प्राप्ते लुग्विधीयते॥ ॥ ४९ ॥ ॥ ॥श्री॥ ॥

नियत्रतु शास्त्रीयमुपसर्जनं तद्धितलुक् पथ्यापं चेदं इति अत्र हि समासार्थेनानाविभक्तिकं पीदृशीसेकविभक्तिकमिति अस्योपसर्जनत्वं तत्रोतयप्रसंगे परत्वाद् यमेव लुक् ह्रस्वं बाधत इत्यर्थः। केचित्समासादेव ग्रंथात् पूर्वसूत्रे पि लौकिकस्योपसर्जनस्य ग्रहणं मन्यंते तेषां हरीतक्यः फलानि इत्यत्र लुग्विषये ह्रस्वप्रसंग इत्युक्तं। स्या देवं लुपि युक्तवदिति शब्दार्थयोरपातिदेशः प्रकृत्यर्थस्य पाल्लिंगं पश्चात्तदभिधायाप्रत्ययः तयोर्द्वयोरतिदेशः तत्रोपदेशिकस्य ह्रस्वत्वस्यातिदेशिकस्यावकाशं भवि ष्यतीति। यद्येवं युवतिरिव पुरुषः लुपमनुष्ये युवतिः हो तिशब्दो ऽश्रयेयातं जस्मालुको गाप्रावो नादिति लुप्प्रसाव्यानेन वा त्रय परिहारो वाच्यः शास्त्रीयं वोपसर्जनं ग्रा ह्यं ग्रंथस्य च समाप्तान्त एवार्थः॥ ॥४९॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अमानुष्ये शालुकापीतीपर्णीसंभवात् लुकीति सप्तमी त्याह लुकि सतीति। पंचेन्द्र इति निर्दिष्टेतार्थे इति समासः सास्य देवतेत्यण्। द्विगोर्लुगनपत्ये इति लुक्। इन्द्रवरुणेत्यादिना विहि
तस्य ङीषोऽनेन लुक् संनियोगविशिष्टानामन्यतराभाव इति आनुको निवृत्तिः। पंचशष्कुल इति। तेन क्रीतमित्यर्थे यस्य ठकोऽध्यर्द्धपूर्वेति लुक्। आमलकमिति। नित्यं वृद्धशरादिभ्य इति मय
ट् फले लुक्। बदरी कुवलीशब्दाभ्यां अनुदात्तादेश्चेत्यञ्। शष्कुल्यादयो गौरादिङीषंताः। अवंतीत्यादि। अवंतीकुंतिशब्दाभ्यां जनपदे वृद्धेत्कोसलाजादाञ्ञ्यङ्। कुरोः कुरुनादिभ्यो ण्यः।
स्त्रियामवंतीति लुक्। कुरुशब्दात् ऊङुतः इत्यूङ्। इतराभ्यामितो मनुष्यजातेरिति ङीष्। अत्रापत्यलक्षणा जातिः स्त्रीप्रत्ययांतेन प्राधान्येनाभिधीयते॥ ॥इद्गोण्याः॥ ॥पंचगोणिरिति॥
गोणीशब्दः परिमाणवचनः आवपनवचनश्च तत्राद्यात् आर्हादगोपुच्छेति ठञ् द्वितीयादार्हीयष्ठक् तयोः अध्यर्धवल्लुक्। इदिति योगविभाग इति। इहेद्ग्रहणमनर्थकं गोण्या इत्येवास्तु ह्रस्व इत्येव लु

॥तद्धितलुकि सति स्त्रीप्रत्ययस्य उपसर्जनस्य लुग्भवति। पंचेन्द्राण्यो देवता अस्य पंचेन्द्रः। दशेन्द्रः। पंचभिः शष्कुलीभिः क्रीतः पंचश
ष्कुलः। आमलक्याः फलं आमलकं। कुवलं। बदरं। तद्धितग्रहणं किं। गार्ग्याः कुलं। लुकीति किं। गार्गीत्वं। उपसर्जनस्येत्येव। अवं
ती। कुंती। कुरूः॥ ॥इद्गोण्याः॥ ॥पूर्वेण लुकि प्राप्ते इकारो विधीयते। गोण्याः तद्धितलुकि सति इकारादेशो भवति। पंचति
गोणीभिः क्रीतः पटः पंचगोणिः। दशगोणिः। इदिति योगविभागः। पंचभिः सूचीभिः क्रीतः पंचसूचिः। दशसूचिः। स च एवंविषय एव

कस्त्रकवचनसामर्थ्यात् न तु हानिः तदेतदिद्ग्रहणमेव लिंगं योगविभागस्य। यदि योगविभागः क्रियते सर्वत्रेत्वं प्राप्नोति तत्राह स चेति। यदि सर्वत्र स्यात् गोण्या ग्रहणमनर्थकं स्यादि
ति भावः। ननु तद्धितलुकि लुगप्रयुक्तः इत्वं चेति तयोर्विकल्पप्रसंगे नित्यमित्वमेव यथा स्यादित्येवमर्थं गोणीग्रहणं स्यात्। न त्वकथं तयोर्विशिष्टविषयत्वं योगविभागस्य। उच्यते एक
एव तावद्योगः सूत्रकारेण पठितः तस्मात् यदि विभागसंस्कारोऽप्यनुवर्तते अविभक्तश्च योगो विशिष्टविषयः इद्ग्रहणसामर्थ्यात् क्रियमाणो विभक्तो विशिष्टविषय एव क
ल्प्यते अत एव योगविभागादिष्टसिद्धिरिति स पुनर्विशिष्टो विषयो व्याख्यानादेव सेयः। न परकाणां तत्कालार्थं दीर्घस्य दीर्घो मा भूत् तद्वचनं तु लुग्ग्रहणबाधनार्थं स्या
त् असति च तकारे प्राप्तप्रतिषिद्धे इकारागम प्रतिप्रसूतः स्यात् न त्वपूर्व इकारो विहितः स्यात् इति भाष्यमानत्वमेव न स्यात्॥ ॥७ ७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

लुपि युक्तवत्॥ ॥ अभिधेयवल्लिंगवचनयोः प्राप्तयोः आरम्भः। अभावरूपस्य लुपो लिंगसंख्यातिदेशासंभवादाह लुपीति लुप्संज्ञेत्यादि। कश्चित्तु सप्तम्यंतो लुप्श
ब्द उपादीयते तत्रापि प्रकृत्यर्थ एवाभिधानात् विशेषः सप्तम्युपादानं तु सूत्रे पठितत्वात् षष्ठ्या मन्तविति मतुब्लुप्यत इति। युक्तवदिति निष्ठाप्रत्ययेनेत्यादि। अत्र हेतुमाह सहीति। पुन
क्तिसंबन्धाति यद्यपि प्रत्ययार्थोपि प्रकृत्यर्थमात्मना युनक्ति तथापि न तस्येह ग्रहणं आनर्थक्यात् न हि तस्यैव लिंगसंख्ये तस्यैव विधातव्ये। अथवेत्यादि। पूर्वं युनक्तेः योगः अप
स क्तवत्वं तस्य षष्ठीसमासोऽत्र दर्शितः इदानीं तु तस्यैव धातोः क्तान्तस्य वृत्तिनिर्देशः असमासस्त्वेति प्रदर्शयिते युक्तः प्रकृत्यर्थ इति। अत्र हेतुः प्रत्ययार्थेन संबद्ध इति। असि
न्नपि पक्षे पूर्ववदेव प्रत्ययार्थस्याग्रहणं। सप्तम्यर्थे वतिरिति। लुपीति प्रातियोगिनि सप्तमी निर्देशात् सप्तम्यर्थे वर्तमानात् विकार्थे वतिरित्यर्थः। व्यक्तिवचने अभिर्भावादि

॥ लुपि युक्तवद्व्यक्तिवचने॥ लुपीति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते। तत्र लुपि युक्तवत् व्यक्तिवचने भवतः। युक्तव
दिति निष्ठाप्रत्ययेन क्तवतुना प्रकृत्यर्थ उच्यते। स हि प्रत्ययार्थमात्मना युनक्ति। तस्य युक्तवतो व्यक्तिवचने लुवर्थे विधीयेते।
अथवा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्धस्तस्मिन्निव व्यक्तिवचने लुबर्थे भवतः। सप्तम्यर्थे वतिः। व्यक्तिवचने इति च लिंगसं
ख्ययोः पूर्वाचार्यनिर्देशः। तदीयमेवेदं सूत्रं। तथा चास्य प्रत्याख्यानं भविष्यति। तदशिष्यं संज्ञाप्रमाणत्वादिति॥ २४ ॥

केप्यर्थे वर्तते वचनग्रहणेपि भीमसेनो भीम इतिवत् एकवचनादिशब्दानां एकदेशप्रयोगोपि संभाव्यते तस्मिंस्तु अग्रहणे पंचाला नो निवास इति वाक्यावस्थायां षष्ठीद्वि
नाम्नस्य एवातिदेशः स्यात्। कुरुपंचाला इति च द्वंद्वे वाक्यावस्थायां मतिदिष्टस्य वचनस्य लुकि समुदायात् बहुवचनं न स्यात् ततस्तत्संप्रत्ययो माभूदिति व्यक्तिव
चने इति चेत्यादि। पूर्वाचार्यनिर्देश अयं योगकारणमाह तदीयमेवेत्यादि। कुत इत्यत आह तथा चेत्यादि। न हि स्वकृतमेव तत्त्वं प्रत्याचष्टे इति तु [illegible] विषयत्वो
पि संबध्यते [illegible] तमिति मामोदिति भावः २४॥

© Dharmartha Trust J&K. Digitized by eGangotri

।पंचालाः क्षत्रियाः इति। पंचालस्यापत्यानि बहूनि जनपदशब्दात् क्षत्रियादञ् तेन तद्राजाः तद्राजस्य बहुषु। तेषां निवासो जनपद इति। अस्यैव समासेन पंचाला इत्यनेन संबंधः
तस्य निवास इत्यणो जनपदे लुप्। कुरव इत्यादि कुरवः क्षत्रिया इत्यादिकं तु सर्वानुसारेण गम्यमानत्वान्नोक्तं। कुरुशब्दात् प्रत्ययः कुरुनादिभ्यो ण्यः। मगधादिभ्योऽपि अणोचेत्यण
ओषेः ऐर्वत्। लुपीति किमिति। तद्धितेनुवृत्तेः साहचर्यादर्थमुपस्थापयिष्यतीति प्रश्नः। लुकि माभूदिति। अपत्यात तद्धितलुकीत्यनुवृत्तेः तत्रैव स्यादिति भावः। लवणाः सूप
इति। संसृष्टे लवणाल्लुक्। व्यक्तिवचने इति किमिति। युक्तवदिति कोतादतिरेकोऽतिदेक्ष्यते षष्ठीनिर्देशो वा कस्य तदितिमन्यते। शिरीषाणामदूरभव इत्यादि। अहिणादि
षु वराहादिषु कुमुदादिषु शिरीषशब्दस्य पाठात् वुञ्छणादिसूत्रेण वुञादयोऽस्मात् भवंति तेषां च विशेषविहितत्वाल्लुपा न भवितव्यमेषां औत्सर्गिकोऽपि तत्र दृश्यत इति व

॥व्यक्तिः स्त्रीपुंनपुंसकानि वचनमेकत्वद्वित्वबहुत्वानि। पंचालाः क्षत्रियाः पुंलिंगाः बहुवचनविषयाः तेषां निवासो
जनपदः यथा तेषु क्षत्रियेषु व्यक्तिवचने तेतद्वज्जनपदेऽपि भवतः। पंचालाः। कुरवो मगधाः। मत्स्याः। अंगाः। वंगाः। सुह्माः। पुंड्राः।
लुपीति किं। लुकि माभूत्। लवणः सूपः। लवणा यवागूः। लवणं शाकं। व्यक्तिवचने इति किं। शिरीषाणामदूरभवो ग्रामः शिरीषाः तस्य
वनं शिरीषवनं। विभाषौषधिवनस्पतिभ्य इति णत्वं न भवति॥ ॥ ॥श्रीरामचंद्राय नमः॥ ॥४॥ ॥

स्पतिनस्य वणादिस्त्रीःना लुप्। असति व्यक्तिवचनग्रहणे शिरीषेषु यद्वनस्पतित्वं तस्यापि ग्रामेऽतिदेशः स्यात् ततश्च णत्वं प्राप्नोति णत्वविधौ च फलीवनस्पतिरिति नाश्रीयते विशे
षः अत एव वृक्षत्वं तत्रातिं भवत्येव शिरीषवणमिति। ननु च ग्रामेऽपि वर्तमानो गुणाभूतं वनस्पतित्वमाहेति णत्वप्रसंगः न चात्र किंचित्प्रधानाश्रयं कार्यमस्ति येन गुणः स्वका
र्यं नारभेत। न च व्यक्तिवचनग्रहणे सत्येवं यद्यपि असति हि तस्मिन् प्रकृत्यर्थगतस्यातिरेकस्यातिदेशात् षष्ठीप्रसज्येत सति तु तस्मिन् संख्यामात्रातिदेशोऽतिरेकसहिता
याः संख्याया अनतिदेशात् नायं दोषः। एवं तर्हि णत्वविधौ प्रधानस्येति ग्रहणात् अत्र तदभावः॥ ॥७॥ ॥४ ७॥ ॥ ७॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का०प०२१
९५

हरीतक्यः फलानीति। हरीतकीशब्दात् गौरादिङीबन्तात् अनुदात्तादेश्चेत्यञो हरीतकादिभ्यश्चेति लुप् अत्र व्यक्तिरेव पुंस्त्ववद्भवति वचनं त्वभिधेयवदेवा खलतिकं वनानीति।
खलतिकशब्दो वरणादिः समासे उत्तरपदस्य बहुवचनस्य लुप् यः। नियमार्थमेतत्। लुबर्थस्य बहुत्वातिदेशः समासे एव हि भवति उत्तरपदस्येवेति मधुरापंचालाः इह न भ
वति पंचालमधुरे इति। बहुवचनस्येति वचनाद्विलातिदेशः पूर्वपदस्यापि भवति गोदौ च ग्रामः मधुरा च गोदमधुरा इति॥ ॥विशेषणानां च॥ ॥पूर्वप्रकृत्यर्थग

हरीतक्यादिषु व्यक्तिः। हरीतक्यः फलानि। हरीतक्यः फलानि। खलतिकादिषु वचनं। खलतिकस्य प
र्वतस्यादूरदृष्टताः। बहुमाल्यफलाः गोदौ रमणीयौ। बहून्नौ। बहुक्षीरघृतौ। बहुमाल्यफलौ। अजा
+भवानि वनानि खलतिकं वनानि॥ ॥विशेषणानां चाजातेः॥ ॥लुपीति वर्त्तते। लुपीति व
र्त्तते। लुबर्थस्य यानि विशेषणानि तेषामपि व्यक्तिवचने भवतः जातिं वर्जयित्वा। पंचालाः रमणीयाः
बहून्नाः बहुक्षीर+ तेरिति किं। पंचालाः जनपदः। गोदौ ग्रामः॥ २५ ॥ ॥छ॥ ॥

पाम०
९५

तयोर्लिंगसंख्ययोर्लुबर्थेऽतिदेशः। इतो न तु लुवन्तेः शब्दः इति तत्र व तेषामानानां विशेषणानां सिद्ध एव युक्तवद्भावः वचनं तु जातिप्रतिषेधार्थं। अथ व्यधिकरणानां
विध्यर्थं कस्मान्न भवति ब्रह्मदत्तस्य पंचालाः इति तत्पुरुषः समानाधिकरणस्य ततः समानाधिकरणानुवृत्तेः गोदाविति। गोदौ ह्रदौ वरणादिः ग्रामजनपदशब्दो जाति
वाचिनौ ताभ्यां लुबर्थो जातिरूपेणोच्यते॥ २५॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

जात्यर्थस्य चेत्यादि। जातिरूपस्य चार्थस्य न जातिवाचिनः शब्दस्येत्यर्थः। तेन किं सिद्धं भवतीत्याह तेनेति। ह्रासह्रलोनैतद्दर्शयति जातौ प्रकृतायां यद्विशेषणमुपनिपतितं तज्जातिमे
वहाभ्राद्धिरिनहिनद्वारेणानुलुबर्थो विशिष्टः प्रतीयते तत्र विशेषविशेषविशेष्यभावं प्रतिकान्नचारादमणीयादीनां जात्युपनिपाते युक्तवद्भावो न भवति लुबर्थो यन्निपाते तु भवति।
यद्येवं नार्थिने न लुयोगत्राप्ययं प्रकारो दृश्यते यथा बदरी सूक्ष्मकंटका मधुरा वृक्ष इति मधुरादीनां वृक्ष्युपनिपाते तल्लिंगसंख्यायोगो हस्तोपनिपाते हस्त लिंगसंख्यायोगो हस्तस्य च नियत

॥ जात्यर्थस्य चायं युक्तवद्भावप्रतिषेधः। तेन जातिद्वारेण यानि विशेषणानि तेषामपि युक्तवद्भावो न भवति। पंचालाः जनपदो रमणीयो बह्वन्नः। गोदौ ग्रामो रमणीयो बह्वन्नः इति। मनुष्यलुपि प्रतिषेधो वक्तव्यः। चंचाभिरूपः। वध्रिका दर्शनीयः॥ ॥ ॥ ॥ ॥ ॥ ॥

लिंगता। एवं तर्हि यत्तत्र तत्रोच्यते गुणवचनानां हि शब्दानां आश्रयतो लिंगवचनानि भवंतीति तदनेन क्रियते विशेषणानां गुणवचनानामित्यर्थः। युक्तवद्व्यक्तिवचने आश्र
यवल्लिंगसंख्ये इत्यर्थः। पदानुजातिविशेषणांतरानेनेति। परतंस्काप्रत्ये चैव वाचनिकमेतत् परे हि यद्यंतरनिरपेक्षे संक्रियमाणे लिंगसर्वनाम नपुंसकं वस्त्वंतरानपेक्षमे
कत्वं च प्राप्नोतीति शुक्लं पट इति प्राप्ते भाविनो ह्यर्हिंगत्याश्रयस्य लिंगसंख्ये विधीयेते। वाक्यसंस्कारे स्वपमनुवाद एव आश्रयविशेषनिष्ठत्वेन विशेषणानामपि तल्लिंग
संख्ययोः सिद्धत्वात्। मनुष्यलुपीति। मनुष्यलक्षणे लुबर्थे विशेषणानां प्रतिषेधो लुबंतस्य तु भवत्येव। चंचाभिरूप इति। तृणमयः पुरुषश्चंचा तत्सदृशो मनुष्यश्चंचा
संज्ञायामिति कन् लुम्मनुष्ये इति लुप्। चर्मविकारविशेषो वध्रिका॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तदशिष्यं॥ ॥संज्ञाप्रमाणत्वादिति॥ प्रमाणानां हि प्रमाणत्वं प्रतिपादकत्वं स्वार्थप्रत्यायनलक्षणं एतच्च सर्वेषामेव शब्दानामस्तीति न संज्ञाशब्दानामेव उच्यते नेदं चेदं तत्र वि-
शेषो विज्ञापत इत्याह संज्ञाशब्दा हीत्यादि। ये संज्ञाशब्दाः तेनानालिंगसंख्या अपि स्वाभिधेयगतलिंगसंख्यापेक्षया भिन्नलिंगादयस्त्वा अपि प्रमाणं स्वार्थप्रतिपादकास्त इत्यर्थः।
भवतु संज्ञाशब्दानां एवंविधं प्रमाणत्वं किमायातं यौगिकानां पंचालादिशब्दानामित्यत आह पंचालावरणा इत्यादि। तद्ध्ने नयत्तं धर्मितं हेतोरुक्तं। सर्वं तु दृष्टान्तगतो
हेतुर्व्याख्यातः। दृष्टान्तमाह प्रयेति। पुत्रवद्दावमाभमाणो पिता त्रकंविधत्वं करोतीति तदेवमयं शब्दस्वभाव एवाश्रयणीयः कश्चिद्धि शब्दः स्वभावात् समुदायस-
ख्यामभिधत्ते कश्चिदवयवसंख्यां यथा वनं वृक्षा इति एवं लिंगेपि द्रष्टव्यं॥ ॥लुब्योगा॥ ॥किं कारणमिति॥ निमित्तकारणहेतुषु सर्वासां प्रायदर्शनं इति प्रथमादि

॥तदशिष्यं संज्ञाप्रमाणत्वात्॥ तदिति प्रकृतं युक्तवद्भावलक्षणं निर्दिश्यते तदशिष्यं न वक्तव्यं कस्मात् संज्ञाप्रमाणत्वात् संज्ञाशब्दा हि नाना-
लिंगसंख्याः प्रमाणं पंचाला वरणा इति च नैते योगशब्दाः किं तर्हि जनपदादीनां संज्ञा एताः तत्र लिंगं वचनं च स्वभावसिद्धमेव। नयत्नप्र-
तिपाद्यं यथा आपो दाराः गृहाः सिकता वर्षा इति॥ ॥लुब्योगाप्रख्यानात्॥ ॥लुबप्यशिष्यः योयं जनपदे लुप् वरणादिभ्यश्-
चेति लुबुच्यते अयं न वक्तव्यः किं कारणं योगाप्रख्यानात्। न हि पंचाला वरणा इति योगः संबंधः प्रख्यायते नैतदुपलभामहे इह
योगान्नगरे वरणा इति। किं तर्हि संज्ञा एताः तस्मात् तत्र स्थानिवासः अदूरभवश्चेति तादृशौ नैवोत्पद्यते किं लुपो विधानेन २६ ॥

तीयागतथा च योगाप्रख्यानादित्युक्तोपपत्तिः योगो जनपदादेः क्षत्रियादिभिः संबंधः तस्याप्रख्यानादनुपलब्धेरित्यर्थः। तदाह नहीति एतदेव विवृणोति नैतदिति।
संज्ञा एता इति यद्यपि संज्ञाशब्दा अपि पंकजा दृष्येपेक्षितप्रवृत्तिनिमित्ताः संति तथापीह प्रकरणादनपेक्षितप्रवृत्तिनिमित्ता इति बोद्धव्यं। अत एवाह तस्मादत्रेत्यादिना
नु योगाप्रख्यानेपि निश्चितत्वस्यघते तथा केवला च संज्ञा यां वच्च लममरणा इतं इति। सत्यं यत्र रूपविशेषोस्ति। ननु च संज्ञाप्रमाणत्वादिति पंचालादिशब्दानां अयौगिकत्व-
मुपपादितं इति अर्थात् लुबपि प्रत्याख्यात एव किमनेनेति क्रियते। उच्यते। संज्ञाप्रमाणत्वादित्यनेन दृष्टान्तगतो हेतुः शब्देनोक्तः तस्यैव तत्पर्यायपंचालादिगतत्वेन प्रतीयमान-
स्यासिद्धिमाशंक्य योगाप्रख्यानादिति यौगिकत्वमपाकुर्वन् हेतुमेव समर्थयते २६ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।योगप्रमाणे च।। ।।पंचालादयस्तत्रादि। एतर्ह्ययोगस्याप्रतिभास उक्तः यस्तु तमवजानीते तं प्रत्यनेनानिष्टमापाद्यत इति दर्शयति योगप्रमाणे हीति। हि शब्दं हेत्वर्थे प्रयु
ञ्जानः सूत्रे चशब्दो हेतौ प्रयुक्त इति दर्शयति। एतदेव व्याचष्टे यदीति। अदर्शनमप्रयोगः स्यादिति दर्शनं ज्ञानं तत्तु प्रयोगस्योच्चारणस्य फलं अतः फलाभावेनेह त्वभावो
विवक्षितस्तद्व्याचष्टे। योगनिमित्तको हि योगाभावेन प्रयुज्यते यथा दण्डीत्यादय इति भावः। ननु भूतपूर्वमपि निमित्तं भवतीति तत्कथं संप्रति विशरणाद्योगाभावेऽपि भूतपूर्वः स एव नि
मित्तं भविष्यति। नैतदेवं भूतपूर्वनिमित्तो हि व्यपदेशो गौणः स्यात् न च गौणः परान्तरस्य प्रयोगमन्तरेणाप्रतीयमानत्वात्। किं च यौगिकत्वे पुरुषान्तरसंबंधनिबंधनोऽपि
व्यपदेशः कस्मान्न प्रवर्त्तते विपर्ययो वा कस्मान्न भवति देशसंबंधाद्राजसु पंचालशब्द इति अतो शब्दादिशब्दवदनेकार्थो वायं पंचालादिशब्दः प्रधान।। ।।अर्थवचनमि

।।योगप्रमाणे च तदभावेऽदर्शनं स्यात्।। पंचालादयः संज्ञाशब्दा न योगनिमित्ता यत्पुनरुक्तं तत्रावश्यमेवाभ्युपगन्तव्यं योगप्रमा
णे हि तदभावेऽदर्शनं स्यात् यदि पंचालादिशब्दो योगस्य प्रमाणं योगस्य वाचकः स्यात् ततस्तदभावे दर्शनमप्रयोगः स्यात् इ
दृश्यते च संप्रति विनैव क्षत्रियसंबंधेन जनपदेषु पंचालादिशब्दः ततो न वयं यदेनायं योगनिमित्तकः किं तर्हि रूढिरूप एव तत्र
प्रवृत्त इति।। ।।प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्।। अशिष्यमिति निवर्त्तते प्रधानं समासे किंचित्पदं प्रत्ययस्तद्ध
दादिः ताभ्यामर्थवचनमर्थाभिधानं अनेन प्रकारेण भवतीति तत्पाणिनिराचार्यः प्रत्याचष्टे अशिष्यमेतत् अर्थस्यान्य
प्रमाणत्वादिति। अन्य इति शास्त्रापेक्षया लोको व्यपदिश्यते। शब्दैरर्थाभिधानं स्वाभाविकं न पारिभाषिक ।।

तिकर्मणि षष्ठ्याः समासः। ननु च प्रधानप्रत्यययोः कर्तरि निर्देशादुभयप्राप्तावित्यनेनात्र षष्ठी ततश्च कर्मणि चेति निषेधः प्राप्नोति। नैष दोषः प्रधानप्रत्यययो
रत्र करणत्वं विवक्षितं कस्तर्हि कर्ता। पुरुषः समुदायो वा प्रधानोपसर्जनयोः प्रकृतिप्रत्यययोश्च। एतदुक्तं भवति प्रधानप्रत्ययाभ्यां करणाभ्यां पुरुषेण समु
दायेन वा यदर्थस्य वचनमिति अर्थवचनं कर्तृकरणे कृता बहुलमिति बहुलग्रहणात्कारकशब्दस्यापि ग्रहणमिति समासः। ननु च प्रत्ययोऽपि प्रत्यये स्व
या प्रधानं कस्माद्भेदेनोपादीयते। उच्यते प्रकृतिः प्रत्ययार्थं प्रति विशेषणं तया त्वार्थः संभिद्यत इति सिद्धं भवति तदा प्रत्ययस्य प्राधान्यं तदेवेदानीं परिभाष्यत इति
पूर्वाचार्यैस्तावत्प्रत्ययो भेदेन निर्दिष्टः प्रधानोपसर्जने प्रकृतिप्रत्ययाविति ततश्च तल्लक्षणनिराकरणे प्रत्ययोऽपि भेदेनोपादेयः।। ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

अशक्यत्वात् इति। अशक्यत्वमनंतप्रकारत्वात् बहुव्रीह्यादिनान्यपदार्थ उच्यते लक्षणयोः धर्म इति समाहारः क्वचित्प्रधानयोरेव समभिधानं प्रधानयोर्धर्माविति वा
र्त्तिकेषु च प्रकृतिप्रत्यययोः प्रत्ययार्थं सहब्रूतः प्राधान्येन इति तथाप्याख्यातेषु क्रिया प्रधानमाख्यातमिति तथा कर्त्रादिषु कर्त्रादीनां प्रत्ययार्थानां शक्तिमद्
द्रव्यं प्रधानमुच्यते इति क्रियाभेदे शब्दांतरावगमः शायकं पश्चेति विभक्तिषु शक्तिप्राधान्यमित्याद्यनंतप्रकारमप्रधानाभिधानमशक्यं परिभाषितुमिति लो
कत एवार्थावगतिः। कथमेतदित्याह ये ऽपीत्यादि॥ कालोपसर्जने॥ ॥अर्थस्यान्यप्रमाणत्वादिति कथं पुनरयमत्र हेतुर्लभ्यत इत्याह। तुल्यश

प्रशक्यत्वात् लोकत एवार्थावगतेः ये ऽप्याचक्षते ते ऽपि राजपुरुषमानयेत्युक्ते राजविशिष्टं पुरुषमानयंति न रा
जानं नापि पुरुषमात्रं। उपगुमानयेत्युक्ते उपगुविशिष्टमपत्यमानयंति नोपगुं नाप्यपत्यमात्रं। तस्मात् लोकतो ऽर्थः सिद्धः
किं तत्र यत्नेन॥ ५७॥ कालोपसर्जने च तुल्यं॥ अशिष्यमिति वर्त्तते। कालोपसर्जने चाशिष्ये। कस्मात् अर्थस्यान्यप्रमाणत्वा
त्। तुल्यशब्दो हेत्वनुकर्षणार्थः। अशिष्यविशेषणं चैतत्। कालोपसर्जने च तुल्यमशिष्ये भवतः। इह पूर्वे वैयाकरणाः का
लोपसर्जनयोः परिभाषां कुर्वंति। आ न्याय्यादुत्थानादा न्याय्याच्च संवेशनात् एषो ऽद्यतनः कालः। अपरे पुनराहुः अहरु
भयतो ऽर्द्धरात्रमेषो ऽद्यतनः काल इति। तथोपसर्जनपरिभाषां कुर्वंति। अप्रधानमुपसर्जनमिति। तदस्माभिर्न शिष्यते। प्र
माणत्वाल्लोकतो ऽर्थावगतेः ये ऽप्याचक्षते ते ऽपि कुर्वंत्विदमस्माभिः अद्य कर्त्तव्यमिदं श्वः कर्त्तव्यमिति नैवं
प्रत्याययते। तथोपसर्जनं स्वपमत्र गृहे यामे वा उपसर्जनं अप्रधानमिति गम्यते। यस्माल्लोकतो ऽर्थः सिद्धः किं तत्र यत्नेनाप्येवं
पूर्वसूत्र एव कालोपसर्जनग्रहणं कस्मान्न क्रियते किमर्थो योगविभागः। प्रदर्शनार्थः। अन्यदप्येवंजातीयकमशिष्यमि
ति। तथा च पूर्वाचार्याः परिभाषंते मत्वर्थे बहुव्रीहिः पूर्वपदार्थप्रधानो ऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः अन्यपद

दो हेत्वनुकर्षणार्थ इति। कथमेतदित्याह। अशिष्यविशेषणं चैतदिति चशब्दो हेतो। आ न्याय्यादिति। रात्रेश्चतुर्थो विभक्तः पाः पश्चिमेन याप्यं स्नाणदुत्थानं स्या
द्वीपत्वात् प्रथमे यामे गते च संवेशनं। अत्र लक्षणे राज्ञेर्मध्ये यामद्वयं नाद्यतनं। द्वितीये तु दृषि। उभयतो ऽर्द्धरात्रमिति बहुव्रीहिः। कृतत्वो दिवसः आगामिन्या
रात्रेः पूर्वार्द्धं नातीतायाः पश्चिमार्द्धेन च युक्त इत्यर्थः। यद्येवमिति। यद्यर्थस्यान्यप्रमाणत्वादित्ययमेवात्रापि हेतुरित्यर्थः। पूर्वसूत्र एवेति। एवं हि तुल्यमिति

© Dharmartha Trust J&K. Digitized by eGangotri

॥जात्याख्यायां॥ ॥जात्याख्यायामिति विषयसप्तमी एवमेकस्मिन्निस्यपि। व्यधिकरणे चैते सप्तम्यौ। जातिर्नामेत्यादिना सूत्रारंभस्य कारणमाह एकोर्थ इति। यद्यपि वैशेषिक-
परिभाषिता संख्या जातेर्न विद्यते तस्याः अधर्मत्वात् तथापि भेदग्रहणानुरूपा संख्या विद्यत एव। यथोक्तं हि शिप्रस्थ सुवर्णादिमूर्तिभेदाय कल्पते। क्रियाभेदाय कालस्तु सं-
ख्या सर्वस्य भेदिके ति। वैशेषिकास्तु व्यवहरंति पंच कर्माणि चतुर्विंशतिर्गुणा इति। जातेराख्येति। आख्याग्रहणमाख्याप्रत्यायने। एकस्मिन्नर्थ इति जात्याख्ये. बहुवचनश-
ब्दोयमन्वर्थो न पारिभाषिकः। उक्तं वचनेन बहूनां वचनं बहुवचनं तत्त्वायमर्थः। एकस्मिन्नर्थे बहूनामुक्तिर्भवतीति। सामर्थ्याद्बहुसंख्यायोगमात्रेव बहूनामिवोक्तिर्भवतीति। सर्वे

॥जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां॥ जातिर्नामायमेकोर्थः तदभिधाने एकवचनमेव प्राप्तमत इदमुच्यते जाते-
राख्यायामेकस्मिन्नर्थे बहुवचनमन्यतरस्यां भवति। जात्यर्थे बहुवत् भवतीति यावत्। तेन तद्विशेषणानामजातिश-
ब्दानामपि संपन्नादीनां बहुवचनमुपपद्यते। संपन्नो यवः। संपन्ना यवाः। संपन्नो व्रीहिः। संपन्ना व्रीहयः। पू-
र्ववया व्राह्मणः प्रत्युत्थेयः। पूर्ववयसो व्राह्मणाः प्रत्युत्थेयाः। जातिग्रहणं किं। देवदत्तो यज्ञदत्तः। आख्यायामिति किं। का-
श्यपप्रतिकृतिः काश्यपः भवत्ययं जातिशब्दो न त्वनेन जातिराख्यायते किं तर्हि प्रतिकृतिः। एकस्मिन्निति किं॥ ॥

वार्थः संपद्यत इत्याह जात्यर्थे बहुवद्भवतीति तेन किमिष्टं भवतीत्याह तेनेति। यदि तु जातिशब्दाद्बहुवचनं जसादि विधीयेत ततो विशेषणेभ्यः संपन्नादिभ्यो
न स्यात् तेषामजातिशब्दत्वादिति भावः। देवदत्त इति। यद्यपि जातिपदार्थवादिपक्षे सर्वत्राप्यवस्थाभेदानुगता जातिः शब्दवाच्या तथापीह सामर्थ्याद्भिन्नेष्वपि-
ड समवेता जातिराश्रीयत इत्यनतिदेशः। काश्यप इति। कश्यपशब्दाद्विदाद्यञ् तत इवार्थे संज्ञायां कन् लुमनुष्ये भवत्ययं जातिशब्द इति। गुणभूतायां गो-
त्रजातेरभिधानात्। न त्वनेन जातिराख्यायत इति। प्राधान्येनेति भावः। असत्यामप्यग्रो जातेर्वर्त्तमानत्वादित्यर्थः स्यात् तत्र यथाकाञ्चिदपर्यंताभिधानेपि ग-
वादिभ्योपि भवति एवमत्रापि स्यात् सति तु तस्मिंस्तत्प्रामर्थ्याज्जातिप्राधान्ये भवति॥

© Dharmartha Trust J&K. Digitized by eGangotri

व्रीहियवाविति। ननु च यथा काश्यां कोसलीया इति जनपदलक्षणो वुञ् न भवति तथा बहुवचनाद्बोऽत्र न भविष्यति। विषम उपन्यासः। जनपदवाचिनो वुञ्
विधीयते न च जनपदरूपः समुदायो वयवाम्या माम्प्ते अतो यत्स्वतं त्रं प्रातिपदिकं न तज्जनपदवाचि न तत्स्वतंत्रं प्रातिपदिकमिति कुतो वुञः प्रसं
गः अथ तु जातिप्रत्यायने विधिर्न जातिशब्दादिति स्यादेव प्रसंगः। संख्याप्रयोग इति। एकस्मिन्नेव बहुत्वातिदेशे क्रियमाणे एकशब्दप्रयोगोऽपि स्यादिति भा
वः। आश्रयमाणेऽप्येतस्मिन् गोत्वं व्रीहित्वमित्यादि शब्देनैव जातिरभिधानेन वायं विधिरिष्यते व्यक्तिपर्यन्ते त्वभिधाने जातिव्यक्त्योरस्त्यारात्स्य संबंध इति जा
तिरूपेण व्यक्तीनामभिधाने एकवचनं प्रसिद्धं व्यक्त्यात्मना तु जातेरभिधाने बहुवचनमिति नार्थो नेन॥ ॥अस्मदो द्वयोश्च॥ ॥अस्मद इति अभिधेयसंबंधे ष

॥व्रीहियवौ। संख्याप्रयोगे प्रतिषेधो वक्तव्यः। एको व्रीहिः संपन्नः सुभिक्षं करोति॥ ॥अस्मदो द्वयोश्च॥
॥अस्मद एकत्वे द्वित्वे च बहुवचनमन्यतरस्यां भवति। अहं ब्रवीमि। वयं ब्रूमः। आवां ब्रूवः। वयं ब्रूमः। सविशेष
णस्य प्रतिषेधो वक्तव्यः। अहं देवदत्तो ब्रवीमि। अहं गार्ग्यो ब्रवीमि। अहं पटुर्ब्रवीमि। युष्मदि गुरावेके
षां। त्वं मे गुरुः। यूयं मे गुरवः॥ ५८ ॥ ॥श्रीः॥ ॥छ॥ ॥श्री छ॥ ॥

ष्टीत्याह अस्मदो योऽर्थ इति। पंचम्यां तु तत्र वर्त्तमानस्य तिङः तस्य तस्मादिति भावः। एकत्वे द्वित्वे चेति। ननु चास्मच्छब्दः प्रत्यगात्मनि वर्त्तते स चैकत्वसंख्यायां द्वि
त्वयोगः एकमपि तस्या युक्तं विशेषणाभमभिचारात्। उच्यते। यदा न्यत्रात्मनात्मध्यारोप्यते अपर्मेक्ष्य द्विव्यत्वमेतिपदाद्यासदादी नि सर्वैर्नित्यमिति एकशेषः
क्रियते तदा संभवत्यनेकार्थत्वं अथ यत्रैवास्मच्छब्दो द्विवचनान्तः प्रयुज्यते तत्र कथं द्वित्वे कत्वविशेषावसायः। प्रकरणादाराच्छब्दस्यैव दूरांतिकयोः। अ
हमिति। इ. प्रथमयोरम्। त्वाहौ सौ। वयमिति। मपर्यंतस्य यूयवयौ जसि शेषे लोपः। आवामिति। युवावौ द्विवचने प्रथमायाश्च द्विवचने इत्यात्वं। सविशेष
णस्येति त्वं राजा वयमस्य प्रमितस्तु प्रत्यभिमानोन्ना मा इत्यत्रोक्ततत्वमेव विधीयते न च विधेयोऽयो विशेषणमिति अतिदेशो भवत्येव। युष्मदी

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥फल्गुनीप्रोष्ठ॥ ॥चकार इत्यादि केचिदाहुः ज्योतिषामावस्थिकी नक्षत्रता चन्द्रयोगे सति भवति अस्यदा तु ज्योतिष्वेव चन्द्रयोगस्य द्वयोः समुदित
योरिति द्वयोरेव बहुवचनेन सिद्धे चकारेण द्वयोरित्यनुकर्षणान्नार्थो ज्ञापयति नक्षत्रग्रहणं ज्योतिष उपलक्षणं इति उपलक्षितज्योतिष्वमेकैकस्याप्यस्त्येति ए
कनिवृत्त्यर्थं द्वयोरित्यनुकर्षणमिति। तत्रोक्तं। सत्यमेकैकस्य ज्योतिष्ट्वे न तत्र फल्गुनीशब्दो वर्तते एवं प्रोष्ठपदादिशब्दः उद्भूतावयवभेदः समुदाय
एव तेनाभ्यासु अतेऽत एव तूर्णं इति पुनर्वस्वोरेकवचनं निशातयोश्च तिसृणां भः नक्षत्रशब्दश्च निघण्टुषु तारकीपर्यायत्वेन पठितः वेदेऽपि नक्षत्रेभिः पित
रो यमश्चिन्त्रानामेभ्यासि चित्रं नक्षत्रमुद्गात् पुरस्तादिति तेनोज्योतिर्मात्रवचन एव नक्षत्रशब्दः नक्षत्रेण युक्तः काल इत्यत्र हस्तिकारो वक्ष्यति। कथं
उत नक्षत्रेण पुष्यादिना कालो युज्यत इति तदप्यनुपपन्नमावस्थिकेन नक्षत्रत्वेन नक्षत्रत्वेऽपि पुष्यादिभिर्योगस्य कादाचित्कत्वात् तिष्यपुनर्वस्वोरित्यत्र बहुउ

॥फल्गुनीप्रोष्ठपदानां च नक्षत्रे॥ ॥चकारो द्वयोरित्यनुकर्षणार्थः। फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च द्व
योर्नक्षत्रयोर्बहुवचनमन्यतरस्यां भवति। कदा पूर्वे फल्गुन्यौ कदा पूर्वाः फल्गुन्यः। कदा पूर्वे प्रोष्ठपदे कदा पूर्वाः
प्रोष्ठपदाः। नक्षत्र इति किं। फल्गुन्यौ माणविके॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

तेऽतिष्यपुनर्वस्विति द्वयोरेतयोश्चन्द्रयोगेऽप्युदाहरिष्यति प्रत्युदाहरणेऽपि चाज्योतिःस्वभावमेवार्थं दर्शयति तिष्यपुनर्वसवो माणवका इति तस्मान्नापकं वक्तिकारस्य
पक्षः आवस्थिकं नक्षत्रत्वे ज्योतिर्मात्रवचनत्वे वा। चकारेण द्वयोरित्यस्यानुकर्षणमपि उद्भूतावयवभेदः समुदायोऽभिधीयते न त्वेकैकं ज्योतिरिति
प्रदर्शनार्थं प्रोष्ठपदानामिति सम्प्रत्यर्थे षष्ठी नक्षत्र इति कर्मधार्यर्थे सप्तमी स्याद्धि फल्गुन्योर्द्वयोरित्या दिना नक्षत्रयोरिति प्रत्येकमभिसम्बध्यते सूत्रे तु बहुत्व
येनैकवचनं अत्राप्यर्थस्य व द्वित्वादिनेदशाज्जिविशेषणस्यापि भवति पूर्वे फल्गुन्याविति। फल्गुन्याविति फल्गुनीभ्यां फल्गुनीभिर्वा युक्तः काल इति
अण्। लुबविशेषे। लुपि युक्तवद्व्यक्तिवचने फल्गुन्यो माणविके इति फल्गुन्यो जाते फल्गुन्याषाढाभ्यो नक्षत्रेभ्याविति टः टिड्ढाणञिति ङीप्॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥छंदसि॥ द्वयोर्द्विवचने प्राप्ते इति पूर्वसूत्रे चानुवृत्तस्य द्वयोरित्यस्येहानुवृत्तावपि पुनर्वसुशब्देनोक्तौ तावयवभेदस्य ज्योतिरूपस्य समुदायस्याभिधानाद्द्व
योरेवार्थं विधिरिति दर्शयति॥ ॥विशाखा॥ ॥किमर्थो योगविभागः। इह चकारेण छंदसीत्यनुवर्त्तिष्यामीति तेनोत्तरत्र छंदसीति निवर्त्तते तिष्यपुनर्वस्वो
रित्यनेनैव सूत्रेण द्विवचनापेक्षया सप्तमी द्विवचनं। नक्षत्रद्वंद्व इति सप्तमी नक्षत्रद्वंद्वे सति तिष्यपुनर्वस्वोरर्थयोः द्वयोरित्योक्तिर्भवतीति। द्वंद्वापेक्षया षष्ठी द्वि
वचनं गणेषां द्वंद्व इति। अत्र तच्छब्दाद्विवचनं नाभावनिराकरणस्य प्रस्तुतत्वाद्द्वंद्वार्थत्वमिति। अत्रणाभिधायिकयोर्द्विवचबहुवचनयोर्ग्रहणे बहुवचनस्य

॥छंदसि पुनर्वस्वोरेकवचनं॥ अन्यतरस्यामित्यनुवर्त्तते। द्वयोर्द्विवचने प्राप्ते पुनर्वस्वोश्छंदसि विषये एकवचनमन्यतरस्यां भव
ति। पुनर्वसुर्नक्षत्रमदितिर्देवता। पुनर्वसू नक्षत्रमदितिर्देवता। नक्षत्रस्येव। पुनर्वसू माणवकौ छंदसीति किं पुनर्वसू इति॥ ॥विशाखयो
श्च॥ ॥छंदसीति निवर्त्तते। द्विवचने प्राप्ते छंदसि विषये विशाखयोरेकवचनमन्यतरस्यां भवति। विशाखा नक्षत्रमिंद्राग्नी देवता। वि
शाखे नक्षत्रमिंद्राग्नी देवता॥ ॥तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं॥ ॥छंदसीति निवृत्तं। तिष्य एकः पुनर्व
सू द्वौ तेषां द्वंद्वो बह्वर्थः तत्र बहुवचने प्राप्ते द्विवचनं विधीयते तिष्यपुनर्वस्वोर्नक्षत्रविषये द्वंद्वे बहुवचनप्रसंगे नित्यं द्विवचनं भवति।
उदितौ तिष्यपुनर्वसू दृश्येते। तिष्यपुनर्वस्वोरिति किं। विशाखानूराधाः। नक्षत्र इति किं। तिष्यश्च माणवकः। पुनर्वसू माणवकौ ति
ष्यपुनर्वसवो माणवकाः। ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं पुनरुच्यते। पर्यायाणामपि यथा स्यात्। तिष्यपुनर्वसू। पुष्यपुन
र्वसू। सिध्यपुनर्वसू॥ २९॥ ॥

द्विवचनमादेशः स्यादेवं तत्र जसादेशे प्रथमा द्विवचने जसि वेति गुणः स्यात् विशेषणानां चनक्षत्रा
दिति मत्वाह बहुवचनस्य प्रसंग इति। बहूनामर्थानामुक्तिप्रसंग इत्यर्थः। द्विवचनं भवति द्वयोरेवोक्तिर्भवतीत्यर्थः। तिष्यपुनर्वसवो माणवका इति। तिष्यपुन
र्वसुशब्दाभ्यां नक्षत्रशब्दो लुप् जानार्थे संधिवेलादिसूत्रेणागतस्य श्रविष्ठाफल्गुन्यनुराधेत्यादिना लुक्॥ नायं द्वंद्वो नक्षत्रे वर्त्तते किं तर्हि माणवकेषु तत्रापि न
योगो योगपरंपरया हेतोः। पर्यायाणामपीति। पुनर्नक्षत्रग्रहणमापन्ने दीर्घस्ये वापमनये स्तिते यान्त्र शार्हस्यातिदेशो भवति तेन पर्यायाणामपि ग्रहणं सिध्य

© Dharmartha Trust J&K. Digitized by eGangotri

।द्वंद्व इति किमिति। तिष्यश्च पुनर्वसू चेति वाक्ये समासे षुत्तरपदार्थप्रधाने बहुत्वं न संभवति। तादृशः समासश्च न सुलभः। बहुव्रीहिश्च न संभवति अधि
करणत्वात्। संख्याएव द्विगुः। अव्ययपूर्वो अव्ययीभावश्चासंभाव्य एव भविष्यतीति मन्यते। प्रतिष्यस्त्यादि। अवयवेन विग्रहः इत्यु नावयवभेदः समुदा
यः समासार्थः। ननु मुख्याः पुनर्वसू तारा इति तिष्या इव एवेति। कश्चित्त इमे तिष्यपुनर्वसवो युग्माः इति पद्यते तत्र अविविक्तता वचनान्मुहेः कर्तृलिङ्कः अविवि
क्तार्थः। अतएवो मुख्यं तीति यथा नक्षत्र समास एवायमिति। समुदायसमुदायिनोरभेदादिति भावः। सर्वो द्वंद्व इति। नन्वेकवद्भाव प्रकरणे प्राण्यंगा
दीनां समाहार एव द्वंद्वः दधिपयआदीनामितरेतरयोग एवेति नियमस्याश्रितः ततश्च तस्मिन्प्रकरणेनुपात्तानां चार्थद्वन्द्वस्त्वेव समाहारेतरेतरयोगयोर्द्वंद्व
सिद्धिः किं ज्ञापकोपन्यासेन। सत्यं विपरीतोपि नियमः स्यात् संभाव्येत प्राण्यंगादीनामेव समाहार इति। तस्माद्बहुवचनग्रहणेन प्राण्यंगादीनां। नियमत्वं ज्ञाप्य

।।द्वंद्व इति किं। यस्तिष्यस्तौ पुनर्वसू येषां त इमे तिष्यपुनर्वसवः। उन्मुखाः तिष्यौ दय एवति पर्ययेण इत्युपमाना बहुव्रीहि
र्णोच्यंते तेन नक्षत्रसमास एवायं। बहुवचनस्येति किं। एकवचनस्य माभूत्। तिष्यपुनर्वसु इदमिति। सर्वो द्वंद्वो विभाषया ए
कवद्भवतीत्यस्यैतदेव ज्ञापकं नित्यग्रहणं विकल्पनिवृत्त्यर्थं।। ।।सरूपाणामेकशेष एकविभक्तौ।। ।।समानं रूपमे
षामिति सरूपाः सरूपाणामेवाद्वानां एकविभक्तौ परतः एकशेषो भवति।। १९ ।। ।।श्रीः।। ।। ।।

नेह स्यादिति विभाषाप्रयोजनं तत्रैव वक्ष्यामः।। ।।सरूपाणां।। ।।समानं रूपमेषामिति सरूपा इति। ज्योतिर्जनपदेत्यादिना समानस्य सभावः। सह
रूपेणावर्ज्जंत इति सरूपा इति तु न भवति अभिचाराभावात्। रूपशब्दश्चेह श्रोत्रग्राह्ये शब्दे वर्त्तते संविक्षि निखिरूपे वर्जते न च प्रत्याहारे स्फुरणादेशादानुपूर्व्या सन
प्रतीता ग्राज्जदाह सरूपाणामेकशेषो ह्यानामिति। निर्धारणे चैषा षष्ठी समुदायापेक्षया वा। अत्र पंच पक्षाः संभवंति समानपर्यायएकशब्दस्तेनैकदिगिति वन्स
मानत्वं च पदाधिष्ठानमिति पृथक् सर्वेभ्यः समानानां यत्र विभक्तौ परतः एकः शिष्यत इति प्रथमः। द्वंद्व इति वर्त्तते तत्र विनयेषु प्रावककाउमपि द्वंद्वमेकशेषो
न बाधते निमित्तत्वात् सरूपाणां द्वंद्वे कृते समासाद्वा रैकस्यां विभक्तौ परत इति द्वितीयः। अत्र पक्षे संख्या वाच्ये का हानिः द्वन्द्वेन पुंसकत्वप्रातिपदिक
से ति वर्तते एकविभक्ताविति सरूपाणामुपलक्षणं एकविभक्तौ पा। निसरूपाणि द्वन्द्वानि तेषामतिपदिकानामेवात्मेति कएकशेष इति तृतीयः।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

विभक्तिशब्दः कारकशक्तिवचनः विभज्यतेनप्रातिपदिकार्थइतिकृत्वा एकस्मिन्कारके विवक्षितेयानिसरूपाणितेषामेकशेषः कारकंचविवक्षि-
तं स्वनिमित्तां विभक्तिं प्रसूत इति पृथक् विभक्तीनां तान्यामेकशेष इति चतुर्थः। सरूपसमुदायादेकस्यां विभक्तौ परत इतियं वमः तत्राद्यपक्षेह वृक्षवृक्षस
वृक्षस इति स्थिते पूर्वयोर्निवृत्तौ सस वृक्षस इति स्थिते मध्यसंबंधिनः सोर्हल्ङ्यादिलोपे तौ द्वयोः श्रवणप्रसंगः। एवमाद्यंतयोरपि निवृत्तौ द्रष्ट-
व्यं परयोर्द्वयोर्निवृत्तावपि शिष्यमाणसंबंधिनो लोपासिद्धिरेव। गोदौ वरणा इत्यादौ च पृथक् द्विवचनयोः परतः एकशेषे तयोः श्रवणप्रसंगः। य-
त्र हि प्रत्ययनिमित्ता प्रकृतिनिवृत्तिः तत्र केवलस्यापि प्रत्ययस्य प्रयोगो भवत्येव यथा इयानिति। द्वितीये तु अश्व अश्व अश्व औ इति स्थिते विभक्त्यपे-
क्षाद्वेषां सर्वमंतोदात्तत्वात् समासांतोदात्तत्वे कृते पादिपूर्वशेषः सर्ववर्णानुदात्तं पदं स्यात् परशेषे तु अश्वशब्दोंतोदात्तः स्यात्। इह वक्ष्य कर अश्वौ
अंतरंगत्वात् दक्षपृष्ठी इति सान्ते कृते विभक्तेः एकोणव्यवधानान्नैकशेषः स्यात् समासांतो हि समासग्रहणेन गृह्यमाणः। तमेव तन्मवद्ध्या
त सर्वानुदात्तं पदं स्यात् परशेषे तु रूपं तु अस्ववदधात्सेव एकग्रहणं चानर्थकं नहि द्वंद्वाद्युगपदनेकाविभक्तिः संभवति यदि पुनरेकविभक्तौ
विसेनदक् त्वाद्द्वं द्विः क्रियानंतरमेनैकशेष इत्युच्येत एवमपि पादौ पाद इत्यादौ द्विवचन बहुवचनेन स्यात् तांश्च एषंगादीनां समाहार ए-
वद्वं द्व इति नियमात्। तृतीये तु पक्षे जननीवचनयोर्मातृशब्दोपश्च मातृ मान इत्यस्मात् तृचि धान्यमायवचनः तयोरपि मातामातृभ्याः इति
क्वचिद्विभक्तौ सरूपत्वात् सर्वत्रैकशेषप्रसंगः। तथा हरितो वाद्वर्णादनुदात्तादिति ङीब्नकारयोर्योर्हारिणीशब्दः संपद्यते पश्च हरित
शब्दाज्जातिलक्षणे ङीषि तयोर्न स्यात्। अथ तयोः सारूप्येपि प्रातिपदिकावस्थायामसारूप्यात्। चतुर्थे तु निवर्त्तमानः शब्दोयद्यपि
सह विभक्त्या निवर्त्तते शिष्यमाणस्य त्वेकवचनश्रवणप्रसंगः। अतः पंचमं पक्षमाश्रित्याह सरूपाणां शब्दानामेकविभक्तौ परत इ-
ति। सरूपाणां शब्दानामेकविभक्तौ परत इति। सरूपसमुदायादेकस्यां विभक्तौ परत इत्यर्थः ३० ॥

© Dharmartha Trust J&K. Digitized by eGangotri

। ननु स्यात् प्रातिपदिकाद्द्व्येकवचनान्तानां द्वन्द्वस्तत्र चैकत्वं विवक्षितं न तु कथं प्रातिपदिकसमुदायाद्विभक्तिः । अस्तु प्रत्येकं प्रातिपदिकत्वं समुदायोऽपि
त्वर्थवत्त्वात्प्रातिपदिकं कः पुनः समुदायस्यार्थः परस्परसंबन्धः एकैकेन विशकलितोऽर्थः अतः समुदायेन तु संबन्धः । तुल्यजातीयस्य चार्थवत्समुदायस्य
समासग्रहणेन निवृत्तिः । कश्च तुल्यजातीयः यत्र पूर्वो भागः पदं न वा तत्र च मितिसमुदायाद्विभक्तिरविरुद्धा सा त्वनुस्यूतावयवभेदत्वाद्द्विवचनं बहुवचनं वा
न त्वेकवचनं । न चोरराज्ञो नौ कर्णौ शाविमादो च परत्वाद्गार्ग्यादिष्वपि लुक्तेषु विरूपाणामपि समानार्थत्वादेकशेषः । अयं च दोषो यं न्यायेन अनन्ते अप्रधाने
उपयुक्तादन्यत्र वचनं वर्त्तते किं तर्हि निवृत्तिमद्वस्था नरसादयः एकः शिष्यते इतरे निवर्त्तन्ते इति । न चास्मिन्नपि पक्षे एकग्रहणमनर्थकं न हि समुदायाद्युगपदनेका
विभक्तिः संभवति । उच्यते अस्मिन्नेकग्रहणे पृथक् सर्वेभ्यो विभक्त्योपरत इति प्रथमो विपक्षः संभाव्येत अतो यत्र पक्ष एकैव विभक्तिः सरूपाणां संभवतीति एवं चैक
ग्रहणार्थ सामर्थ्यात् । अथ वा चतुर्थपक्षेऽयं यः । कथं तर्हि विभक्त्योपरत इति न हि कारकशब्दानां पौर्वापर्यं भवति । उच्यते इष्टवाची परशब्दः एकस्यां विभ

।। एकः शिष्यते इतरे निवर्त्तन्ते । वृक्षश्च वृक्षश्च वृक्षौ । वृक्षश्च
वृक्षश्च वृक्षश्च वृक्षाः ।। ।। ३१ ।। ।। श्री रत्नापतिः ।। ।।

क्तार्थानामेकस्मिन्काले विवक्षित इति यावत् । ननु चोक्तं शिष्यमाणस्यैकवचनश्रवणप्रसंग इति । न चेदानीं निवर्त्तमानसंख्याविशेषादुपजायमाने द्वित्व
बहुत्वे द्विवचनबहुवचने उपजनयितुमुत्सहेते प्रत्ययान्तत्वेनाप्रातिपदिकत्वात् । नैष दोषः । सहविवक्षायामेकशेषः का पुनः सहविवक्षा उक्तमत्र । अ
नुस्यूतैकरूपाणां नामैकाप्रक्रमोपजायते । यदा सह विवक्षितानामाद्वन्द्वैकशेषयोरिति । अयमर्थः । यदा वृक्षौ वृक्षाः एकस्यां बुद्धावुपारूढा यथा पुरोवस्थितस्य
हस्तस्य पञ्चाङ्गुलयः ते चैकस्मिन्नुल्लेखे यावत् पृथक् पृथगवधारिताः पुनः यथावत् तावदनुगतेन क्रमेण गृह्यन्ते तदा भिन्नैरेव शब्दैः प्रत्येकपर्यवसा
यिभिरेव वचनान्तैरभिधीयेरन् समुदायाकारा त्वनुस्यूतावयवभेदैका बुद्धिर्नान्यपात्रं संक्रमयितुमिच्छता तदनुरूपः शब्दः प्रयोक्तव्यः । न च तादृशस्य समु
दायस्य साधारणः कश्चिच्छब्दोऽस्तीत्यवयवशब्दैरेवाभिधानं समुदायिनोरभेदात् स चैकैक एवावयवशब्द उद्भूताव
वभेदसमुदायप्रतिपादनाद्द्विवचनान्तो बहुवचनान्तश्च प्रवर्त्तत इति नैकवचनश्रवणप्रसंगः ।।

© Dharmartha Trust J&K. Digitized by eGangotri

यद्येवमेकेनैवावयवशब्देन तावद्द्रव्यसमुदायस्याभिधातुं शक्यत्वात्पदावयवेषु युगपत्प्रयोगप्रसंगः । अथ मतं अन्येष्वसन्निधावेव समुदायप्रतिपा
दनशक्तिरिति । कथं तर्ह्येकशेषारंभे एकैकस्यासंभवति न हि द्वितीयमतीशक्तिरेकशेषवचनेन कर्तुं शक्यते । उच्यते । विरूपेषु योऽन्यसन्निधाने समुदायरूपाभि
धानशक्तिः प्रादुर्भवति पटुगुणादिवदिति । अत्रापि युक्तं तावदवयवभेदं समुदायं प्रतिपादयितुमवयवशब्द एव प्रत्येकं द्विवचनबहुवचनान्तः प्रवर्तते । अथ
यावद्द्विवचनबहुवचनायोग्यात्स्वार्थमात्रपर्यवसायिभिरवयवशब्दैः क्रमेणोच्चारणात्तत्र्यार्थोपि क्रमेणैव प्रतीयते । क्रमेणाचानेकार्थप्रतीतौ द्विवचनबहु
वचने न भवतः समुच्चयश्च भवतीति तद्यथा वाक्ये प्लक्षश्च न्यग्रोधश्चेति । अतो विरूपेष्वेवं दर्शना सरूपेष्वपि द्वन्द्वाशंका सरूपेष्वेकस्यैवानेकार्थप्रतिपादनशक्ति
रस्तीति वचनेनानुसाध्यते । अन्ये तु तृतीयमपि पक्षं ग्रन्थान्तरे वर्णयन्ति सरूपाणां शब्दानामेकविभक्तौ परत एकशेषो भवति एकविभक्तौ परतः सरूपा
णामित्यन्वयः न त्वेकशेष इति एकस्मिन्कार्ये विवक्षिते एकविभक्तौ वा परतो ये सरूपा दृष्टाः शब्दास्तेषामित्यर्थः । तत्र च शिष्यमाण एव निवर्तमा
नस्याप्यर्थमाह हे अग्नी चिदिति प्रत्ययनिहन्नौ प्रकृतिवदिति द्विवचनबहुवचने यथायोगं भवतः । तत्र यदुक्तं हरिश्च हरिणौ योर्वर्तयोर्न स्यादि
ति । तत्र प्रातिपदिकग्रहणं नानुवर्तते तेन द्यंतयोरेव सारूप्यात् भविष्यति ॥ यदप्युक्तं मातृशब्दयोः प्रसंग इति अर्थविप्रतिषेधान्न भविष्य
ति । कृते ह्येकशेषे तामभिलप्यनुप्रयोगे पुमर्थो निगम्यते इति तु स्त्र्यर्थः । वत्समात्रा एवकारस्येहानुकर्षणादेकविभक्तौ यानि सरूपाण्येवेमा
न्यपराणि निष्ठेति त्वा चिनश्चास्मञ्जिति सर्वनामस्थाने दीर्घविधानादसारूप्यादेकशेषाभावः । अत्र पक्षे एकग्रहणं चिंत्यप्रयोजनं । तदे
वं पंचसु पक्षेषु त्रयः स्वीकृताः । हे क्ष्मश्च हे क्षश्चेति । अनैमित्तिक एकशेष इति पक्षे विभक्तौ सारूप्यं दर्शयितुं विभक्त्यंते नाऽग्रहः । कथं पुनस्त्रि
ह्निः यावता एकशेषवृत्तिर्नित्यो नेतद्वृत्तिः समासो नार्थवाक्यं प्रत्येकमत्र विवक्षा आनन्दस्य प्रत्येकं तत्र भेदनिर्बंधनः समुच्चयश्च शब्देन द्योत्यते । भिन्ना
र्थमपि किंचिन्मात्रसाधर्म्याद्वाक्यं भवत्येवा समानार्थत्वेऽपि तदेव यथा हंसौ च हंसौ च हंसौ च हंसाश्च हंसाश्च हंसाश्च हंसा इति ॥ ३१ ॥ ॥

राम॰
१०१

© Dharmartha Trust J&K. Digitized by eGangotri

।ननु यथैतावदेकार्थाभिनिवेशिनः शब्दाः आकाशइत्यत्र गोलादयः नतेषु द्विवचनबहुवचनेनार्थ एकशेषः येत्वनेकार्थाभिनिवेशिनः गोः शुक्लः पा
चक इत्यादयस्तेषु नु स्यात् किंचिदर्थमनेकं गोत्वादिनिमित्तं वक्ष्यामः अन्यथा संबंधग्रहणासंभवात् तत्र गवादिषु तद्गता जातिर्निमित्तं तथा शुक्लादि
ष्वपि गुणमात्रनिष्ठेषु गुणिनिष्ठेषु तु सत्तया जात्या एकीभूतो गुणः एवं पाचकादिष्वपि । गोत्वाभूत्वे सामान्येनि ; सामान्यानि आपाततोऽत्र भिन्ने
ष्वभिन्नप्रत्ययहेतुत्वं । तावेतावित्यादौ परोक्षत्वप्रत्यक्षत्वादिकं अभावाश्चैतादृः इत्यत्र निरूपाख्यत्वमित्यादि सर्वत्र दृष्टव्यं निमित्तं तदेतो अनादायस्य
सर्वं हि वस्त्वेके नानाचयगवादिरूपेणोक्तं स्वैरं मुखादि प्रातिस्विकरूपेण नाना । एवं स्थिते यदि तावज्जातिरेव शब्दार्थः तदा तस्या एकत्वान्नानेकशब्दा
द्यप्रसंगः । अथ द्रव्यं एवमपि जातिरूपेणैव शब्दो द्रव्यमभिधत्ते न प्रातिस्विकेनाकारेणेति नास्त्यनेकशब्दप्रसंगः केवलद्रव्यपदार्थपक्षेपि

।।प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानं तत्रानेकार्थाभिधानेऽनेकशेषः रूपग्रह
णं किं भिन्नेऽप्यर्थे यथा स्यात् । अक्षाः पादाः माषाः ।। ।।छ छ।। ।। ।।

अस्मिन् विषयेऽनेकार्थाभिधानसामर्थ्यं शब्दस्य साध्यादिपदवदभ्युपगंतव्यं अन्यथा समर्थैकशेषे तत्र स्यादिति सिद्धमेकशब्दत्वाद् द्व्यागतसंख्या
प्रतिपादनाय द्विवचनबहुवचने भविष्यतः नार्थ एतेनेत्याशंक्याह । प्रत्यर्थमित्यादि एकैकस्मिन्नर्थे यस्माच्छब्दानां निवेशः ततोऽनेकेन शब्देनानि
कस्याभिधानं स्यात् इत्येवं स्थिते अनेकार्थाभिधाने कर्तव्ये यावतामर्थानां तावतां शब्दानां प्रयोगः प्राप्नोतीष्यते चैकशब्दत्वं तस्मादेकशेष
आरभ्यते अपमपि माषाः । केवलजातिपक्षे अक्षाः पादाः माषा इत्यत्र अनेकशब्दत्वं स्यात् न हि विभिन्नकदेवं न शक्यसे घनुप्रः नं किंचित्सामान्य
मस्ति अत एव तत्र नु प्रवृत्तिर्भेदेनापेक्ष्यते एवमुभयपक्षेपि केवलद्रव्यपक्षेपि हि स्यादिति वाक्ये अनेकशब्ददर्शनात् द्विरूपेषु द्वंद्वदर्शनाच्चारंभणीयम
त इति । रूपग्रहणं किमिति । अंतरंगत्वादिह पत्वादुपदेशानपेक्षत्वात् सरूपकृतमेव समानत्वं ग्रहीष्यत इति प्रश्नः । प्रतिपत्तिलाघवं च समाना
नामित्युच्यमाने भवति रूढिशब्दत्वेन इति तुल्यार्थावगमात् रूपग्रहणेनु वर्तिपदार्थावगम्यमानयत्नार्थो विज्ञातव्य इति गौरवं । भवति । भिन्ने
ऽप्यर्थे इति । स्वं रूपमित्यत्र रूपग्रहणेन ज्ञापितं शास्त्रे रूपवदर्थोऽपि तत्रमिति न तत्त्वार्थेन तयोः समानत्वं गृह्यते इति भावः ।। ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

।एकग्रहणं किमिति। शेषस्त्वेकत्वं विवक्षितं स्यादिति प्रश्नः। द्विवद्भ्योरिति। द्वित्वबहुत्वविषयस्यानेकस्य शब्दस्येत्यर्थः। ननु द्वयोर्बहूनां चेति द्विबहुवचनप्रसंगात्
इह शेषविधानद्वारेण संख्यिमाणत्वात्स्थितिमात्रं प्रधानं प्रधाने च संख्या न विवक्षितेति यथा ग्रहं संमार्ष्टीति विषयतपस्यासः संमार्गो विशेषो द्वितीया निर्देशा
त् ग्रहाः प्रधानभूता ४ संमार्गस्तेषां संस्कारः संस्कारेणाभतस्य भवतीति यच्छब्दान्तरे प्रयोजनवत्यां क्रियायां साधनत्वे नविनियुक्तं संस्कृतस्यवायस्य वि
नियोगः इत्यमात्रस्यनुसंस्कारो नर्थकः स्यात् तदिह संमार्गसंस्कारो विधीयमानः शब्दान्तरे विनियुक्तं ग्रहमपेक्षते तत्र न च संख्या ग्रहाः श्रुता इति तद
पेक्षः समार्गविधिर्नवानामपि भवितुमर्हति। ग्रहमित्येकवचनं तु कर्मीत्वमात्रमभिधाय कृतार्थं भविष्यति। इह तु शेषस्य वाक्यान्तरेणव धारणाद्दिमे
वोभवतिवाममिति विवक्षणीयासंख्यापक्षमात्रभेते निवत। सत्यं इदमेवैकग्रहणं ज्ञापकं शास्त्रान्तरानवगते विप्रधाने संख्या न विवक्षितेति तेनैकत्वं ॥

॥एकग्रहणं किं। द्विवद्भ्योः शेषो मा भूत्। शेषग्रहणं किं। आदेशो मा भूत्। एकविभक्ताविति किं।

पयः पयोत्तरयनि। ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां देहि। ॥३१॥ ॥६१॥ ॥

रीभिन्नतमभित्यत्र इष्येत तमस्य संख्या या अविवक्षासिद्धा भवति। शेषग्रहणं किमिति। साधुनुशासनप्रक्रमात्तत्रैकमेकः साधुर्भवतीति विज्ञा
स्यत इति भावः। आदेशो मा भूदिति। असति हि शेषग्रहणे षष्ठीस्थानेयोगे तिवचनात् स्थानषष्ठी स्यात् ततश्चादेशः स्यात्। अस्तु शव् तो र्थतश्चान्त
रतमो भविष्यति। नैवं शक्यं स्वरे हि दोषः स्यात् द्वयोरशब्दयोः समुदायः स्थानी तत्र च द्वावुदात्तावितिषु दात्तश्चादेशः स्यादेतेनद्य नुदात्तत्वं का
र्यात्। एकविभक्ताविति किमिति। नानाविभक्तौ वैरूप्यमव रूपं भावीति भावः। पयः पयरिति। एकविभक्तावित्यस्मिन्नसति सरूपाणां सर्वत्र सह
प्रयोगे न स्यात्। अथ क्रियमाणेऽप्यस्मिन्नैमित्तिकपक्षे स्मादेवात्र न भवत्यिगन्द्रपित्ये कस्यां विभक्तौ परतः सरूपं द्वयमेवनेषदोषः। ए
कग्रहणमस्मिन्पक्षे अतिरिच्यत इत्युक्तं तन्नाम यर्थादेकस्यामर्थादेकस्यामेव विभक्तौ विषयभूतायां भविष्यति। अत्र तु पक्षे कशेषे पर्याये
णाभिन्ना विभक्तिः स्यात्। अथवा किं न इह तेन पहेत्यो हेशतोभाव्येपेनस्तां द्वावेव पक्षेऽइह एकस्वेति सं मा श्वानामेकशेषो न भवति अनभिधा

© Dharmartha Trust J&K. Digitized by eGangotri

वृद्धो यूना॥ वृद्धशब्दो ऽयं लोके वयस्येव प्रसिद्धो युवशब्दो ऽपि तत्र तयोरिह ग्रहणे ग्रहणं माभूत् वृद्धश्च युवा च स्थविरश्चेत्यादौ स्यात्। वृद्धिर्यस्याचामादिस्तद्वृद्धं जीवति तु वंश्ये यु
वाऽनयोः शास्त्रीययोरिह ग्रहणमित्येव गच्छामो न तत्र अशेषगोत्रिश्च युवेत्यादौ न स्यात् ततो युवशब्दस्य तावल्लक्षित्रिमस्य अव्यवहितापत्यवाचिनो गोत्रग्रहणं तत्राह वृद्धशब्द
स्यापि व्यवहितापत्यवाचिनः शास्त्रान्तरे प्रसिद्धस्य ग्रहणमित्याह वृद्धशब्द इत्यादि। गोत्रग्रहणेनापत्याधिकारादन्यत्र लौकिकस्य ग्रहणमित्यपत्यमात्रस्य ग्रहणं स्यात्। क्वचित्तु न

॥वृद्धो यूना तल्लक्षणश्चेदेव विशेषः॥ शेष इति वर्त्तते। यूनेति सहयोगे तृतीया। वृद्धो यूना सहवचने
शिष्यते। युवा विवर्त्तते। वृद्धशब्दः पूर्वाचार्यसंज्ञा गोत्रस्य। अपत्यमन्तर्हितं वृद्धमिति। वृद्धयूनोः स
हवचने वृद्धः शिष्यते तल्लक्षणश्चेदेव विशेषः। तदिति वृद्धयूनोर्निर्देशः। लक्षणशब्दो निमित्तप
र्यायः। चेच्छब्दो यद्यर्थे। एवकारो ऽवधारणे। विशेषो वैरूप्यं। वृद्धयुवनिमित्तकमेव यदि वैरूप्यं भव
ति ततो वृद्धः शिष्यते। समानायामाकृतौ वृद्धयुवप्रत्ययाभिधेये॥

रधिको ऽपि ग्रन्थः पठ्यते यूनेति सहयोग एषा तृतीयेति। स इदानीं तेन प्रक्षिप्तः। यूना सह वचन इति सहशब्दं प्रयुञ्जानः सूत्रे सहयोगे तृतीयेति दर्शयति अत एव ज्ञापते स
ह विवक्षायामेकशेष इति। विशेषो वैरूप्यमिति। आह स्वाह वृद्धयुवनिमित्तस्य ग्रहणं नान्यस्येति भावः। यदा अर्थं दर्शयितुं तदयमर्थ इत्याह वृद्धयुवनिमित्तकमेवेत्यादि। समा
नायामाकृताविति। आकृतिः शब्दस्य प्रवृत्तिनिमित्तं गार्ग्यत्वादि। क्वचित्तु प्रकृताविति पाठः। प्रकृतिर्मूलप्रकृतिर्गर्गशब्दादिः॥ ॥६ ६॥ ॥ ।राम

© Dharmartha Trust J&K. Digitized by eGangotri

गार्ग्यश्चेत्यादि । गर्गवत्सशब्दाभ्यां गर्गादित्वाद्यञ् । तताभ्यां यूनि फञ् इतिफक् । गार्ग्यायणेति प्रकरणादिनात्र जीवद्वंश्यता वसायः शब्दस्य गोत्रद्वयस्या-
पि साधारणत्वात् । यद्येवं गार्ग्यश्च गार्ग्यश्चेति गोत्रशब्दयोरेव एकशेषो वोक्तः । प्रकरणादिनैव युवत्वमन्यतरस्य गम्यते एतोद्दिष्टा वाकारी जीवद्वं-
श्यत्वं यौत्रप्रभृत्यपत्यत्वं च तत्र विशेषा विवक्षायां सामान्यशब्दो न निवर्तते यथा वक्तुभूतानद्यतने यि यो विवधस्स्व इति लुङ् भवति । तस्मा-
न्नार्थ एतेनाश्रुतो प्रकरणाद्यनपेक्षेण शब्देन जीवद्वंश्यत्वं प्रतिपादयितुकामो द्वंद्वं प्रयुंजीत गार्ग्यगार्ग्यायणाविति अतो द्वंद्व निवृत्त्यर्थं चकारः । प्र-

गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वात्स्यश्च वात्स्यायनश्च वात्स्यौ । वृद्ध इति किं । गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ । यूनेति किं । गार्ग्यश्च गर्गश्च गार्ग्यगर्गौ । तल्लक्षण इति किं । गार्ग्यवात्स्यायनौ । एवकारः किमर्थः । भागवित्तिश्च भागवित्तिकश्च भागवित्तिभागवित्तिकौ । कुत्सा सौवीरत्वं च भागवित्तिकस्याधिको विशेषो विद्यते ॥ ॥ ३२ ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ छ ॥

मुदाहरणे तु सर्वत्र द्वंद्वो भवति । गार्ग्यवात्स्यायनाविति । न च त्र विशेषांतरसद्भावेपि न लक्षणो विशेषा विद्यत इति स्यादेव शेषः । नैष दोषः । एवमत्र व-
चनं भज्यते योऽसौ विशेषः यस्य सद्भावाद्द्वंद्वेनाप्राप्तिः स तल्लक्षणश्चेदिति । एवं च यावदुद्देश्य विधेयसंबंधान स्त्रीकरिष्यामहे तु भूत स्यरूत्वतस्य विशे-
षस्य तल्लक्षणात् विधानात् कुतोत्र प्रसंगः । इह तु प्राप्नोति भागवित्तिभागवित्तिकाविति इह तत्र स्य विशेषस्य तल्लक्षणत्वादेव कारेण तु व्यावर्त्यते ।
न त्वत्र तल्लक्षण एव विशेषः तदाह कुत्सा सौवीरत्वं चापरो विशेष इति । विशेष हेतुरित्यर्थः ॥ ३२ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥स्त्रीपुंवच्च॥ ॥स्त्रीलक्षणे वैरूप्ये कारणे स्याधिकाराद्वचनं पुंवच्चेति वक्ष्यामीति वा। अत्र स्त्रीशब्दस्य स्वरितत्वेनाधिकारविहितानां यबादीनां ग्रहणात्प्रथम
र्थो भवतीति पुंवत् स्त्रीप्रत्ययो न भवतीति यथा पुंवद्भाषितः स्त्रत्नाभि समाधिकरणे इत्यत्र तथा स्त्रीत्वस्यानिवृत्तेर्न्नात् गार्ग्यौ स्त्रियौ गार्ग्यायणाश्च गार्ग्यः इत्यत्र य
ञञोश्चेति लुक् न स्यात् अस्त्रियामित्यधिकारेण न भवत्यप्रतिषेधे चायं दोषः पर्युदासे तु स्त्रियां तासां निवर्त्तमानार्थाभिधायित्वात् अस्त्रि स्त्री स्वदृश्योर्थ इति सिद्ध
मिह तु गार्ग्यौ इति स्त्रीत्वस्यानिवृत्तेस्तास्मात् न्यायं पुंसां बहुत्वे शसउस्यन्तरतिनत्वं न स्यात् स्त्रार्थ इति ते शब्दस्य तु ग्रहणे स्त्री शब्दस्य पुंशब्दस्येव तद्रूपं भवतीस
र्थः स्यात् स्त्रीत्वं त्वनुवृत्तमेवत त्रयपयविगर्गा इतिवदृष्टपुंशब्दस्य रूपमिति तस्मिन्नतिदिष्टे जस्यादिषु न दोषः नत्वं तु विभक्तिकार्यं नस्यादेव ह्यर्थग्रहणेतु पुम
र्थः स्यात् स्त्रीत्वं त्वनुवृत्तमेव तत्र पथ इति निवृत्ते एव प्रती यते शब्दानामर्थपरत्वात् स्वरूपग्रहणं तु नाशंकामेव वृद्धो यूनेत्यनुव
र्त्तीति देशान्तमानि वृद्धानां कार्याणां सिद्धिरिति न कश्चिद्दोषः स्त्रीति चोक्ते अर्थ एव प्रती यते शब्दानामर्थपरत्वात् स्वरूपग्रहणं तु नाशंकामेव वृद्धो यूनेत्यनुव

।स्त्रीपुंवच्च॥ ।शेष इति वर्त्तते। वृद्धो यूनेति च सर्वं स्त्री वृद्धा यूना सहवचने शिष्यते तल्लक्षणश्चेदेव विशेषो भवति। पुंसश्चास्याः का
र्यं भवति। स्त्र्यर्थः पुमर्थवद्भवति। गार्गी च गार्ग्यायणश्च गार्ग्यौ। वात्सी च वात्स्यायनश्च वात्स्यौ। दाक्षी च दाक्षायणश्च दाक्षी॥ ।।पुमां
स्त्रिया॥ ।तल्लक्षणश्चेदेव विशेष इति वर्त्तते। वृद्धो यूनेति निवृत्तं। स्त्रिया सहवचने पुमान् शिष्यते स्त्री निवर्त्तते। स्त्रीपुंसलक्षणश्चे
देव विशेषो भवति। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ। कुक्कुटश्च कुक्कुटी च कुक्कुटौ। तल्लक्षणश्चेदेव विशेषः। कुक्कुटश्च मयूरी च कुक्कु
टमयूर्यौ। एवकारः किमर्थः इंद्रश्च इंद्राणी च इंद्रेंद्राण्यौ। पुंयोगादाख्यायामित्ययं विशेषः। पुमानिति किं। प्राक् च प्राची च प्राक्
प्राच्यौ। प्रागित्ययमव्ययलिंगं॥ ॥ श्रीः॥ ॥

र्त्तनात् अतोर्थस्यैव ग्रहणमित्याह स्त्र्यर्थः पुमर्थवद्भवतीति। गार्गी चेत्यादि। गार्ग्यवात्स्यशब्दाभ्यां यञश्चेति ङीप्। दाक्षीति। इतो मनुष्यजातेः। दाक्षीइति ङीषि निवृत्ते इत्र
ता द्विवचने प्रथमयोरिति दीर्घः इदमपि द्वंद्वनिवृत्त्यर्थमेव वचनं॥ ॥पुमान्॥ ॥स्त्रीपुंसलक्षणश्चेदेव विशेष इति। यदान्तरमन्यदपि लक्षणे विशेषे भवति यथा गोश्च
गौश्चेयमिति एतौ गावौ चरतः इति। एवं क्रमाखुर्न्नकवाकुग्रामणीखलपूप्रभृतिषु पुंसः शेषो वेदितव्यः। इह कस्मान्न भवति हंसश्च वरटा च कच्छपश्च डुलिश्च। अत एव
स्यादेहि च अश्वश्च वडवा च पूर्ववदश्ववडवाविति सर्वत्राप्यत्र स्त्रीपुंसकृत एव विशेषः। सरूपाणामिति वर्त्तते तेन समानकार्यकृतो यत्र स्त्रीपुंसकृत एव विशेषस्तत्रैव भव
ति। इह तु ब्राह्मणवत्सश्च ब्राह्मणीवत्सा चेत्यत्र प्राप्नोति। नैष दोषः। स्त्रीपुंसयोः सहविवक्षायां एकशेषः। सा च प्रधानयोरेव भवतीति यत्र प्रधानस्त्रीपुंसकृत एव वि
शेषः तत्रैवैकशेषः इह त्वप्रधानकृतो यतो नैकशेषाभावः। इहापि मृगक्षीरादिवज्जातिविवक्षायां कुक्कुटादिषु सिद्धं द्वंद्वनिवृत्त्यर्थं तु वचनं। प्रागित्ययमव्ययमिति। अ
प्रत्ययान्तत्वात् अस्तातेरंचेर्लुगिति लुकि च कृते अविभक्तिकत्वात् प्रत्ययनिमित्तकार्याभावादेकशेषोऽविशेषात्। ॥

© Dharmartha Trust J&K. Digitized by eGangotri

भ्रातृपुत्रौ। इदमपि द्वन्द्वनिवृत्त्यर्थं वचनं। स्वसृशब्दस्य लोकापत्यत्वनिमित्तं दुहितृशब्दस्यापत्यत्वमेव भ्रातृपुत्रशब्दयोः स्त्रीत्वं पुंस्त्वं चोभयत्र विशेषः तत्र भ्रा
तरौ पुत्रौ इति स्त्रीपुंस्त्वाविवक्षायां सिद्धं स्वसृदुहित्रोरभिधानं एकशेषारंभे प्रयत्नेनैव निर्वाहः॥ ॥ नपुंसक॥ ॥ शुक्ला च शुक्लं चेति विभक्तौ विभक्त्यन्त
योश्चासारूप्यादप्राप्त एकशेषः। शुक्लं च शुक्लश्चेति विभक्त्यंतयोरसारूप्यं। विभक्तौ सारूप्येपि पुंनपुंसकयोः पर्यायः स्यादिति वचनं एकवद्भावार्थं च।
तल्लक्षणश्चेदेव विशेष इति वर्तते इति। शुक्लं च कृष्णश्चेत्यत्र माभूत्। एवकारस्तर्हि किमर्थः। हिमाहिमानी अरण्यारण्यानी इत्यत्र माभूदिति अत्र हिमारण्ययो

॥ भ्रातृपुत्रौ स्वसृदुहितृभ्यां॥ ॥ यथासंख्यं भ्रातृपुत्रशब्दौ शिष्येते सहवचने स्वसृदुहितृभ्यां। स्वस्रा सह वचने भ्रा
तृशब्दः शिष्यते। भ्राता च स्वसा च भ्रातरौ। दुहित्रा सहवचने पुत्रशब्दः शिष्यते। पुत्रश्च दुहिता च पुत्रौ॥ ॥ नपुंसकमन
पुंसकेनैकवच्चास्यान्यतरस्यां॥ ॥ तल्लक्षणश्चेदेव विशेष इति वर्तते। नपुंसकमनपुंसकमात्रकृतेन विशेषेणानपुंस
केन सहवचने नपुंसकं शिष्यते एकवच्चास्य कार्यं भवति अन्यतरस्यां। शुक्लश्च कंबलः शुक्ला च बृहतिका शुक्लं च व
स्त्रं तदिदं शुक्लं। तानीमानि शुक्लानि। अनपुंसकेनेति किं। शुक्लं च शुक्लं च शुक्लं च शुक्लानि एकवच्चेति न भवति ३४

र्महत्वमपरो विशेषः। अन्यतरस्यां ग्रहणमानंतर्यादेकवच्चेत्यनेन संबध्यते न त्वेकशेषेण। चत्वारह एकवच्चेत्यादि। अस्य ग्रहणमेकवच्चेत्यस्योत्तरत्रानुवृत्ति
र्माभूदिति। इह शुक्ले न च वस्त्रेण शुक्ले न च कंबलेन तेनानेन शुक्लेनेति तल्लक्षणविशेषाभावादेकशेषो न प्राप्नोति। सामान्यविवक्षायामेकशेषे सत्येकव
चनं नपुंसकत्वं च भविष्यति। यद्येवं तदिदं शुक्लमित्यत्राप्येवमेव भविष्यतीत्यर्थ एतेन द्वन्द्वनिवृत्त्यर्थं तु वचनं। अनपुंसकेनेति किमिति। नपुंसके नापि सहवच
ने सरूपाणामित्येकशेषेण भवितव्यमिति प्रश्नः। तेन यथा स्यादनेन मा भूदिति प्रसुक्तं। कोऽत्र विशेष इत्यत आह एकवच्चेति॥ ३४ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पितामात्रा। मातापितराविति। अभ्यर्हितत्वान्मातुः पूर्वनिपातः। पितुर्दशगुणं माता गौरवेणातिरिच्यते। पितरावित्यभिधानं जनयितृत्वमात्रविवक्षायां लिंगावि-
वक्षायां सामर्थ्यं नीयं। एकशेषारंभे पि द्वंद्वस्त्विष्यत एवेति गार्ग्य एतेन। शशुरः श्वश्र्वा। पितरश्च श्वशुरौ मातृश्वश्र्वाभ्यामिति नोक्तं लाघवार्थं। श्वश्रूशब्दो मुख्यत्वं प्रातिप-
दिकं। श्वशुरस्योकाराकारलोपश्चेत्यूङ् तत्वे प्रत्ययांतत्वान्न ब्रह्मबंधूरित्यादिवदेकादेशाभावाच्चाप्रातिपदिकत्वे पि श्वश्र्वेति अस्मादेव निर्देशात् ल्लिंगात् सुपः न द्वित्वाश्च
भवंति। श्वश्रूश्वशुराविति। अभ्यर्हितत्वादेव पूर्वनिपातः श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिता। अत्रापि दंपत्योर्जनयितृत्वमात्रविवक्षायां लिंगाविवक्षा

॥ पिता मात्रा॥ ॥ अन्यतरस्यामिति वर्त्तते नैकवदिति। मात्रा सहवचने पितृशब्दः शिष्यतेऽन्यतरस्यां। माता च पिता च पितरौ।
माता पितराविति वा॥ ॥ श्वशुरः श्वश्र्वा॥ अन्यतरस्यामिति वर्त्तते। श्वश्र्वा सहवचने श्वशुरशब्दः शिष्यतेऽन्यतरस्यां। श्वशुर
श्च। श्वश्रूश्च। श्वशुरौ। श्वश्रूश्वशुराविति वा॥ ॥ त्यदादीनि सर्वैर्नित्यं॥ त्यदादीनि सैवरूपाणि सर्वैः सहवचने शिष्यन्ते त्यदादिभिर
न्यैश्च। सर्वग्रहणं साकल्यार्थं। नित्यग्रहणं विकल्पनिवृत्त्यर्थं। स च देवदत्तश्च तौ। यश्च देवदत्तश्च यौ। त्यदादीनां मिथो यद्यत्परं तत्तच्छि
ष्यते॥ ॥छ छ॥ ॥

यां सामर्थ्यं नीयमनारंभपक्षे पि श्वशुरावित्यभिधानं द्वंद्वस्त्विष्यत एतेन॥ ॥त्यदादीनि॥ ॥सर्वशब्दस्यार्थमाह। त्यदादिभिरन्यैश्चेति। एतदेव प्रकटयति। स
र्वग्रहणमिति। त्यदादिभिरन्यैश्चेति यदुक्तं साकल्यमुक्तं तदर्थमित्यर्थः। अन्यथा प्रत्यासत्तेस्तल्लक्षणाश्चेदेव विशेषणमिति अधिकाराद्वा त्यदादिभिरेव सहवच
ने स्यादिति भावः। स च देवदत्तश्चेति ननु देवदत्तो पि स्यात् पुनस्त्वविवक्षायां नपुंसकेनैव निर्दे शः कार्येत तत् अन्यतरस्यामित्येवास्तु अन्वयार्थं चेपि सूत्रे हतौ
विशेषोत्तर्भवपितुं शक्यः नाविसम्यसरूपविरूपसाधारणत्वात् द्विरूपाणां एकनानाविधत्वात्। सत्यं तद्देवदत्तावित्यादिद्वंद्वनिवृत्त्यर्थं वचनं। अन्यथा तत्तु
त्यदादीयत्वनिह संभवद्वंद्वो पि स्यात् परं घतरमिति। त्यदादिपाठे परविप्रतिषेधाश्रयणादिति भावः॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्वपश्वपाविलादि· भाष्ये तु सर्वशेषः खल्वपि दृश्यते। स च पश्यता निमुक्तः। इह चाहं च भवांश्च आवामिति भवतीत्यादुः। त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि। आयदित्वात
सि: त्यदादीनां शेषे सह विवक्षितो शेषी: पुमान् यच्च नपुंसकं तद् शेषे लिंगवचनानि भवंतीत्यर्थः। स च देवदत्ता च तौ। सा च देवदत्तश्च तौ। तच्च देवदत्ता च ते पुनपुंसकयोस्तु सह
विवक्षायां परत्वान्नपुंसकशेषेन व्यवस्थात च्च देवदत्तश्च ते। इह स च कुक्कुटः सा च मयूरी कुक्कुटमयूर्यौ ते। अर्द्धपिप्पल्यास्ताः अर्द्धपिप्पली च सा अर्द्धपिप्पल्यौ ते इति येषां
रबलिंगमिति समासार्थस्य लिंगातिदेशात् तद्धि शेषस्यापि सर्वनाम्नस्तदेव लिंगं भवति। ग्राम्यप॰ पशुसंघेषु ग्रामे भवा ग्राम्याः ग्राम्या घग्खजौ। पुंसः शेषे प्राप्ते इति। पुमान् स्त्रि

॥ सचपश्वयौ । यश्वकश्वकौ ॥ ॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री ॥ ॥ ग्राम्याणां पशूनां संघाः ग्राम्यपशु
संघाः एतेषु सहविवक्षायां स्त्री शिष्यते। पुमांस्त्रियेति पुंसः शेषे प्राप्ते स्त्री शेषो विधीयते। अतरुणेष्विति
सामर्थ्यात्पशुविशेषणं। गाव इमाः। अजा इमाः। ग्राम्यग्रहणं किं। रुरव इमे। पशुष्विति किं। ब्राह्मणाः क्षत्रियाः।
संघेष्विति किं। एतौ गावौ चरतः। अतरुणेष्विति किं। वत्सा इमे। वर्करा इमे। अनेकशफेष्विति वक्तव्यं। इह मा
भूत। अश्वा इमे॥ ॥ इति काशिकायां वृत्तौ प्रथमाध्यायस्य द्वितीयः पादः॥ ॥ ३५ ॥ ॥ ॥

येत्यनेन। सामर्थ्यादिति। प्रधानस्य संघस्य तारुण्यं न संभवति इत्यस्मात्सामर्थ्यात् गुणीभूतानामपि पशूनां विशेषणमित्यर्थः। एतौ गावाविति। यद्यपि द्वयोरपि संघातोऽप्यवस्थैव
तथापि इह संघग्रहणसामर्थ्यात् द्वन्द्वानां संघो गृह्यते अन्यथा शेषस्यानेकविषयत्वात् अनर्थकं तत्स्यात्। अनेकशफेष्विति। शफाः खुराः उष्ट्राणां त्वभ्रापत्वात् स्त्री शेषाभावः॥
॥ ॥ इति श्रीहरदत्तमिश्रविरचितायां पदमंजर्यां प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः॥ ॥ ३५ ॥ ॥ ७ ॥ ॥ ४ ७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥ भूवादयो धातवः ॥ ॥ भू इत्येवमादयः शब्दा इत्यनेन पाठनिबंधनेयं संज्ञेति दर्शयति । यदि त्वनादृत्य पाठं क्रियावचनो धातुरित्युच्येत तत आणवेदुद्दत्यादिष्वपि स्यात् । कथं पुनर
पभ्रंशानामनुशासनमाशंकाते । कुतो नुरवल्येत अणाविहिलादयोपभ्रंशा इति । यावन्तो ये शास्त्रेणानुगम्यन्ते ते साधवः अव इष्टानुबंधादिविशिष्टरूपपाठेनैवरहीनीयं नहि तद्रूपप्रयो
गे समस्ति अतो नार्थः समर्थाधयाव एवाश्रितः भवतीति धातुत्वे सति तत्र भवति । एधते स्पर्धते इति । अनुदात्तेतो यदि पाठमात्र निबंधनेयं संज्ञाया वा दिव शब्दानां सर्वनामविकल्पस्याविचि
नां समान शब्दानामपि प्रसंगः । न च प्रायपाठ दिर्थो नियामकः अनार्षत्वात् अभियुक्तैरुत्तरकालनिर्दिष्टत्वात् अनेकार्थत्वाध्ययनाभावात् । सत्यं संज्ञायोक्तो दोषः । न तावद्धातुप्रत्यया
नां लशब्दानां प्रसंगः कर्त्रादीनामभावात् । उच्यते वा । वहेतिष्ठ नो धातोरिति लोपः स्यात् । न च धातुरिति निषेधात् अ शतिपदिकत्वाद्विभक्तिर्वनस्यात् नैन दृष्टि । विप्रक्षा वुल्लप्राया
प्यदोघत्वेदापि च यावद्रूपत्वे सति धातुत्वं सुबुत्पत्ति दृष्टायां तु पदित्वस्य नास्ति धातुत्वं वा शब्दानां सुबेव न स्यादेवं दिशब्दादपि न चादिवओ दिस्यात् द्वा तुत्वाभावे लिंगं । किंच तस्य दीक
तेः सुपि संभवात् सानुबंधकत्वे पि तस्यैव ग्रहणं स्यात् अत । समानशब्दानां प्रतिषेधो वक्तव्य इत्यत आह धातुशब्द इत्यादि । केचित्तु भू इत्येवमादयः शब्दा इत्यस्यानंतरं क्रि

॥ भूवादयो धातवः ॥ भू इत्येवमादयः शब्दाः क्रियावचना धातुसंज्ञा भवन्ति । भू भवति । एध एधते । स्पर्ध स्पर्धते । धातुशब्दः पूर्वाचार्यसंज्ञा । ते च क्रियावचनानां संज्ञां कृतवन्तः । तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् । क्रियावाचिनामेव भूवादीनां धातुसंज्ञा विधीयते ॥ ॥ श्रीः ॥ ॥ छ ॥ ॥

यावाचिन इति पठन्ते तस्मिन् पक्षे याप्रसंगं यस्य शंका सा तस्याद् दुष्टव्या अस्य तु कथं पुनः सूत्रेनुपात्तः क्रियावचन इत्ययं विशेषो लभ्यते अत आह धातुशब्दः पूर्वाचार्यसंज्ञेति ततः किमि
त्याह ते चेति । ततो ऽपि किमित्याह तदिहापीति । महत्याः पूर्वाचार्यसंज्ञाया आश्रयणात् दीर्घोपाक्षिपरिग्रहार्थमेवेति भावः । यावत् सिद्धमसिद्धमसिद्धं वा साध्यत्वेनाभिधीयते । आश्रितक्रम
रूपत्वात्सा क्रियेत्यभिधीयते । सिद्धं वा भवत्वसिद्धं वा शब्दे न तु पच्यस्त साध्यत्वेनाभिधीयते सा क्रिया साध्यत्वं च आश्रितक्रमरूपत्वात् । पूर्वापरीभूतावयवत्वं वितत रूपत्वं च यत् क्रम
रूपमभिधीयते तस्यैकस्मिन् क्षणे अनवस्थानं । यदाह क्रियानामेयमत्यन्तापरिदृष्टा । शक्या च सापि उभूता निदर्शयितुमिनुमितिरेकैकस्य क्रियाक्षणस्याप्रत्यक्षत्वेपि समूहरू
पा धातुगम्या क्रिया न प्रत्यक्षसमर्थ्यः क्रमवंत एव क्षणा एकफलोद्देशेन गंयापमान त्वात् एकमिवापन्ना धातुवाच्याः । तथा यच्चतीत्यधिश्रयणादयोधः अयणान्ताः क्लेद
नफलावच्छिन्नाः एवमपच्छदित्यत्रापि क्रिया साध्यैव तादृशस्यैव हि तु पस्यतत्रात्यय: प्रतीयते यत्पूर्वापरीभूतं । क्रियते घट इत्यत्र तु घटशब्देन सकीर्णाते पिघटः सिद्धरूप उच्यते
एकस्मिन्नेव क्षणे दर्शनयोग्यरूपेणोत्पर्थः । तदेवं क्रियावचनो धातुरित्याश्रयणात् इति अ संगेना सिद्धि निश्चिता इह भूः आदिर्येषामिति बहुव्रीहौ यणादेशे कृते भूवादय इत्यनुप
पन्नो निर्देश इत्यत आह ॥ ॥ छ छ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰८॰११
१०६

भ्वादीनां वकारोयं मंगलार्थ इति। अभिधानधर्मस्याप्यभिधेये उपचारः यथा भ्रमरो द्विरेफ इति भ्वादीनां संज्ञिनां संबंधी यो वकारः तदभिधायिनि भ्वादिशब्दे स्थितः अयं प्रयुज्य
ते लक्षणेनाप्राप्तो निपात्यत इत्यर्थः। स च मंगलार्थः। अपूर्वस्य लाभो मंगलं दध्यादिलाभवत्। अस्यैव शब्दस्यापूर्वस्य लाभायेत्यर्थः। धर्मो वा मंगलं साधुशब्दप्रयोगे पि धर्मो भवति भू
वादिशब्दश्च साधुः। किंच। वकारे सत्यविकृतो भूशब्दो याहृत्वा दिस्मायतीत्यपि धर्मो भवतीति। प्रकारांतरमाह भुवो वार्थं वदंतीति। भुवो धातोरर्थं वदंतीति वा भ्वादय इति निर्देश इत्यर्थः।
अर्थकथनं चैतत्। सुसन्निस्क भवनं भूः क्रियासामान्यं भुवं वदंतीत्यणादिको यं गमिवयियति राजिब्रजिसहिहनिवाशिवादिवारिभ्य इञ्जिति कतरि खिदेः इञ् प्रत्ययः यदि क्रियासा
मान्यं ये वदंतीति ते संज्ञिनः अस्ति लवति विघतीनामेव स्यात् न पचत्यादीनां विशेषवाचिनां। घञ्चिषिवद्धातिक्षेति। तघ्याभाव इति सामान्योपादानेन विधीयमानो घञ् विशेषवा

भ्वादीनां वकारोयं मंगलार्थः प्रयुज्यते। भुवो वार्थं वदंतीति भ्वर्था
वा वादयः स्मृताः। धातुप्रदेशाः धातोरित्येवमादयः॥ १ ॥

चिभ्यो पि भवति पाकस्त्याग इति तत्कस्य हेतोः विशेषेष्वपि सामान्यसंभवात् विशेषाश्रयनिषेधाभावाच्च तद्वदिहापि। अस्मिन्नर्थे गणपाठसामर्थ्यात् सोयं गीक्रियते अन्यथा शबि
करणाय सेटो निरनुबंधकाश्च ताणकार्यवर्जिता भूप्रभृतयस्तेषां पागेनर्थकः स्यात्। बहुव्रीहेस्त्व भूवादिशब्दस्य पृषोदरादित्वात् साधुत्वं। तृतीयं प्रकारमाह। भ्वर्था वा वादयः
स्मृता इति। भवनं भूः सोर्थो येषां ते भ्वर्थाः एवंभूता या वादयो वा त्र संज्ञिनः स्मृता इत्यर्थः। किमिदं वादय इति वा गतिगंधनयोः वा आदिर्येषां ते वादयः वा गतिसा दृष्यचुरादिसमाप्तेः।
तथा वक्षादयो वादयः भूप्रभृतयः आ वा गतिगंधनयोरित्यस्मात् द्वादय अवादय अत्र बहुव्रीहितत्पुरुषयोः स द्विविध छायां स्वार भिन्नानां यस्यां तरः स्वरविधिरिति बहुव्रीहेः शे
षः ततो भुवो वादय इति वाच्य वाचक संबंधे शेषषष्ठीसमासः। अस्मिन्पक्षे या न विशेषोर्थश्चेत्सु भयं सूत्राक्षरैरेवोपात्तं भवति॥ १ ॥ ॥७ ७॥ ॥

२ २ २ २ २ २॥

ए॰म॰
१०६

© Dharmartha Trust J&K. Digitized by eGangotri

।।उपदेशे।। उपदिश्यतेनेनेत्युपदेशः इति। अकर्त्तरि च कारक इति करणे घञ्। ननु च नेयं संज्ञा यरत्वाच्च करणाधिकरणयोरिति ल्युट् प्राप्नोति इह ल्युट् त्वेत्यत्रापि संज्ञायामिति संज्ञायामित्येव। ल्युड्
बहुलं भवति कृत्यल्युटो बहुलमिति। अकर्त्तरि चेत्यत्र चकारो भिन्नक्रमः संज्ञायां चेति तेन क्वचित् संज्ञायामपि भवति। अथोपदिश्यते नेनेत्यत्रोपदिशेः कोर्थः। विधानं। यद्येवं लण् एधङ्
इत्यादौ न स्यात् न ह्यत्र किंचिद्विधीयते। अथानिर्ज्ञातस्वरूपस्य स्वरूपज्ञापनेन तत आचार्येण लभ्यते बहोरेव क्रिवेत्यत्र गल्भाद्यकारस्य न स्यात् न हि गल्भादीनां स्वरूपज्ञापनार्थमुच्चा
रणं पंचमी निर्देशेन क्रियो विधानात्। यद्येवं क्विवेन नानिर्ज्ञात रूपो ज्ञाप्यते तत्र वाये भवस्य कार्य इति भविष्यति। शास्त्रवाक्यानीति। लण् एधस्पर्द्धत्यादीनामपि विशिष्टप्रयोजनपरत्वेनोच्चा
रणात् वाक्यत्वं। अस्यैव विवरणं सूत्रपाठ इति। खिलपाठो धातुपाठः प्रातिपदिकपाठो वाक्यपाठश्च तत्र सूत्रे मतुवादेतु काः धातुषु एधाद्यकारः प्रातिपदिकेषु भवच्छब्दस्योकारः। वाक्ये

।उपदेशेऽजनुनासिक इत्।उपदेशे किं।अभ्रम्।अप्रपः।अजिति किं।आतो मनिन् क्वनिब्वनिपश्च।शेऽत्रानुनासिक इत्। उपदिश्यतेनेनेत्युपदेशः। शास्त्र
वाक्यानि सूत्रपाठः खिलपाठश्च। तत्र योऽजनुनासिकः स इत्संज्ञो भवति। एधाञ्चक्रे प्रतिज्ञानुनासिकाः पाणिनीयाः। उप
देश इति किं॥ ॥श्रीः॥ ॥श्रीरामचंद्राय नमः॥ ॥श्रीकृष्णाय नमः॥ ॥छ॥ ॥

।।लंबाधकारः। ननु च सर्वत्रात्र अच्चु द्वौ च पद्यन्ते नानुनासिकः इत्यत आह प्रतिज्ञानुनासिका इति। प्रतिज्ञामात्रेण समाधिगम्यमानुनासिकत्वं येषां ते तथोक्ताः। प्रतिज्ञानुनासिका इ
ति तु प्रसिद्धः पाठः तत्र प्रतिज्ञा समधिगम्यत्वात् अनुनासिके प्रतिज्ञानुनासिका इति। प्रतिज्ञामात्रेण समाधिगम्यमानुनासिकत्वं येषां ते तथोक्ताः। प्रतिज्ञानुनासिका इति तु प्रसिद्धः पा
ठः तत्र प्रतिज्ञा समधिगम्यत्वात् अनुनासिके प्रतिज्ञाशब्दो द्रष्टव्यः ततः समानाधिकरणपदो बहुव्रीहिः भवत्व प्रतिज्ञानेनानियमेन भवति किं तर्हि यत्राचार्याः स्मरंति तत्रैव सूत्रकारेणा
नाद्विलक्षिताः सर्वेनुनासिकाः पठिता दुर्लभपथ्यशास्त्राणि विवृत लेखकैरुक्तसंकीर्णानि लिखिताः। तत्र स्मृतिपरंपरया निर्णय इत्यर्थः॥ ॥छ॥ ॥छ छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ ११
१७

अभ्रत्रां अप इति। नायं सूत्रादिषु स्वरूपेणोच्चारितोनुनासिकः किं तर्हि आङोनुनासिकः छंदसीत्यनुनासिकशब्दे न विहितः। अथ क्रियमाणेप्युपदेशग्रहणे ङ इत्संज्ञस्य कस्मान्न भवति विधानसामर्थ्यात् इत्संज्ञायां हि तस्य लोपः स्यात् यद्येवं अत्रापि विधानसामर्थ्यादेव न भविष्यति एवं तर्हि उदाहरणांतरं प्रदर्शितं इदं त्वत्रोदाहरणं प्रगृह्यसंज्ञानुनासिकः दधीं इति त्राह्मणकुलमिति किं जंता क्विपि अल्लोपे वलि लोपे नपुंसकह्रस्वत्वं दधिइति यद्यत्रेत्संज्ञा स्यात् इदितो नुम्धातोरिति नुम् स्यात्। अत्राप्यनुनासिकविधानसामर्थ्यादेवेत्संज्ञा न भविष्यति। न नुवयत्रेत्संज्ञायां सत्यां प्रयोजनं न संभवति यथा दधिमधिति प्रातिपदिके कृते तत्रेत्संज्ञाया अभावः अत्रानुनासिकविधानमर्थवत्। नैतदेवं लोपस्येत्कार्यस्य सर्वत्र संभवात्। तस्मादुणोप्रगृह्यस्य इत्संज्ञायामेव विधेयायामनुनासिकविधानसामर्थ्यादेवात्र लोपो न भविष्यति। एवं तर्ह्युत्तरार्थमवश्यमुपदेश इति वक्तव्यं तदिहापि विस्पष्टार्थं भविष्यतीति मन्यते। आ लोमनिन्निति। अत्र मकारस्येत्संज्ञा न भवति यदि स्यात् अन्येभ्योपि दृश्यंत इति हलंते सा ऋवः परः स्यात्। सर्वस्येति। टी डा प्रभृति संबंधिनोपि॥ हलं॥ ॥ अंतशब्दोत्र समीपेवर्त्तते नावयवे असंभवात्। न समीपे अतिप्रसंगात्। येन समाप्यते स समुदायः तत्र अंते भवमंत्यं। दिगादित्वाद्यत्। हलंते सर्वप्रसंगः सर्वस्य हलः संज्ञा प्राप्नोति सर्वो हि हल्ततेमवधिप्रत्यं

अभ्रत्रां अप॥ अति तिकिं आतोमनिन् क्वनिब्वनिपश्च। अनुनासिक इति किं। सर्वस्याचो मा भूत्। इत्संदेशाः आदि
तश्चेत्येवमादयः॥ ॥ हलन्त्यं। उपदेश इति वर्त्तते। अंते भवमंत्यं। धात्वादेः समुदायस्य यदंत्यं हल् तदित्संज्ञं भवति। अइ
उण्। णकारः। ऋलृक्। ककारः। एओङ्। ङकारः। ऐऔच्। चकारः। उपदेश इत्येव। अग्निचित्। सोमसुत्॥ २ ॥

एम॰
१७

तो भवति अंत्यग्रहणं त्वादि निवृत्त्यर्थं स्यात् अत आह धात्वादेरिति। आदिशब्देन सूत्रप्रातिपदिकप्रत्ययनिपातागमादेशानां ग्रहणं शीङ् लश्मन् ट्टसन् आङ् त्रयुजः तुनोःधुक् चक्षिङः ख्याञ् इति यो यं धात्वादिरूपः समुदायास्तदर्थास उपदेशः न तु नांतरीयकावांतरसमुदायार्थ इत्येतस्य समुदायापेक्षायां प्राधान्यादु त्वादेरेव ग्रहणं इति भावः। अग्निचिदिति। अत्रेत्संज्ञायां लोपः स्यात् न च तुकोवेयर्थ्यं आगमस्योच्चरितार्थत्वात् न च क्विपापि त्वास्य वैयर्थ्यं अग्निचितादि प्रादेशोच्चरितार्थत्वात्। यद्यप्यत्रोभयत्रापितावतोवधेस्तकारेत्यस्तथापि सुरमसमुदायस्यानोत्य इति नास्ति प्रसंगः। इह च दंडिन्निति नकारस्येत्संज्ञायां सत्यां न ङिसंबुद्ध्योरिति निषेधाल्लोपाभवेपि समुदायस्य नित्त्वादाकदात्तत्वप्रसंगः यथाश्रोत्रियशब्दे वाकार्थे पदवचनमिति यस्मेअर्थोपदेशानु हत्वावपि स नुतरीत्स्य स्य रेफस्य कस्मान्न भवति स्वरादिपाठात् तोदात्तयाठसामर्थ्यात्॥ २॥

॥ ॥२॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

रहहशषसन्रहलितियोलकारस्तस्येत् संज्ञायां सत्यां हलित्यर्यं प्रत्याहार उपपद्यते सति च प्रत्याहारे लणिमित्रलकारस्य हल्त्वात्तस्यैव शषसरहहल इत्यत्रान्ते निर्दिष्टत्वादित्सं
ज्ञातदाश्रयश्च प्रत्याहार इति रत्नरेतराश्रयत्वाद्धलिति तावत्प्रत्याहारो नोपपन्नः ततश्च सर्वेषामेवणकारादीनामित्संज्ञा न स्यादिति सर्व एव प्रत्याहारव्यवहारो नुपपन्नः ततश्च स
र्वेषामेव णकारादीनामित्संज्ञा न स्यादिति सर्व एव प्रत्याहारव्यवहारो नुपपन्नः आदिरन्त्येनेत्येतस्यापि वैयर्थ्यं स्यादेनतद्धलित्यत्र हकमात्रपरलकारः तस्य लकारस्यैकादेशो लपरः
कृतः तस्योपदेशेऽजनुनासिक इतीत्संज्ञा स एव हलन्तेऽमिसत्राप्येकादेशेन लपरेणानिर्दिष्ट इति एवमपीतरेतराश्रयमेव लकारस्य सत्यामित्संज्ञायां हलिति प्रत्याहारः सति च
प्रत्याहारे ऐऔजिति चकारस्येत्संत्यामजिति प्रत्याहारे सति लकारस्येत्संज्ञेति तस्मादुक्तमत्र परिहारः तस्माद्धहसलहतिस्यादि साधारणो भवेदर्ज यथा तुल्यकक्षयो भुञ्जान

ननु विभक्तौ तुस्माः पूर्वेण प्राप्तायामित्संज्ञायां विभक्तौ वर्तमानानां तवर्गसकारमकाराणां प्रतिषेध उच्यते तवर्गो यथा सिद्
मामिनातस्मात् हन्तात् लन्तात् सकारः जस् ब्राह्मणाः तस् यस् पचतः पचथः मकारः अपचन् अपचतां विभक्ताविति
तिकिं अचोपत गुणमिषमे रुधादिभ्यः श्नम् क्किमोऽदित्यत्र प्रतिषेधो न भवति अनित्यत्वादस्य प्रतिषेधस्य इदमस्थमुरित्युः
कारानुबन्धनिर्देशादनित्यत्वमुपलभ्यते ॥ ॥आदिर्ञिटुडवः॥ ॥ इदितिवर्तते आदिशब्दः प्रत्येकमभिसंबध्यते ञि
टु डु इत्येतेषां समुदायानामादितो वर्तमानानामित्संज्ञा भवति ञिमिदा मिन्नः ञिक्ष्वा क्ष्वः ञिइन्धी इद्धः ञिइन्धी इ
द्धः टुवेपृ वेपथुः टुओश्वि श्वयथुः डुपचष् पक्त्रिमं डुवप् उप्त्रिमं डुकृञ् कृत्रिमं आदिरिति किं पटूयति कण्डूयति
उपदेश इत्येवा ञिकारीयति ३ ॥+ हमालहलितिद्वितीयमत्र हलग्रहणं तत्रेणो
योः प्रदीपः स चेह प्रयत्नविशेषः यथा श्वेतो धावतीत्यत्र साधारणोनेकेनैव प्रयत्नेन द्वयोर्वाक्ययोरुच्चारितयोः फलं संपद्यते तथेहाप्येकेन तन्त्रेण प्रयत्नेन द्विती
यं हल्ग्रहणमुपात्तं परिगृहीतं वेदितव्यं तत्स्यद्वितीयस्याह्यामाह हस्यति समीपसमाप्तिसंबंधेषष्ठीसमास इत्यर्थः ततः किमित्याह तेनेत्यादि एतद्दर्शयति हकारस
मीपवर्तिनो लकारस्य न प्रत्याहारसमाश्रयणेनेत्संज्ञाकिंतर्हि साक्षादुपादानेनेति प्रत्याहारपाठे क्रमसमाम्नायः तथा चेत्यादिगतार्थं किं पुनस्तत्र प्रमाणं आग

© Dharmartha Trust J&K. Digitized by eGangotri

नति॥ हृस्वादिति तकारस्येत्संज्ञापां तिनि स्वरितं स्यात्। ननु चादेशे लोपरकालं स्थानिवद्भावेनास्य विभक्तिसंज्ञा प्राप्नोति तस्य प्रतिषेधसामर्थ्यात्तु मा
विन्नपि विभक्तित्वे प्रतिषेधो भविष्यति वर्णग्रहणं किं। हृस्वानित्यत्रापि यथा स्यात्। क्व पुनरुपदेशो नकारोपमन्त्रो ननु तावत्तस्य संघातस्य क्वचिदुपदेशः। इमान्
इत्यत्र त्वकारो नकारस्येत्संज्ञापरित्राणार्थ इति शाकं च वक्तुं। इह तर्हि सम्यग्न पचेरन्निति। ब्राह्मणा इति रूपोदाहरणो मे तत्। कार्योदाहरणं तु भवंत इति।
अत्र सिति चेति पदत्वे जश्त्वं स्यात्। पचतः पचतः पचथ इत्यत्र प्रयोजनाभावादेव न भविष्यतीति शाकं वक्तुं। अयं च तामित्यादि। तामाहस्य तस्याः
नामं त्या दद्यः। परेस्तु॥ किमो दित्यस्य प्रागदिशो विभक्तिरिति विभक्तित्वे इत्येदितस्यापि स्थानिवद्भावेनेति तयोरपि प्रतिषेधः प्राप्नोति तत्राह किमो
दित्यादि। अनित्यत्वं तु इदमस्थमुरिति थमोउकारानुबंधाद्विज्ञायते क्वचित्तु हृत्त्वादेव इदमस्थामुरित्युकारानुबंधनिर्देशादनित्यत्वमुपलक्ष्यत इति
पंचत इदानीं तदानीमिति दानीमस्त्व प्रतिषेधो भवत्येव अनित्यत्वं हि ज्ञापितं न पुनः प्राग्दिशीये थस्याप्रवृत्तिः। अदिति। आदिग्रहणं प्रत्येकमभि
संबध्यते तेनैकवचनमुपपद्यत इति भावः। अत्र दु इति न टवर्गस्य ग्रहणं उकारस्यानुनासिकत्वेनानुदित्वात्। चुटू इत्युत्तरत्र टवर्गग्रहणात् भिड
भोमाहच पचि। भिन्न इति छिन्न इति। आदितश्चादाभ्यां निष्ठा तो नः। ले पथु इति ह्वितो घुटच उत्रिमम् इति। ड्वितः क्त्रिः मं निर्वृत्तं यत्रादित्वोत्संप्रसा
रणं। पपूपतीति एध्वादिष्पुपदुशो दस्योपदेशः। अत्रेत्संज्ञार्थं सत्यामवयवे कृतं लिंगं समुदायस्य विशेषकमिति समुदायाद्यथुच प्रसंगः। केवल
स्यानुदाहरणात्व मितकार्याभावात्। कंड्यतीति ननु चामंदीर्घांतः कंड्वादिषु पद्यते एवं तर्हि कंड्वमिच्छतीति क्यजंतात् क्विपि कंडू ब्राह्मणकुल
तदिच्छतीति पुनः क्वविदृष्टम्। तत्रेत्संज्ञायामंतरंगत्वाद्दकृत एव दीर्घ भवत्ययं दुश्शाहः। गणपाठे तथ्यकुंडूशा एकदेशविकृतत्व इति स्यान्तप्रसंगः।
त्रिकारीभतीति नायं समुदायः क्वचिदुपादिष्टः॥ ३ ॥

॥षः प्रत्ययस्य। रजकीति। षित्गौरादिभ्यश्चेति ङीष् कथं पुनरत्रोपधालोपः यावता अनिदितां हल उपधायाः क्ङितीत्युच्यो। ज्ञापकात्सिद्धं। पर्यंजनीजर्ष्षकसुरंजोमंतीश्चेति मित्संज्ञो
शासितत् ज्ञापयति रंजेश्च ङित्यपि ष्कचिदुपधालोपो भवतीति। षोड इति। वद्दंता अस्य वयसि दंतस्य दत् षड् त्वं दत् दशाधास्त्रतरपदादेः ए षु त्वं चेति षषो तस्यो त्वं डत्ररपदा
देई. कारः। षोडन्नमाच ष्ट इति ति चिदितिलोपः। पचा पचि शिलोपः। षण्ड इति षणुदानेऽनुमंतादुः उणाद्यो बहुलं इति बहुलवचनात् इत्संज्ञा सत्वयोरभावः। षडिक इति अनुकंपि
तः षडंगुलिः वहूचोमनुष्यानाम्नष्ठ्वा षज्ञादावुद्दीद्वितीयादच इति ङ्गुलिशब्दस्य लोपः यस्येति लोपस्य स्था निवद्भावात् षकारांते वृद्धोभसंज्ञाया अभावादंतर्दंतिनी विभक्ति
माश्रित्यपदत्वाज्जश्त्वं अत्रत्त्वं ज्ञायां स्त्री क्वि ष्वायां मच प्रसंगः यद्येप्येते समुदाया न कार्ष्यु परिदृश्यते षकारस्य ष उत्वं षणुदान इत्युपदेशस्थो भवति। अविषोमहिष इति अविमह्योष्टि

॥षः प्रत्ययस्य॥ ॥षकारः प्रत्ययस्यादिः इत्संज्ञो भवति। शिल्पिनि ष्वुन्। नर्त्तकी। रजकी। प्रत्ययस्येति किं। षोडः। षडिकः। आ
दिरित्येव। अविमह्योष्टिषच। अविषः। महिषः॥ ॥चुटू॥ ॥चवर्गटवर्गौ प्रत्ययस्यादी इत्संज्ञौ भवतः। गोत्रे कुञ्जादिभ्यश्च्फञ्।
कौञ्जायन्यः। छस्य ईयादेशं वक्ष्यति। जस्। ब्राह्मणाः। अस्यां तादेशं वक्ष्यति। शण्डिकादिभ्योञ्यः। शाण्डिक्यः। टवर्गः। चोरट्। कुरुच
री। मद्रचरी वस्य इकादेशं वक्ष्यति। सप्तम्यां जनेर्डः। उपसरजः। मन्दुरजः। ढस्येयादेशं वक्ष्यति। अन्नाणः। आन्नः। पृथक्योगक
रणमस्य विधेरनित्यत्वज्ञापनार्थं तेन वित्तश्चुञ्चुप्चणपौ। केशचुञ्चुः। केशचणः। अवात्कुटारच्च नतेनासिकायाः संज्ञायां
टीटञ्नाटज्भ्रटचः। अवटीटः। आदिरित्येव। कर्मणि घटोऽठच्। कर्मठः॥ ॥

षचूलन्वत्रप्रयोक्तनाभावादेव षकारस्येत्संज्ञा न भविष्यति ईकारस्यादित्वादेव सिद्धेः। न च यञ्जेङीबर्थः षकारः ङीयोपि चितः परस्योदात्तनिवृत्तिस्वरेणोदात्तत्वात्। सत्यमन्यतरस्ये
वाणार्थ उपदेशः स्यादिति टकारस्यापि शंकेत। चुटा आदित इति प्रारंभे वर्तमाना वित्यर्थः। कौञ्जायन्य इति सूत्रं नात ब्रातच्फञोरस्त्रियामिति स्वार्थे भ्या शां डिकादिभ्यो ञ्य इति। सोप्या
भिञ्जन इति तत्र वर्ति। मंदुरज इति ङ्वायोः सज्ञाछंदसोरिति ह्रस्वः। अन्नाण्य इति घनगणं लब्धेत्सनो लब्धेति ज्ञत्रानुवर्तते किमर्थो योग विभागः ष चुटू प्रत्ययस्य इत्येक एव योगः
क्रियतामत आह पृथगित्यादि। केशचुञ्चुः केशवरण इति अत्र वकारस्येत्संज्ञायां चित इत्यंतोदात्तत्वं स्यात् पित्कारणं तु पर्यायार्थं स्यात्। अवात्कुटारच्चेति अनेन नतेनासिका
यां संज्ञायामित्यत्र अवादित्यस्यानुवृत्तिर्दर्शिता॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

लशक्का। प्रियंवद इति। अह हृषिर ज्ञेतस्य मुम्। जिष्णुरिति। विस्तत्प्रत्ययस्यापि त्वयक्षेगकारस्येदमुदाहरणं। चूडाल इति। मत्वर्थे प्राणिस्थादातो लजन्यतरस्यामिति लच्। अत्र लित्स्व
चित्स्वरयोः पर्यायः स्यात्। लोमश इति अत्र प्रयोजनाभावादेव न भविष्यतीति शक्यं वक्तुं। कार्णिके तिक र्णललाय न् कस्य लंकार इति भवार्थेक न् अत्र किति वे तिह्रद्धिः स्यात्। न्त्वयं
चन स्विष्मेत्। अथ हृदिशिष्छिदि प्रभृतिषु इरित्यस्य समुदायस्य केनेत् संज्ञा मा भूत्त्समुदायस्य रेफस्य हलंत्यमिति भविष्यति इकारस्योपदेशो जनुनासिक इदिति। इरितो वेत्यत्रापि इश्वर
ञ्चरौ इतो विताव स्येति विग्रहः। ननु इरित्ययं समुदायः स इत्येति अवश्यं च इकारस्य पृथगित्संज्ञेषितव्या स्यादिते नइत्साहनेयदेयथा स्यादिति यथैवमिति दितो नुम धातोरिति नुमप्रा

लशक्वतद्धिते॥ ॥तद्धितवर्ज्जितस्य प्रत्ययस्यादितो वर्त्तमाना लकारशकारकवर्गा इत्संज्ञा भवन्ति। लकारः। ल्युट्। चयनो
ज्जयनं। शकारः। कर्त्तरि शप्। भवति। पचति। कवर्गः। क्तक्तवतू निष्ठा। भुक्तः। भुक्तवान्। प्रियवशे वदः खच्। प्रियंवदः। वशंवदः।
ग्लाजिस्थश्च ग्स्नुः। ग्लास्नुः। जिष्णुः। भूष्णुः। भंजभासमिदो घुरच्। भंगुरं। टाट्सिङ्साभिनात्स्याः। इन्शात्। इक्षस्य। अतद्धित
इति किं। चूडालः। लोमशः। कर्णिका॥ ॥तस्य लोपः। तस्येत्संज्ञकस्य लोपो भवति। तथा चैवोदाहृतं। तस्य ग्रहणं सर्व
लोपार्थं। अलोन्त्यस्य मा भूत्। आदिर्ञिटुडवः इति॥ ४ ॥ ॥

स्योति कुंभीधान्यस्यायेन न भविष्यतीति यथा कुंभीधान्यः श्रोत्रिय इत्युच्यते यस्य कुंभ्यामेव धान्यं भवति यस्य पुनः कुंभ्यां वान्यत्र वनास्ते कुंभीधान्यः। नायं न्यायो नुम विधौ शक
आश्रयितुं इह हि न स्यात्। कुनरिनंदश्रुरिति ज्ञापकात्तसिद्धं यदयं नदशाइति वत्सस्य प्रतिषेधं शास्ति तरजयपतिने रितां नुम भवति अन्यथा दृशोरिरत्वानुमि सति अनिगुपधा
ला तवत्सस्य प्राप्तिरेव नास्ति किं तन्निषेधेन। परिहारांतरमप्यत्र तु स्थिरैव ह्यते। तस्य। तस्य ग्रहणं किमर्थं यावता अभावो लोपः स च कस्य चिदेव भवति। तत्र प्रकरणा
दित्संज्ञकस्यैव लोपो भविष्यतीत्यत आह। तस्य ग्रहणमित्यादि। आदिर्ञिटुडव इति असति तस्य ग्रहणे ये अनेकाल इत्संज्ञकाञ्ञिप्रभृतयः स्तेष्वलोन्त्यस्य लोपः स्यात्
तस्य ग्रहणसामर्थ्यात्तु सर्वस्य भविष्यति। एतच्च नानर्थके लोन्त्यस्य विधिरित्यनाश्रित्योक्तं ४

© Dharmartha Trust J&K. Digitized by eGangotri

यथासंख्यासंख्याशब्देनात्र क्रमो लक्ष्यत इति। कथं अव्यभिचारात् एकैकस्योद्देश्यानुदेशीव यथामुख्यादृत्तेः तिन लआनियमप्रसंगः इत्यनेकत्वसंख्या चक्रमं न स्ति चरति युगपद्
नेकस्य शब्दस्योच्चारयितुमशक्यत्वात् मुख्येत्यर्थेपमर्थः स्यात् समानां समसंख्यानामुद्देशिनां यासंख्या चतुरादिलक्षणा तयानुदेशः संबध्यते तत्र संख्याको सूत्वा संयत इति ततश्चान
र्थकमेव स्यात् समत्वादेवास्यार्थस्य सिद्धत्वात् अतः क्रमपर एव संख्याशब्द इति। यथाक्रमग्रहणं तु न कृतं। संख्याद्वारकं साम्यं यथा विज्ञायेत अन्यथा स्थानप्रयत्नादिकृत
मपि समत्वं प्रतीयेत तत्र चक्रियमाणमपि संयत इति ततश्चानर्थ्य संख्याद्वारकं साम्यं यथा विज्ञायेत अन्यथा स्थानप्रयत्नादिकृतमपि समत्वं प्रतीयेत न तु च क्रियमाणमपि संख्या
ग्रहणं क्रमपरमिति कथमतः संख्यासाम्यप्रतिपत्तिः। यस्यां क्रमे शब्दः पर्यवस्यति मुख्योऽर्थः प्रतीयते सहि प्रतीतो लाक्षणिकं गमयतीति। तस्मात् संख्याग्रहणसामर्थ्यात् तद्द्वा
रकमेन साम्यं गृह्यते। यथासंख्यमिति। यथा। सादृश्य इति वीप्सायामव्ययीभावः। अनुदेशो भवतीति संबंधो भवतीति दृष्टव्यं। यथावस्यति अनुदेशिनः संबध्यंत इति। अनुदिश्यत

॥ यथासंख्यमनुदेशः समानां ॥ संख्याशब्देन क्रमो लक्ष्यते। यथासंख्यं यथाक्रममनुदेशो भवति। अनुदिश्यत इत्यनुदेशः।
पश्चादुच्चार्यत इत्यर्थः। समानां समसंख्यानां समपरिपठितानामुद्देशिनां अनुदेशिनां च यथाक्रमं अनुदेशिनः संबध्यंते। तू
दीसलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः। प्रथमात्प्रथमः द्वितीयात् द्वितीय इत्यादि। तौदेयः। सालातुरीयः। कौचवार्यः। समा
नामिति किं। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः। लक्षणादयश्चत्वारोऽर्थाः प्रत्यादयस्त्रयः। सर्वेषां सर्वत्र कर्म
प्रवचनीयसंज्ञा भवति। इह कस्मान्न भवति। वेशोयशआदेर्भगाद्यल्। खचेति। स्वरितेन लिंगेन यथासंख्यं प्रवर्तत्रेष्यते। तत्र
स्वरितत्वेन प्रतिज्ञायते। स्वरितेनाधिकार इति स्वरितग्रहणं पूर्वेणापि संबध्यते ५

इत्यनुदेश इति। अकर्तरि च कारके संज्ञायामिति संज्ञायामपि कर्मणि घञ्। अनुशब्दः पश्चादर्थे। दिशिरुच्चारणक्रिय इत्याह। पश्चादुच्चार्यत इत्यर्थ इति। यदुक्तं संख्याद्वारकं साम्यं गृह्यत इति
तद् दर्शयति समानां समसंख्यानां अस्यैव विवरणं समपरिपठितानामिति। उद्देशिनामिति। कांचिद्धर्मं विधातुं प्रसिद्धवदुद्धृत्य परामर्शो योनैः येन रूपेणोपादानमुद्देशः तद्वन्त उद्देशिनः
विधेयतया पश्चादुच्चारणमनुदेशः तद्वतोनुदेशिनः। यद्यपि सूत्रे उद्देशिनो न श्रुताः तथाप्यनुदेशशब्दस्य संबंधिशब्दत्वात् समसंख्यत्वस्य प्रतियोग्यपेक्षत्वात् च यथा गम्यं
ते। उद्देशिनामनुदेशिनां चेति। यथाक्रममिति सेत्स्यपेक्षया यथेष्ट्यो। यथाक्रममिति। पूर्ववदव्ययीभावः। तृतीयांतं चैतत् तात्त्वयम् अत्रार्थः। समसंख्यानामुद्देशिनामनुदेशिनां च यो
यः क्रमः प्रथमचरमभावः तेन तेनानुदेशिनः संबध्यंते उद्देशिभिः। सहेत्यर्थात् गम्यते चोद्देशिभिरिति यद्यते। तत्र सहयोगे तृतीया। प्रथमात्प्रथम इत्यादिना सूत्रार्थमु

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ ११

११०

वहंतिवर्षं नदंतीतिइत्यादौ लोक एव यथासंख्यासंबंधस्य दृष्टत्वात्त्रार्थ एतेन उच्यते । अनुक्रमेणापि संबंधो लोके दृश्यते कस्मात् दृष्टत्वात् । गोदंडकंदुक
हस्ताविति योग्यतावशात् संबंध इति चेत् क्रमेणापि संबंधस्तद्दृशादेव योग्या हि न घो वहनेघ नाम्बुवर्षणे अत एवैकस्य धर्मिणो बहुषु धर्मेषु वि
हितेषु विधानक्रमेणान्यथा वा योग्यतानुरूपण्व संबंधो भवति अमुमुद्दृत्य प्यापयमोजयस्तापयोत त्वर्तयै तिस्यादै तत्त्वतः प्राप्तिरियं पदुत्तक्रमे
ण संबंधः तथा हि योपत्तविशेषानवधारणे प्रथमप्रतीमयोः संबंधो वा धकाभावात् नाकता हि द्वयोरपि चरितार्थत्वं । द्वितीयस्य धर्मिणोध
र्मस्यवाप्रतियोग्यपेक्षणं प्रथमश्रुतस्य चरितार्थत्वात् अचरितार्थेन द्वितीयेन प्रतियोगिनं संबंधः । एवं सर्वत्र तस्मान् स्वरः प्राप्तः क्रमसंबंधः
सिद्ध इति यद्येवं लक्षणे धूर्भूता व्याने स्यादैविषम्योप्येवमेव स्यात् । यावतां सम्यं तावतां मादिनः क्रमेण संबंधः परिशिष्टस्य तु सर्वैः स्वरितेनाचे
ति अतः समानामितिवस्यामीत्यारंभः स्वरितेनेति विशेषं वक्ष्यामीति । कचिद्विमान्यपि नेष्यते अथारंभमाणोप्यस्मिन् परस्मैपदानां णलादि
योलुः प्रथमस्यजारौरसः परचेय्यवायावुइत्यत्र कथमस्य प्रवृत्तिः यावता परस्मैपदादिसंज्ञया यथासंख्यं देवसंज्ञिनां प्रतीतिः नक्रमेणास्त्यं तिवादि
सूत्रे अक्षरसमाम्नायेवन्निवादयः क्रमेण प्रतीताः सएवक्रमो नियामको भविष्यति । एवं द्वंद्वे पि माघे स्मारौ युगपदधिकरणवचनतायां द्वंद्वे पि क्र
मस्यप्रतीतिः सएव नियामकः । ननु च तिपोणल्तसोतुस पचपिकः । घ्रजिघ्र इत्येवं भिन्नवाक्यानयोपदेशेस्त एवं हीदं नवक्त्यं भवति सत्यमेवं
तु गौरवं स्यात् तस्य स्वरूपेण निर्देशात् तत्र विभक्तेर्भेदनोच्चारणोच्च । तथा क्रियालये वेत्यत्रानन्तरोन्मसो मे सेतन्तसंबध्येत । तदाह । संज्ञासमासनि
र्देशात् सर्वप्रसंगो तु देशः तत्र यथासंख्यवचनं नियमार्थं संज्ञासमासनिर्देशाश्च पृथक्विभक्तिसंज्ञस्तु च्चारणार्थः प्रकरणे च सर्वसंप्रत्ययार्थ
इति । नोदेयइत्यादेशोसौ अभिजन इत्यत्रार्थ्यप्रत्ययः । इहेत्याशिः एकयोगत्वप्रसंगे पृथग्भिन्नयोग प्रसे तु योगविभागो यथासंख्यनिरासार्थ इति वस्यति । के
चित्तु विभज्य योगं पठंति अन्ये त्वेकमेव । स्वरितेनेत्यादिपरिहारः कथं पुनरयं विशेषो लभ्यत इत्याह । स्वरितेनाधिकार इत्यादि । यद्येवं स्वरिते दृष्टे संदेहः स्या
त् न ज्ञायते किमयं यथासंख्यार्थः आहोस्विदधिकारार्थ इति संदेहमात्रमेव न तत् भवति सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि

राम॰

११०

© Dharmartha Trust J&K. Digitized by eGangotri

।।स्वरितेति।।अत्र पारिभाषिकस्य स्वरितस्य ग्रहणे रषाभ्यां नो णः इत्यादौ णकारादेर्व्यंजनस्याधिकारोपलक्षणं नोक्तं स्यात् पारिभाषिकस्याच धर्मित्वादिति मत्वाह स्व
रितो नाम वर्णधर्म इति। वर्णमात्रधर्म इत्यर्थः।। स चाऽपधर्मः कलाध्मातादितुल्यः केवलं सूत्रेष्वेव भवति न प्रयोगे। कश्चित्तु स्वरितो नाम स्वरदोषे वर्णधर्म इति पा
ठः। तत्र स्वरदोष उच्चारणदोषः। अधिकारो नाम शास्त्रोपभावसाधनः विनियोग इति आपाणं अथ शब्दस्य विनियुक्तस्यैकोऽयमपार इत्याह। अधिकृतत्वादुत्तरत्रोप
तिष्ठत इति। उपस्थानमर्थेन द्वेषपदुनायान्त्र बुद्धिस्थत्वादुत्तरत्रेत्युपस्थानं कश्चिन्न पूर्वत्रा उपतिष्ठते तत्र कोऽपाय वितस्याप्य स्वरितत्वसमे कीर्तिता।

।। ।।स्वरितेनाधिकारः।। ।।स्वरितेनेति। इत्थंभूतलक्षणे तृतीया। स्वरितो नाम स्वरविशेषो वर्णधर्मः। तेन चिह्
नेनाधिकारो वेदितव्यः। अधिकारो विनियोगः। स्वरितगुणयुक्तं शब्दरूपमेतदधिकृतत्वादुत्तरत्रोपतिष्ठते। प्र
तिज्ञास्वरिताः पाणिनीयाः। प्रत्ययः। धातोः। ङ्याप्प्रातिपदिकात्। अङ्गस्य। भस्य। पदस्य।। ६ ।। ।।

तपावस्य विषयविभागो दुर्ज्ञान इत्याह प्रतिज्ञास्वरिता इति। प्रत्यय इत्याद्युदाहरणानि। किमर्थं पुनरिदमुच्यते यावता निर्दिश्यमानं लोके ध्रियते यथा दे
वदत्ताय गौर्दीयतां कंबलश्चेति देवदत्तायेति। यतेन तथा सर्पिः उत्पादीनां मा कांक्षत्वात् कुतस्तैर्घत्वादिभिरेव संबंधोऽभविष्यति अप्रमनिर्देशात् कल्पितव
र्तकः। तथा देवदत्ताय गौर्दीयतां विष्णुमित्राय कंबलो गौर्निर्वर्तको भवति तथेहाप्यभिविधौ भाविहनी नुणा घञो निवर्तकः स्यात् ततस्थाने कोऽ
वस्रो ग्र इत्यादिष्वनंतरस्यानुरोध स्यात् तस्मात्परिभाषा।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

।अधिकारपरिमाणं ज्ञायते किंपर्यन्तमवधिमधिकारोऽनुवर्त्तत इति। यथा प्राग्णत्वात्स्वविकारेभ्योऽणाधिकारः। उत्तरास्य समपरिसमाप्तेः धातोरिति प्रा
कृत्वा द्वितीयस्य तृतीयाध्यायस्य परिसमाप्तेः एवं तर्ह्युभयार्थमिदं अधिकारार्थं च निवृत्त्यर्थं वा कथं स्वरिते नाधिकारः स्वरिते दृष्टे अधिकारो न भवतीत्यर्थः
तेन विंशतिकात्खः इत्यत्र स्वरितत्वं प्रतिज्ञेयं न दृष्टं नाच्छित्रपूर्वादिनस्यनि हन्निरवसीयते एवमपि स्वरिते दृष्टे संदेहः स्यात् किंपर्यन्तमधिकारार्थः अ
होस्वित् प्रकृतस्य निवृत्त्यर्थ इति। एवं तर्हि यस्य यावत्स्वयोऽनुवृत्तिरिष्यते तत्र तावतिथोऽलनुबंधनीयः यथा छित्रिपूर्वात्रिषकादित्यत्रेकारः ते
न द्व्येषो योगा योरनुवृत्तिर्भविष्यति एवमन्यत्रापि यत्र तावतिथो लनास्ति तत्र प्राग्वचनं कर्त्तव्यं यथा अगस्य प्राग्वीरिति। तन गुरु भवति स्यादेतत् व्याख्या
नात्परिमाणं ज्ञास्यत इति अधिकारो विनिर्हि आख्यानात् ज्ञापितं इसुणघजिति संदेहे घजिति व्याख्यास्यामः इनुणस्त्र नंतर्यं घजोऽप्यनु
वृत्तिसामर्थ्यं दृष्टमिमत्तेवं संदेहः। ग्रहणादि। निषिद्धामः श्वेत्यादि सुत्वनं नरस्यापरवाधिकारः नदृष्टानुवृत्तिसामर्थ्यस्यापि पञ्चः सिद्धत्वाद्व्या
ख्यानाद्वा नाद्यपरस्तुतप्रेक्षितं अकांक्षायह्निते पि वाक्ये प्रकृतस्य संबंधार्थं शास्त्रीयोऽधिकारः यथा दूरान्तिकार्थेभ्यो द्वितीया चेत्यत्र पंचम्य
धिकार इति तत्रापि आख्यानमेव शरणमिति तत्र देवं सर्वत्राल्पत्वार्थ एतेन ररंतहिं। प्रयोजनं अन्यत्र दृष्टस्याधिकारस्य स्वरिते नोपल
क्षणं यथा स्यात् यथा गोस्त्रियोरुपसर्जनस्येत्यत्र ग्रहणस्य। न हि तल्लौकिके नाधिकारेणापि सिद्धं आनुषंगिकं वास्य प्रयोजनं साकांक्षेषु भव
हितस्य वानुवृत्तिः ६ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अनुदात्तास्य विशेषेणोक्तादित्यस्य तिवादयः लटः शानच्शानचौ लिटः कानच् क्वसुश्च लटः सदेशात्मनेपदपरस्मैपदयोर्विहितत्वात्पारिसमाप्ते नियमार्थं प्रकरणं
मित्यर्थः । एकवाक्यतया विधावितरेतराश्रयप्रसंगः स्यादेतत् यथा च द्रुषु बद्रुषुवच्चलंकर्मणि द्वितीयाप्राप्तानियतिकादित्येतैरेकवाक्यमतो स्वदीर्घ्यं विशिष्टवि
धिः एवमनेन प्रकरणेन लस्य तिवादयश्चाद्भिश्चतिङ्गमविशिष्टविधिरत्विति । यद्येवमात्मनेपदपरस्मैपदसंज्ञाभ्यां तिवादीनां विधिः विहितानां च संज्ञाभ्यां
भाव्यमितीतरेतराश्रयं प्राप्नोति । स्वरूपेण विशिष्टविधौ च त्वादिप्रसंगः । स्यान्मतं लस्यातिसमस्तिपिपृथस्थ मिश्वमस्मोलस्यतिवादिवादयो भवन्ति ततोऽनुपरा
म्यां कृपश्च कर्त्तरि । अनुप्रश्नीतकरोते ४ परस्मैलस्यतिवादयो भवन्ति किमर्थमिदं ग्रंथनाच क्षेयणा स्वरितेत्रितः ३ तिवस्य ततिनन्न वाधनार्थं ककर्तृग्रहणाभावकर्मणि
तिवस्माणस्वतन्त्रो वाधामाभूदिति । स्वमभिप्रस्य तिम्यः शिपरस्मादिलुटिच ल्रूपकृत्येव संतत्वात ततोऽनुदात्तङितस्तस्माथ्यासाथांधामिद्विमहिङ् अनुदात्तङितः
कर्तस्य लस्यात्मानेपदयो भवन्ति । तिवादीनामपवादः ततो भावकर्मणोरित्यादि विभाषोपपदेन प्रतीयमान इत्येवमतं करिष्यते तत्रायमप्यर्थः । आत्मनेपदग्रहणं =

॥ अनुदात्तङित आत्मनेपदम् ॥ अविशेषेण धातोरात्मनेपदं परस्मैपदं च विधास्यते । तत्रायं नियमः क्रियते अनुदात्तेतो
ये धातवो ङितश्च तेभ्य एव आत्मनेपदं भवति नान्येभ्यः । अनुदात्तेद्भ्यः । आस् । अनुदात्तेत्वात् आस्ते । वस्ते । ङिद्भ्यः
खल्वपि षूङ् । सूते । शीङ् । शेते ॥ ७ ॥ ॥

रस्मैपदग्रहणं वा न कर्त्तव्यं भवति एवमपि प्रकरणान्तरावस्थितानां शत्रादीनां नियमो न स्यात् अतोऽन्य स्वरूपेणाविशिष्टविधिरुक्तः । सत्कृ । संज्ञाश्रयणे तु पत्रय त्रैत तत्संज्ञ
योर्विधानं तत्र सर्वत्रोपस्थानान्नायं दोषः किं तितरेतराश्रयं प्राप्नोति पदिलस्य सत्रस्य शानटकं च येनिवर्त्तभाविनी । संज्ञाविज्ञापेन ततो नेतरेतराश्रयं लाघवं प्रतिनक
श्चिद्विशेष इति किं सुधामावि संज्ञाश्रयणविरहेनेति भिन्नवाक्यतया नियमयत्र बाधितो हन्त्रिकारेण यद्येवं विकरणव्यवधाने नियमाप्रसंगः । लिङ् लिट् हाम् म्लुलु लुक्व
नानुबंधयोरर्थवत्वात् इहाहि विकरणानामवकाशः अलादेवात्मानेशायः । नियमस्यावकाशः यत्र विकरणा नसन्ति स्पर्द्धि षाहयस्य हेङ्आस्ते शेते आतिजुहो
तिमिनन्तिभूयादि साटिएधते स्पर्द्धते कुरुते निविशत इत्यादावुभयप्रसंगे परत्वाद्विकरणेषु कृतेषु तेऽवशानान्नियमो न स्यात् असमतिनियमे परिताव तत्प्रकृतिनि
यमः अनुदात्तङिद आत्मनेपदमेव शेषाधातोः परस्मैपदमेवेति ततो मिन्नविषये उभय प्रसंगः प्रत्यय नियमेपि तुल्यजातीयस्य नियमेन व्यावृत्तिरितिचा तोर
नन्तरस्यात्मनेपद परस्मैपदे भवतो मुख्यादेवेत्येवं नियमो विज्ञायमानो धात्वन्तरादेवतेव्यावर्त्तयेदितिविकरणव्यवधाने नियमाप्रहत्तौ उभय प्रसंगस्तएवए

विहितेषु लादेशेषु सार्वधातुकापेक्षो विकरणोऽभ्यविधानं चानेन प्रकरणेन सहेति नेतत्प्राप्तिकारणं संभवः। स्यादेषो लावस्थायां विधीयमानोऽन पिलकारवि
शेषापेक्षत्वात् बहिरंग इति लमात्रापेक्षं तरंगे प्याद्देशेषु हजेष्वेव भविष्यतीति न तत्रापि दोषः नियमपक्षेपि न दोषः। ज्ञापकात् सिद्धं यदयं हतभ्मः स्यसनोरिति स्य
तिकल्पं शास्ति तन्न ज्ञापयति विकरणोऽभ्यो नियमो वलीयानिति। एतेनैतदपि निरस्तं वृद्. वृ. भ्यो मात्मनेपदं प्रसंग इति। कथं पूर्वो नियमे प्रवृत्ते नैयशवात् वृद्भ्यो भवतेरिति
प्रसेकमिच्छन्ति स्यादन्यत् इत्याह अनुदात्तेतो ये धातवो ङितश्चेति। समुदायसंबंधेन तु वक्षि ङ. एवं स्यात् सत्यनुदात्तेत् पद्यते ङिच्च तत्र इत्यत्र प्रसङ्गः स्यात् ङ्का
रस्त्वनुदात्तेत्त्वनिबंधनस्यात्मनेपदस्यानिमित्तज्ञापनार्थः। तेन स्यएवायं न्यागाः सहति कल भम्पः परिमकंनमहाभिसाह लप्र साहसिकामादिसिद्धं यात
वरसेतत कृते लभ्यते। केचिदाहुः भूवादयो धातव इत्यतो धातुग्रहणमनुवर्त्तते तत्रानुदात्तेत् ङि. न इत्यनेन सामानाधिकरण्यात् पंचम्या विपरिण
म्यते अत एव चवृद्. वृ. भ्यामात्मनेपदं न भवतीति पड. तादपि न हि न प्राप्नोतीति चेमिघत इति पड. चत्पडि. जनमंदतो धातुः अवयवे वा चरितार्थे लिंगं समु
दायस्य विशेषकं भवति तस्माद् द्विधातोरिति नानुवर्त्तं प्रायोऽन्त्याऽनुदात्तो धातवः इत्युक्तं वड. ऽवेत्यपरिहार उक्त एव। पघयं प्रकृतिनियम ४ स्यात् अ
नुदात्तङि. त आत्मनेपदमेवेति लज्जा इत्योनस्युः। वचनात् भविष्यति अस्तिवचनस्यावकाशः परस्मैपदे यदि न स्तत्रापि नियमाशेषात् परस्मैपदमे
वेति तेन वचनात् भविष्यति तुल्यजातीयस्य च नियमेन अपेक्षितः कश्च तुल्यजातीयः आत्मनेपदस्य परस्मैपदं तस्य चतत एवमपि शेषात् कर्त्त
रीति शेषग्रहणं न कर्त्तव्यं प्रकृतिनियमपक्षे कथं प्रकृत्यो निपताः। आत्मनेपरस्मैपदं वा नियतं ततो यस्मादपि परस्मैपदमिनित त्रियमार्थं भवि
ष्यति यव परस्मै पदं वा न प्राप्नोति तत्र परस्मैपदमेवेति प्रत्ययनियमस्तु नांन रेशांज्ञाको विज्ञानुमिति शेषग्रहणं कुर्वतः सूत्रकारस्य एवा
भिप्रेत इत्याह नेष्य आत्मनेपदं भवति नाम्ने भा इति यदि प्रत्ययनियमो यं शेषात् कर्त्तरि परस्मैपदमित्यत्र यदेतावदेवं नियमः कर्त्तरि पदं भवति
शेषादेवेति विनतो शेषात् कर्त्तरि माभूत् भावकर्मणोस्तु शेषाद शेषाच्च परस्मैपदं प्राप्नोतीति अथ शेषाघ भगति कर्त्तयेवेति ततः शेषात् भा
वकर्मणोर्माभूत् अशेषात्तु भावकर्मकर्तृषु त्रिष्वपि प्राप्नोतीति न चेत् कस्मिन्नाचाको नियमद्वयं शक्यं विज्ञातुं शेषादेव भवति तत्रापि कर्त्तयेवे
ति एवं तर्हि योगविभागेन यमरूपं तत्रैव साधयिष्यामः। आक्त इत्यादि। आमस उपदेशेन वसउ आच्छादने छड. आति प्रपवेत्री ड. स्वप्ने अदादयः श्री

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥भाव॥भाव्यत इति भावः। एष ज्ञात भवतेः कर्म्मणि घञ् धात्वर्थः क्रियात्मक उच्यते। कर्म्म तु पारिभाषिकं पचादि विधौ तु भाव इति शुद्धात् भवते भवि यज् भावः सत्तात्वा
त्वर्थस्य सिद्धतावस्थोच्यते अयमपि नियम इति दर्शयितुमन्यतः सिद्धिमाह लकर्मणि चेत्यादिकं व्यसुनश्चायं नियमः यावता अनुदात्तङित इत्येवात्मनेपदमिति पूर्वेणा नियमे
न यथा शेषात् कर्त्तरि परस्मैपदं प्राप्नोति तं एव भावकर्म्मणोरपि इति तन्न द्वयोर्विध्यर्थमिदं युक्तं। सत्यं परि पूर्वसूत्रे प्रकृत्तेस्य प्रवृत्तिः विपर्ययोपि शक्यते वक्तुं भावकर्म्मणोरे
वात्मनेवात्मनेपदमित्यस्मिन् नियमे प्रवृत्ते अनुदात्तङितः कर्त्तर्यात्मनेपदं प्राप्तमिति पूर्वसूत्रमपि विध्यर्थमिति तेन द्वयोरपि लस्य तिबादयः इमेन द्वये तथा नियमार्थत्वं पर
स्मैपदस्य तु विध्यर्थत्वमेवमापाद परिसमाप्तेरिष्टं। अत एवास्यान्यसिद्धिं दर्शयति। एवं शाकोन प्रयुक्तः। तिबादि सूत्रेण धातुसामान्ये विहितं वलकारमाश्रित्य तिबा
दयो विहितो लकारः तस्य सामान्येन तिबादयः। सर्वे विसंते न त्वात्मनेपदमेव तेन स्यादेव यथा स्यादित्ययमारंभ इति प्रसमयमेतु भावकर्म्म कर्तृषु त्रिष्वपि विहितस्य लस्य सा

॥भावकर्म्मणोः॥ ॥लः कर्म्मणि च भावे चाकर्म्मकेभ्य इति भावकर्म्मणोर्विहितस्य लस्य लस्य तिबादयः सामान्येन व
स्थे तेन तत्रेदमुच्यते भावे कर्म्मणि चात्मनेपदं भवति। भावे। स्नायते भवता। सुप्यते भवता। कर्म्मणि। क्रियते कटः क्रियते भारः

मानेन्येनात्मनेपदं स्वक्षत इति वाच्यं स्यात् सत्यं अयं तत्रार्थः भावकर्म्मणोरिसुपलक्षणं भावकर्म्मकर्तृविषयत्वार्थः। तिबादय इति सूत्रेण तिपः प्रथमनिर्देशादेव मुक्ते
तिबादिषु तद्भूता लङ् इत्यर्थः। न तु आत्मनेति यावत्। किं तु नः स्याद्यथायमर्थो नियमः स्यात् इह को भवता लाभो लब्धः को भवता दायो दत्त इत्यर्थे दृश्यते इति कर्म्मणि घ
ञ् न स्यात् अकर्त्तरि चेत्यस्य त्वपादानादिर्वकाशः यद्यपि तुल्यजातीयस्य परस्मैपदस्य नियमेन माहात्तिः इति पर्यालोचितं तथापि पूर्वसूत्रे तावत् प्रत
पनियम इति हापि स एवाश्रितः। स्नीयत इति ग्लेम्ने हर्षक्षये सुप्यत इति जिष्वप् शये वचिस्वपियजादीनां संप्रसारणं। क्रियत इति रिङ् शयग्लिङ्क्षु यद्याकर्म्मव
त्कर्म्मणा तुल्यक्रियः इत्यादि देशोपदेशाति देशो वा तदाशास्त्रे उपदेशापोरिति दिष्टयोः स्वेनस्वेन दृशा सात्मन्त्ला यं भवति तत्र कर्म्मण्यात्मनेपदमिम स्यावका
शः शुद्धकर्म्मकर्त्रीरपि परस्मैपदमित्यस्य शुद्धः कर्त्ता कर्म्म कर्त्तर्यु भयप्रसंगे परत्वात् परस्मैपदं प्राप्नोति अत आह ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कर्म्मकर्त्तरीत्यादिा द्वितीयं कर्तृग्रहणं अनुवर्त्तत इति कर्त्तरि कर्म्मव्यतिहार इत्यतः। कार्यातिदेशपक्षे तात्मेनपदमेव परमिति नायं परिहारो वाच्यः। कर्त्तरि क
र्म्म। अत्र लौकिकं कर्म्मग्रहणेन पारिभाषिकमित्याह कर्म्मशब्दः क्रियावाचीति ननु कृत्रिमत्वात्पारिभाषिकस्यैव ग्रहणं युक्तं ततो देवदत्तस्य धान्यं व्यतिलु
नंतीमत्रैव स्यात्। एवं मन्यते इह कर्त्तरि व्यतिहार इतीयता सिद्धं कर्म्मग्रहणं व्यतिहारे कस्मान्न भवति उच्यते क्रियायाः साध्यत्वात् प्राधान्यं क्रियया व्युमिष्ट
तमत्वात्तादर्थ्येन क्रियाप्रवर्त्तनात् कर्म्मणोपि प्राधान्यं इत्युभयव्यतिहारे लब्धे कर्म्मग्रहणं क्रियते तेन यदि साधनकर्म्मग्रहणे तत् तदा क्रियाया अपि संदर्शनार्था
र्थं नाध्यवसायेन प्रमाणत्वात् कृत्रिमकर्म्मत्वमिति पुनरुभयोरपि ग्रहणात् कर्म्मग्रहणमनर्थकं स्यात् किं चात्मनेपदेनाक्षिप्तो नुवृत्तो वा धातुः क

कर्म्मकर्त्तरि। लूयते केदारः स्वयमेवेति परस्मैपदं न भवति। तस्य विधाने द्वितीयं कर्तृग्रहणमनुवर्त्तते। तेन क
र्त्ता तत्र यः परस्मैपदं भवति॥ ॥कर्त्तरि कर्म्मव्यतिहारे। कर्म्मशब्दः क्रियावाची व्यतिहारो विनिमयः यत्रान्यसं
बंधिनीं क्रियामन्यः करोति इतरसंबंधिनीं चेतरः स व्यतिहारः। तद्विशिष्टक्रियावचनाद्धातोरात्मनेपदं भवति।
व्यतिलुनते। व्यतिपुनते ८ ॥श्रीः॥ ॥

र्म्मव्यतिहारेण विशेष्यमाणे तत्र वर्त्तमानाद्धातोरिति न च साधनकर्म्मणोधात्वभिधेयं संभवतीति तस्य क्रियावाचित्वादिति। विनिमयो व्यत्यास इत्यर्थः। एतदे
व स्पष्टयति यत्रेति योग्यतावशाद्यस्य यदं साधनं अन्यस्येयं क्रियास्य चेति निर्वृत्तिर्यो विपर्यासः साध्यसाधनभावस्य समभिहार इति विवक्षितं यत्रेत्यादि पञ्च
म्यन्तस्य व्यतिहारस्य विषयस्यार्थः परस्परकरणमपि कर्म्मव्यतिहार उच्यते संप्रहरन्ते राजानः व्यासुश्रीमाभिसरणस्त्वहाप दीव्यन्तीति व्यतिलुनत इति
लूञ् छेदने आत्मनेपदेष्वनत इत्यदादेशः श्नाभ्यस्तयोरित्याकारलोपः प्वादीनां ह्रस्वः अन्योन्यस्य परमन्योन्यविषयं वा लवनं कुर्वन्तीत्यर्थः एवं त्रयश्चार्थो
न कर्त्तृकत्वे सति प्रतीयतस्येकवचनं न भवतीति केचिदाहुः। व्यतिपेथ्ये व्यतिलेसे इत्येकवचनमपि तत्रत्रोदाहरिष्यते। अन्यो व्यतिस्ते नुमस्यापि धर्मदे
तिप्रभृतिप्रयोगाः॥ ८ ॥ ध॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मव्यतिहार इति किम् । कर्तृग्रहणमेवमस्तु लुनन्त इत्यादौ प्रापकत्वेनोपयोक्ष्यत इति भावः अथ कर्तृग्रहणं किमर्थं भावकर्मणि निवृत्त्यर्थं न पारार्थ्येण भावात् ।
भावकर्मणोरिति पूर्वेणात्मनेपदं भवत्येव व्यतिलूयते व्यतिसूयत इति तेन यथा स्यात् अनेन मा भूत् कः पुनरत्र विशेषः तेन न गस्यात् अनेन वा अयमस्ति विशे
षः अनेन सति न गतिहिंसार्थेभ्य इति प्रतिषेधः प्राप्नोति यत्ति गम्यन्ते ग्रामः व्यतिहन्यन्ते दस्यवः इति न वा नन्तरस्य प्रतिषेधान व्यतिहन्यन्त इत्यत्र हेत्वा भाव
कर्मणोरिति च कर्मणोरिति च कर्मव्यतिहार इति च तत्रानन्तरस्य विधिर्वा भवति प्रतिषेधो वेति अनन्तरा कर्मव्यतिहारलक्षणा प्राप्तिः प्रतिषिध्यते न पूर्वा तु
भविष्यति नार्थ एतेन कर्तृग्रहणेनेत्यत आह कर्तृग्रहणमिति शेषात्कर्तरीति प्रदर्शनमेतत् दाङो दीनास्य विरहणा इत्यादावप्यस्योपयोगं वक्ष्यामः ॥ ॥ न ग

। कर्मव्यतिहार इति किं । लुनन्ति । कर्तृग्रहणमुत्तरार्थं शेषात्कर्तरि परस्मैपदमिति ॥ ॥ न गतिहिंसार्थेभ्यः ॥ ॥
पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते । गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्मव्यतिहारे आत्मनेपदं न भवति ॥ व्यतिगच्छन्ति
। व्यतिसर्पन्ति । हिंसार्थेभ्यः व्यतिहिंसन्ति घ्नन्ति । गत्यर्थानां प्रतिषेधे हसादीनामुपसंख्यानं । व्यतिहसन्ति । व्यतिजल्पन्ति ।
व्यतिपठन्ति । हरतेरप्रतिषेधः । संप्रहरन्ते राजानः ॥ ॥

ति व्यतिगच्छन्तीत्यादि गम्लृ सृप्लृ गतौ हिंसि हिंसायां हन हिंसागत्योः गमेरिषुगमियमां छ इति छः । सृपेर्लघूपधगुणः हन्तेर्गमहनेत्युपधालोपः हो हन्
तेरिति कुत्वं हसादीनामिति हसि सकारणे शब्दक्रियाणामित्यर्थः उपसंख्यानमिति संख्यायतेऽनेन सिध्यप्रतिपाद्यते नेनार्थ इति संख्यानं सूत्रं तत्स्यो
पोच्चारितं उपसंख्यानं सूत्रसमीपे परिठमपि सूत्रं प्रवर्तत इत्यर्थः । हरतेरप्रतिषेध इति अर्थग्रहणसामर्थ्याद्धेशान्तरनिरपेक्षा गतिहिंस पोर्वर्तते तेन
इह न हन्तीति उपसर्गविशेषे हिंसार्थत्वाद्धरतेः अप्रतिषेध इत्याह इह तु न तः संप्रहरन्तो इक्ष्वाकवो धनंजया इति घोन्यस्य मा नाविति विवक्षितं
न व्यतिहारः इह च संविहरन्ते गावो इति विहरे गत्यर्थत्वात्प्रतिषेधः देशाद्देशान्तरप्रापणं हि विहरेरर्थो भारं वहन्तीति लौकिकरीयकस्तक गत्यप्रत्ययः कन्या
प्रापणमुपस्थापनं च संच्यार इत्यर्थः ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥इतरेतर॥ ॥उपोच्चारितं पदमुपपदं न पारिभाषिकं। अर्थं भवान् असत्युपपदग्रहणे यं पंचमी निर्देशोपरस्यैवानंतरस्य स्यात् तस्मादित्युत्तरस्येति वचनात् सप्तमी निर्देशे तु तस्मिन्निति निर्दिष्टे पूर्वस्येति पूर्वस्यैवानंतरस्य स्यात् न तत्र यथा पिलकारो नंतरः परो न संभवति धातुरूपं संभवति सर्वत्र धातुरनंतरो न संभवति लकारस्तु संभवति तत्रापि निर्देशो पंचमी साधारणत्वाद् न व्यवसाय इति उपपदग्रहणं क्रियते। इतरेतरस्येत्यादि लौकिके तु शब्दस्य

इतरेतरान्योन्योपपदाच्च॥ ॥इतरेतर अन्योन्य इत्येवमुपपदाद्धातोः कर्मव्यतिहारे आत्मनेपदं न भवति।

इतरेतरस्य व्यतिलुनंति। अन्योन्यस्य व्यतिलुनंति। परस्परोपपदाच्चेति वक्तव्यं परस्परस्य व्यतिलुनंति॥ ॥

हारे लाघवं प्रत्पनादरात् इतरेतरादि शब्दा उपसर्गश्च कर्मव्यतिहारद्योतनाय समुच्चीयंते। कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः समासवच्च बहुलं यदा न समासवत् प्रथमैकवचनं तदा पूर्वपदस्येति षष्ठ्येकवचनान्तस्य तरशब्दस्य द्विर्वचने समासवद्भावेन सुब्लुकि समासत्वादेव प्रातिपदिकत्वात् सुनः षष्ठ्येकवचनं। अन्यशब्दस्य तु बहुलग्रहणाद समासे समासवद्भावे पूर्वपदस्य षष्ठ्येकवचनस्य प्रथमैकवचनं एवं परस्परस्येत्यत्रापि कस्कादिषु दर्शनाद्विसर्जनीयस्य सत्वं पदस्य द्विर्वचनविधानात् अन्योन्यपरस्परे नित्यत्र वा मयोः प्रकृतिभागमात्रस्यानुकरणं द्रष्टव्यं॥ ९ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥नेर्विशः॥ शेषात्कर्त्तरि परस्मैपदे प्राप्त इति। अनात्मनेपदनिमित्तापेक्षया शेषत्वमिति स्यात्। आत्मनेपदं विधीयत इति। यद्यपि निवादिस्तत्रापेक्षया सर्वस्यैव प्रकरणस्य नियमार्थत्वमनुवात्तङित आत्मनेपदं भावकर्मणोरिति सूत्रद्वयापेक्षया तु विध्यर्थत्वमपि संभवतीति मत्वैवमुक्तं। एवं सर्वत्र द्रष्टव्यं। न विशेते मत्र लङि निविशत इति स्थिते लादेशो लकारमात्रापेक्षत्वात् अंतरंगः अडागमस्तु लुङादिविशेषापेक्षत्वाद्बहिरंग इति पूर्वं लादेशो विकरणश्च प्राप्नोति अडागमश्च नित्यत्वाद्विकरणः अडागमो हि विकरणे कृते तदंतमेव लङि परतो गंतव्यादिग्रहणस्य स्यादित्यु मर्थोज्ज्वादिनितस्यैव प्राप्नोतीत्याह तेतु विकरणो धातुमात्रस्येति शब्दांतरप्राप्तेरनित्यः ततश्च विकरणेन व्यवधीयमानोऽडागमो धातुमात्रप्रत्यय उक्त इति नेश्च धातोश्च व्यवधायकत्वात्

॥नेर्विशः॥ शेषात्कर्त्तरि परस्मैपदे प्राप्ते निपूर्वाद्विशः आत्मनेपदं विधीयते। नेः परस्माद्विश आत्मनेपदं भवति। निविशते। निविशंते। नेरिति किं। प्रविशति। तदागमास्तद्ग्रहणेन गृह्यंते ते नाटाना स्ति व्यवधानं। न्यविशत। नेरुपसर्गस्य ग्रहणं अर्थवद्ग्रहणे नानर्थकस्येति तस्मादिह न भवति। मधुनि विशंति भ्रमराः॥ ॥परिव्यवेभ्यः क्रियः॥ डुक्रीञ् द्रव्यविनिमये। ञित्वात्कर्त्रभिप्राये क्रियाफले सिद्धमात्मनेपदं। अकर्त्रभिप्रायार्थोऽयमारंभः। परिव्यवेभ्य उत्तरात्क्री

णातेरात्मनेपदं भवति परिक्रीणीते। विक्रीणीते। अवक्रीणीते। पर्यादय उपसर्गा गृह्यंते तेनेह न भवति।

नेपदं न प्राप्नोतीत्यत आह तदागमा इत्यादि एवं मन्यते धातोरुपसर्गसंबंधापेक्षत्वात् पंचमीविधिर्बहिरंगः अस्मिंश्चापवृत्ते लादेशोऽप्यप्रवृत्त एव तत्र पञ्चम्या विषय परिहारेण हि तेन प्रवर्त्तितव्यं अनिर्वृत्तश्च लादेशो विकरणोऽप्यंतरंगो न निमित्ते तेनाडागमस्तस्यामेवाङ्गावस्थायां धातुमात्रस्यैव भवति ततश्च तद्व्यवधानात्तत्रैव व्यवधायक इति कथं तदुक्तं अटा व्यवधानेऽपि भवतीति उक्तिमात्रापेक्षया क्वचित् व्यवधानमित्येव पाठः। मधुनि विशंतीत्यत्र मधुनो नमकोऽरनवयव इति निशब्दस्यानर्थकत्वं कश्चिन्नु मधुनीति शब्दं तं पद्यते॥ ॥परिव्यवेभ्यः॥ पर्यादय उपसर्गा गृह्यंत इति कथं। क्रियां प्रतिषेधे उपसर्गा रेवचपर्यादिभिः अर्थद्वारको विशेषणविशेष्यभावलक्षणः संबंधः न च क्रियायोगे उपसर्गास्तेभ्यः परं धात्वंतरं संभवति इति क्रीणातेरेवात्मनेपदं भवतीति।

© Dharmartha Trust J&K. Digitized by eGangotri

वहुव्रीतिवहवोवयःपक्षिणोस्मिन्निति वहुव्रीहिः कर्मपदं चैतत्। पक्षिवाचिनो विशब्दस्य नपुंसकत्वाभावात् विभक्तिरस्य सम्बन्धमात्रे केवलो नोदाहृतः। ननु बहुव्रीहिरिव पिञ्जहत्स्वार्था यां हन्तोकेनानर्थकं अजहत्स्वार्थाप्यमपितदर्थस्योपसर्जनत्वमिति न भविष्यतिरेवं तर्हि दुदाहरणादिगियं दर्शिता इदं त्वत्रोदाहरणं वेक्रीणामिश्रत्रैकदेशविकृतः स्यानन्यत्वात्प्रसंगः। वीक्रीणाति अत्रैकादेशस्य पूर्वप्रसंगतवद्भावात्प्रसंगः॥ ॥विपराभ्यां जेः। साहचर्यादिति द्वयोर्दृष्टपचारत्वेपि परस्य साहचर्यादित्यर्थः। नेर्विशइत्यादिप्रकरणसाहचर्याद्वावहुव्रीति। अत्रापि चेजयमिवीजयतः इत्युदाहार्यं पराउत्कष्ठान्यायकथंजेरिति निर्देशः। पश्वताप्रकृतिवदनुकरणं भवतीति। अविश्रुधात्विपादिनाद्यउटेशो न भवितव्यं नच दीर्घ इत्युसावकाशमिपदं परत्वात् घेङिति तिगुणेन गवहुगिक्रीणातिवनं॥ ॥विपराभ्यां जेः॥ शेषात्कर्त्तरिपरस्मैपदमित्यस्यापवादः। विपराप्रूर्वाज्जयतेर्धातोरात्मनेपदं भवति। विजयते। पराजयते। विपरशब्दावुपसर्गौ इति तेसाहचर्यात्तेनेह न भवति। वहुविजयतिवनं। पराजयतिसेनेति॥

आङोदोनास्यविहरणे॥ अकर्त्तभिप्रायार्थोयमारंभः। आङ्पूर्वाद्ददाते ते नास्यविहरणे वर्तमानादात्मनेपदं भवति। विघामादत्ते। अनास्यविहरण इति किं। आस्यंमाददाति॥ १० ॥

धाइतिपुक्तं ह्रस्वेष्वपि पूर्वविप्रतिषेधे नेयङ् इष्टत्वात् तथाचक्षियइति निर्देशः उक्तमतेधातुत्वं तावद्योयंक्रियावचनो धातुरितिइहवाविवक्षितार्थं रूपमात्रमनुकृतमिति अनुकार्यस्यापि धातुत्वं नास्ति प्रापेवानुकरणस्य॥ ॥आङोदोनास्य॥ ॥यथैवावत्साधेनुरानीयतामिसुक्तेसंभवदन्तस्सर्वं धागोधेतुरेवानीयतेनमहिष्यादिधेनुः तथेहापि संभवदास्यविहरणस्यदुदाज्ददानस्यैवग्रहणं नतुगामादाग्रहणेष्वविशेषइतिसर्वेषांदानामिसाह। आङ्पूर्वाद्दात्र इति। आदत्त इति। स्नोद्विर्वचनं पूर्ववदाकारलोपश्च दकारस्य चर्त्वं। कश्चिदाङो ङि ङित्ति ग्रहणं किंमिस्यामादत्तातीतिपठ्यतेतत्रस्मृतागाकारः १० ॥

© Dharmartha Trust J&K. Digitized by eGangotri

आस्यविहरणसमानक्रियादपीति कथमिहाङो दोनास्यहरतीपताति द्रं स्येषातो दमिसंभवादिह समवापि मांक्रियाया वर्त्तमानस्य समुदायस्य निषेधो
विज्ञायते। न चैवं स्वं मुखमाददान इत्यत्रापि मुखविषयत्वाददानस्य प्रतिषेधप्रसंगः॥ या त्वास्य एव सम वेना क्रिया तस्यां वर्त्तमानोददातिरास्य हर्त्ति र्भवति
ग्रहणं तु आहिणोरुभयोरपि समवेतं अनास्य इति वपर्युदासः आस्यानास्य समुदायश्चास्यादन्य इति विधिरेव भविष्यति एवं हि द्वे विहरणग्रहणं विशे
षापलक्षणार्थं तेनास्यसम्पास्यता दृशो विहरणेन प्रविष्यति यादृशामास्य विहरणं आस्यव्यादानं विपादिके निपादस्फोटो विपादिका। स्वांगकर्म्म
काच्चेति स्वं अंगं स्वांगं न तु पारिभाषिकमद्रवादिलक्षणं से एतच्चान्यापसिद्धमेवो कं कथं कर्त्तरी निवर्त्तते आस्य शब्दश्चाघं संबंधिशब्दः कस्यास्यमि

॥आस्यविहरणसमानक्रियादपि प्रतिषेधो वक्तव्यः। विपादिकां आददाति। कूल[illegible]ददाति। स्वांगकर्म्मकाच्चेति वक्तव्यं।
इह माभूत्। आदत्ते पिपीलिकाः पतंगस्य मुखम्॥ ॥क्रीडोनुसंपरिभ्यश्च॥ क्रीड़ विहारे एतस्मात् अनुसंपरि इत्येवंपू
र्वात् आङः पूर्वाच्चात्मनेपदं भवति। अनुक्रीडते। संक्रीडते। परिक्रीडते। आङः खल्वपि। आक्रीडते। समोकूजनेइति
वक्तव्यं। संक्रीडंति शकटानि। समासाहचर्यादिच्चादिरूपसर्गो गृह्यते। तेनेह कर्म्मप्रवचनीयप्रयोगेन भवति। माणवक
मनुक्रीडति। आगमेः क्षमायामात्मनेपदं वक्तव्यं। क्षमा उपेक्षा कालहरणमिति यावत्। आगमयस्व तावन्माणवकं। शि
क्षेर्जिज्ञासायां। विद्यासु शिक्षते। धनुषि शिक्षते॥ ॥
सये स्वार्थं यस्मिन् कर्त्रर्थात्मनेपदं तस्य चेत् न दास्यमिति विज्ञायते तेन परकीयास्य विहरणे विधिरेव भवति॥ ॥क्रीडोनुसं। माणवकमनुक्रीडतीति।
माणवकेन सह क्रीडतीत्यर्थः। तृतीयार्थे इत्यनुः कर्मप्रवचनीयः। आगमेरिति। णयंतस्येदं ग्रहणं आगमयस्व तावदिति सहस्व कंचित्कालं मात्व
रिष्ठा इत्यर्थः। शिक्षेरिति शिक्ष विद्योपादाने इत्यस्यानुदात्तेत्वादेव सिद्धमिति शकेः सनंतस्य ग्रहणं शिक्षत इति सनि मीमा घुरभ्यच इत्यत्वे सलोपः संयो
गाद्योरिति सलोपः अत्र लोपोभ्यासस्य धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः। क्रियाविषयो हि शकेः प्रयोगः भोक्तुं शक्नोति गंतुं शक्नोतीति।

© Dharmartha Trust J&K. Digitized by eGangotri

आशिषिनाथ इति। नाधृ नाथृ याच्ञोपतापैश्वर्याशीःषु। अनुदात्तेत्। नियमार्थं तु वचनं आशिष्येव यथा स्यात् न याञ्चादिषु मा भूदिति। अनुदात्तेत्त्वं तु जर्थ्यं सर्पिषो नाथत इति। आशिषि नाथ इति कर्मणि षष्ठी सर्पिर्मे भूयादित्याशास्त इत्यर्थः। हरतेर्गतिताच्छील्ये। हरतेरिति गतिः प्रकारः। पैतृकमिति पितुरागतं प्रकारं सततं शीलयतीत्यर्थः। अत एव ठञ् इस् उस् उक्तान्तात् कः। प्रत्युदाहरणे मात्रं विवक्षितं न प्रकारस्तात्ताच्छील्यं। किरतेरिति। विक्षेपार्थः किरतिः हर्षादिषु त्रिषु विषयेषूपात्ताः तत्र हर्षो विक्षेपस्य कारणं जीविका कुलायकरणे तु फलं। एते षष्ठ्यर्थे यथा चतुर्थ्यादिति सुटि विधीयते आ तु तः इति। अकं गमर्ष्टं हृ क

आशिषि नाथः। सर्पिषो नाथते। मधुनो नाथते। आशिषीति किं। माणवकमनुनाथति। हरतेर्गतिताच्छील्ये। पैतृकमश्वा अनुहरन्ते। मातृकं गावो ऽनुहरन्ते। गतिताच्छील्य इति किं। मातुरनुहरति। किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यं। अपस्किरते वृषभो हृष्टः। जीविकार्थी अपस्किरते कुक्कुटो भक्षार्थी। कुलायकरणे। अपस्किरते श्वा आश्रयार्थी। हर्षादिष्विति किं। अपकिरति कुसुमं। आङि नुप्रच्छ्योरुपसंख्यानं। आनुते शृगालः। आपृच्छते गुरुं। शप उपलम्भन इति वक्तव्यं। वाचा शरीरस्पर्शनमुपलम्भनं। देवदत्ताय शपते। यज्ञदत्ताय शपते। उपलम्भन इति॥ शपति॥ ॥ समवप्रविभ्यः स्थः। संअवप्रविभ्य इत्येवं पूर्वात् तिष्ठतेरात्मनेपदं भवति। संतिष्ठते। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते। आङः स्थः प्रतिज्ञान इति वक्तव्यं। अस्ति सकारमातिष्ठते। आगमो

रीतीत्यर्थः रुउक्तो ऽपरादिः। आपृच्छत इति। प्रच्छती प्साया अनुदात्तादिः यदिह षाष्ठादिना संप्रसारणं। वाचा शरीरस्पर्शनमिति। त्वमा द्रोहः स्यादपि नेतन्मया कृतमिति वं तूपः शपथविशेषः। देवदत्ताय इति श्लाघह्नुङ् स्थाशपामिति संप्रदानं संज्ञा॥ ॥ समवप्रविभ्यः स्थः। संतिष्ठत इति पाघ्रादिसूत्रेण तिष्ठादेशः अत्राप्युपसर्गग्रहणादिह न भवति वेतिष्ठसि वा तिष्ठत इति। अस्ति सकारमितिस्तः। संतीत्यादौ मकारमात्रस्य दर्शनात्तभुवीत्ये वधातुः पाधः अस्तीत्यादौ पिति सार्वधातुके ऽत् आगमो विधेयः आस्तामास न्निसा

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥प्रकाशने॥ स्वाभिप्रायकथनमिति। कथनमाषिः करणमात्रं न तु शब्देनैव तेनाभावमात्रेणायामपि कन्यकायां भवतिष्ठत्यस्मिन्निति। प्रकरणादिनात्र विवाद
पदनिर्णेतुः प्रतीतिर्न तु शाब्दीति विग्रहवाक्ये आत्मनेपदं न ह। तं संज्ञाप्यकरणादिष्विति। संज्ञपरस्थानेषु करणादीन् निर्णेतृत्वेनाश्रयतीत्यर्थः॥ ॥उदोनूर्ध्व
कर्मणि कृः क्रियावाचिनि। सोऽयं कर्मणि धातोर्वृत्त्यर्थं भवादिनिभावः। उदरे ईहायामिति। ईहापरिस्पन्दाई ईहाग्रहणमित्यादि ईहात्मकं पदं नूर्ध्वकर्मेत्येवं ऊ
र्ध्वकर्मणि एव विशेषणं ईहाग्रहणं न पुनरनूर्ध्वकर्मग्रहणमयनोपर्ईहाग्रहणांकेऽत्रेम मिमुञ्चन इत्यर्थः तथाहि सत्यासनादुत्तिष्ठतीत्यत्रापि स्यान्न सिद्ध

॥ ॥प्रकाशनस्थेयाख्ययोश्च॥ स्वाभिप्रायकथनं प्रकाशनं॥ स्थेयस्याख्या स्थेयाख्या। तिष्ठत्यस्मिन्निति स्थेयः विवादपद
निर्णेता लोके स्थेय इति प्रसिद्धः। तस्य प्रतिपत्त्यर्थमाख्याग्रहणं। प्रकाशने स्थेयाख्यायां च तिष्ठतेरात्मनेपदं भवति। प्रकाश
ने तावत्। तिष्ठते कन्या छात्रेभ्यः। तिष्ठते वृषली ग्रामपुत्रेभ्यः। प्रकाशयत्यात्मानमित्यर्थः। स्थेयाख्यायां। त्वयि तिष्ठते मयि
तिष्ठते। संशय्य कर्णादिषु तिष्ठते यः॥ ॥उदोऽनूर्ध्वकर्मणि॥ उत्पूर्वात्तिष्ठतेरनूर्ध्वकर्मण्यवर्तमानादात्मनेपदं भवति।
कर्मशब्दः क्रियावाची अनूर्ध्वताविशिष्टक्रियावचनात्तिष्ठतेरात्मनेपदं भवति। गेहे उत्तिष्ठते। तदर्थं घटत इत्यर्थः। उदईहा
यामिति वक्तव्यं। इह मा भूत्। अस्माद्ग्रामात् शतमुत्तिष्ठति। शतमुत्पद्यत इत्यर्थः। ईहाग्रहणमनूर्ध्वकर्मण एव विशेषणं
नापवादः। अनूर्ध्वकर्मणीति किं। आसनादुत्तिष्ठति॥ ॥उपान्मन्त्रकरणे॥ उपपूर्वात्तिष्ठतेर्मन्त्रकरणेऽर्थे वर्तमानादात्म
नेपदं भवति। ऐन्द्र्या गार्हपत्यमुपतिष्ठते आग्नेय्याग्नीध्रमुपतिष्ठते मंत्रकरण इति किं।

नृपत्यानुत्थानस्येति भावः। उदईहायामित्येतत्कर्मग्रहणान्न सिद्धमित्याशङ्क्य कथं ईहा ऊर्ध्व इत्येतावतानूर्ध्वताविशिष्टक्रियावाचित्वं सिद्धं धातोः क्रिया
वाचित्वात् एवं सिद्धे कर्मग्रहणात् लोकप्रसिद्धं परिस्पन्दात्मकं कर्म गृह्यत इति। उपात्॥ पारिभाषिकमन्त्रकरणं गृह्यते मन्त्रैः करणं यस्यार्थस्य त
स्मिन्वर्तमानादित्यर्थः॥ ॥ ॥श्री॥ ॥७७॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

उपाद्दिसादि।अमंत्रकरणार्थमिदं।संगतकरणमुपश्लेषः इति।विनापिमैत्रीसंबंधात्।स्तुघ्नमुपतिष्ठतइतिप्राप्नोतीत्यर्थः।भिक्षुकइतिलिप्सयाहेतुभूतया ब्राह्मणकुलमुपगच्छतीत्यर्थः॥ ॥अकर्मकाच्च॥ ॥अत्रासंभवाक्रियाकर्मनगृह्यतेनह्यस्तिसंभवः धातुश्च भवतिक्रियावचनश्चेति।नतुचसा धनकर्मणोधर्मकत्वमव्यभिचारात् विशेषणंनाहि।शब्दात्मकस्यधातोः कर्मणायोगवियोगावियोगोसंभवतः साधनयोगस्यक्रियाधर्मत्वात्तस्मा ह अकर्मकक्रियावचनादितिएतेनार्थद्वारकमेततधातोर्विशेषणमितिदर्शयति।यावद्भुक्तमिति।यथार्थेयदव्ययमितिवीप्सायामव्ययीभावः स

उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वाच्यं।देवपूजायामादित्यमुपतिष्ठते।संगतकरणे।रथिकानुप तिष्ठते।मित्रकरणे।महामात्रानुपतिष्ठते।मित्रकरणसंगतकरणयोः कोविशेषः संगतकरणमुपश्लेषः।तद्यथा॥ गंगायमुनामुपतिष्ठते।मित्रकरणंतुविनाप्युपश्लेषेणमैत्रीसंबंधः।पथि।अयंपंथाः सुघ्नमुपतिष्ठते।वाविप्सायामि तिवक्तव्यं।भिक्षुकोब्राह्मणकुलमुपतिष्ठते।उपतिष्ठतीतिवा॥ ॥अकर्मकाच्च॥ ॥उपादितिवर्त्तते।उपपू र्वात्तिष्ठतेरकर्मकादकर्मकक्रियावचनादात्मनेपदंभवति।यावद्भुक्तमुपतिष्ठते।यावदोदनमुपतिष्ठते।भुक्तमितिभा वेक्तप्रत्ययः।भोजनेभोजनेसन्निधीयतइत्यर्थः।अकर्मकादितिकिं।राजानमुपतिष्ठति॥ १२॥ ॥६२॥ ॥

स्मिंतंचेतत्संनिधीयतइत्यर्थः इति।भावेलकारः अर्थेमात्मानंचैनत् योह्युपतिष्ठतेससंनिधत्तेयश्चसंनिधत्तेतेनसंनिधीयतेअकर्मकादि तिकिमिति।पूर्वसूत्रेउपादितियोगविभागादिष्टस्यसिद्धिंदर्शयति।नचैवंअतिप्रसंगः मंत्रकरणइत्यस्यनियमार्थत्वात् सकर्मकात् यदिभवतिमंत्र करणएवेति।राजानमुपतिष्ठतीति।विपरीतोपिनियमःस्यात्सकर्मकात्तोयदिभवतिमंत्रकरणएवेतितत्रश्चात्रस्यादेवेतिभावः १२ ॥

॥ ॥उद्विभ्यां तपः। उत्तपति सुवर्णमित्यत्र संतापने विलापने वा तपिर्वर्त्तते इति सकर्मकत्वं। स्वमंगं स्वांगमिति पाणिः कर्तृ आत्मनेपदं तस्य चेत् स्वमंगमित्यर्थः।

॥उद्विभ्यां तपः॥ अकर्मकादिति वर्त्तते। उद्वि इत्येवं पूर्वात् तपतेरकर्मकक्रियावचनादात्मनेपदं भवति। उत्तपते। वितपते। दीप्यत इत्यर्थः। अक-
र्मकादित्येव। उत्तपति सुवर्णं सुवर्णकारः। वितपति पृथ्वीं सविता। स्वांगकर्मकाच्चेति वक्तव्यं। उत्तपते पाणिं। उत्तपते पृष्ठं। वितपते पाणिं। वितपते
पृष्ठं। स्वांगं चेह न पारिभाषिकं गृह्यते अद्रवं मूर्त्तिमत् स्वांगमिति। किं तर्हि स्वम् अंगं स्वांगं तेनेह न भवति। देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपतीति। उद्वि-
भ्यामिति किं। निष्टपति॥ ॥आङो यमहनः॥ ॥अकर्मकादिति वर्त्तते। यम उपरमे हन हिंसागत्योः इति परस्मैपदिनौ। ताभ्यामकर्मक-
क्रियावचनाभ्यामाङ्पूर्वाभ्यामात्मनेपदं भवति। आयच्छते। आयच्छेते। आयच्छन्ते। हनः खल्वपि। आहते। आघ्नाते। आघ्नते। अकर्मकादि-
त्येव। आयच्छति कूपाद्रज्जुं। आहन्ति वृषलं पादेन। स्वांगकर्मकाच्चेति वक्तव्यं। आयच्छते पाणिं। आहते शिरः। स्वांगं चेह न पारिभाषिकं
गृह्यते। किं तर्हि स्वमंगं स्वांगं तेनेह न भवति। आहन्ति शिरः परकीयमिति॥ ॥समो गम्यृच्छिप्रच्छिस्वरत्यर्त्तिश्रुविदिभ्यः॥ ॥अकर्म-
कादिति वर्त्तते। [illegible] परस्मैपदेभ्यो संपूर्वेभ्यः गमिऋच्छिप्रच्छिस्वरत्यर्त्तिश्रुविदि इत्येतेभ्यः अकर्मकेभ्यो धातुभ्य आत्मनेपदं
भवति। संगच्छते। समृच्छते। संपृच्छते। संस्वरते। संकल्पा अस्य समरन्त। अर्त्तेर्लुङि च्लेः सर्त्तिशास्त्यर्त्तिभ्यश्चेत्यङादेशः। तत्र परस्मैपदे वि-
धेयत्वाश्रीयते। बहुलं छन्दस्यमाङ्योगेऽपीत्याट् प्रतिषिध्यते। ऋदृशोऽङि गुण इति गुणः। समरन्त। संशृणुते। संविन्ते। ऋच्छेरादेशे
ग्रहणं। समृच्छिष्यते। [illegible] इत्येव सिद्धमात्मनेपदं। अर्त्तिरिह पठ्यते। ऋ गतिप्रापणयोरिति भ्वादौ। ऋ गतौ इति जुहो-
त्यादौ विशेषाभावात् द्वयोरपि ग्रहणं। विदेर्ज्ञानार्थस्य ग्रहणं परस्मैपदिभिर्गमादिभिः साहचर्यात्। लाभार्थस्य स्वरितेत्वादुभयतोभाषत्वात्।
दृशेश्चेति वक्तव्यं। संपश्यते। अकर्मकादित्येव। ग्रामं संगच्छति॥ ॥निसमुपविभ्यो ह्वः॥ अत्र हि [illegible] कर्मकादिति निवृत्तं। अतः
परस्मात् अन्येनात्मनेपदविधानं प्रतिपत्तव्यं। निसं उप वि इत्येवं पूर्वात् ह्वयतेर्धातोरात्मनेपदं भवति। निह्वयते। संह्वयते। उपह्वयते। विह्वयते। अ-

पपत्वर्थग्रहणं ततो माणिन्यपि कर्त्रभिप्रायं गंतत्कर्मकादपि प्रसंगः पारिभाषिके त्वेष दोषो न भवति तस्य प्राणित्वात्। अन्वर्थेपि न दोषः। तयोः अ

णिकर्तृकत्वात्। पारिभाषिकस्य तत्संबंधित्वाद्वत्वात् कर्त्तुश्चेत्त्वमगामित्येवं न प्रतीयेतेति भावं च॥ ॥आङो॥ आहतेति। अनुदात्तोपदेशेत्यनुना
सिकलोपः। आघ्नत इति पूर्ववद्धात्वादेशोपधालोपौ कुत्वं च। आहंति शिरः परकीयमिति। आनने घ्रे विषम विलोचनस्य वक्षः। अत्र तु गांडीवी विषमविलोचनस्य
वक्षः एनस्वं वक्षो हतवानित्यर्थः। मल्लोऽप्युत्साहवर्धनाय स्वं वक्ष आस्फालयति॥ ॥समो गमृ॥ ॥समो गमृच्छिभ्यामित्येतावत् सूत्रं प्रच्छाद्य स्क
वार्त्तिके दृष्टाः सूत्ररूपेणापठिताः सूत्ररूपेणापठिताः सूत्रकारवद्वार्त्तिककारोऽपि शास्त्रस्य कर्त्तेति व्याख्यातेति द्योतयितुं। तत्रहीति। उत्तरार्थमनुवर्त्त
मानमपि योगविभागसामर्थ्यात् तत्र न संबध्यत इत्यर्थः। नलाभार्थस्येति सन्नो विचारणार्थ योऽत्र अनुदात्तेत्त्वादात्मनेपदेन भाव्यमेवेति भावः। द
शेश्वेत्यादि। इदं वक्ष्यमाणरूपेणोच्चपठितं। विचित्राहि वृत्तेः कृतिः वृत्तिकारेण। अथास्मिन्न कर्मकाधिकारे ये सकर्मकास्तेनिठ मिप्रभृतयः। तेषां क
यं मकर्मकत्वं उच्यते। धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रिया॥ हेतिभारश्मितिप्रायणो स
कर्म्मको वहिः स्यंदनेऽत्वकर्म्मकः। वहंतिनघ इति प्राणविशिष्टं धारणं जीवतिराह तत्र प्राणानां धातुनैवोपात्तत्वात्तेन कर्म्मणा सकर्म
कत्वं न च प्राणो कर्म्मके धा॰। एते अन्यस्य कर्म्मत्वमितिजीवतिरकर्म्मकः। मासि इवर्षं थावर्षतीत्यनुपात्ते कर्म्मणीति रेवि यमेन जलं प्रतीयत इति
नतेन सकर्म्मकत्वं तेन छष्टोदेव इति कर्त्तरि क्तो भवति व्यभिचारिणा तु रुधिरादिना सकर्म्मकस्य रुधिरं ववर्ष तिशरान् ववर्षतीति। कर्म्मणो ऽवि
वक्षया प्यकर्मकत्वं यथा नेह पच्यते नेह भुज्यते इत्यत्र कर्म्मविवक्षायां न तत्कश्चित् क्रियापाठापि ज्ञायते न पाकमात्रमित्य विवक्षा कर्म्मणः। नि
समुपे। निह्नुपत इति कथं पुनरत्रात्मनेपदं यावता ह्नुङ् इत्याकारांतादियं च मी एकारांतश्चायं न च विकृतिः प्रकृतिं गच्छतीति ससपमाकारांतात्सं
च मीनत्विदं प्रयोगस्त्वस्याकारांतस्यानुकारणं किं तर्हि धातुपठे वस्थिते कारांतस्य तस्यैव लक्षणावशाद्दात्रं। नचानुक्रियमाणरूपविनाश
प्रसंगः शास्त्रवासनया तस्यैव प्रतीतेः यथायस्येति च ईकाराकारयोः २३

॥ ॥स्पर्द्धायां॥ ॥सविषय इति। हेतुभावेन च विषयत्वं अत एव हेतौ प्रानज्ञप्रयुक्तः स्पर्द्धमानस्तत्पोह्वानमिति। आङ्क्रिय एवेति। यद्यपि स्पर्द्धायां प
द्यते तथाप्याह् एवं सूत्रत्वं वर्न्तते किं तर्हि शब्दनक्रियावाचा इत्यर्थः॥ ॥गंधनावक्षेपण॥ ॥अपकारप्रयुक्तमिति। अपकारेण प्रयुक्तं अनेनेम्पकृ
तमिस्येतपातुध्या कृतमित्यर्थः अथवा कथं मयापकृतं स्यादिति बुध्या प्रवर्त्तितमित्यर्थः हिंसात्मकमिति। सूचितस्यवधबंधनादिका हिंसा इह तु न क

॥ ॥स्पर्द्धायामाङः॥ अकर्त्रभिप्रायार्थोयमारंभः। स्पर्द्धायां विषये आङ्पूर्वात् ह्वयतेरात्मनेपदं भवति। स्पर्द्धा संघर्षः पराभिभवे
च्छा स विषयो धात्वर्थस्य तु स्तुशब्द क्रिय एव मल्लो मल्लमाह्वयते। छात्रश्छात्रमाह्वयते। स्पर्द्धमानस्तत्पाह्वानं करोतीत्यर्थः। स्पर्द्धायामि
ति किं। गामाह्वयति गोपालः॥ ॥गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः॥ कर्त्रभिप्राये क्रियाफले सिद्धमे
वात्मनेपदं। अकर्त्रभिप्रायार्थोयमारंभः। गंधनादिष्वर्थेषु वर्त्तमानात्करोतेरात्मनेपदं भवति। गंधनमपकारप्रयुक्तं हिंसात्मकं सूच
नं तथाहि। वस्तुतः गंधत्र अर्द इति। अर्द हिंसायामिति चुरादौ पठ्यते। अवक्षेपणं भर्त्सनं। सेवनमनुवृत्तिः। साहसिक्यं साहसिकं कर्म।
प्रतियत्नः सतो गुणांतराधानं। प्रकथनं प्रकर्षेण कथनं। उपयोगो धर्म्मादिप्रयोजने विनियोगः। गंधने तावत्। उत्कुरुते। उदाकुरु
ते। सूचयतीत्यर्थः। अवक्षेपणे। श्येनो वर्त्तिकामुदाकुरुते। भर्त्सयतीत्यर्थः। सेवने गणकानुपकुरुते। महामात्रानुपकुरुते। सेव
त इत्यर्थः। साहसिक्ये। परदारान्प्रकुरुते तेषु साहसात्प्रवर्त्तत इत्यर्थः। प्रतियत्ने। एधोदकस्योपस्कुरुते। काण्डं गुडस्योपस्कुरुते। त
स्य गुणांतराधानं करोतीत्यर्थः। षष्ठी सुट् करोतेः प्रतियत्न एव विधीयते। प्रकथने। गाथाः प्रकुरुते। जनापवादान्प्रकुरुते। प्र
कर्षेण कथयतीत्यर्थः। उपयोगे। शतं प्रकुरुते। सहस्रं प्रकुरुते॥ धर्म्मार्थं शतं विनियुंक्त इत्यर्थः। एतेष्विति किं। कटं करोति॥

रणात्वात् सूचनमेव हिंसात्वभावमित्युक्तं कथं पुनर्ज्ञायते गंधनं हिंसात्मकमित्यत आह तथा हीति। चुरादाविति स्वभावानुवादः। साहसिक्यमि
ति सहसा वर्त्तते साहसिकः उञः सहो भसा वर्त्तत इति ठक् तस्य कर्म्म इति ष्यञ् वर्त्तिका शकुनिविशेषः। एधोदकस्येति समाहारद्वंद्वः। कृञः प्रति
यत्न इति षष्ठी। उपस्कुरुत इति उपात्प्रतियत्नेत्यादिना सुट्॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अधेप्रसहने। प्रसहनमभिभवः इति। सामाह योयुष्मान् अभिः एतनाषाड् इन्द्र सोरादिभ्योनात्। केचित्तु सहमर्षणे भिभवे छंदसि तित्र छंदसीति प्रायिकं इत्यव। अपराजयो वेति। पराजेरसोढ इत्यपादानसंज्ञा पर्यायसेवनमयापत्तृ दभावः स इत्यर्थः। तथा च भारविः भवाद्दृशाश्चेदधिकुर्वते परान् इति। भवादृशाश्चेत् परानधिकुर्वते अभिभवन्ति न पराजयं ते क्षमंत इत्यर्थः। तदाहनकां तेन पराजित इत्यर्थ इति। तेनात्मनेपदव्याख्येनकर्त्राभिप्रायेत द्वयं कर्मभूतो न पराजित इत्यर्थः। पृथग्योगकरणमि त्यादि। प्रकथनोपयोगप्रसहनेषु धीसु सुधमानेतां धनादिष्वपि अधिपूर्वात् दृश्यते अथ तत्राधिग्रहणं न क्रियेत प्रसहने प्रध्यभावे पि प्रसंगः। अत उप सर्गेण प्रसहनं विशेषयिष्यामीति प्रसहनेन वाउपसर्गं विशेषयिष्यामीति योगविभागविभाग इत्यर्थः।। ।।वेः शब्दकर्मणः।। ।।उदोनूर्ध्वकर्मणि सा

।।अधेः प्रसहने।। ।।अकर्त्रभिप्रायार्थ आरंभः। अधिपूर्वात् करोतेः प्रसहने वर्त्तमानादात्मनेपदं भवति। प्रसहनमभिभवः।। अपराजयो वा। तमधिचक्रे। तमभिबभूव। न तेन पराजित इत्यर्थः इति वा प्रसहन इति किं अर्थमधिकरोति पृथग्योगकरणमुपसर्गविशेषणार्थं।। ।।वेः शब्दकर्मणः।। कृञ इत्यनुवर्त्तते। विपूर्वात् करोतेः कर्त्रभिप्राये क्रियाफले शब्दकर्मणः आत्मनेपदं भवति। कर्मशब्द इह कारकाभिधायी। न क्रियावचनः। क्रोष्टा विकुरुते स्वरान्। ध्वांक्षो विकुरुते स्वरान्। शब्दकर्मण इति किं। विकरोति पयः।। ।।अकर्मकाच्च।। ।।वेः कृञः इत्यनुवर्त्तते विपूर्वात् करोतेरकर्मकात् अकर्मकक्रियावचनादात्मनेपदं भवति। विकुर्वते सैंधवाः। साधु दान्ताः शोभनं वल्गंतीत्यर्थः। ईद्र नस्यम्प्रा। इति किं। विकरोति पयः।। ।।अकर्मका

च्छात्रा विकुर्वते। निष्फलं चेष्टंत इत्यर्थः।। १५ ।।

ष्टत कर्म शब्द क्रियावाची मा विज्ञायीत्याह कर्म शब्द इत्यादि विपूर्वस्य करोतेः शब्दक्रियायां वृत्यसंभवात् कृत्रिमसंभवे लौकिकस्य ग्रहणं योगाच्च किं च वेः शब्द इत्येवं वक्तव्यं कर्मग्रहणमनर्थकं। विकरोति पय इति सकर्मकत्वात् उत्तरेणापि न भवति।। ।।अकर्मकाच्च।। ।।उदन्तस्य प्रणी इति। सुहितार्थयोगे षष्ठी भवति ज्ञाय नात् षट्पंश्चरणे गुणात् सुहितार्थेति सुहितार्थे पाषष्ठी सा न समस्यत इत्याह तज्ज्ञापयत्याचार्यो भवति सुहितार्थयोगे षष्ठीति अकर्मकादिति किमिति पूर्वसूत्रे चेदिति योगविभागादिष्टमिद्धिमन्यते। नचैवं भवति कर्मणि यदि भवति शब्द एवेति। कथं वि

\+ प्रसंगः शब्दकर्मण इत्यस्य नियमार्थत्वात् + १

॥ गासं ~ माननः॥ ॥संमाननादिषु विशेषणेषु सत्स्विति। युक्तं संमाननाचार्यकरणेवेत नान्नो विशेषणत्वं तत्र हि प्रापणमेव धात्वर्थः संमान
नादीनि तु तमेव विषयतया व्यवच्छिंदंति। उत्संजनादीनां त्वयुक्तं तेषामेव धात्वर्थत्वात् नह्यतिरिक्तस्य विशेष्यस्यासंभवात्। उच्यते। संमाननादि
तुल्यत्संजनादेश्च विशेषणत्वं समानं। पूर्वोक्तात्वर्थविशेषणं उत्तरत्र धातु विशेषणमिति विशेष्यमात्रं भिद्यते अतः सुष्ठुक्तं संमाननादिषु वि
शेषणेष्विति। चार्वी बुद्धिरिति। चारुशब्दात् वोतो गुणवचनादिति ङीष्। आचार्यो पि चार्वी ति। यथाय ही: प्रवेद्या येति पुरुषे च यम्यञ्ज ... लिंगः एव
यहि शब्दः तद्वत् चार्वीदः। ते युक्तिभिः लोहितः। एवं स्मिन्नाको गुणाभावेनापि प्रकृताः शिष्याः तद्वदेन परा ... इयंते। श्लाघ्यमाना इति शिष्टाः प्रतिपाद्य

।संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः॥ णिजन्तप्रापणे अस्मात्कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मने
पदं। अकर्त्रभिप्रायार्थोयमारंभः। णीञ् प्रापणे इत्यस्मात् धातोरात्मनेपदं भवति सम्माननादिषु विशेषणेषु सत्सु। संमा
ननं पूजनं। नयते चार्वी लोकायते चार्वी बुद्धिः तत्संबंधादाचार्योपि चार्वीसलोकायते शास्त्रे पदार्थान्नयते। उपपत्तिभिः स्थि
रीकृत्य शिष्येभ्यः प्रापयति। ते युक्तिभिः श्लाघ्यमानाः संमानिताः पूजिता भवंति। उत्संजनमुत्क्षेपणं। माणवकमुदानयते।
उत्क्षिपतीत्यर्थः। आचार्यकरणमाचार्यक्रिया॥ ॥

त्रजंतीते शिष्याः युक्तिभिः प्रतिपाद्यमानाः निष्पाद्यमाना इत्यर्थः पूजिता भवंतीति। अभिलषितार्थसंपादनमेव तेषां पूजा। पदार्था युक्तिभिः
श्लाघ्यमाना इति तु आख्यानेपदार्थानामचेतनत्वात् न मुख्यं सम्माननं। उत्क्षिपतीत्यर्थ इति नेनोत्संजनं नमतेरर्थ इति दर्शयति। आचार्यकरण
माचार्यक्रियेति निरूक्तेः वृत्तौ च करणं वस्तु याभिवाक्ये ताभिः प्राप्नोति विकल्पाधिकारेन्लरुतः। तथा चाचार्यकं कुर्वन्निति त्रिभिः प्रयुक्तः। ननूपनयनं
माणवकस्य संस्कारः येनासावध्ययने योग्यो भवति न तु तेनाचार्यकं कश्चिदिति शोज्यते। आचार्यशब्दस्य तु प्रवृत्तिनिमित्तमुपनीयाध्याप
नं नाम क्रियाविशेषः। यथोध्यायशब्दस्य एकदेशाध्यापनं तत्कथमाचार्यकरणे आत्मनेपदं विधीयते इत्यत आह॥ ॥ ॥

प

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ १११
१२०

माणवकमीदृशेनेत्यादि। एवं मन्यते उपनीयाध्यापनेनाहंकृत्यः कश्चिदिति अपरआचार्यं जनयते तद्देवप्रवृत्तिनिमित्तमाचार्यशब्दस्येति। तदाह स्वयमा
चार्यः संपद्यते इति। आत्मानमाचार्यं कुर्वन्निति च हेतुलक्षणे लटः शत्रादेशः। ईदृशेनेति। यादृशः शास्त्रोक्तो विधिः तादृशेनेत्यर्थः। ननु यदाचार्यकमुप
नयनस्य प्रयोजनं तत्कर्त्रभिप्रायमिति नार्थ आचार्यकरणे आत्मनेपदविधानेन उच्यते नोपनयने नाचार्यकं जन्यते किं तर्हि इति सर्वकेणाध्यापने न उपनयन
क्रियायाः फलं माणवकसंस्कारः स एवास्य फलं एवं संस्कृतस्य माणवकस्याध्यापनेन तेनाचार्यकं जन्यत इति न तदुपनयनक्रियायाः फलं। यच्च तस्याः फलं तन्मा
णवकगामि न कर्तृगामि। निष्चिनोतीत्यर्थ इति। अनेन ज्ञानं नयतेरर्थ इत्याह। करं विनयत इति। कर एव करः प्रज्ञादिः एजन्तो भागः कर्मकैः कल्पि

माणवकमीदृशेन विधिना आत्मसमीपं प्रापयति यथा स उपनेता स्वयमाचार्यः संपद्यते। माणवकमुपनयते। आत्मानमा
चार्यं कुर्वन्माणवकमात्मसमीपं प्रापयतीत्यर्थः। ज्ञानं प्रमेयनिश्चयः। नयते चार्वी लोकायते। तत्र प्रमेयं निश्चिनोतीत्यर्थः। भृति
र्वेतनं। कर्मकराननुपनयते। भृतिदानेन समीपं करोतीत्यर्थः। विगणनमृणादेर्निर्यातनं। मद्राः करं विनयन्ते। निर्यातयन्तीत्य
र्थः। व्ययो धर्मादिषु विनियोगः। शतं विनयते। सहस्रं विनयते। धर्माद्यर्थं उपनयं विनियुङ्क्त इत्यर्थः। एतेष्विति किं। अजां नय
ति ग्रामं॥ ॥कर्तृस्थे चाशरीरे कर्मणि॥ नयतेः कर्तृ इव त्वादिर्लकारवाच्यः कर्तृस्थे कर्मणि अशरीरे सति नयतेरात्मने
पदं भवति। शरीरं प्राणिकायः। तदेकदेशोऽपि शरीरं। क्रोधं विनयते। मन्युं विनयते। कर्तृस्थ इति किं। देवदत्तो यज्ञदत्तस्य क्रो
धं विनयति। अशरीर इति किं। गडुं विनयति । कर्मणीति किं। बुद्ध्या विनयति प्रज्ञया विनयति १५

नः॥ ॥कर्तृस्थे च॥ ॥नयतेरात्मनेपदविधानात्तत्संबंधे एव कर्तृलकारवाच्यः प्रत्यासन्नो गृह्यत इत्याह नयतेः कर्तेति। तदेकदेशोऽपि शरीरमि
ति। अपिशब्दोऽवधारणे। इह शरीरस्यैव चैतन्यविशिष्टस्य कर्तृत्वं लौकिकाः प्रतियन्ति न तु तदतिरिक्तस्य बुद्ध्यादिसमितस्यात्मन इति शरीरस्योप
त्तिः अतस्तदेकदेश एव तत्तद्ग्रहणेन गृह्यत इत्यर्थः। अत्र क्रोधाद्यपनयनफलं कर्त्रभिप्रायमिति स्वरितञितः इत्येव सिद्धे नियमार्थमिदं कर्तृ
स्थे कर्मणि। एव शरीर एवेति। अथ कथं विगणय्य नयति पौरुषं विहितक्रोधजयो जिगीषवः इति। केचिदाहुः अपशब्दमेव जैमिनादिरात्मनेप
दविधाने अत्र तु करोत्यर्थं प्राप्तस्यार्थं वा वर्तते अनेकार्थत्वाद्धातूनामिति॥ १५॥

राम॰
१२०

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥वृत्तिसर्गे॥ ॥सर्गउत्साह इति सर्गश्चे आपणत्वधेये नेइलो कावृत्तपापसरद्व स्तात्रौदशनात्सर्जिस्तत्साहार्थः हस्तादिष्विति किं अपक्रामति॥ ॥
उपराभ्यां॥ ॥उपपराभ्यामिति किमिउपसर्गनियमः किमर्थमित्यर्थः। संक्रामतीति क्रमः परस्मैपदे त्रिनिदीर्घः॥ ॥आङ उद्गमने॥ ॥आक्रमति
माणवकः कुतुपमिति अवष्टभ्नातीत्यर्थः। कृत्स्नाकुतूः कुतूपः तुलाकुयञ्च। कुतपमिति पाठे कुतपोदर्भसंस्तरः। आक्रमति धूमो हर्म्यतलामि
ति उद्गमनेऽकर्मकः तस्माद्धर्म्यतलादिति पञ्चम्यंतं पठितव्यं यद्वा उद्गमनपूर्विकायां व्याप्तावत्र क्रमिर्द्रष्टव्यः। इहतु नभः समा
॥वृत्तिसर्गतायनेषु क्रमः॥ ॥ज्योत्पात्कर्त्रीयेस्मैपदेप्राप्ते हस्तादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं भवति। वृत्तिरप्रतिबंधः। सर्गः उ
त्साहः॥ तायनं स्फीतता। ऋचौ तावत्ते त्स्वस्य क्रमते बुद्धिः। नप्रतिहन्यत इत्यर्थः। यजुःषु अस्य क्रमते बुद्धिः। सर्गे व्याकरणाध्ययनाय
क्रमते। उत्सहत इत्यर्थः। तायने। अस्मिन् शास्त्राणि क्रमंते। स्फीतीभवंतीत्यर्थः। एतेष्विति किं। अपक्रामति॥ ॥७॥ ॥उपपरा
भ्यां॥ ॥वृत्तिसर्गतायनेष्विवर्त्तते। उपपराभ्यां पूर्वात्क्रमतेर्हस्तादिष्वर्थेषु वर्त्तमानादात्मनेपदं भवति। किमर्थं तर्हीदमुच्यते उपसर्ग
नियमार्थं सोपसर्गाद् उपपराभ्यामेव नान्यपूर्वादिति· उपक्रमते· पराक्रमते· उपपराभ्यामिति किं। संक्रामति। हस्तादिष्वित्येव। उप
क्रामति पराक्रामति॥ ॥आङ उद्गमने। आङ्पूर्वात्क्रमतेरुद्गमने वर्त्तमानादात्मनेपदं भवति। आक्रमते आदित्यः। आक्रमते च
न्द्रमाः। आक्रमंते ज्योतींषि। उद्गमन इति किं। आक्रामति माणवकः कुतपं। ज्योतिरुद्गमन इति वक्तव्यं इह माभूत्। आक्रामति धूमो
हर्म्यतलं॥ ॥वेः पादविहरणे॥ ॥विपूर्वात्क्रमतेः पादविहरणेर्थे वर्त्तमानादात्मनेपदं भवति। विहरणं विक्षेपः। सुष्ठु विक्रमते। साधु विक्रम
ते। अश्वादीनां गतिविशेषो विक्रमणमुच्यते। यद्यपि क्रमिः पादविहरण एव पठ्यते क्रमु पादविक्षेप इति। तथाप्यनेकार्थत्वाद्धातूनामि
ति एवमुक्तं। पादविहरण इति किं। विक्रामत्यजिनसंधिः॥ ॥प्रोपाभ्यां समर्थाभ्यां॥ ॥प्रउपइत्येताभ्यां परस्मात्क्रमतेरात्मनेपदं भवति यो
चेत्प्रोपौ समर्थौ तुल्यार्थौ भवतः। क्वचानयो स्तुल्यार्थता। आदिकर्मणि। प्रक्रमते भोक्तुं उपक्रमते भोक्तुं। समर्थाभ्यामिति किं। पूर्वेद्युः प्रक्रा
मति चंद्रमाः क्रमादिति क्रमिर्व्याप्तौ वर्त्तते नोद्गमने॥ ॥वेः पादः विक्रामत्यजिनसंधिरिति द्विधा भवति स्फुटतीत्यर्थः॥ ॥प्रोपाभ्यां॥ ॥अन्योन्य
साहचर्यात्प्रोपयोरुपसर्गयोर्ग्रहणं न पातिपदिकांतकर्मप्रवचनीययोर्नापि क्रियांतरसंबंधिनोः नाप्यनर्थकयोः निपातयोरित्याह प्र उप इत्येताभ्यामुप

© Dharmartha Trust J&K. Digitized by eGangotri

सर्गाभ्यामिति। तुल्यार्थाविति। एतेन समोऽर्थो ययोरिति समर्थौ कं वादित्वात्पररूपं संग्राह्यस्येव वान्यानेकार्थत्वात्तुल्यार्थत्वमिति दर्शयति। ननु समर्थः पद
विधिरित्यत्र सामर्थ्यं प्रसिद्धं समर्थं इह तु धात्वर्थप्रतिपादनं आन्यपरस्परेणैव स्वार्थत्वे धातुनाप्युपसर्गयोः संबन्धः अभिधानेति तस्मात्समर्थौ एकार्थः। प्र
क्रमत इति आरभत इत्यर्थः॥ ॥अनुपसर्गाद्वा॥ ॥अप्राप्तविभाषेयमिति। उपपराभ्यामित्यस्य नियमार्थत्वात् हत्यादिसूत्रमनुपसर्गविषयमेवेति
नतत्रायं विकल्प इति भावः॥ ॥अपह्नवे॥ शेषात् इत्यादि अस्मिन् सूत्रे अयमपि शेष एव भवतीति भावः। सोपसर्गश्चेति तेनानुपसर्गात् ज

॥अनुपसर्गाद्वा॥ ॥क्रम इति वर्तते। अप्राप्तविभाषेयं। उपसर्गविप्रमुक्तात् क्रमतेरात्मनेपदं वा भवति। क्रमते क्राम
ति। अनुपसर्गादिति किं। संक्रामति॥ ॥अपह्नवे ज्ञः॥ ॥शेषात्कर्तरि परस्मैपदे प्राप्ते जानातेरपह्नवे वर्तमाना
त् आत्मनेपदं भवति। अपह्नवोऽपह्नुतिरपलापः सोपसर्गस्यायमपह्नवे वर्तते न केवलः। शतमपजानीते। सहस्रम
पजानीते॥ अपलपतीत्यर्थः। अपह्नव इति किं। विदपि जानासि॥ ॥अकर्मकाच्च॥ अकर्त्रभिप्रायार्थमिदं। कर्त्र
भिप्राये त्वनुपसर्गाज्ज्ञ इति वक्ष्यति। जानातेरकर्मकादकर्मकक्रियावचनादात्मनेपदं भवति। सर्पिषो जानीते। म
धुनो जानीते। कथं च अयमकर्मकः नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितं। किं तर्हि ज्ञानपूर्विकायां प्रवृत्तौ करणत्वेन।
तथा च ज्ञोऽविदर्थस्य करण इति षष्ठी विधीयते। सर्पिषो जानीते। मधुनो जानीते। सर्पिषा उपायेन प्रवर्तत इत्यर्थः। अक

इत्यनेनाकर्त्रभिप्राये क्रियाफले न सिध्यतीति भावः। अवजानीत इति ज्ञाजनोर्जा॥ ॥अकर्मकाच्च॥ ॥अकर्त्रभिप्रायार्थमिदमिति। अथ कर्त्रभिप्रा
ये कथं तत्राह कर्त्रभिप्राये हीति। ननु सोपसर्गात्कर्त्रभिप्राये प्यनेनैवात्मनेपदमेषितव्यं ओषधस्यानुजानीते ओषधास्यानुजिज्ञासत इति। तस्मात्सर्पि
षो जानीत इत्युदाहरणाभिप्रायः एवमुच्यमानेऽकर्मकादपि स्यादिति दर्शयितुं स्वरोऽन्ति॥ १६ ॥ ॥ १६ ॥ ॥ ॥

॥संप्रतिभ्यां॥ ॥उत्कंठास्मरणं। मातुरिति अधीगार्थदयेशां कर्मणीति षष्ठी। ननु शेष इति तत्रानुवर्त्तते तेन कर्मणः शेषत्वेन विवक्षितत्वमिति अकर्मकत्वात्पूर्वेणा
त्मनेपदप्रसंगः। अनाध्यान इत्यस्य तु मातरं संजानातीति भावः। अस्यापि त्र कर्मत्वे विवक्षिते नैष दोषः। अनाध्यान इति विभज्यते तेन पूर्वयोगस्यापि शेषो
भविष्यति॥ ॥भासनोप॥ भासनादिष्विति॥ अत्रापि किंचिद्धातोर्विशेषणं किंचित्कृतेऽर्थस्य। उपसांत्वनमुपछंदनं धातोर्भासनादिधात्वर्थस्य॥ ॥
भासमान इति हेतौ लटः शानजादेशप्रयोगेण भासनं हेतुत्वेन विशेषणमित्याह शिष्यैः स्वरूपमानो भासते तथा चोपर्युपरि शास्त्रार्थस्य प्रतिभासनात्

॥ ॥संप्रतिभ्यामनाध्याने॥ ॥ज्ञ इति वर्त्तते। सकर्मकार्थमिदं। संप्रति इत्येवंपूर्वाज्जानातेरनाध्याने वर्त्तमानादात्मने
पदं भवति। आध्यानमुत्कंठास्मरणं। शतं संजानीते। सहस्रं संजानीते। शतं प्रतिजानीते। सहस्रं प्रतिजानीते। अनाध्या
ने इति किं। मातुः संजानाति। पितुः संजानाति। उत्कंठत इत्यर्थः॥ ॥भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः॥
शेषात्कर्तरि परस्मैपदे प्राप्ते भासनादिषु विशेषणेषु सत्सु वदतेरात्मनेपदं भवति। भासनं दीप्तिः। वदते चार्वी लोकाय
ते। भासमानो दीप्यमानः तत्र पदार्थान्व्यक्तीकरोतीत्यर्थः। उपसंभाषा उपसांत्वनं। कर्मकरानुपवदते। उपसांत्व
यतीत्यर्थः। ज्ञानं सम्यगवबोधः। वदते चार्वी लोकायते। जानाति वदितुमित्यर्थः। यत्न उत्साहः। क्षेत्रे वदते। गेहे वदते।
तद्विषयमुत्साहमाविष्करोतीत्यर्थः। विमतिर्नानामतिः। क्षेत्रे विवदंते। गेहे विवदंते। विमतिपतिताः विचित्रं भाषंते इत्यर्थः।
उपमंत्रणं रहस्युपछंदनं। कुलभार्यामुपवदते। परदारानुपवदते। उपछंदयतीत्यर्थः। एतेष्विति किं। यत्किंचिद्वदति॥ ॥

॰सुष्ठु वदनं भवति तेजोभंगेन तु न शक्नुयाद्वदितुं जानाति वदितुमिति शकधृषेत्यादिना तुमुन्। अत्र च वदत्यर्थो ज्ञानस्य विषयः ज्ञानं विषयि। तद्विषय
मित्यादि। अत्र यत्न आविष्करणरूपस्य वदत्यर्थस्य कर्म। विमतिपतिता इति हेतुगर्भं विशेषणं प्रयुंजानो विमतेर्हेतुत्वं न विशेषणत्वमित्याह। वि
मतौ हि सत्यां विचित्रभाषरूपो वदत्यर्थो निर्वर्त्तते। उपछंदयतीति भद्रभज स्वमोरहंते दास्याः मीति स्वाभिलषिते प्रवर्त्तयतीत्यर्थः॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अक्तवाचां॥ ॥मनुष्याः प्रसिद्धा इति यद्यपि कुक्कुटादिरुतमपि स्वरूपेणाव्यक्तं अस्ये हंतु तमस्येद मितिमनुष्यवागव्यक्ततरा भवति वर्णात्मकत्वात्
स्यार्थावगतिहेतुत्वाच्च अतएव गत्यंतेशुकशारिकादीनां तु पुरुषप्रयत्नवशेन कोचिदव्यक्ता वाक्त्वं न स्वाभाविकं सार्वत्रिकमिति न तेषां ग्रहणं। स
ते नु संप्रवदंति कुक्कुटा इति अपनयपादसरोजयं कतः शिथिलयवाङ्कुलतांगलाहतां। कचवदृये शुकमाकुली हृतं इति पूर्वपादः। कचित्तु व्य

व्यक्तवाचां समुच्चारणे॥ ॥वद इति वर्त्तते। व्यक्तवाचां समुच्चारणं सहोच्चारणं तत्र वर्त्तमानाद्वदतेरात्मनेपदं भवति।
ननु वद व्यक्तायां वाचीत्येव पद्यते तत्र किं व्यक्तवाचामिति विशेषणेन। प्रसिद्ध्युपसंग्रहार्थमेतत्। व्यक्तवाच इति हि
मनुष्याः प्रसिद्धाः। तेषां समुच्चारणे यथा स्यात्। संप्रवदंते ब्राह्मणाः। संप्रवदंते क्षत्रियाः। व्यक्तवाचामिति किं। वरत-
नु संप्रवदंति कुक्कुटाः। समुच्चारण इति किं। ब्राह्मणो वदति। क्षत्रियो वदति॥ ॥अनोरकर्मकात्॥ ॥वद इति
व्यक्तवाचामिति च वर्त्तते। अनुपूर्वाद्वदतेरकर्मकाद्व्यक्तवाग्विषयादात्मनेपदं भवति। अनुवदते कठः कलाप-
स्य। अनुवदते मौदः पैप्पलादस्य। अनुः सादृश्ये। यथा कलापोऽधीयानो वदति तथा कठ इत्यर्थः। अकर्मकादि-
ति किं। पूर्वमेव यजुरुदितमनुवदति। व्यक्तवाचमित्येव। अनुवदति वीणा। ८७

तत्र एव श्लोकः पद्यते तत्र वरतनु रिति वद्धत्री ह्योपदिष्टत्वात् तनुशब्दः ततः संबुद्धौ चेति गुणप्रसंगः दीर्घनिर्दुत्यत्वे लक्षणं कप्राप्नोति। केचिद्वा
ऊः ननु शब्दः स्त्रीजातौ कविभिः प्रयुज्यते तस्मादूङुतर इति ह्रस्वः इति कर्मधारयोपमितिः। अनो। व्यक्तवाचामिति वर्त्ततेऽत इति न तु समुच्चारण इति स्वर्ये
उक्तेनो वचनमिदमनर्थकं स्यादितिभावः। तद्व्यक्तवाक्संबंधिनो वदेरिति सूत्रार्थमाह व्यक्तवाग्विषयादिति अनुः सादृश्य इति तेन कालापस्येति तुल्या-
र्थयोगे शेषलक्षणा षष्ठीतिभावः। यथोमादि। वदनमात्रसादृश्ये तात्पर्यमिति कर्म न विवक्षितमिति भावः। अनुवदतीति एनं वदतीत्यर्थः। ८७॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ विभाषा ॥ सांवत्सरा विवदंतीति । सांवत्सराः ज्योतिषिकाः एवं मौहूर्त्तिकाः । अवाद्गिरः ॥ ॥ गिरइतिपाठे धात्वनुकरणत्वाद्विभक्तीवितं । ग्रह इति तु पाठे त्रू
पमात्रानुकरणोद्रष्टव्यं । तस्य त्ववपूर्वस्येति । नियतविषयाण्यपि क्रियाविशेषणानि भवंति यथोर्याद्दयः कृत्वा तिथ्योन्यविषया न भवंतीति भावः ॥ समः
प्रति । प्रतिज्ञानमभ्युपगम इति केचिदाहुः परोपदेशनिरपेक्षं आत्मनैव विप्रतिपन्नस्य पक्षस्य परिग्रहोऽभ्युपगमः परेण प्रार्थितस्यार्थस्य नियमवचनं

॥ विभाषा विप्रलापे ॥ वद इति वर्त्तते । व्यक्तवाचां समुच्चारण इति च । विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्त्तमानाद्वदतेरात्मनेप
दं भवति विभाषा । प्राप्तविभाषेयं । विप्रवदंते सांवत्सराः । विप्रवदंति सांवत्सराः । विप्रवदंते मौहूर्त्ताः । विप्रवदंति मौहूर्त्ताः । युगपत्प
रस्परप्रतिषेधेन विरुद्धं वदंतीत्यर्थः । विप्रलाप इति किं । संप्रवदंते ब्राह्मणाः । व्यक्तवाचामित्येव । विप्रवदंति शकुनयः । समुच्चार
ण इत्येव । क्रमेण मौहूर्त्ताः मौहूर्त्तेन सह विप्रवदंति ॥ ॥ अवाद्ग्रः ॥ गॄ निगरणे इति तुदादौ पठ्यते तस्येदं ग्रहणं न तु गॄ शब्द
इति क्र्यादिपठितस्य । तस्य त्ववपूर्वस्य प्रयोग एव नास्ति । शेषादिति परस्मैपदे प्राप्ते अवपूर्वाद्गिरतेरात्मनेपदं भवति । अवगिर
ते । अवगिरेते । अवगिरंते । अवादिति किं । गिरति ॥ ॥ समः प्रतिज्ञाने ॥ ग्र इति वर्त्तते । संपूर्वाद्गिरतेः प्रतिज्ञाने वर्त्तमानादात्म
नेपदं भवति । प्रतिज्ञानमभ्युपगमः शतं संगिरते । नित्यं शब्दं संगिरते । प्रतिज्ञान इति किं । संगिरति ग्रासं ॥ ॥ उदश्चरः सक
र्मकात् ॥ ॥ शेषात्कर्त्तरि परस्मैपदे प्राप्ते उत्पूर्वाच्चरतेः सकर्म्मकक्रियावचनादात्मनेपदं भवति । गेहमुच्चरते । कुटुंबमु
च्चरते । गुरुवचनमुच्चरते । उत्क्रम्य गच्छतीत्यर्थः ॥ सकर्म्मकादिति किं । बाष्पमुच्चरति ॥ ॥

एतावद्दास्यामीत्येवं प्रतिश्रवः । परेणाभ्युक्तस्य साधितस्यार्थस्य संमाननं समीचीनमुक्तमत्र भवतेत्येवंरूपमंगीकरणमिति प्रतिज्ञायाः आम्याचांतरभेदा
एतेन तु पर्याया इति वृत्तिकारस्तु परस्परविषये अंगीकरणादिव्यवहारदर्शनात् पर्यायत्वमेवमन्यते । उदश्चरणं । उत्क्रम्येति । उल्लंघ्येत्यर्थः । उच्चर
तीति उपरिष्टाद्गच्छतीत्यर्थः ॥ ॥ ५ ६ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ १९ १२

१२३

समस्तृतीया। विभक्तिर्गृह्यत इति। तत्रैव तृतीयाशब्दस्य मुख्यत्वात्। एवमेवं तथा सुहृया तो संबंधो न भवति नहि तृतीया धातुवाच्या नापि धातुस्तृतीयान्त इति अत आह तयेत्यादि। तृतीयार्थेन धात्वर्थस्य योगादौपचारिको वा तो तृतीयायोग इत्यर्थः। यद्यप्यत्रेति नहि चेष्टानूपसंचरणमन्तरेणाकरणं संभवति अतोऽश्रुतेऽपि करणापदे तत्प्रसाश्रुतेन चेति गम्यमानत्वात्तदर्थयोगस्य संभवः। तृतीयायास्त्विति एतदर्थमवाहि पूर्वमुक्तं विभक्तिर्गृह्यत इति। तृतीयायुक्तादिति वानर्थकं स्यात् यदितरदर्थयोगे स्यात् सर्वत्रैव तदर्थभावादिति भावः। दाणश्च। वक्तव्यमेवैतदिति सूत्रे चेच्छब्दस्यार्थे अनेकार्थत्वान्निपातानामिति के

समस्तृतीयायुक्तात्॥ ॥ संपूर्वाच्चरतेस्तृतीयायुक्तादात्मनेपदं भवति। तृतीयेति तृतीया विभक्तिर्गृह्यते तया चरतेरर्थद्वारको योगः। अश्वेन संचरते। रथेन संचरते। तृतीयायुक्तादिति किं। उभौ लोकौ संचरसि इमं चामुं च देवल। यद्यप्यत्र तदर्थयोगः संभवति तृतीया तु न श्रूयत इति प्रत्युदाहरणं भवति॥ ॥ दाणश्च सा चेच्चतुर्थ्यर्थे। दाण दाने। परस्मैपदी। ततः संपूर्वात्तृतीयायुक्तादात्मनेपदं भवति। सा चेत्तृतीया चतुर्थ्यर्थे भवति। कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात्। वक्तव्यमेवैतत्। अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यं। दास्या संप्रयच्छते। वृषल्या संप्रयच्छते। कामुकः सन् दास्यै ददातीत्यर्थः। चतुर्थ्यर्थ इति किं। पाणिना संप्रयच्छति। समः प्रशब्देन व्यवधाने कथमात्मनेपदं भवति सम इति विशेषणे षष्ठी न पंचमी ॥१८॥ ॥

रा॰म॰

१२३

विशदाणस्तृतीयायुक्तादात्मनेपदं भवति सा चेत्तृतीया चतुर्थ्यर्थे वेदितव्येति आचक्षते। एवमपि अशिष्टव्यवहार इति वक्तव्यमेव अशिष्टानां संकीर्णाचाराणां यो व्यवहारः आचारः तस्मिन्नित्यर्थः। दास्या संप्रयच्छत इति यो दास्या सह भुंजानस्तत्पादनेन स्वयं भुंक्ते स्वयं च तस्यै ददातीति द्विषयोऽयं प्रयोग इत्याहुः। कथमात्मनेपदमिति। न कथंचित् तस्मादिसुत्तरस्येत्यत्र निर्दिष्टग्रहणस्यानन्तर्यार्थत्वादिति भावः। विशेषणे षष्ठीति। एवं च पूर्वसूत्रे यस्त्वेन समुदाचरत इत्यादावपि भवितव्यं॥ १८॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥उपाद्यमः॥ ॥उद्वहस्य मतोऽनुरूपां नरो यत्पत्नीकरणं तत्स्वकरणमिति निरूप्यते किं तर्हि यः परास्त्र्यं स्वं स्वं करोति तत्र दामवित्तं पि प्रत्ययस्य विकल्पितत्वान्न
भवति। पाणिग्रहणविशिष्टमिति। पाणिग्रहणं नाम कश्चिल्लक्ष्यसंस्कारः तद्विशिष्टमित्यर्थः। मा भूदेतत्स्वयमतः स्वत्वापादनमेव स्वकरणमित्युक्तं। भट्टिकाव्ये
पितृवद्गुरुणः प्रयोगः। उपायंस्त महास्त्राणि। उपायंसत नामसर्वं। नोपायंस्त दृशानन इति द्वितीयो पठतेदन्नस्य भार्यामुपयच्छतीति। यज्ञदत्तसंबंधिनीं भार्यां दृ
स्वाविदूपेण स्वीकरोतीत्यर्थः। पाणिग्रहणाभावात् हन्तिकारमते पुंक्तं पत्सुदहरणं भाष्यकारमतेनात्रापि भवितव्यम्॥ ॥ज्ञाश्रुस्मृदृ॥ ॥श्रुदृशोरपीति॥

॥उपाद्यमः स्वकरणे॥ ॥शेषात्कर्तरि परस्मैपदे प्राप्ते उपपूर्वात् यमः स्वकरणे वर्तमानादात्मनेपदं भवति। पाणिग्रहणविशि
ष्टमिह स्वकरणं गृह्यते। न स्वकरणमात्रं। भार्यामुपयच्छते। स्वकरण इति किं। देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति॥ ॥ज्ञाश्रुस्मृदृ
शां सनः॥ ज्ञाश्रुस्मृदृश इत्येतेषां सन्नन्तानामात्मनेपदं भवति। तत्र ज्ञानातेरपह्नवे ज्ञ इति त्रिभिः सूत्रैरात्मनेपदं विहितं श्रुदृशोर
पि समो गम्यृच्छीत्यत्र विहितं। तस्मिन्विषये पूर्ववत्सन इत्येव सिद्धमात्मनेपदं। ततोऽन्यत्रानेन विधीयते। स्मरतेः पुनरप्राप्त एव वि
धानं। धर्मं जिज्ञासते। गुरुं शुश्रूषते। नष्टं सुस्मूर्षते। नृपं दिदृक्षते। सन इति किं। जानाति। शृणोति। स्मरति। पश्यति॥ ॥ना
नोर्ज्ञः। पूर्वेण योगेन प्राप्तमात्मनेपदं प्रतिषिध्यते। अनुपूर्वाज्जानातेः सन्नन्तादात्मनेपदं न भवति। तथा च सति सकर्मकस्येदं
यं प्रतिषेधः संपद्यते। पुत्रमनुजिज्ञासति। अनोरिति किं। धर्मं जिज्ञासते॥ ॥

श्रुवः सूत्र एव निर्देशान्न दृश उपसंख्यानान॥ ॥नानोर्ज्ञः॥ पूर्वेणेति अनंतरसूत्रेणापत्माप्तं न प्रतिषिध्यते। कुत एतत् अनंतरस्य विधिर्वा भवति
प्रतिषेधो वेति। तथा चेति। अनंतरस्य प्रतिषेध इत्युक्तं एवं सति सकर्मकस्यैवायं प्रतिषेधः संपद्यते अनन्तरयोगस्य सकर्मकविषयत्वात् सकर्म
का च्चेति प्रागेव विहितत्वान्न तेनाकर्मकात्पूर्ववत्सन इत्यात्मनेपदं भवत्येव। औषधस्यानुजिज्ञासत इति। औषधेन प्रवर्तितुमिच्छतीत्यर्थः।

© Dharmartha Trust J&K. Digitized by eGangotri

प्रत्याङ्भ्यां श्रुवः॥ ॥उपसर्गग्रहणं चेदमिति परस्माद्दर्पिता देवदत्तं प्रतीतिलक्षणोऽसंभूते सति कर्मप्रवचनीयो नोपसर्गः॥ ॥शदेः शितः॥ ॥यद्यत्र श
देः प्रयोगः शितस्तत आत्मनेपदं भवतीत्येवं व्याधिकरणे नैतस्मिन्सति तत्र मित्रेः शितिविकरणे कृते परस्मैपदं स्यान्नि हि तन्निर्दिश्येत न हि निर्दिश्यमाने हि तिः वचन शतेनापि
शक्यते कर्तुमिति सामर्थ्याधिकरणाक्षेपेऽरोधदर्शनात् समानाधिकरणो पंचम्यन्तेति दर्शयन्नाह शादि+ पंचम्यन्त शित्सम्बन्धिप्रत्यये विकरणे सत्यनेन विधिना भवितव्यं॥ सा
र्वधातुकेऽपरतो विकरणो विधीयते ततश्च प्रागेवास्माद्विधेः सार्वधातुकं भवत्युपलक्षणत्वात् परस्मैपदं स्यादात्म+ र्मः शिदिति॥ कथं पुनः शादिः शिद्भवति विकरणो

प्रत्याङ्भ्यां श्रुवः॥ प्रति आङ् इत्येवं पूर्वाच्छृणोतेः सन्नन्तादात्मनेपदं न भवति॥ प्रतिशुश्रूषति॥ आशुश्रूषति॥ उपसर्गग्र
हणं चेदं तस्मादिह प्रतिषेधो न भवति॥ देवदत्तं प्रतिशुश्रूषते॥ ॥शदेः शितः॥ शद्ऌ शातने॥ परस्मैपदी॥ तस्मादात्मनेपदं विधी
यते॥ शदेर्यः शित् शिद्भावी शितो वा संबंधी तस्मादात्मनेपदं भवति॥ शीयते॥ शीयेते॥ शीयन्ते॥ शित इति किं॥ अशात्स्यत्॥ श
त्स्यति॥ शिशत्सति॥ ॥म्रियतेर्लुङ्लिङोश्च॥ मृङ् प्राणत्यागे॥ ङित्त्वादात्मनेपदेऽत्र सिद्ध एवेति नियमार्थमिदं वचनं॥
म्रियतेर्लुङ्लिङोः शितश्चात्मनेपदं भवति॥ अन्यत्र न भवति॥ अमृत॥ मृषीष्ट॥ शितः खल्वपि॥ म्रियते॥ म्रियेते॥ म्रिय
न्ते॥ नियमः किमर्थः॥ मरिष्यति॥ अमरिष्यत्॥ १९ ॥ ॥श्रीः॥ ॥छ छ॥ ॥ ॥

हि शकारेत्संज्ञो भवतीत्यत आह शिद्भावी तिशिद्भावी यस्मात् स तयोक्तः शिद्भावित्वात् उपचारेणशादिरेव शिदित्युक्तं इत्यर्थः॥ शितो वा संबंधीति शित इत्य
स्य षष्ठ्यन्ततां दर्शयति कश्च शादेः शितः संबंधी यस्तस्य प्रकृतिः प्रागेव चाशि उत्पत्तियोऽपत्तस्य कृतित्वमस्येव शीयत इति या प्रादिसूत्रेणाशीयादे
शः॥ ॥म्रियतेः॥ लुङ्लिङोरिति स्थानषष्ठी यं विषयसप्तमी वा॥ नियमार्थमिति परिनियमः॥ म्रियते ङि करणं किमर्थं यावता अप्राप्ते विधिरेवास्तु
रहमाहि म्रियतेति लुङि तास्यनुदात्तेति ङित् लक्षणः सार्वधातुकनिघातो यथा स्यात् निङ्घातोऽत्र हि चेति प्रतिषिद्धः॥ १९ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥पूर्ववत्सनः॥ ॥पूर्ववदितिितेन तुल्यमित्याेपिनात् तृतीयांताद्वतिः। नपंचम्यंतात् लक्षणाभावात्। यथा च ब्राह्मणेन तुल्यं वैश्य अधीत इत्युक्ते ब्राह्मणादिवैवै
श्य अधीत इतिपंचम्यर्थो गम्यते तथेहापि पूर्वस्मादिव सन्नंतात् आत्मनेपदमित्यर्थो लभ्यते तुल्यार्थैरिति हि न तृतीया। सर्वविभक्त्यर्थं मतं भाषयति। सनः पूर्वो यो धा
तुरितिएतेन सन इति पूर्वस्यावधिनिर्देशो न त्वात्मनेपदापेक्षया पञ्चमीति दर्शयति। एवं सन्नंतादात्मनेपदमिति न लभ्येत सूत्रे छन्नस्यावधिनिर्देशेनोप
श्लेषात् अत आह तद्वत्सन्नंतादित्यादीति अवधित्वेनापि तावत्सनः श्रुतत्वात् प्रत्यासत्तेस्तादेव विधिर्विज्ञापत इति भावः। अथैवं कस्मान्न विज्ञायते सन्नंता
दात्मनेपदं भवति पूर्ववदिति अथोतोन्वयः। तत्र कुतः पूर्ववदित्ययं स्यापां सन्निहितत्वात्सन एव पूर्ववदिति विज्ञायत इति एवं मन्यते एवं विज्ञायमाने अयमेव योगः पू
र्वस्याविधिः संभाव्येत यथा पूर्वत्रापि सिद्धमित्यत्रतत एव योगात् पूर्वत्रेति तत स्यामर्थः स्यात् अनुदात्तङित इत्यस्माद्यतः एवं येधातवो निर्दिष्टाः तेभ्यः सन्नंतेभ्यः
तद्वदेवात्मनेपदं भवतीति तत स्योत्तरो विधिः सन्नंतान्न स्यात् प्रजो न वन अनुपुस्पत इति तस्मात् सनः पूर्ववदित्येव अथोतो न्वयएष व्यस्तु इतियद्ययं कार्यनिर्देशः स्या

॥पूर्ववत्सनः। सनः पूर्वो यो धातुः आत्मनेपदी तद्वत्सन्नंतादात्मनेपदं भवति। येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते तेनै
व सन्नंतादपि भवति अनुदात्तङित आत्मनेपदं। आस्ते। शेते। सन्नंतादपि तदेव निमित्तं। आसिषते। शिशयिषते। नेर्विशः।
निविशते निविविक्षते। आङ उद्गमने। आक्रमते। आचिक्रंसते॥ ॥

त्कार्यनिर्देशो वा विज्ञायेत तदा सन्नंतात् प्रयोगांतरे दृष्टमित्येव निमित्तनिरपेक्षं कार्यं शास्त्रं वा निर्दिश्यमानमिहाप्यतिदिश्येत शिशयिषतिमुषतिरी
यते मित्रियत इत्यत्र दृष्टत्वादिति मम तयोर्दोषं दृष्ट्वा निमित्तातिदेशमाश्रित्याह येन निमित्तेनेति निमित्तस्य तुल्यत्वात्तद्द्वारकं यदात्मनेपदविधेः तुल्यत्वं
तदाश्रीयत इत्यर्थः। पूर्वमिति समुत्पन्नेः प्राक्प्रयोगांतर इत्यर्थः। पूर्वस्मादिति मुक्तः पाठः तथा च सन्नंतादपीति संगच्छते। यद्यपि प्रकृतिगतं ङित्वा
दिकं सन्नंते धातोर्वचनशतेनापि प्राप्यापि तु अङ्कार्कं शिशयिषते इति तथापि प्रकृतिगतमेव तत्सन्नाद्यव्यवधानेपि तदंतादात्मनेपदस्य निमित्तं भवति।
त्यतिदेशार्थीतावता च निमित्तातिदेशवाचोयुक्तिः आसिसिषत इति। इडिति इत्यजादेर्द्वितीयस्येति सिङ्भावस्य द्विर्वचनं। निविविक्षत इति हलंताच्चेति सि
तः कित्वे व्रश्चादिषत्वं षढोः कः सि आचिक्रंसत इति। आङ आत्मनेपदनिमित्तत्वात् स्नुक्रमोरिती इट् नैव भवति। निमित्तातिदेशाश्रयणस्य फलमाह॥

© Dharmartha Trust J&K. Digitized by eGangotri

रहेति। कारणमाह नहीति शिदाघपीति शिद्वा विलादिकमपीत्यर्थः आदिश्यदेन लुङ्लिङोर्ग्रहणं तच्चेह नास्तीति। कृञेम नितरं तमेव शिद्वाविन शदिम्रियती।
ऋशिषित इत्यादौ तु कृतेपि सनि तदानीमपि शिद्वा दिकं प्रकृतिगतं विघतइति भावः। यदि तर्हि निमित्तातिदेशः। अनुचिकीर्षतीत्यत्रापि प्रसंगः गंधनादे
र्थस्य जितस्य चच्चात्मनेपदनिमित्तस्य सत्यपि परस्मैपदे निवृत्तत्वात्। कार्यातिदेशे तु न दोषः अनुपराभ्यां कृञ इति परस्मैपदेनापवादेनात्मने
पदस्य बाधितत्वात् आह यस्य चेति न योग्यतामात्रेण निमित्तत्वं किं तर्हि कुर्वद्रूपस्येति कृञकर्माभिप्रायत्वविवक्षत इति भावः यदि कुर्वद्रूपं निमित्तं जुगुप्सत
इत्यादौ कथं न ह्यत्र प्रकृतिगतमनुदात्तेत्वं तत्रात्मनेपदं कदाचिदपि करोति नित्यसनंतत्वात् गुपादीनां अत आह इहेत्यादि नैवात्रानेनात्मनेपदं

इह न भवति। शिशत्सति। मुमूर्षति। न हि शदिम्रियतिमात्रमात्मनेपदनिमित्तं। किं तर्हि शिदाघपितं चेह नास्ति। यस्य
च पूर्वत्रैव निमित्तभावः प्रतिषिध्यते तस्मात् सन्नंतेप्यनिमित्तं अनुचिकीर्षति। पराचिकीर्षति। इह तु जुगुप्सते। मीमांसते इ
ति अनुदात्तेत इत्येव सिद्धमात्मनेपदं। अवयवे कृतं लिंगं समुदायस्यापि विशेषकं भवतीति ॥ २० ॥ ॥ ॥

किं तर्हि अनुदात्तेत इत्यनेनेत्यर्थः। कथं पुनः समुदायस्य जुगुप्सादेः अनुदात्तेत्वं अत आह अवयव इति। अवयवेऽचरितार्थं लिंगं सामर्थ्यात्समु
दायस्य विशेषकं भवति। यद्येवं गोपयतीत्यत्रापि स्यादवपि प्रसंगः अथ यं समुदायं चावयवो न व्यभिचरति तत्र कृतं लिंगं तस्य विशेषकं भवति णि
जंतं च व्यभिचरति विनापि तेन जुगुप्स इति गुपेः प्रयोगादिस्मुच्यते तदवयवं सन्नन्तादपि न स्यात् विनापि तेन गोपयतीत्यत्र गुपेः प्रयोगात् तद्व्यभिचारादिशे
षः अयमु च्यते गुपगोपुन इत्यस्य सद्विधौ ग्रहणं तस्माच्च नित्यं सन्नेच भवति नापरः प्रत्ययः गोपयति गोपायतीत्यादिकस्तु प्रयोगो गुपूरक्षण इत्यस्य
स्वान्यस्य च इयं चैतद्देवा वित्तयं अन्य एव सन्नर्कृतिः तस्मात्सन्नेव भवतीति अन्यथानिदाया अन्यत्र यथाणिजभवन्नित्यालड्डादिरपिस्यात् एवं तिं
जिप्रभृतयोपि क्षमायर्थे पत्रसेल्लिष्यते तत्रानुदात्तिनो नित्यसन्नन्ताः क्षमादिस्तोन्यत्र तु यत्र णिजिष्यते तत्रानन्तुबंधका एव चुरादौ पठितव्याः ॥ २० ॥

राम०
१२५

© Dharmartha Trust J&K. Digitized by eGangotri

आम्प्रत्ययवत् । न चामन्तस्य धातुत्वादिह समात्मनेपदं तत्कथं कृञो इति दिश्यते । स्यादियमनुपपत्तिः । यदि प्रत्ययग्रहणं क्रियेत कृतेऽपि वा तस्मिन् प्रत्ययग्रहणे कर्मधारयः तद्गुणसंविज्ञानो वा बहुव्रीहिराश्रीयेत । अयं त्वतद्गुणसंविज्ञानो बहुव्रीहिः । धातुरन्यपदार्थः । आम्प्रत्ययो यस्मादिति तद्गुणसंविज्ञानेऽवयवेन विग्रहः समुदायः समासार्थ इति । आम्प्रत्ययस्येवेति विग्रहः । स्थानप्रतियोगिनि षष्ठीनिर्देशात् न त्वत्र तत्स्येदेति षष्ठ्यन्तात् वतिः । आह आम्प्रत्ययस्येवेति कृञोऽनुप्रयोगस्येति समानाधिकरणे षष्ठ्यौ अनुप्रयोगशब्दः कर्मसाधनः । ईक्षांचक्र इति । ईक्ष दर्शने ईह चेष्टायाम् । लिट् इजादेश्चेत्याम् । आमः इति लेर्लुक् । अकर्त्रभिप्रायार्था

॥ आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य ॥ अकर्त्रभिप्रायार्थोऽयमारम्भः । आम् प्रत्ययो यस्मात् सोऽयमाम्प्रत्ययः । आम्प्रत्ययस्येव धातोः कृञोऽनुप्रयोगस्यात्मनेपदं भवति । ईक्षांचक्रे । ईहांचक्रे । यदि विध्यर्थमेतत् तर्हि उब्जांचकार उम्भांचकारेति कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्राप्नोति । नैष दोषः । उभयमनेन क्रियते । विधिर्नियमश्च । कथम् । पूर्ववदिति वर्तते । स द्वितीयो यत्नो भविष्यति । कृञ इति किम् । ईक्षामास । ईक्षांबभूव । कथं पुनरस्यानुप्रयोगो यावता कृञ्चानुप्रयुज्यते लिटीत्युच्यते ।

कृञ्त्रिनि ॥ ६७ ॥ ॥

यमारंभ इति चक्रुवता विध्यर्थं मैवेति दिस्युक्तं तत्र दोषमुद्भावयितुमाह यदीति । किं पुनः कारणं विध्यर्थत्वमङ्गीक्रियते । अनुपगते दोष उद्भाव्यते न पुनर्नियमार्थत्वमङ्गीकृते तदनुगुणो दोष उद्भाव्यते । सत्यं अकर्त्रभिप्राये विध्यर्थत्वमपि संभवति कृञो वाभित्वम । अपि च कर्त्रभिप्राये नियमार्थत्वमपि संभवति कृञो वाभित्वम । अपि च कर्त्रभिप्राये यश्च पाकं चक्र इति वृद्धीक्षांचकार इत्यादावपि मा भूत् आम्प्रत्ययवदेव कृञोऽनुप्रयोगस्यात्मनेपदमिति नियमार्थत्वमपि तत्र विधिनियमसंभवे विधिरेव ज्यायानिति तस्मादेवमुच्यते उब्जांचकारोम्भांचकार । उभयमित्यादि परिहारः । कथमिति । नैकेनैव यत्नेनोभयं लभ्यमिति भावः । ईक्षांबभूवेति भवतेः भुवो वुग्लुङ्लिटोः । कथं पुनरिति कृञ इत्यत्र स्वरूपग्रहणं मन्यमानस्य प्रश्नः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रत्याहारग्रहणमितिनियमितत्त्वेत्स्वरूपग्रहणं स्यात्। इह हृञ् ग्रहणमनर्थकं स्यात् अनभ्यासानुप्रयोगस्याभावादितिभावः॥ अत एव विपर्ययोपि न भवति तत्र स्वरूपग्रहणं स्यात् इह प्रत्याहारग्रहणमिति इह हि प्रत्याहारग्रहणोऽस्त्वस्यो एष्वात्मनेपदविधिप्रयोजनं यदि चानुप्रयोगविधिना कृञ् एकानुप्रयुक्तः स्यात् तदा च स्तेऽरनुप्रयोगाभावादात्मनेपदविधिरनुपपन्नः स्यात् तस्मादिह स्वरूपग्रहणे अनुप्रयोगविधौ प्रत्याहारस्येति निमित्तं अभिविधौ संपदस्त्वेति संपदो पि तत्रां न भवास्त्वनुप्रयोगः प्राप्तः सनाद्यन्ताधातवइत्यतो धात्वधिकारात् यस्मात् समुदायस्यैव भवति योत्र धातुस्तस्यापि न भवति अर्थविप्रतिषेधादिति नैवं स्याम॥ ॥प्रोपाभ्यां युजिर्यगइतियुज समाधावित्यस्य तु देवादिकस्यानुदात्तेत्वादेव सिद्धं युजेरितिच विवक्षितइकारोनत्वाणनुकः यज्ञयात्र विषयता चास्यैव संभवतीति भावः। प्रयुंक्ते इति रुधादित्वात् श्नम् श्नसोरल्लोपः कुत्वं वै। अनुस्वारपरसवर्णौ। स्वराद्यन्तोपसृष्टादिति। स्वरः अ इ आदिः

प्रत्याहारग्रहणं तत्र विज्ञायते। कसंनिविष्टानां प्रत्याहारः। अभूततद्भावेकृभ्वस्तियोगे संपद्यकर्त्तरिच्विरिति कृञ शब्दात्
रभ्य यावत्तकञोढ्गितीपतत्ती येति प्रकारः॥ ॥प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ युजिर्योगे स्वरितेत्। तस्य कर्त्रभिप्राये क्रियाफले सिद्ध
मेवात्मनेपदं। अकर्त्रभिप्रायार्थोयमारम्भः प्रउपइत्येवं पूर्वात् युजेरयज्ञपात्रप्रयोगविषयादात्मनेपदं भवति। प्रयुंक्ते। उप
युंक्ते। अयज्ञपात्रेष्विति किं द्वंद्वं न्यंचि पात्राणि प्रयुनक्ति। स्वराद्यन्तोपसृष्टादितिवक्तव्यं। उद्युंक्ते। नियुंक्ते॥ ॥समः क्ष्णुवः॥
क्ष्णु तेजने। परस्मैपदी। ततः संपूर्वादात्मनेपदं भवति। समोगम्यृच्छि इत्यत्रैव कस्मान्न पठितः। अकर्मकादिति तत्र वर्त्तते। संक्ष्णु
ते शस्त्रं। संक्ष्णुवते। संक्ष्णुवते॥ ॥२२॥ ॥

तोवाय समस्वराद्यन्तः तेनोपसर्गेण संबद्धः स्वराद्यन्तोपसृष्टः समनिस्दुस्
प्रपेतान्वर्ज्जयित्वा सर्वेप्युपसर्गास्संगृहीताः। समः। इह आर्धविसर्जनीयइत्यस्यावकाशः पत्रकुघोसंभवः। पुरुषः त्सरुकः कुष्ण्योः कष्योचेमस्य
उपत्वश्यपरीकूपूर्नभवतः पुरुषः करोतीति शर्परयोरुभयोः प्रसंगे पूर्वत्रासिद्धं नास्ति विप्रतिषेधो भाद्यत्वारस्योतिशर्परे विसर्जनीयइतिनित्यं विसर्ज
नीय एव भवतीति न समः क्ष्णुवइति सूत्रे विसर्ज्जनीयासेवयाद्यः। समोगमृच्छीत्यत्रैवेति एवं हि द्विः समोग्रहणं न कर्त्तव्यमिति भावः। सक्ष्णुतइति। अहादि
त्वान्नद्योल्लुक् आत्मनेपदे घनत्वाइतिरुः स्यादादेः अविष्णुधात्वित्यादिनोवङ्॥ ॥२१॥

© Dharmartha Trust J&K. Digitized by eGangotri

भुजोऽनवने ॥ ॥ अनवनप्रतिषेधेनेत्यादि संसर्गविद्धिप्रयोगोऽपि विशेषस्य निहेतुः । यथा द्रोणं धीयपयोधेनुः शब्दः संबन्धिभिः विशेषेव ख्याप्यते सवत्साधेनुरा
नीयतां न किंशोरासवर्क रेतिनथा अवत्सा अकिशोरा अवकीरिति यस्मान्नेयं द्वन्द्वः संसर्गः सैवत्सतरता आनीयते न हरिहारिणीसमर्थः ॥ ॥ णेरणौ ॥ अत्र णौ
ति यद्यपि सामान्यनिर्देशः तथापि पुच्छभाण्डचीवराण्णिङ् न ग्रहणे अणौ कर्म णेरणौ सम्भवात् कर्मेति णिङः स्त्यापादयश्च आङ्धातुके चेति वचनाद् णौ ताव
ख्यायां भवति कर्मणश्च कर्तृत्वं कमिष्यते योषितं देवदत्तः कामयिष्यते योषित्स्वयमेवेति तथापि णिङि त्वाद्देव सिद्धेः सोऽपि न गृह्यत इति णिचश्च ग्रहणं
मित्याह णिचश्चेति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदमिति अकर्त्रभिप्रायार्थ इति । उपलक्षणमेतत् कर्त्रभिप्रायेऽपि दीर्घत्वेन णिचोऽन्येन विभाषोपपदेन प्रती
यमानइति किंकल्पे बाधित्वा नित्योविधिर्यथा स्यादित्येवमिदं अत्रैकवाक्यताया अपमर्थो भवति । एषं तावदात्मनेपदं भवति अणौ यत्तावत्ख्यायां यत्कर्मकर्तृ
यदि स भवति आध्यानाद्यत्रेति तत्र कर्मणि तदनिवृत्तिर्न कृता स्यात् । ततश्चेहापि प्रसज्येत आरोहन्ति हस्तिनं हस्तिपकाः तानारोहयति हस्ती ति । किंच उक्तेऽर्थे

भुजोऽनवने । भुज पालनाभ्यवहारयोरिति रुधादौ पठ्यते तस्मादनवने वर्तमानादात्मनेपदं भवति । भुङ्क्ते । भुञ्जाते भुञ्जते । अनवन इ
ति किं । भुनक्त्येनमग्निराहितः अनवनप्रतिषेधेनैवौधादिकस्यैव ग्रहणं विज्ञायते । नतौदादिकस्य भुजकौटिल्य इत्यस्य । तेनेह न भ
वति । विभुजति पाणिं ॥ ॥ णेरणौ यत्कर्म णौ चेत्स कर्त्ताऽनाध्याने । णिचश्चेति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदं ।
अकर्त्रभिप्रायार्थोऽयमारम्भः । ण्यन्तादात्मनेपदं भवति । कथं । अणौ यत्कर्म णौ चेत्तदेव कर्म स एव कर्त्ता भवति ।

णेरणौ कर्मणीति तावदेव वाच्यं कर्त्तरीत्येव ण्यन्तादात्मनेपदं भवति अणौ कर्मणि कर्त्तरीत्युक्ते को नाम विवक्षितोऽर्थो न सिध्यति । सइत्येतत्त्वानर्थकं यत्र द्रोणिसंबंधादेवाध्याह
रणात् सिद्धेः तस्माद्यथाश्रुतमात्रं न विवक्षितमिति मत्वा पृच्छति कथमिति । इतरोऽपि णौ कामेदाश्रयणेन यद्यारोहन्ति अणौ यत्कर्म सा णिचि णेरात्मनेपदं भवति आध्याना
दन्यत्रेत्येकं वाक्यं । ततो णौ यत्कर्मेति द्वितीयं अत्र वाक्ये यत्तदोर्नित्यसंबन्धाद्यदेवेन तच्छब्द आक्षिप्यते वर्मैर्जात एषवानिर्देशात् उद्देशेनापि श्रुतं कर्मत्वमेव विधी
यते । न त्वविधीयमानं सामर्थ्यात्सोऽपि इति संनिहितत्वात् स यत्तावत्ख्यायामेव विधीयते । किं तत्सामर्थ्यात् अणौ यत्कर्म तद्वा तत्सामर्थ्यात् णौ कर्मत्वसिद्धेस्तत्रैव
तद्विधानस्यासंभवः तदेवं अणौ यत्कर्म तेनात्र णौ वा णौ यत्कर्म णौ चेत् तत्कर्मेति स्यात् भवति अनेन च कर्मान्तरनिवृत्तिः क्रियते न तु णौ कर्मणः णौ कर्मभा
वः प्रतिपाद्यते स कर्त्तेति वाक्यान्तरात् स कर्तृत्वप्रतिपादनात् एकस्य युगपदेकस्यां क्रियायां कर्मत्वकर्तृत्वयोरुभयोरसंभवात् । ततो णौ चेदिति तृतीयं वा
क्यं । अत्र णौ यदिति वअणौ यत्कर्मेति णौ चेत्तत्कर्मेति चेन्नतदेव प्रतिपाद्यमित्यर्थः । ततः सकर्त्तेति च तुर्थं अत्र णौ यत्कर्म णौ चेदिति सर्वमनुवर्त्तते ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अनाध्यान इत्येतदपि प्रसज्यप्रतिषेधे यं च मं गक्यं तत्र हस्तिकारणात्रीणि वाक्यानि स्वशाचादर्शितानि एषं तादात्म्येन एतं भवन्तीति केवलं वाक्यं अणौ यत्कर्मणौ चेद्भवति स
मानं क्रियार्थमिति तु वक्ष्यति अत स्तदपि वाक्यमभ्युपगतमेव। आरोहन्तीत्यादि अणौ कर्मप्रदर्शनार्थमिदमुक्तं इदं तदुदाहरणं आरोहयते हस्ती स्वयमेवेति।
आरुह्य पूर्वं हि हस्त्यवनेन प्रसज्जने न प्रयोगभागेनेव वर्तते मनवं तं हस्तिनं प्रसज्ञापयतीत्यर्थः यदा तु हस्तिनः सौकर्यातिशयप्रतिपादनाय हस्तिपकव्यापारो
न विवक्ष्यते तदा स्यप्रज्ञापनमात्रे तु हि र्वर्तते तत्र च हस्तिनः कर्तृत्वं उक्तं च निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितं। निवर्तमाने कर्मत्वे स्वकर्तृत्वे व्यतिष्ठत इति कर्म
स्थकर्तुः कर्मस्वक्रियेषु कर्मकार्याण्यतिदिश्यन्ते कर्मवत्कर्मणा तुल्यक्रिय इति न यथा लूयते केदारः स्वयमेवेति लुनातिर्हि द्विधाभवनीयसर्जने द्विधा
भावने हस्तः कर्तृव्यापारे विवक्षायां द्विधाभवनमात्रे वर्तते तु हि स्यकर्तृस्थक्रियत्वात् कर्मकार्याणि न लभत इत्येतावता। ततो ऽन्यत्र भवनहन्ते तु हि हस्ति
पकव्यापारे णिजुत्पद्यते तदावयवेवार्थः आरोहन्ति हस्तिनं हस्तिपका इति स एवार्थः आरोहयति हस्तिनं हस्तिपका इति पुनः सौकर्यातिशयविवक्षायां

अनाध्यानेत्वाध्यानं वर्जयित्वा। आरोहन्ति हस्तिनं हस्तिपकाः आरोहयते हस्ती स्वयमेव। उपसिंचन्ति हस्ति
नं हस्तिपकाः। उपसेचयते हस्ती स्वयमेव। पश्यन्ति भृत्या राजानं। दर्शयते राजा स्वयमेव॥ १२ ॥ ॥

अविवक्षिते हस्तिपकव्यापारे स्वप्रवनमात्रे रोहि र्वर्तते आरोहयते हस्ती स्वयमेवेति सुष्ठु न्यग्भवतीत्यर्थः। उक्तं च स्वप्रज्ञापनं स्वप्रवनं तु हौरुद्धे प्रतीयते न्य
ग्भावनं स्वप्रवनं एषं तेपि प्रतिपद्यते। अवस्थायां पञ्चमीमारूढायां ते ततो कर्मकर्तरि निवृत्तप्रेषणाद्धातोः प्राकृते ऽर्थे णिजुत्पद्यत इति एवं सिचं तेरप्याद्रीभवनोपस
र्जनमाद्रीभावनमर्थः ततो निवृत्तप्रेषणमिस्यादि सेववित्। सेचयते हस्ती स्वयमेवमेव नेत्यं तु प्रमुकलो भवतीत्यर्थः। एवं दृशिरपि कर्मव्यापारमात्रवृत्ति
र्णिच्युत्पत्तौ पुनः तत्रापरोपितव्यापारे उयीदमुदाहरणात् दर्शयते राजा स्वयमेव। दर्शने नुकूलो भवतीत्यर्थः। सोयं निवृत्तप्रेषणपक्ष उक्तो अपरः प्रकारः
आरोहन्ति हस्तिनं हस्तिपकाः तान् सौकर्यातिशयाद्धस्ती प्रयुंक्त इति हस्तिव्यापारे णिजुत्पद्यते आरोहयति हस्ती हस्तिपकानिति तत्र सौकर्यातिशयप्र
तिपादने तात्पर्यं इति कर्म न विवक्ष्यते ततो कर्मको भवति यथा नेहयाते नेह भुज्यत इति पाकमात्रप्रतिषेधे तात्पर्यमिति कर्मणो विवक्षायां भावे लो भवति
आरोहयते हस्ती स्वयमेव सुष्ठु न्यग्भवतीत्यर्थः। एष एव हि हस्तिनः प्रयोजकव्यापारः। एवमितरयोरपि द्रष्टव्यं। सो यमध्यारोपितप्रेषणपक्ष इति निगीयते
तदेवमुभयोरपि पक्षयोर्धात्वेव क्रियाणां तावस्थायां न च कर्मान्तरमस्तीत्यतोपि समस्वेनूदाहरणोपपत्तिः स्वयमिति वचनं कर्त्रन्तरव्युदासार्थं ॥ १२॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।णेरिति किमिति अणौ कर्म्मत्वानुरोधेन णौ कर्तृत्वविधानात्प्राधान्यात्स्वयंतादेव भविष्यतीति प्रश्नः। साधारोहतीति साधुत्वमग भवतीत्यर्थः अत्र कर्म्म आपारमात्रे तु हिर्वर्तते कर्तृ
स्थक्रियत्वात्तु कर्म्मवद्भावाभावात्पदात्मनेपदेन भवतः आत्मनेपदे भवतः अणौ यत्कर्म्म तस्यापि ताववछोयाप्यपि अणौ तोपि स्यादिति भावः ननु प्राधान्यात्स्वयंतादेव
भविष्यतीत्युक्तं। किंच अणौ यत्कर्म्म णौ चेत्स कर्तेत्स्य यमुपाधिर्यस्मिन्नेव प्रयोगे संभवति तत्रैवात्मनेपदं युक्तं साधारोहतीत्यत्र चानायं प्रकारः संभवति आरोहयते हस्ती
त्यत्र तु णिचः प्रकृतिभूते तु हावयर्णेत्रेयत्कर्म्म स एव चारणंनेकर्त्रेति तत्रैव भविष्यति सत्यं। न देवमुत रार्थमवश्यं णेरिति वक्तव्यं इहापि विस्पष्टार्थं भविष्यतीति मन्यते।
अणाविति किमिति। कर्म्मकर्तृत्वपौर्वापर्यासंभवान् णौ च कर्तृत्वस्य श्रुतत्वादेव स्कंत्वे णावेव कर्म्मत्वं विज्ञास्यत इति प्रश्नः। गणयतीति। गणसंख्याने चुरादावदं
तः पठ्यते अतो लोपस्य स्थानिवद्भावात् उपधावृद्ध्यभावः। गणयमानो गणो णयदा गणनक्रियाया मानुकूल्यं प्रतिपद्यते तदा तद्व्यापारमात्रप्रवृत्तेर्हेतुमण्णिचेपुनः क
र्म्मव्यापारमात्रे आरोपितस्यैवार्थप्रयोगः गणयति गणः स्वयमेवेति। अत्र णावेवाणौ कर्म्मणा चैव कर्त्रा इत्यात्मनेपदं न भवति कर्म्मवद्भावेनापि न भवति कर्तृस्थ
क्रियत्वात् गणनं हि संख्यानिमित्तः परिच्छेदो ज्ञानविशेषः। भाष्ये तु भागशो वस्थापनेन णिर्वर्तते भागशो वर्तिष्यमानं गणं गोपालको वस्थापयतीत्यर्थमंगीकृ

।णेरिति किं। आरोहंति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती साध्वारोहति। अणाविति। किं। गणयति गणं गोपालकः।
गणयति गणः स्वयमेव। अकर्मकग्रहणं किं। लुनाति दात्रेण। लावयति दात्रं स्वयमेव। णौ चेद्ग्रहणं समानक्रियार्थं। आरोहंति ह

यत्रानुकूल्यात् गणस्यैव कर्तृत्वविवक्षायामस्ति कर्म्मभावकत्वमिति कर्म्मवद्भावादात्मनेपदमुदाहृतं न तु चाणावकर्म्म॥ स्तिनं हस्तिपकाः॥
कादित्यत्र वक्ष्यति हेतुमण्णिचो णिषिरीति प्रतिषेधोपि प्राप्नोति तस्मै त्र्याप्य इति तत्वेत्तस्येदमपि अनुदाहरणं अयुक्तमेव। उच्यते। युक्तं तत्र हेतुमण्णिचो विधि
नि तत्र बुधादिसूत्रे णेरिति वर्तते बुध्यादिष्वेहेतुमण्णिज एव संभवति इह तु सामान्येन ग्रहणं विशेषत्वभावात् ननु चाणौ यत्कर्म्म सुवृत्ते तु रादौ चानित्यणपेनत्वा
केवलानां प्रयोगाभावात् अणौ कर्म्मणो भावात्। अत्रापि हेतुमण्णिच एव विधिः नेत्याह आधृषाद्वेति विभाषितणिचामपि केषांचित्संभवो भवेत् भाष्ये तु हेतुस्तचो
विधिरिति स्थितं। लावयतीति दात्रं स्वयमेवेति। करणस्यापि सौकर्यातिशयेन लवनेयत्तदानुकूल्यं तत्प्रतिपादनापलावकान्यतिप्रयोजककाल्पितवत्साध्यो
णिचा इह ण्यंतादात्मनेपदं भवति अणौ यत्कर्म्म णौ चेत्स कर्तेति सुकर्म्मण्यतएव तत्र यस्माण्ण्यंतात्तद्विधिः। तत्रैवाणौ यत्कर्म्म णौ चेत्कर्त्रेति अतो णौ चेद्ग्रहणमनर्थकं त
त्राह णौ चेद्ग्रहणं समानक्रियार्थमिति प्रयोज्यप्रयोजकभावलक्षणे विक्रियाभेदे मा भूत् णौ च प्रकृत्यर्थभूतायामेकक्रियायां यथा स्यादित्यर्थः यथा पुनरयं त्र
त्वार्थस्तथोक्तं पुरस्तात्।। ।।६७।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

आरोहयमाणो हस्ती भीतान्सेचयति मूत्रेणेति येन प्रयोज्यप्रयोजकभावलक्षणोऽपि क्रियाभेदे आत्मनेपदं वार्यते वार्य्यतएवानेन धातुभेदात्स्कंधभेद इति मत्वेतत्र
सुदाहृतं भीतांस्तत्रारोहयतेः कर्म्मनसेचयतेः आरोहयमाण इति णिचश्चेत्यात्मनेपदं स्यान च भीतानारोहयमाणभाराममत्रयंतितेन हस्ती सिञ्चते कर्म्मक
र्म्माविवक्षायां तु सेचयते रकर्मकत्वं उदेशप्रतिनिर्देशात्तल्लक्षेपत्तस्य ग्रहे पुनः तद्ग्रहो वाक्यभेदेन कर्म्मान्तरनिवृत्त्यर्थे इत्याह यत्तस्य ग्रहणमनन्यकर्म्मार्थमिति।
स्थलमारोहयति मनुष्यानिति अत्र कर्म्मान्तरमप्यस्ति मनुष्याः इहेत्यर्थस्तान्मनुष्यान्स्थलं कर्म्म सत्यां कथं पुनरत्राणौ कर्म्मणो णौ कर्तृत्वं यावता स्थल
मणौ कर्म्म हस्ती पुणौ कर्त्ता स्यादेतत् आरोहयमाण इत्यत्राणौ कर्म्मणो हस्तिन एव कर्तृत्वं स एव च स्थलमारोहयतीति अत्रापि कर्त्तेति। एवमपि
मत्वा मन्त्रिवात्र न भविष्यति तथा हि एवं तारात्मनेपदं भवति अणौ यत्कर्म्मणौ चेत् स कर्त्ता सुक्ते प्रत्यासन्नेरेतद्गम्यते येन णिचाराणं तदात्मनेपदं

आरोहयमाणो हस्ती भीतान्सेचयति मूत्रेणाय यत्तस्य ग्रहणमनन्यकर्म्मार्थं। आरोहंति हस्तिनं हस्तिपकाः।
आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान्। कर्त्तेति किं। आरोहंति हस्तिनं हस्तिपकाः तानारोहयति
महामात्रः ॥ २३ ॥ ॥

विषयान्तितं ते नैव णिवा गणयं तेतत् प्रवृत्तिमूते धातौ परस्मैपदस एव वेल्कर्त्तात स्मिन्नेव णे तद्इति अत्र च यत्रायमुपाधिः कृतमेवतत्रात्मनेपदं आरोहयमाण इतीयत्रनुन
क्तं स्थलमारोहयतीति न तत्रायमुपाधिरिति नैवात्मनेपदप्रसंगः। इह तर्हि आरोहंति हस्तिनं हस्तिपकाः तानारोहयति हस्तीति किं पुनरत्र नेष्यते। हस्तिकृतनिष्पन्नेभा
गाहस्तिकारेणात्विष्यते। तथा माघः प्रयुंक्ते करेणुरारोहयते निषादिनं इति। कर्त्तेति किं सिति भावकर्म्मणोः सिद्धत्वात्कर्त्तर्येव भविष्यतीति मन्यते अणौ यत्कर्म्म तस्मिन्ने
वकर्त्तरि यथा स्यात्कर्त्तरि मा भूदिति वेमर्थकर्तृग्रहणमिति दर्शयन्नाह तानारोहयति महामात्र इति गत्यर्थत्वादुहे हस्तिपकानां कर्म्मसंभा। यद्येवं कर्म्मान्तरसंभवा
देवात्र न भविष्यति नैतदेवं अस्ति सत्राणौ कर्म्मणो हस्तिनो णावपि कर्म्मत्वेनान्वयः। न चासतिकर्तृत्वविशेषो कर्म्मान्तरमाहर्त्तिर्लम्पते। यद्वा प्रयोजकव्यापारमात्रेना
त्यर्थ विगाहस्तिपकाः कर्म्मत्वेनाविवक्षितास्तदेदं प्रत्युदाहरणं द्रष्टव्यं॥ ॥२३॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

वनगुल्मस्येति कर्मोपलक्षणमेतत् न त्वत्र वनगुल्मस्य कर्मत्वमविशेषत्वेन विवक्षितत्वात् तस्माद्वनगुल्ममिति प्रदर्शनीयं । स्मरयत्येनमिति स्म आध्याने घटादिः वनगुल्म
स्य मणीपलप्रतिपादनाय प्रयोजकत्वे विवक्षिते णिच् एनमिति बुध्यर्थत्वात् कोकिलस्य कर्मसंज्ञा एतदप्युपलक्षणं अत्र हि कर्मान्तरसद्भावादेव प्राप्तिर्नास्ति कर्मणि विवक्षा
यां प्रत्युदाहरणं दृष्टमं न तु चात्र कर्मकर्त्तरि मलोदाहरणानीति ननु कोऽध्यारोपितप्रेषणपक्षे आरोहयतो हस्तिनः कर्मत्वाभावात्कर्मणा समानधातौ तुल्यक्रियत्वाभा
वात्प्रयत्स्योदनं देवदत्तोऽध्यापसोदनं स्वयमेवेति यत्कर्मवद्भावो न प्राप्नोतीत्यस्तं आरब्ध एवास्मिन् सूत्रे सोऽपि पक्षः संभवात्प्रदर्शितः अनारब्धे तु निवृत्तप्रेषणाय कर्म
क्रिये वाप्यपि अतेननु तत्रापि आपाद्यमानापिधापि शुरुहादि भवत्येवं ये तु केवलकर्तृव्यापारवाचिनो दृश्यादयः तेषु कथं न हि दृशिः कर्मव्यापारं कंचिदाचष्टे स्यादेतत्
विषयभावापत्तिः कर्मव्यापारः तदापादनं कर्तृव्यापार इति यद्येवं दृष्ट्यापि दृश्यार्थः स्यात् तत्रापि विषयभावापत्तिः तदापादनं चैव विद्यते अथ दर्शनविषयभावापादनं

।।अनाध्यान इति किं । स्मरति वनगुल्मस्य कोकिलः । स्मरयत्येनं वनगुल्मः स्वयमेव । न तु चात्र कर्मकर्त्तरि मलोदाहरणानि । अत्र
कर्मवद्भावेनैव सिद्धमात्मनेपदं । किमर्थमिदमुच्यते । कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवदिति देशो विज्ञायते । कर्तृस्था
र्थोयमारंभः । तथा रुहिः कर्तृस्थक्रियः दृशिः कर्तृस्थभावक उदाहृतः ।। ।।२४।। ।।७ ७।। ।।

दृश्यर्थः ननु तदेव निरूप्यते किं नाम तद्दर्शनं इति अत्रोच्यते मानामात्मन कर्मव्यापारं अस्ति तावत्कर्मणोऽपि व्यापारः कारकत्वात् न शोणिजुषमित्रदृश्यायां तावत्तेवव
निष्पत्ते उदाहरणाद्दर्शनायां यतो पीति मन्यते न यावत् तु हि कर्मस्य क्रिय इति युक्तं केवलकर्तृव्यापारवाचिनामिह स्निप्रभृतीनां कर्तृस्थक्रियत्वं कथं तु विक्लिद्यु
पसर्जनार्विक्लेदवचनः पचिः छिदापवनोपसर्जन छिद्याभावनवचनश्च लुनातिः कर्मस्थक्रियः स्यन्न वनोपसर्जनन्यग्भाववचनस्तु रुहिः कर्तृस्थक्रि
यः उच्यते तु हि शिणिमर्थः तथा च यद्वितुपरं छंदसीत्यत्र भाष्यकारो वक्ष्यति हस्तिनमारोहतीत्यत्र हि उपरिगमनलक्षण एव रुहेरर्थः तस्तुनवबनमनेहेतु
त्वात् न्यग्भावनमित्युच्यते उपरि गमनाक्षिप्तं तु न्यग्भावनमात्रं तु रुहेरर्थो न भवति यदा खलु कश्चिद्भूमावेवनिष्पन्न वृक्षस्य शाखामग्रां हस्ताभ्यामवनमयति तदा
नासावारोहतीत्युच्यते तस्मादुपरिगमनविशेष एव रुहेरर्थः कस्मात् हि क्रियाणां कर्मकर्तृस्थतायां हेतुः उक्तमत्र ।। ।।७ ७।। ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता । क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता इति विशेषदर्शनेन शब्दानुसारेण क्रियायास्तास्य कथ्यते । एतच्च कारणाद्
यमारोहणस्य कर्तृत्वस्य सतां प्रतिपाद्यते न तु कर्मस्थतां न हि हस्तिनमारोहति पर्वतमारोहतीत्यादौ कर्मभेदेऽप्यारोहणो रूपभेदः प्रतीयते यथा घटं पश्यति तण्डुलादि वृष
केन च हस्तीमयं बालिशे एवं कारकव्यापारः किं तर्हि हस्तिपकाद्युपर्यासीरेनितिया के तु तेन तु लाङ्गितो शिलिङ्गितादि रूपो विशेषो यथा स्यात् इत्येव कारकव्यापारः तस्मा
त्कर्मभेदेन रूपभेदाद्द्वैरूप्यस्य कर्मगतत्वात्पचिः कर्मस्थक्रियः विपर्ययात्तु हिः कर्तृस्थक्रिय इति सिद्धं । एवं चारुह्यवंचारुह्यते हस्ती स्वयमेवेति कर्मवद्भावप्रद
र्शितो भाष्यमाय विरोधात्तु पेक्षाः दृशिः । कर्तृस्थभावक इति । अथ शिचिः कस्मादुपेक्षितः कर्मस्थक्रियत्वात् आङ्भिर्वनं ह्यत्र प्रधानं तदर्थत्वात्कारकव्यापा
रस्य किमर्थं तर्हि दाहृतः विशेषाभावात् न सत्राने न कर्मवद्भावः कर्मणोस्यते न वा आत्मनेपदे सति कश्चिद्दोषः तेनापि सनियह्रिणो न भवतः शोस्त्रेथि इति प्रति
षेधात् भाष्येपि कर्मवद्भावासिद्धिं ताशंकाध्यानप्रतिषेधार्थमित्युक्तास्मरतेः कर्तृस्थभावकत्वात्कर्मवद्भावस्याप्राप्ति र्नास्ति तमभिधायोक्तं एवं तर्हि सिद्धे सति
यदाध्यानप्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भवत्येवंजातीयकानामात्मनेपदमिति किमेतस्य ज्ञापने प्रयोजनं पश्यति भृत्याशनाभ्रदर्शयते भृत्या नरा
जा स्वयमेवच्च आत्मनेपदं सिद्धं भवतीति एवंजातीयकानामिति कर्तृस्थक्रियाणामित्यर्थः एवं च बुद्ध्वातिविधर्थमेतदित्युक्तं भवति विशेषप्रतिषेधेन सा
मान्यविधेरनुमानात् । अत्र दर्शयते ग्रहणं न एजेर्येतदेकमुदाहरणमनुपपन्नं कर्मणा तद्भावात् । तत्र हक्तिकारस्तत्रदेकं कुलस्यार्थ इति भाष्यात् उदा
हरणमेतदुपपन्नमित्यन्यते अस्मिंस्तु दाहरणे कर्मव्यापारमात्रे विवक्षिते सिद्धं भवतीत्यर्थः । अन्ये त्वाहुः अस्मादेवोदाहरणाद्गणे एकर्तृकर्मणोरित
च्यतिरिक्तकर्मणा सद्भाव एवात्मनेपदं न भवति यथारूढलमारोहयति मनुष्यानिति रेहलासोकहरणाभृत्यानशोकमर्तवमिति एवं च स्मरयत्येनमि
ति कोकिलस्य कर्मत्वेप्यस्तुदाहरणमुपपन्नं करोणस्यारोहयन्ते निषादिनमिति प्रयोगाश्चोपपन्न इति तेषां सूत्राक्षराण्येव तावदधिकानि भाष्यं च स
र्वमुदाहरणवर्जमनुपपन्नं प्रयोगाणां तु निर्वाहो णिचश्चेत्यात्मनेपदे जपादित्वं समरूपं ग्रन्थमेतत्प्रकाशितं ॥ ॥ २४ ॥ ॥ छ ॥ ॥

॥ ॥ छ छ ॥ ॥ छ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

भीस्म्योः॥ ॥भयमनिश्चयात्तशंकासाधनमात्रं लौकिको हेतुः॥ नवांतरेणसाधनं क्रियासंभवतीति विशेषणसामर्थ्यात्कृत्रिमत्वाच्च पारिभाषिकस्य हेतोर्ग्र
हणमित्याह हेतुः प्रयोजक इत्यादि ततश्चेद्रूपं भवतीति यद्येवं स्मयतेरर्थो न विशेषितः स्यान्न हि स्मयतेर्भयमर्थः अत आह भयग्रहणमिति चित्तविकारस्योपलक्ष
णमित्यर्थः। विस्मयोपि तत एवेति अत्र चेद्भवतीत्यनुषंगः। भीषयत इति भियो हेतुभये षुक् भापयत इति बिभेतेर्हेतुभय इति वैकल्पिकमात्वं एवं चेत्र अत्र षुक्

॥भीस्म्योर्हेतुभये॥ रोरिति वर्त्तते। अकर्त्रभिप्रायार्थोयमारंभः। बिभेतेः स्मयतेश्च ण्यंतादात्मनेपदं भवति। हेतुभ
ये। हेतुः प्रयोजकः कर्तृलकारवाच्यः। ततश्चेद्रूपं भवति। भयग्रहणमुपलक्षणार्थं विस्मयोपि तत एव। मुंडो भीष
यते। जटिलो भीषयते। मुंडो भापयते। ज० यते। जटिलो विस्मापयते। मुंडो विस्मापयते। हेतुभय इति किं। कुंचिकयैनं भा
पयति। रूपेण विस्मापयति॥ ॥गृधिवंच्योः प्रलंभने॥ रोरिति वर्त्तते। अकर्त्रभिप्रायार्थोयमारंभः। गृधु अभिकांक्षा
यां। वंचु गतौ। विसेतयोर्ण्यंतयोः प्रलंभने वर्त्तमानयोः आत्मनेपदं भवति। प्रलंभनं विसंवादनं मिथ्याफलाख्यानं।
माणवकं गर्धयते। माणवकं वंचयते। प्रलंभन इति किं। श्वानं गर्धयति। गर्धनमस्योत्पादयतीत्यर्थः। अहिं वंचय
ति। परिहरतीत्यर्थः॥ ॥-७१॥ ॥

न भवति तद्द्विधा विकार प्रश्लेषात्। विस्मापयत इति नित्यं स्मयते रित्यात्वं अन्त्रिद्धी ल्यादिना पुक्। कुंचिकयेति करणात्तत्र भयं न हेतोः। यद्यपि तद्व्यापारेण
द्विधानात् प्रयोजकसाध्यमेव भयं तथापि विशेषणोपादानसामर्थ्यादेवं विज्ञायते अन्यनिरपेक्षाद्धेतोरेव यदिति एवं रूपेणैव भापयतीति अत्रापि गुण
गुणिनोर्भेदविवक्षायां भवति उदाहरणे तु तादात्म्यस्य विवक्षितत्वाद्धेतोरेव भयं ॥गृधिवंच्योः॥ परिहरतीत्यर्थ इति वर्जयतीति यावत्॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पृ॰ १३

१३०

लियः संमानन नाविशेषाभावादितिनिरनुबंधकपरिभाषानुवामदेवाद्यड्याविति तत्र ज्ञापितं प्रत्ययग्रहणविषये चेति मन्मतो संमानने शालीनीकरणे च वर्तमानादिति संमाननं विषयोन धात्वर्थः पराहस्ज्ञामधिगच्छतीत्यर्थ इति धात्वर्थे तु पूजयतीतिवाच्यं स्यात् यथान्यत्कुरोतीत्यर्थ इति अकर्मकश्चायम् मिन प्रयोगे ह्नुज्ञामस्यकर्मण आत्मनेपदसहितेन धातुनेवोपात्तत्वात् पुत्री पतिं चादिलाड् ज राभिरितिहे तौ न तीयाय एहि जयः संतिलोकेमस्य

लियः संमानन शालीनीकरणयोश्च। णेरिति वर्तते। अकर्त्रभिप्रायार्थोयमारंभः। लीङ् श्लेषणे इति दिवादौ पठ्यते। लीश्लेषणे इति च क्र्यादौ। विशेषाभावात् द्वयोरपि ग्रहणं। लियो ण्यंतात्संमानने शालीनीकरणे च वर्तमानादात्मनेपदं भवति। जटाभिरालंभने च। संमाननं पूजनं। शालीनीकरणं न्यग्भावनं। जटाभिरालापयते। पूजां समधिगच्छतीत्यर्थः। श्येनो वर्तिकामुल्लापयते। न्यक्करोतीत्यर्थः। प्रलंभने। कस्त्वामुल्लापयते। विस्मापयतीत्यर्थः। विभाषा लीयते। रितिणावा च विधीयते। तस्मिन्विषये नित्यमत्र विकल्पः व्यवस्थितविभाषा हि॥ संमाननादिष्विति किं। बालकमुल्लापयति॥ ॥मिथ्योपपदा त्कृञोभ्यासे॥ णेरिति वर्तते। अकर्त्रभिप्रायार्थोयमारंभः। ण्यंतात् करोतेः मिथ्योपपदादात्मनेपदं भवति अभ्यासे। अभ्यासः पुनः पुनः करणमावृत्तिः। पदं मिथ्याकारयते। सापचारं स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदादिति किं। पदं सुष्ठु कारयति। कृञ इति किं। पदं मिथ्या वाचयति। अभ्यास इति किं। पदं मिथ्याकारयति। सकृदुच्चारयति॥ २५॥

ते॥ ॥मिथ्योपपदात्॥ ॥उपोच्चारितं पदमुपपदं मिथ्याशब्द उपपदं यस्य स तथोक्तः। मिथ्याकारयत इति। आत्मनेपदेनैवाभ्यासस्य द्योतितत्वा न्नित्यवीप्सयोरिति द्विर्वचनं न भवतीति सदोषमिति। एतेन मिथ्याशब्दस्यार्थमाचष्टे अस्यैव विवरणं स्वरादिदुष्टमिति आदिशब्देन वर्णग्रहणं तते। असकृदिति अभ्या संदर्शयति। उच्चारयतीत्यर्थः। इति ण्यंतस्य करोतेरुच्चारणे वृत्तिः अनेकार्थत्वाद्धातूनां स्वं च प्रकृतिभूतः करोतिरुच्चारणे वर्तते अकर्मकश्च॥ ॥२५॥ ॥

श्रम॰

१३०

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥स्वरितञितः॥ ॥कर्त्तारमभिप्रैतीति कर्त्रभिप्रायं कर्म्मी राज्ञा। क्रियाफलं चेह कर्म्मे विवक्षितं नास्ति नियमः तेनाकर्म्मकेभ्योपि यजिप्रभृतिभ्यः स्वर्गादिके फ
ले कर्तृगामिन्ययं विधिर्भवत्येव। कर्त्तारं चेदिति क्रियाफलस्य कर्तृगामित्वद्योतनायात्मनेपदं भवतीत्यर्थः। यदि यच्चयावच्च क्रियानंतरभावि फलं तत्र कर्तृगामि
त्वमयं विधिर्भवति इहापि स्यात् यजंति याजकाः पचंति पाचका इति दक्षिणादेः कर्तृगामित्वादित्यत प्रधानभूतमिति किं पुनस्तदित्यत आह यदर्थमिति यदु
दिश्येत्यर्थः। क्रिया आरभ्यत इति सामग्री समवधानात्मिका आद्यप्रवृत्तिरारंभः या मंतरेण यान्तकालेनामप्रवृत्तिः स्वर्गादिके हि फलं प्रेप्सुः सामग्रीसमवधी
यमवर्त्तयति। प्रवर्त्तिताः यथायथं प्रवर्त्तन्ते कथं पुनरेतल्लभ्यते प्रधाने फले कर्त्रभिप्राय इति प्रधानत्वादेव किंच किंचन फले सर्वत्र कर्त्रभिप्रायं भवतीननुय

॥स्वरितञितः। कर्त्रभिप्राये क्रियाफले। णेरिति निवृत्तं। शेषात्कर्तरि परस्मैपदं प्राप्ते स्वरितेतो ये धातवो ञितश्च तेभ्य आत्म
नेपदं भवति। कर्त्तारं चेत्क्रियाफलमभिप्रैति क्रियायाः फलं क्रियाफलं प्रधानभूतं यदर्थमसौ क्रिया आरभ्यते तत्त्वे त्कर्तुर्ल
कारवाच्यस्मभवति। यजते। पचते। ञितः खल्वपि। सुनुते। कुरुते। स्वर्गादिप्रधानफलमिह कर्त्तारमभिप्रैति। कर्त्रभिप्राय
इति किं। यजंति याजकाः। पचंति पाचकाः। कुर्वंति कर्म्मकराः। यद्यपि दक्षिणालाभः ऋत्विजां कर्तुः फलमिहास्ति। तथापि न तदर्थः क्रि
यारंभः॥ ॥अपाद्वदः॥ कर्त्रभिप्राये क्रिया इति वर्त्तते। अपपूर्वाद्वदतेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। धनका
मो न्याय्यमपवदते। न्यायापवादेन धनमर्जयिष्यामि इति मन्यते। कर्त्रभिप्राये क्रियाफल इत्येव। अपवदति॥ ॥

तु क्रियाभ्यासमात्रे तात्पर्यं तत्र न किंचित्फलं कर्तृगामि तत्रापि किंचित्फलं कर्तृगामि। क्रियाकौशलं पुनरभ्यासे हि क्रियासु कौशलं भवति तस्मात्प्रधाने फले
कर्त्रभिप्राय इति सिद्धं। यजतभृतौ केचिदाहुः देवतायै इदं न मम मे सेवं विधो मानतः संकल्पेण ग इति तेषां यजंति याजका इति ऋत्विग्व्यापारे प्रयोगो नोपप
न्नः एवं तर्ह्युभयं यजेरर्थः। ऋत्विग्व्यापारश्च यजमानव्यापारश्च तत्र दुःखं पजादिषु चाविपर्यासो न्याय्या नाक्रिया राणां पक्षपर्यायत्वादिति। न तदर्थः क्रियारंभ इति न
नु ऋत्विजां पारिभाषण तदर्थ एव नेन देवं आद्यप्रवृत्तिरारंभः। उक्तं स्वाच्च यजमानस्य स्वर्गमहं लभेयेति न तु ऋत्विजां लाभमेदं नित्य यावद्यामेदं नि
निर यावद्याते क्रियमाणो वेदश्च भवति वै तु ऋत्विजां च भवति भृतिश्च लभ्यते अथ व वेतुर्थ्येष्टी एवावद्यातः तद्वदत्रापि। तदुक्तं हरिणा यस्यार्थस्य प्रसिद्ध्य
र्थमारभ्यंते पचादयः। तत्प्रधानं फलं तेषां न लाभादि प्रयोजनं इति॥

© Dharmartha Trust J&K. Digitized by eGangotri

इह स्वामिनेऽसोऽपचत इति क्रियामात्रविवक्षायां परस्मैपदं भवति स्वामिगते तु धर्म्मेऽस्य आरोपिते स्वामिनेऽसौ पचते इत्यात्मनेपदं भवति अथातिप्रग्रहणं किमर्थमिति प्र
स्वेऽपि फलेयथा स्यात् द्विविधं क्रियाफलं दृष्टमदृष्टं च पुत्रवृष्टिशत्रुवधादिकं अदृष्टं च स्वर्गादि तत्र सर्वप्राणामनन्तमवश्यं भावीति प्रधानं इतरत्तु विप्रत्ययो यानिपाते सति
अभिचारसंभवाद्विप्रकृष्टत्वाच्चाप्रधानं संभवति तत्र किल मनुष्ठितयागस्य पि मध्ये वैरागणेऽस्मै सत्यां अनुत्पत्तिः स्वर्गास्य तत्र स्येग्रहणं तस्मान्न अभिप्रग्रहणे
तु सति अभिपरोक्षिमुख्यमेव वर्त्ततेऽप्रशब्दस्तासं भवतिकं जीरिप्रत्याभिमुख्येन क्रियाफलं वेत्येतिए तु आरभते एवमात्मनेपदं भवतीत्यर्थो भवति । तथा च यद्यपि स्वर्गा
दिकं स्वरूपेणात्रादृष्टं तत्सदृशं तेनेति तिरस्य त्वंकुरावस्थाकर्त्तारमेति तिन द्वारेण फलमेवैतु मारभत इति सर्वजसिध्यति । फलस्येव यदंकुरावस्था पूर्वशब्दवाच्या

णिचश्च ॥ कर्त्रभिप्राये क्रियाफल इति वर्त्तते । णिजन्तादात्मनेपदं भवति कर्त्रभिप्राये क्रियाफले । कटं कारयते । ओदनं पाचयते ।
कर्त्रभिप्राय इत्येव । कटं कारयति परस्य ॥ ॥ समुदाङ्भ्यो यमोऽग्रन्थे ॥ ॥ कर्त्रभिप्राय इति वर्त्तते । सं । उत् । आङ् । इत्येवं पूर्वाद्यमेः
कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति ग्रन्थविषयश्चेत्प्रयोगो न भवति । व्रीहीन् संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । आ
ङ्पूर्वादकर्मकाद्दाणोयम इत्यस्ति सिद्धमेवात्मनेपदं । सकर्मकार्थमिदं पुनर्ग्रहणं । अग्रन्थ इति किं । उद्यच्छति चिकित्सां वैद्यः । कर्त्रभि
प्राय इत्येव । संयच्छति । उद्यच्छति । आयच्छति ॥ ॥ अनुपसर्गाज्ज्ञः ॥ कर्त्रभिप्राय इति वर्त्तते । अनुपसर्गाज्जानातेः कर्त्रभिप्राये क्रियाफ
ले आत्मनेपदं भवति । गां जानीते । अश्वं जानीते । अनुपसर्गादिति किं । स्वर्गं लोकं न प्रतिजानाति मूढः । कर्त्रभिप्राय इत्येव । देवदत्तस्य गां

॥ ॥ णिचश्च ॥ ॥ अत्र कश्चिदाह इदमात्मनेपदं चुरादिणिचो न भवति कुतः ज्ञापकात् किं ज्ञापकं लक्ष्यते स्वरितेत्त्वमिति नात्रास्माभाषितमस्तिपारायणे
णेऽपि चुरादिणिच आत्मनेपदमुदाहृतं एष विधिर्न चुरादिणिजन्तात् स्यादिति कश्चन निश्चिनुते स्म आप्तवचोऽत्र न किंचन दृष्टं लक्ष्यते स्वरितेत्त्वमनार्षं ॥ ॥
समुदाङः ॥ ॥ उद्यच्छति चिकित्सामित्यत्राधिगमरूपं केऽद्यमेयमिर्वर्त्तते चिकित्साशास्त्रमधिगन्तुमुद्यमं करोतीत्यर्थः ॥ ॥ अनुप ॥ ॥ अनुप ॥ ॥ स
कर्म्मकार्थमिदं अन्यच्च कर्म्मकोऽचेति सिद्धत्वात् तदाहर्गां जानीत इति स्वर्गं लोकं न प्रतिजानातीति प्रसंति भ्यामनाध्यान इत्यतेनायिन भवति आध्यानविष
यत्वात् प्रजानातीति वा पाठः ॥ २६ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥विभाषा॥ अप्राप्तविभाषेयमित्याह तदुपपदेनेति। अत्र च स्वरितञितः इत्यस्यां पञ्चसूत्र्यामनुवर्त्तते समीपे अपमाणमिति निगादिभ्यः। स्वां गां जानीते जानातीति वा॥
॥शेषात्कर्त्तरि॥ आत्मनेपदनियमः कृत इति प्रकृत्याश्रयोपर्यश्रयश्च अनुदात्तङित इत्यात्मनेपदं भावकर्मणोरेवेति सर्वं तद्धितिसर्वाभ्यः प्रकृतिभ्यः सर्वेषु वाच्येषु वि
स्पर्धः तदर्थमितिपर्वतः प्राप्तिनिहत्यर्थमित्यर्थः। येन विशेषणेनेति। अनुबन्धादिना। यानि वानीत्यनुबन्धशेषः। गन्धनादेरस्यत्र करोतीत्यादिरर्थशेषः। गन्धनादिवि
शिष्टो हि कृञादिः शेषग्रहणेन पञ्चम्यन्तेन निवर्त्यमानेन गृहीतविशेषणान्यायेन विशेषणं गन्धनाद्यपि व्यावर्त्तयति शेषादेव नान्यस्मादिति। उपलक्षणमेतत् कर्त्रभिप्रा

॥विभाषोपपदेन प्रतीयमाने॥ स्वरितञित इति पञ्चभिः सूत्रैः आत्मनेपदं कर्त्रभिप्राये क्रियाफले द्योतिते विहितं तदुपपदेन द्योति
तेन प्राप्नोतीति वचनमारभ्यते। समीपोच्चारितं पदमुपपदं। तेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले विभाषा आत्मनेपदं भवति।
स्वं यज्ञं यजति। स्वं यज्ञं यजते। स्वं कटं करोति। स्वं कटं कुरुते। स्वं पुत्रमपवदति। स्वं पुत्रमपवदते। एवं पञ्चसूत्र्यामुदाहार्यं॥ ॥शेषात्क
र्त्तरि परस्मैपदं॥ पूर्वेण प्रकरणेनात्मनेपदनियमः कृतः न परस्मैपदनियमः। तत्सर्वतः प्राप्नोतीति तदर्थमिदमुच्यते। येभ्यो धातुभ्यो ये
न विशेषणेनात्मनेपदमुक्तं ततोऽपदन्यत्स शेषः शेषात्कर्त्तरि परस्मैपदं भवति। शेषादेव नान्यस्मात्। अनुदात्तङित आत्मनेपदं
उक्तं। आस्ते। शेते। ततोऽन्यत्र परस्मैपदं भवति। याति। वाति। नेर्विशः आत्मनेपदमुक्तं। निविशते। ततोऽन्यत्र परस्मैपदं। आविशति।
प्रविशति। कर्त्तरीति किं। पच्यते। गम्यते॥ ॥छ॥ ॥

वनामन्त्रेत्यपि द्रष्टव्यं पच्यते गम्यत इति। ननु क्रियमाणेऽपि कर्त्रीत्यग्रहणेऽप्यहितावदेवं नियमः कर्त्तर्येव परस्मैपदं भवति शेषादेवेति ततोऽशेषात्कर्त्तरि मा भूत् शेषात्तु भावक
र्मकर्तृष्वपि प्राप्नोति अथाप्येवं नियमः शेषादेव परस्मैपदं भवति कर्त्तर्येवेति ततोऽशेषाद्भावकर्मणोरपि भूत् अशेषात्तु त्रिष्वपि प्राप्नोति उक्तोऽत्र परिहारः योगविभा
गोऽत्राभिप्रेत इति तत्र प्रथमे योगे शेषादेवेति नियमः द्वितीये तु कर्त्तर्येवेति॥ ॥छ छ॥ ॥छ॥ ॥छ छ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कर्म्मकर्त्तरि लादिभावकर्मणोरित्यत्रोक्तत्वार्थो विस्मरणशीला ननुग्रहीतुं पुनरपि स्मार्यते॥ ॥अनुपरा॥ अत्रापि द्वितीयं कर्तृग्रहणमनुवर्त्तते। अनुक्रियते स्वयमेव
पराक्रियते स्वयमेव॥ ॥उपाच्च॥ उपसर्गादेरमिरिति विनार्थाणोर्वर्त्तते उपरतो ध्यपनात् उपरतानिधनानीतिनयोरन्यार्थयोः सकर्मकत्वमुपपद्यते तत्र कथं स

कर्म्मकर्त्तरि कस्मात्परस्मैपदं न भवति। पच्यते ओदनः स्वयमेव। कर्त्तरि कर्म्मव्यतिहार इति द्वितीयं कर्तृग्रहणमनुवर्त्तते। तेन कर्त्रैव यः
कर्त्तेति परस्मैपदं कर्मकर्त्तरि न भवति॥ ॥अनुपराभ्यां कृञः॥ कर्त्रभिप्राये क्रियाफले गन्धनादिषु च करोतेरात्मनेपदं विहितं। तद
पवादः परस्मैपदं विधीयते। अनुपरा इत्येवं पूर्वात्करोतेः परस्मैपदं भवति। अनुकरोति पराकरोति॥ ॥अभिप्रत्यतिभ्यः क्षिपः॥ क्षि
प प्रेरणे स्वरितेत् ततः कर्त्रभिप्राये क्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। अभि प्रति अति इत्येवं पूर्वात् क्षिपः प
रस्मैपदं भवति। अभिक्षिपति प्रतिक्षिपति। अतिक्षिपति। अभिप्रत्यतिभ्यः इति किं। आक्षिपते। द्वितीयमपि कर्तृग्रहणमनुव
र्त्तते। तेनेह न भवति। अभिक्षिप्यते स्वयमेव॥ ॥प्राद्वहः॥ ॥वह प्रापणे स्वरितेत् तत्र कर्त्रभिप्राये क्रियाफलविवक्षायामा
त्मनेपदे प्राप्ते परस्मैपदं विधीयते। प्रपूर्वाद्वहतेः परस्मैपदं भवति। प्रवहति प्रवहतः प्रवहन्ति। प्रादिति किं। आवहते॥ ॥परेर्मृषः
॥ ॥मृष तितिक्षायां स्वरितेत् ततस्तथैवात्मनेपदे प्राप्ते परस्मैपदं विधीयते। परिपूर्वान्मृष्यतेः परस्मैपदं भवति। परिमृष्यति।
परिमृष्यतः परिमृष्यन्ति। परेरिति किं। आमृष्यते। वहतिमपि केचिदत्रानुवर्त्तयन्ति। परिवहति॥ ॥व्याङ्परिभ्यो रमः॥ रमु क्री
डायां। अनुदात्तेत्वादात्मनेपदे प्राप्ते परस्मैपदं विधीयते। वि आङ् परि इत्येवं पूर्वाद्रमतेः परस्मैपदं भवति। विरमति आरमति प
रिरमति। एतेभ्य इति किं। अभिरमते॥ ॥उपाच्च॥ ॥रम इत्येव। उपपूर्वाद्रमतेः परस्मैपदं भवति। देवदत्तमुपरमति यज्ञदत्तमु
परमति उपरमयतीति यावत्। अन्तर्भावितण्यर्थोऽत्र रमिः। पृथग्योगकरणमुत्तरार्थं। अकर्मकाद्विभाषा वक्ष्यति सा उपपूर्वादेव
कर्म्मकस्योदाहरणं अत आह उपरमयतीति यावदिति कथं पुनरण्यन्तो ण्यर्थे वर्त्तते इत्याह अ ॥ यथा स्यात्॥ विभाषाऽकर्मकात्। रमउपादि
न्तर्भावितण्यर्थ इति २०॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥बुधयुध॥ ॥प्राप्नोतीति गम्यत इति चलनं तु प्राप्तिहेतुर्व्यापारः। कुण्डिका स्रवतीति कुण्डिकायाः पुरःके कुण्डिका उदकव्यापारो वा कुण्डिकायां छिद्रवत्त्यामुपचर्यते न तु
स्पन्दनमपि द्रवद्रव्यकर्तृकं चलनमेव। तथाप्रतीत्यभावात्॥ ॥निगरणा॥ ॥चलयतीति चलकम्पने घटादिः। आदयते देवदत्तेनेति। गतिबुद्धीत्यादिना अणौ क

॥बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ ॥णिचश्चेति कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। बुधयुधन
शजनेङ्प्रुद्रुस्रु इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। बोधयति। नाशयति। जनयति। अध्यापयति। प्रावयति। द्रावयति। स्रावयति। येऽ
त्राकर्मकास्तेषामणावकर्मकाच्चित्तवत्कर्तृकादित्येव सिद्धे वचनमिदमचित्तवत्कर्तृकार्थं। बोधयति पद्मं योधयति काष्ठानि। नाशयति
दुःखं। जनयति सुखं। अत्र चलनार्था अपि तेषां निगरणचलनार्थेभ्यश्चेति सिद्धे प्रद्रावणे चलनार्थास्तदर्थं च वचनं। प्रवति। प्राप्नोतीति ग
म्यते। अयो द्रवतीति विलीयत इत्यर्थः। कुण्डिका स्रवति। स्यन्दत इत्यर्थः। तद्विषयाण्युदाहरणानि॥ ॥निगरणचलनार्थेभ्यश्च॥
णेरिति वर्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते। निगरणमभ्यवहारः। चलनं कम्प
नं। निगरणार्थेभ्यश्चलनार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। निगारयति। आशयति। भोजयति। चलनार्थेभ्यः च
लयति। चोपयति। कम्पयति। अयमपि योगः सकर्मकार्थः। अचित्तकर्तृकार्थश्च। अदेः प्रतिषेधो वक्तव्यः। अत्ति देवदत्तः।
आदयते देवदत्तेन॥ ॥अणावकर्मकाच्चित्तवत्कर्तृकात्॥ णेरिति वर्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदा
पवादः परस्मैपदं विधीयते। अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च तस्मात् ण्यन्तात्परस्मैपदं भवति। आस्ते देवदत्तः। आ
सयति देवदत्तं। शेते देवदत्तः। शाययति देवदत्तं। अणाविति किं॥ ॥

तः कर्मसंज्ञा प्राप्तास्ति रवायोः प्रतिषेध इति वचनान्न भवति॥ ॥अणावक॥ ॥अणाविति किमिति। ण्यन्तस्य प्रयोज्येन कर्मणा सकर्मकत्वमवश्यंभावी
ति मन्यमानस्य प्रश्नः॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

चेतयमानमिति। चिती संज्ञाने चुरादिः। हेतुमणिचो विधिरिति बुधादिसूत्रादिह णिजग्रहणमनुवर्त्तते बुधादिभ्यश्च हेतुमत्येव णिच्सम्भवति तस्मादिहापि तस्यैव ग्रहणमिति भावः। तत्र यथा प्रास्तणा अनीयेनामनत्रा धीयानेभ्य इत्युक्ते प्रत्यासत्तेर्यदध्ययनं ब्राह्मणानां सम्भवति तदधीयानेभ्य इति गम्यते न तु क्षेत्रलब्धमात्रमधीयाने भ्य इति तद्वदिहापि प्रतिषेधोपि तस्यैव गम्यते यस्य विधौ ग्रहणमिति। आरोहयमाणमिति। रोहणाविव्यात्मनेपदं इत्यनयेत्युक्त्वा। तत्रैवास्याकर्मकत्वमुपपा

चेतयमानं प्रयोजयति चेतयते इति केचित्तत्सुदाहरन्ति। तदयुक्तं। हेतुमण्णिचो विधिः प्रतिषेधोपि प्रत्यासत्तेस्तस्यैव न्याय्यः।
तस्मादिह चेतयतीति परस्मैपदेनैव भवितव्यं। इदं तु प्रत्युदाहरणं। आरोहयमाणं प्रयोजयति। आरोहयते। अकर्मकादिति
किं। कटं कुर्वाणं प्रयोजयति। कारयते। चित्तवत्कर्तृकादिति किं। शुष्यन्ति व्रीहयः। शोषयते व्रीहीनातपः॥ ॥न पादम्या
ङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। पूर्वेणायोगद्वयेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं वि
हितं तस्य प्रतिषेधोयमुच्यते यत्कर्त्रभिप्रायविषयमात्मनेपदं तदवस्थितमेव न प्रतिषिध्यते। पा। दमि। आङ्यम। आङ्य
स। परिमुह। रुचि। नृति। वद। वस। इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं न भवति। णिचश्चेत्यात्मनेपदं भवति। तत्रापि वति निगरणा
र्थः। दमिप्रभृतयश्चित्तवत्कर्तृकाः। नृतिश्चलनार्थोपि एषां परस्मैपदं न भवति। पा। पाययते। दमि। दमयते। आङ्यम। आयाम
यते। यमोपरिवेषणे इति मित्संज्ञा प्रतिषिध्यते। आङ्यसा आङ्पूर्वो यसः। आयासयते। परिमुह। परिमोहयते। रुचि। रो
चयते। नृति। नर्त्तयते। वस। वासयते। पादिषु धेट उपसंख्यानं। धापयते शिशुमेकं समीची॥ ॥२८॥ ॥

दिति। प्रयुंक्त इति पाठः। प्रयोजयतीति पाठे णेरर्थो निर्दिष्टः। ॥न पाद। लुप्तविकरणालुप्तविकरणयोरलुप्तविकरणस्य ग्रहणमिति पिबतिवसत्योर्ग्रहणं न यातिव
स्तोः। तेनाणावकर्मकत्वविवक्षायां परस्मैपदं भवत्येव यापयत इति। आङ्यसाङ्पूर्वो यसः। पाद्विधिति। धेट् इत्ययमस्मिन्सूत्रे पठितव्य इत्यर्थः। समीची इति।
प्रथमा द्विवचने वाच्छन्दसीति पूर्वसवर्णदीर्घः॥ २८॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ वा क्यषः ॥ लोहितायतीति । आ लोहितो भवतीत्यत्रार्थे क्यष् । अकृत्सार्वधातुकयोरिति दीर्घः । पटपटायतीति । पटच्छब्दस्याव्यक्तविषये द्विर्वचनं अव्यक्तानुकरणादिति डाच्
टिलोपः । नित्यमाम्रेडिते डाचि । कथमिति । न कथंचिदित्यर्थः । किं कारणमित्याह यावतेति । न नियमेन व्यावर्तितमात्मनेपदमनेन वाक्यं प्रापयितुं न ह्यशक्यार्थे वचनस्य
व्यापारः । तावद्वचनं तु केवलस्यैव प्रयोगार्थं स्यादिति भावः । एवं तर्हि स्यादिपरिहारः । विकल्पितं विभाषितं पाक्षिकमित्यर्थः । कथं पुनः परस्मैपदप्रकरणे न विच्छिन्नमात्म
नेपदं शक्यं विधातुमत आह तत्रेति । ननु शास्त्रः संनिधिः संबन्धकारणं प्रतिषेधेन चापवादभूतस्य परस्मैपदस्याभावमात्रं प्रतिपाद्यते आत्मनेपदं तु विधेन शास्त्रेणाभ्य
नुज्ञातं तावत्तस्य संबन्धं निषिद्धं भवति । उच्यते तात्पर्यतो यः संनिधिः संनिधिरेव अपवादापनयनस्य चोत्सर्गस्य प्रवृत्तौ तात्पर्यं तेन परस्मैपदं न भवतीत्यस्यात्मनेपदं भ

॥ वा क्यषः ॥ लोहितादिडाज्भ्यः क्यष् इति विहितः क्यष् तदन्ताद्धातोर्वा परस्मैपदं भवति । लोहितायति । लोहितायते । पटपटाय
ति । पटपटायते । अथात्र परस्मैपदे न मुक्ते कथमात्मनेपदं लभ्यते । यावता अनुदात्तङित इत्येवमादिना प्रकरणेन तन्नि
यतं । एवं तर्हि आत्मनेपदमेवात्र विकल्पितं विधीयते । तदनन्तरं परस्मैपदप्रतिषेधेन सन्निधापितमिह संबध्यते । ते
न मुक्ते शेषात्कर्तरि परस्मैपदं भवति ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

वतीति तात्पर्यार्थः । यद्वा इहापि प्रतिषेध एव विधेयः स च प्रवृत्तस्तत्रवदिहात्मनेपदं प्रवर्तयिष्यति किंतर्हि उच्यते अनन्तरं सन्निधापितमिति तत्त्वेवमिहैव संनिधापि
तं भवति । एतदेवं यदि परस्मैपदेन बाधं जातमात्मनेपदं बाधितं स्यात् । नियमेन तु न तत्त्याहतिः तत्र स्वविषये परस्मैपदप्रतिषेधो विकल्प्यमानः किं कारणमात्मनेप
दं प्रवर्तयेत पूर्वं न त्वपवादमपताम्प्रतिषेधेनात्मनेपदं प्रवर्तितं तस्मादिहापि नरं तु हन्ति सामर्थ्यादिहाध्याहृतः प्रतिषेधः आत्मनेपदप्रवृत्त्यविनाभावी प्रवृत्त
तः तादृश एव विधीयत इति पदतोक्तं अनन्तरं सन्निधापितमिति यद्यात्मनेपदं विधीयते केनेदानीं परस्मैपदं प्रसेभवतीत्यत आह तेन मुक्ते इति ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

भ्यो लुङि।। ।।द्युतेरेकत्वाद्बहुवचनमनुपपन्नमित्याशंक्याह तत्साहचर्यादिति छत्रिण्यायेनेति भावः। लुठादयोपीति प्रत्याहारेणाम्नाने साहचर्यात् प्रतीतिः स्यादि त्याशंकामनयेनुदूरवर्त्तिनामुपादाने। कचित् स्थितास्य इत्यनेनं तरगणमेव पाठः। कृपूपर्यन्ता इति तदनन्तरं वृत्करणात् एतदुक्तं भवतीत्याह बहुवचननिर्देशादि ति। व्यद्युतत् इति। पुषादिसूत्रेणाङ् न च ततएतो द्विधानान्तपरस्मैपदं शकं विज्ञातुं निमित्तप्रसंगात्। अङो मन्त्रापि प्रसंगाद्वा अनुदात्तेत्त्वं तु युजर्थं स्यादित्। वृद्भ्यः।।

द्युद्भ्यो लुङि। वेत्येव। द्युतदीप्तौ। तत्साहचर्यात् द्युतादयोपि कृपूपर्यन्तास्तथैवापदिश्यन्ते। बहुवचननिर्देशाद् द्युतादिभ्यो भवति। अनुदात्तेत्त्वान्नित्यमेवात्मनेपदे प्राप्ते द्युतादिभ्यो लुङि वा परस्मैपदं भवति। व्यद्युतत्। व्यद्योतिष्ट। अलुठत्। अलोठिष्ट। लुङीति किं। द्योतते।। वृद्भ्यः स्यसनोः। द्युतादिष्वेव वृतादयः पठ्यन्ते। वृतु वर्तने। वृधु वृद्धौ। शृधु शब्दकुत्सायां। स्यंदू प्रस्रवणे। कृपू सामर्थ्ये। एतेभ्यो धातुभ्यः स्ये सनि च परतो वा परस्मैपदं भवति। वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। वर्तिष्यते। अवर्तिष्यत। विवर्तिषते। वृधु। वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। वर्द्धिष्यते। अवर्द्धिष्यत। विवर्द्धिषते। स्यसनोरिति किं। वर्त्तते।।

।।लुटि च कॢपः। वृतादित्वादेव स्यसनोर्विकल्पः सिद्धः। लुटि विधीयते। चकारस्तर्हि स्यसनोरनुकर्षणार्थो न वक्तव्यः। एवं तर्हि इयं प्राप्तिः पूर्वां प्राप्तिं बाधते। तस्माच्चकारः स्यसनोरनुकर्षणार्थः क्रियते। लुटि च स्यसनोश्च कॢपेः परस्मैपदं वा भवति। कल्प्ता। कल्प्तारौ। कल्प्तारः। कल्प्स्यति। अकल्प्स्यत्। चिकॢप्सति। कल्पिता। कल्पितारौ। कल्पिष्यते। अकल्पिष्यत। चिकल्पिषते।। ।।इति काशिकायां वृत्तौ प्रथमस्याध्यायस्य तृतीयः पादः।। ३९ ।।

स्यसनोरिति सत्सप्तमी द्युतादिष्वेव वृतादयः पठ्यन्त इति यद्येवं द्व्यं प्राप्तिः पूर्वां प्रतिबाधेत तत्तस्मात् तद्वर्त्तिष्टेति लुङि विकल्पो न स्यात् तथा चोक्तमत्र चकारः क्रियत इत्यां प्राप्तिं पूर्वक्षेत्तरा प्राप्तिर्न बाधेतेति द्युतादित्वात् सामर्थ्यात् क्वापि भविष्यतीति यद्वा लुङ्स्तत्र खरव्यते। वत्स्यतीत्यादौ न वृद्भ्यश्चतुर्भ्य इति इट्प्र तिषेधः।। ।।लुटि च।। एवं तर्हीति सामान्यस्य विशेषो बाधक इति भावः। कल्प्तेत्यादौ तासि च कॢप इतीट्प्रतिषेधः।। ।।इति हरदत्तविरचितायां पद

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥ आकडारादेका संज्ञा ॥ अत्र सूत्रे इति विधौ इति समासस्य विकल्पितत्वात् कडारादिति निर्देशः । समासे त्वाकडारमिति स्यात् । इह द्वौ कडारशब्दौ भवतः प्राक्कडारात्
समासः कडाराः कर्मधारय इति च तत्र कोवधिरित्यत आह ॥ कडाराः कर्मधारय इति वक्ष्यतीति । कुतः पुनरेतत् स्यात् अतस्तत्रोत्तरस्योपरि प्रथमानिर्देशो नास्य येकार्थयो
गित्वात् प्राक्कडारात् समास इत्यत्र अवधित्वेन प्रयोगाभावात् आ सेश्च आपातात् एवं हि भूयसामनुग्रहो भवति । लिंगात् परं परतत्पुरुषो द्विगुश्चेति द्विगो
स्तत्पुरुषसंज्ञां शास्ति तत् ज्ञापयति द्वितीयेप्येकसंज्ञाधिकार इति । अन्यथा द्विगुसंज्ञा तत्पुरुषाधिकारात् समावेशः सिद्धः तदर्थमेतत्तोपार्थकः
स्यात् किमर्थं पुनरियानवधिः प्राक्प्रथमे तस्मादेकत्वात् इत्येवोक्ते नाम हि स्वार्थे दृश्यत इत्यतः परस्याप्रयोगः उच्यते । इह आ भाष्ये इयन्नियमस्य अवधिः संभाव्येत । ततश्च
संज्ञाद्वित्वं संज्ञासमावेशोऽपि स्यात् । का पुनरस्या विषय एकसंज्ञा भवतीत्येतावता सूत्रव्यापारः । तत्र विशेषादर्शनात् प्रश्नः । यावतानवकाशे च सा वच

॥ आकडारादेका संज्ञा ॥ कडाराः कर्मधारय इति वक्ष्यति आ एतस्मात् सूत्रावधेर्यदितऊर्ध्वमनुक्रमिष्यामः तत्र एका संज्ञा भवतीति वेदि
तव्यं । का पुनरसौ । या परानवकाशा च । अन्यत्र संज्ञासमावेशान्नियमार्थं वचनं एकैव संज्ञा भवतीति । वक्ष्यति । ह्रस्वं लघु । भिदि छिदि
संयोगे गुरु । शिक्षा । भिक्षा । संयोगपरस्य ह्रस्वस्य लघुसंज्ञा प्राप्नोति गुरुसंज्ञा च । एका संज्ञेति वचनात् गुरुसंज्ञैव भवति ॥ ॥ ॥

नत्वपाप्य व्यवस्थेति भावः । ननु परस्मिन् पूर्वत्वमनवकाशत्वं च वा असमावेशव्यवस्था वाच्या । अनवकाशे परस्मिन् असमावेशव्यवस्था भविष्यति नार्थ एत
तेन तत्राह । अनवकाशेति । अयं भावः । यत्र प्रयोजनमेकं भवति सहानवस्थानलक्षणो विरोधः । तत्रैवानवकाशः सावकाशं बाधते । यथा नैवारं चरुं निर्वपेत् ।
नैवारश्च हृष्टवीहीनामिति । नावावपने न वैतुष्यफलकेन तत्फलकोवघातो बाध्यते । अष्टौ श्रिपाः कर्तव्या वाजपेयस्य चतुश्चतुरस्त्रिरिति अष्टाश्रित्वा
चतुरश्रत्वयोर्विरोधात् बाध्यबाधकभावः । विप्रतिषेधोपि विरोधात्मकत्वात्तत्रैव भवति । न चास्मिन् सूत्रे संज्ञानामेतदुभयं भवति अतएवान्यत्र समा
वेशो भवति । तद्यथा कृत्प्रत्ययसंज्ञा नाम तद्धित प्रत्ययसंज्ञानां च सति त्वस्मिन् सूत्रे एकस्यैकैवेति नियमाद्विरोधो जायते विरोधे च सति परत्वादनव
काशत्वात् व्यवस्था भवति व्युत्पत्तित्रानवकाशा यावदाहरणमाह वक्ष्यतीति । छिभिदि छेदि । गुरोश्च हलः इत्यकारप्रत्ययः घपद्येत्रसमावेशोऽपि । नक
श्चिद्दोषः तथापि तत्त्वतः समावेशो नास्तीत्येतावतादाहरणं । संप्रति यत्र समावेशोऽस्ति तत्र दोषः तद्दर्शयति ॥ ॥ ॥७॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ ११

१३५

रा

अततक्षदिति। परस्मात् तक्षेः श्नं धनुः सा विध्यतीति श्नस्य णम पार्थं प्रत्ययं वषिभूतस्यैव धनुषो बाधनं प्रतिसाध्य कनमत्वमिति तु भयप्रसंगे परत्वात् लक्षणमेनुज्ञात्र अपादा
न संज्ञां बाधते तथा कांस्यपात्र्यां भुंक्ते इति अधिकरणसंज्ञां धनुर्विध्यतीति करणसंज्ञा। उक्तं च पाठान्तरं न मुख्यत्वेन इति गार्ग्य धातुः कृ इति अनवकाशो भोल्पद
संज्ञाभ्यां अंगसंज्ञाया धातुप्रत्ययेषु सावकाशाया बाधः प्राप्नोति। ज्ञापकात्सिद्धं पदयंस्तु पित्वं कृ वचने फलेन न द्वितेष्वचामादेरिति स्थादिषु तद्धितेषु
चांगस्य यतः कार्यं शास्ति न ज्ञापयति। समाविशासंगमं ज्ञानं पदसंज्ञा प्राप्नोति। क्षयेहि स्वादयः यत्रादयो हला दयश्च तत्र भजादिषु नसंज्ञा हलादि
षु पदसंज्ञेति अंगस्य कार्यविधानमनुपपन्नं स्यात्। गुरुलघुसंज्ञे वर्णमात्रस्य विधीयेते। नदीधिसंज्ञे तु दंतस्येति नाम्यां समाविष्टा नः तद्यथा। वा
तीवं धुरीति नदी धुनीति पूर्वपरांतो एतत्तत्त्वं वा स्त्रीवं धोः इति गुरो रनृत इति प्लुतश्च भवति विष्वभाव विनशेरध्यादिपूर्वतिपातः। विश्रोभविः चैत्रं इगं
ता च लघुपूर्वात् इत्यगर विनशवाच छेद इति विनयति विनयति प्रविनयामासः त्वपि लघुपूर्वादित्ययादेशो भवति। भाष्येति इविषये समावेशो मा

॥ अततक्षत्। अररक्षत्। तस्त्वक्षयुनीत्येषविधिर्न भवति॥ ॥ १ ॥ ॥

संतरेणमायितः प्राक्कडारात्परं कार्यमिति तत्रायमर्थः। प्राक्कडारात्संज्ञाप्रकरणं कार्यपरं भवतीति संज्ञाप्रकरणे संज्ञैवात्र कार्यमित्युच्यते। एकसंज्ञेत्येव तूक्तं विप्र
तिषेधे वेति वस्तति। तत्र परं कार्यमित्यनुवृत्तिर्यथा स्यात् तत्र परस्याः संज्ञाया परस्याः पूर्वया अनवकाशबाधः प्राप्तः सा परा भवतीति विधिरूपेण सम्प्रवृत्तिः ननु अन
वकाशया पि पूर्वया नैव परस्या बाधः प्राप्नोति विरोधाभावात् फलेकाभावाच्च संज्ञानाम अन्यत्र समावेशस्य दृष्टत्वात् स्पष्टं स्यदेव ज्ञापयति। भवत्यत्र प्रकरणे स
ज्ञानां बाध्यबाधकभाव इति। तेन परया अनवकाशया पूर्वा बाध्यते द्वयोश्च सावकाशयोर्विप्रतिषेधे परमिति परैव भवतीति परफलस्यापि सिद्धिः एकस्मिन्का
ले अंगसंज्ञा प्राक्कडारात् वैन्न पदसंज्ञे एवं सर्वत्र यत्र समावेशस्य एषः। अस्मिन् पक्षे नतो राच्छ दूसि पस तिपरति अत्र सितिचेति पदसंज्ञाविषये परं कार्यमिति
वचनात् तत्संज्ञापि स्यात्। तत्र श्वोर्गुणः प्राप्नोति सिल्करणं तु पदत्वे सत्यवग्रहार्थं स्यात्। शेषो बहुव्रीहि इत्यत्र च शेषग्रहणं कर्तव्यं अन्यथा अन्यपदार्थे
वत्संज्ञायामिति अपि भावविषये परं कार्यमिति वचनात् बहुव्रीहिसंज्ञापि स्यात्। एकसंज्ञाधिकारे त्वव्ययीभावसंज्ञैव चाधिके तिशेषग्रहणमनर्थकं तद
वंशेषग्रहणमेव गमणमाणं। स्वासांतरमेपित्त्वकारस्याभिमतमिति॥ ॥ १ ॥ ॥ ७ ७ ॥ ॥ ७ ॥ ॥ ॥

राम॰

१३६

© Dharmartha Trust J&K. Digitized by eGangotri

॥विप्रति। विप्रतिषेध इति षिध गत्यां शास्त्रे विधु गत्यामिति भौवादिक परस्मैपदस्य रूपं तस्य हि सेधति वसं...जामिति षत्वमस्ति। उपसर्गवशाच्च विरोधार्थत्वं
धातूनां सुपसर्गवशादन्यथार्थे उपजायते। तद्यथा प्रहार उपहारो नुहारः संहारः अनिषिक्षसेराद्धविमस्यन्तु देवा। एकं सषत्वं नास्ति सेधति चेति शया
निर्दिष्टात्। आदेशप्रत्यययोरिति विहितस्य षत्वस्य समासत्वाद्द्योरिति निषेधः। ननु गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचना
त्पंसकाः परा... षत्वविषये परिभाषेयं न भवति यदि स्यात् ... भूमिष्ट शब्दे सकारस्यापदादित्वादादेशप्रत्यययोरित्येव षत्वं सिद्धं अथवा योगवि
दिग्रहणमनर्थकं स्यात्। पारऋषेरुपत्रिलिङ्गः परो... परोनासेनापरं कार्यं ... अनोपमसुत्पन्नः यचाद्यजन्तो वामनु... इत्यवतः तथा हि
तत्रिलिङ्गतत्स्यात्। कृत्यल्युटः पुंसि के भावे स्त्रियां क्तिन्नादयो यतः। अतो घञादयः पुंस्येव यथा पाक ... ल्वः। ... हल्युट्तुमुन्
खलर्थेषु ... विधिर्नास्ति निवचनात् स्त्रियामपि नाम ... नास्ति प्रतिषेधात्। कृत्यल्युटः पुंसि केभावे स्त्रियां। अतो भावे च घञादयः पुंस्येव कर्तरि क्तिः

॥ ॥विप्रतिषेधे परं कार्यं। विरोधो विप्रतिषेधः। यत्र द्वौ प्रसङ्गावन्यार्थावेकस्मिन् युगपत् प्राप्नुतः स विप्रतिषेधः तुल्यबल
विरोधो विप्रतिषेधः। तस्मिन् विप्रतिषेधे परं कार्यं भवति॥ ॥ ॥१॥ ॥२॥ ॥३॥ ॥

तेनु कालकेषु नपुंसकशेषं कथं चेत् स्त्रियो। परं कार्यमिति। परं परकार्यं त्वा ... भवतीत्यर्थः। अथवा परस्तत्कार्यं भवति कर्तरि भवतीत्यर्थः। अन्ये त्वा
हुः। न क्रियापदत्वेन कर्मशब्दः स्यात् परः। नापि परं कार्यं भवति। ननु शास्त्रमिति एवं शास्त्रादि ... पर कार्यशब्दः। किं तर्हि यत्कार्यं लक्ष्यं परं तद्भवतीति वचन
व्यक्तिः। ... किं सिद्धं भवति तुल्यबलविरोध इति सिद्धं भवति न त्वपवादादीनाम् ... तेषां ... इति। विरोधो
विप्रतिषेध इति। तद्वाचित्वे न वलोके प्रसिद्धत्वात्। विप्रतिषिद्धमिति उक्ते विरुद्धमिति ... विरुद्धमिति गम्यते। तस्य विषयं दर्शयति। यत्रेत्यादि। यत्र
विषये द्वौ ... इत्यादि। अन्यार्थावित्यादि ... चरितार्थ
त्वासंभवात्। ... प्रयोजनं ... इति विग्रहः। द्वौ प्रसङ्गौ द्वे कार्ये ... युगपत्प्राप्नुतः स विप्रतिषेधः। विप्रतिषेधः। विप्रतिषेधविषय इत्यर्थः। तु
ल्यबलयोर्विरोधोऽपि ... परं कार्यं भवतीति परं कार्यं लक्ष्यं ... भवतीत्यर्थः। तुल्यबलविरोधस्य ... दर्शयति॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ १२

१३६

उत्सर्गापवादेत्यादि तत्रस्याद्यधेत्याकारान्तरलक्षणोपलक्षणतया सर्गः तं परमप्यनुपसर्गेष्वावकाशं बाधित्वा अनवकाशत्वादातश्चोपसर्गे इति क एव भवति पुग्लम्मुग्न
इति धेर्णित्वेनिरभिजनोरवीतिनुमकृता कृतप्रसङ्गित्वान्नित्यः अन्तउपधायाः इति ह्रस्वनित्यानुमिह कृते अकारस्यानुपधात्वादप्राप्तेः तत्र पूर्वोपि नुमेवभवति । संघ
मति । अशिश्रिपत् अडुदुवत् इत्यत्रान्तर्भूतिचङः पराक्तत्वात् इयङुवङावन्तरङ्गो बहिर्भूतत्वाच् णेर्लोपः न बहिरङ्गलक्षणगुणापरमपि बाधेते । अपवादादीनां तु
परिणामं प्रधारणा पदान्तिसादप्यन्तरङ्गं तस्मादप्यपवादः । उक्तं च । पाविदुः पूर्वपरयोपपत्रोपरस्य नित्यस्यवनित्यमेवानित्यं तरङ्गोपगामेतरङ्गं तस्मादिविधिः प्रातिपदोवृत्ती
यानीति । द्वयोरेकत्र निपातउपपत्तिः परस्यानित्यस्य चेति । अत्र उपसमत्तमस्यपपन्नानित्येन तदनुकल्पते । प्रतिपदं भवः प्रातिपदः अपवादः । अप्रहत्त्वाविरोधाद्धेतो
पदार्थेद्वयोरन्यत्र कृतार्थत्वाद्विप्रतिषेधे सति परस्यप्रतिबन्धादप्रहृत्तिरेव तथापि हि द्वयोः तुल्यबलयोरेकः प्रेष्योभवति सतयोः पर्यायेण कार्यं करोति

। उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गेषु तुल्यबलतानास्तीति नापमस्ययोगस्य विषयो बलवत्तेवतत्र भवितमा ।
अप्रवृत्तौ पर्यायेणाप्रवृत्तौ प्राप्तायां वचनमारभ्यते । अतो दीर्घो यञि सुपि च स्यादेकादेशः वृक्षाभ्यां प्लक्षाभ्यां । ४
बहुवचने झल्येदित्यस्यावकाशः वृक्षेषु प्लक्षेषु । इहोभयं प्राप्नोति वृक्षेभ्यः प्लक्षेभ्य इति । परं भवति विप्रतिषेधे ८

पदानमुभोयुगपत्प्रसङ्गपतः नानादिक्षु च कार्यं भवतः तदायघसावनिरोधार्थमिवतितउभयोर्न करोति तत्र विध्यर्थमिदं परं भवतीति । तस्मिन्कृते य
दि पूर्वस्यापि निमित्तमस्ति तदपि भवत्येव यथाभिधकी निर्भिन्न इहि इति छितेयरत्वाद्धिभावे कृते पुनः प्रसङ्गविज्ञानाद्रुक्च भवति । अन्ये तु पदार्थे
सर्वविनमुद्देशेन शास्त्रस्य प्रवृत्तेः तद्विषयोपनियातिनोन्यत्रारितार्थत्वाभावात्पर्यायेणाप्रवृत्तौ प्राप्तायां नियमार्थमिदं विप्रतिषेधे परमेव भवति
न पूर्वमिति । एतस्मात्रारम्भाच्च पूर्वस्य लक्षणस्यात्रानारम्भोनुमीयते तदुच्यते स कृतकृत्ते विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति तथा चात्र नताबित्व
मिति परत्वात्तत्रादेशे कृते स्थानिवद्भावेन प्राप्तं धित्वं न भवति । लक्ष्यानुरोधेनत्र्यन्माहृतिपरत्वाच्छ्रयणादनयोः पक्षिशायपयोर्विषयविभागोव

सेयः ॥ २ ॥ ॥

स्म॰

१३६

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥यूखो॥ ॥अत्र ह्रस्वयोरि ह्रुतोर्ग्रहणेऽपघ पि सवर्णग्रहणाद्दीर्घयोरपि संज्ञा लभ्यते ह्रस्वयोरपि तु स्यात्। ततश्च हे शकटे हे धेनो अत्रापि प्राप्नोति। ह्रस्वश्च कारिति धुर्नदी वंधु नीति पूर्वपदान्तो दान्तत्वं प्रसज्यते। हवबूऊडा क हिः वङ्ऊ धेनु रित्ति न एतच्चेति नि त्यः कपस्था ङानेष दोषो इति ह्रस्वेश्चमे तान्नि पमार्थत्वावि ष्यति इति सेव ह्रस्वो नदी संज्ञो भवतः नात्यत्रेति के मे ष्व न्निय मो भवति विधेयं नास्ता ति कृत्वा इह वास्ति विधेयं कि नित्या नदी संज्ञा प्राप्नेति स्याद्विभाषा इ ष्यति इति दर्शयति इचि ऊ च यू इति समास विधौ सुव धिकारात्रे तद्ध्रु स्यापि विग्रह य का किन्तर्हि अर्थ धेयाश्च तो ह्रस्वयोरपि स्यादेवेति दोषह्रस्वा दीर्घयोर्ग्रहणमिति दर्शयति।

॥ सूत्रस्थाख्योनदी ॥ ॥ इचऊवयूः अविभक्तिको निर्देशः । क्रियमाचक्षातेऽत्राख्यो ॥

प्रदर्शितं अत्र चानुकार्यानुकरणयोरभेदविवक्षया विभक्तिर्न कृता कचित्तु विभक्तां तमेव पठ्यते ननु दीर्घयोर्ग्रहणे एङ् इति निर्देशो मोयपघते दीर्घाज्जसि चेति पूर्वसवर्णप्रतिषेधात् अत आह अविभक्तिकोऽयं निर्देश इति सुपां सुलुगिति लुप्तत्वाद्धान्छन्दसीति पूर्वसवर्णोनाप इत त्वादाना स्मिन भ वितिः श्रूयत इत्यविभक्तिकः अन्येतु नैवायं ह्रुः किन्तु पृथक्पदे इयुङ् मिसाद्रुः। अविभक्तिकत्वं चानुकार्यानुकरणयोरभेदविवक्षया। क्रियमाव क्षातेऽत्राख्या विति ननु वस्त्राख्या या विति प्राप्नोति अनुपसर्गे को विधीयते यस्त्वातश्चोपसर्गे इति क अयमकर्मोपि यदेवीतार्थः कर्मणि त्व णा बाध्यते। यथा वस्सति अकारादनुपपदात्कर्मोपि पदोऽविप्रतिषेधेनेति तत्राह॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का.प.१३
१३७

मूलविभुजादिषु दृश्यनादिति। एवं च कृत्वा ऽस्मदपि सिद्धं भवति। यस्मिन् दृश्यते स हृष्याणि पुत्रे जाते गवां दृष्टौ। आह्लादोऽभ्युः प्रिया ह्वोऽभ्यः प्रिया ह्वोऽभ्यः सोपसृष्टेन
जीवतीति। इह ईदूतौ रेवेपंस त्वाविधीयेन तदन्त एव गाऽऽधेयपक्षे कृत्स्त्रियां न स्यात्। आधेयाख्यातेऽपि हेलक्ष्मिहेयवाग्वितिसमुदायो यत्र स्त्र्याख्यो नदीह्रस्वात्र सव
ज्ञो रेलतु स्यात् स्त्रियां विधानादन्वयव्यतिरेकाभ्यां च स्त्र्याख्यत्वादिति द्वितीयं पक्षमाश्रित्याहाईकारान्तं इत्यादि। वर्णग्रहणो सर्वत्र तदन्तविधिरिति तदन्तविधिलाभः।
सुप्रसिद्धं तमिमत्र सुप्रसिद्धोः प्रत्ययत्वादन्यत्रापि प्रत्ययग्रहणाद्यावदन्तं न विधिर्निवारितः। कथं पुनर्यंते वर्णयोरेवेदं ग्रहणं न प्रत्ययोरिति इयङुवङ्स्थानप्रतिषे

॥ मूलविभुजादिदृशिनाकप्रत्ययः। ईकारान्तमूकारान्तं च स्त्र्याख्यमंशोवदूपं नदीसंज्ञं भवति। ईका
रान्तं कुमारी। गौरी। लक्ष्मीः। ऊकारान्तं ब्रह्मबन्धूः। यवागूः। इति किं। मात्रे। दुहित्रे। स्त्र्याख्यो
इति किं ग्रामणीः। सेनानीः। खलपूः॥ ३ ॥ ॥श्रीः॥ ॥श्रीकृष्णः॥ ॥

राम॰
१३७

धात्वादिति दन्तस्य संज्ञा कथं वस्तिशीनयोः पातेः नघंतादंगादुत्तरस्येति समुदायस्य नदीत्वान्नरवयवभूतावादूतावाप्यितयोः क्वौ अस्येत्वादुः वर्णयो
रेव संज्ञा समुदायधर्मस्य स्त्रीत्वस्यावयवस्यारोपात् कृत स्त्रियामपि भवति। अत्र च लिंगमियङुवङ्स्थानप्रतिषेधइति नेयोरुहनदीसंज्ञयोः स
मावेशो न स्यात् एकविषयत्वात्। इति किमिति डे राम धा स्तोऽभ्यस्तत्र एवं घगाव्यग्रहणात् आयो न भविष्यतीति मन्यते। मात्रे दुहित्रे इति न घृतश्च
तिक्रमकाश्यग्रहणेन स्त्र्यर्थं स्यात् वदु पितृकइत्यत्रे सज्ञापकं ऋकारान्ता नासंज्ञा त्वावस्या। ग्रामणीः खलपूरिति। ऋयोदाहरणं मेतत्त्वं बुध्यन्तेवाद्

।अथाख्याग्रहणं किमर्थं यावता स्त्रियावित्येतावतैवार्थे सिद्धे नित्यस्त्रीत्वं लभ्यते तत्राह आख्याग्रहणमिति। आङ्पूर्वस्य ख्याङः इत्यस्य धातोर्ग्रहणमित्यर्थः। ख्य-
चित्वात् ग्रहणं किमिति प्रश्नः। शब्दार्थस्त्रीत्ववृत्ति। आख्याग्रहणसदंतरमनपेक्ष्य योऽस्य स्वयमेव स्त्रियमाचष्टे तेऽस्याख्यायते इत्यर्थः। शब्दप्रभृतीनां तत्त्वव्याप्ति-
गानां शब्दार्थः एवं स्त्रीत्वमिति॥ तद्धि स्वस्थे निनदी संज्ञा भवत्येव। एवं यट्प्रभृतीनां गुणशब्दानामपि शब्दार्थ एव स्त्रीत्वं तथा च पटुरानीयता मित्युक्ते
स्त्रियमप्यानीयकता भवतीत्यन्ये त्वाहुः। आख्याग्रहणं ग्रामण्यौ क्विप आश्रीयते। स्त्रियमेव पा वाच्यातेन तु लिंगान्तरयुक्तं इति ग्राम णी खलप्व शब्दाद्
योक्त क्विपा शब्दत्वेन त्रिलिंगत्वात्स्त्रवतीति। ग्रहणप्रभृतीनां तु स्त्रीविषयत्वाभावात्। तद्धि स्वस्थे यत्नके वलस्य स्त्रीशब्दस्यैवानुवृत्तिर्न हि माग्रहणस्य

॥ आख्याग्रहणं किं शब्दार्थे स्त्रीत्व एव यथा स्यात्। पटातेरात्मेभाजूः।
ग्रामण्ये स्त्रियै। खलप्वे स्त्रियै। नदीप्रदेशाः आपालघास्त्ये वृमाद्यः॥ ॥

ति भवतीति। तेषामाह। पूर्वस्य ध्यायतेः क्विपि संप्रसारणे आध्येः आलापेऽस्य तत्रापि न स्यात्। तस्मात्सर्व एव प्रकारस्त्वाश्रयणीयः कथं तर्हि श्रीसुदाहरणं
ग्रामण्यो स्त्रियै खलप्वे स्त्रियै इति उच्यते क्विपा शब्दत्वेऽप्येतयोः पुंसि सुखावृत्तिः पुंस्त्वमपि वर्त्तयप्रवृत्तितो धर्मः पटुतरग्रामनयने नाम एव खलप्वनम्
क्रियाध्यानं तु स्त्रीपुंससाधारणमिति विशेषः। अथ मलिंगग्रहणं चाप्रयोजनं किं शुमासाः॥ यः शास्त्रः प्रथमस्त्वात्तु प्रयुक्तं ङ्भमभिधायस्य श्वाघेनके
नचित्त्वकारान्तरेण लिंगान्तरप्रयुक्तं ड्रूमान्तरमाह। तस्य तदानीमस्त्रीत्वात् भाषासंज्ञा विधीयते। क्विपि कुमारीयति। कुमारीयतेः क्विप् कुमारी ब्राह्मणः।
तस्मै कुमार्यै ब्राह्मणाय। लुप्। लुप्त लुब्ध इति लुप्। खरकुघे ब्राह्मणाय॥ ॥ ॥७ ५॥ ॥७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प८१२

१३८

यद्यप्यत्र पुंक इवङ्भावात् स्त्रीत्वमप्यस्ति तथापि स्वाश्रयस्य पुंस्त्वस्यानिवृत्तेर्न स्त्रियामेव वर्त्तत इति आख्यो ग्रहणान्न प्राप्तिः। समासान्तः। अतितन्त्रे ब्राह्मणाय।
अयं वे स्त्रीविषयत्वात्। सिद्धं समासेन स्वरवयवस्तु स्त्रीशब्दः स्त्रियामेव वर्त्तत इति तदानीमेव संज्ञा तत्र श्वकारीसंज्ञापक्षे समुदायस्य न घटत्वात् कार्यसिद्धिः
तदन्तपक्षे त्वङ्गाधिकारेण एकवचनं तु तरपदस्य चेति वचनात्। अतितन्त्री वंधुरीत्यत्रापि नदीवंधुनीति स्वरः सिद्धः। यथा प्रवृत्तिपदस्य विशेषणात्।। किं वल्लु
योरपि पूर्वो स्त्रियामेव वर्त्तितव्यस्थाद्यपि तद्विशेषणेनार्थान्तरे वृत्तिः। तत्रार्थान्तरसंसर्गात्याणेयान्तरगत्वात् तन्नामसंज्ञासमपि यस्या स्त्रिलिङ्गान्तरयोगेतस्य च
बहिरङ्गत्वान्न निवर्त्तिष्यते। यद्येवं इयुवुस्थानप्रतिषेधे येण स्थानप्रतिषेधे प्रसंगो यवयोरियुवुस्थानत्वात् यथाह्यवयवस्य स्त्रीविषयत्वात् समु
दायस्य संज्ञा भवति। तथा वयस्येयुस्थानत्वात् समुदायस्यापि स्थानस्यापि प्रतिषेधप्रसंगो यथाधिगेआध्याविति सिद्धं तं गनूपग्रहणात्।

नेयङुवङ्स्थानावस्त्री।। पूर्वेणातिप्रसक्ता नदीसंज्ञा प्रतिषिध्यते। स्त्रियाः स्थानौ इयङुवङोः स्थानमनयोरिति इ
यङुवङ्स्थानौ तौ यू नदीसंज्ञौ न भवतः स्त्रीशब्दं वर्जयित्वा हे श्रीः। हे भ्रूः। अस्त्रीति किं हे स्त्रि। ४ ।। ।।७।।

पस्यांगस्येयुवौ प्रतिषेधादंगस्येय ङ्वङ्विधानसामर्थ्यादंगस्याक्षेपः तेन यस्यांगस्येयङुवङौ निर्दिष्टौ तस्य नदीसंज्ञानिषेधः। आक्षेपे इत्यत्र लव
यवस्यांगत्वं नास्ति आगस्येरनेकाच इति यणा विधानात् इयङुवङ्स्थानता नास्तीति निषेधाभावः। एतदृश्यमेव तत्र स्थानग्रहणं इयङुवङोर्यत्र
स्थितिः तदा प्रतिषेधो यथा स्यात् प्रसक्तत्वपवादेन बाधः तदा मा भूदिति। एवं ङिति ह्रस्वश्चेत्यपि अंगस्याक्षेपात् सोपि विधिरंगस्येव स्त्री त्विभ
वतिनावयवस्य शङ्कयोऽतिशङ्करूपेन्द्राह्मणायश्रियेऽअतिश्रियेब्राह्मणाय।। ।। नेयङु।। ।। इयङुवङोः स्थानमनयोरिति। वैयधिक
रण्येपि गमकत्वात् द्वीहिः आत्मेत्वधिकरणेल्युटं विधायकत्वं शिष्याः समासं कुर्वन्ति। अथ कथं विमाननासु भ्रुकुतः पितुर्गृहे इतिप्र
मादरवापंपादः अन्येत्वाहुः अनित्योयन्निषेधः सकृद्गत्वानात्तथा चपरिभाषा सत्हहमनित्यदेव इन्दुमिति। अत्र वज्ञापकं न
दोदावचनमित्याहुः।। ४ ।। ।।

रा॰म॰

१३८

© Dharmartha Trust J&K. Digitized by eGangotri

।।वा॰मि।। आमि इत्यपि षष्ठीबहुवचनस्य ग्रहणं न तु द्वितीयैकवचनस्य । नदीकार्याभावात् । नापि सप्तम्येकवचनस्य । नदीसंज्ञोत्र स्कालं ङेराम्नद्याम्नीभ्य
इति आमुविधानात् न चामि तद्विषयसप्तमीष्यते तस्मिन्निर्दिष्टे इति वचनात् अत आह । आमि परे वा नदीसंज्ञौ भवत इति । अरणामिति । नदीसंज्ञापक्षे ह्र
स्वनद्यापो नुट् । ङिति ह्रस्वश्च । यवज्ञस्वविशेषणार्थं यू इति नानुवर्त्तते तदा ह्रस्वस्यापि स्यात् मात्रे दुहित्रे इति तस्मान्नेहानुवर्त्तते । न चैवमपि विशेषणं प्रक
ल्पेत यू ह्रस्वौ वेति यदि पुनः ह्रस्वौ अथ ह्रस्वो न यङ्वस्थौ एवेति प्रतिषिद्धं नेमं प्रतिषिद्धम् आह । यं एह्रस्वावितिनतदेवंविज्ञायमानः ह्रयोर्ह्रस्वावि

॥ वामि ॥ पूर्वेण नित्ये प्रतिषेधे प्राप्ते आमि विकल्पः क्रियते । इयङ् वङ् स्थानौ आमि परतः वा नदीसंज्ञौ न भवतः ।
श्रियां । श्रीणां । भ्रुवां । भ्रूणां । अस्त्रीत्येव । स्त्रीणां ॥ ङिति ह्रस्वश्च ॥ दीर्घस्य न प्राप्नोति । इयङुवङ्स्थानयोश्च प्रतिषि
द्धा । तस्मात् ङिति वा विधीयते । ङिति परतो ह्रस्वश्च यौ संबंधी स्त्र्या । अ इयङ्स्थानौ च स्त्र्या नदीसंज्ञौ भवतः । कृत्यै । कृतये ।
धेन्वै । धेनवे । श्रियै । श्रिये । भ्रुवै । भ्रुवे । अस्त्रीत्येव । स्त्रियै । स्त्र्याख्यावित्येव । अग्नये । वायवे । भानवे । कृतये । धेनवे । अ
सखीति किं । सख्या । सख्ये । सख्युः । सख्यौ ॥ ५ ॥ ॥ छ छ ॥ ॥ छ छ ॥ ॥ श्रीः ॥ ॥

ङिति केचिद्यौ ह्रस्वौ सवर्णीति तदाह ह्रस्वश्च यौ संबंधी स्त्र्याख्य इति अत्रापि समुदायधर्मस्यावयवे आरोपात् ह्रस्वयोः स्त्र्याख्यत्वं । तदन्तविशे
षणां वा । इयङुवङ्स्थानौ च यू इति । न चैकं यू ग्रहणमनुवर्त्तते । तच्च ह्रस्वविशेषणम् एवोपक्षीणं तत्कथं पुनर्यू इति लभ्यते । उच्यते चकारेणाक्षि
प्यते समसंज्ञिकः समुच्चयार्थः । इयुङ्वङ्स्थानावित्ति च प्रकृते यो रेव तत्स्था नान्यामिति अर्थाद् यू इति लभ्यते । स्त्रीलिंगात्वादनुवर्त्तनं तु परस्येन ह्रस्ववि
शेषणमिति न कश्चिद्दोषः ॥ ॥ छ छ ॥ ॥

का० प० १२

१३९

शेषो॥ ॥शेषइत्यादि। पूर्वाद्धस्याधिकारो शिषश्च असर्वोपयोगे विपूर्वो निशपः इति पठ्यते। तत्र शिषश्च पश्चेकर्म्मणोपेरन्। ह्रस्वइति वर्त्तत इति। अन्यथा ग्रामणप्रादेरपि स्या
त्। अस्त्रियाख्यत्वेन शेषत्वात्। यस्य नदीसंज्ञा न विहिता तस्य शेषत्वे मात्रे दुहित्रे इत्यत्रापि स्यादिति मत्वा इच्छतीति कश्चित्। इतरस्तु ह्रस्वविशेषणार्थे प्रत्ययस्यानुवृ
त्तिमाश्रित्याह ह्रस्वमिति। ह्रस्वान्तमित्यर्थः। यदाह इवर्णोवर्णान्तमिति कश्चित्तु ह्रस्वे यवर्णोवर्णान्तमिति पाठः। ह्रस्वान्तं कोपदस्य इवर्णउवर्णश्च नदन्तमित्यर्थः। ह्रस्वेन
शेषस्य विशेषणात्तदन्तविधिः। एवं चामरकं तिष्ठ विशब्दस्य प्रतिषेधः। न तत्संबन्धिनः इकारस्य किं सिद्धं भवति इह शोभनः सखा अस्य सुसखिः सुसखेरागच्छ
तीति घिसंज्ञा सिद्धा भवति। न ह्ययं समुदायः सखिशब्दः तदन्तविधिश्चेह ग्रहवलवता प्रातिपदिके न प्रतिषिद्धः। ह्रस्वमात्रस्य तु संज्ञाविधौ सखिशब्दसंबन्धस्य
प्रतिषेधादिहापि न स्यात्। यदि तदन्ते निषेधो न भवति यस्येति चेत्यत्र इवर्णस्य इति पदुहाहरणं। सखिशब्दात् सख्या शिन्धी भाषायामिति ङीषि सखिरिति

॥शेषो घ्यसखि॥ ॥ह्रस्वइति वर्त्तते। शेषोत्र घिसंज्ञो भवति। सखिशब्दं वर्ज्जयित्वा। कश्च शेषः।
ह्रस्वमिवर्णोवर्णान्तं यन्न स्त्र्याख्यं स्त्र्याख्यं च यन्न नदीसंज्ञकं स शेषः। अग्नये। वायवे। कृतये। धे
नवे। असखीति किं। सख्या। सख्ये। सख्युः। सख्यौ॥ ॥५॥ ॥७ ॥ ॥ ॥

एम०

१२९

ति ख्यिते ईकारस्य लोपः असति तु लोपः सति तु लोपे ज्ञमवर्णा दीर्घस्य पूर्वप्रत्यन्तद्भावात् सखीमतिक्रान्तो तिसखिः अतिसखेरागच्छतीत्यत्रापि घिसंज्ञाप्र
तिषेधः स्यादिति तत्रोपपद्यते तत्पर्यन्तद्भावेन सखिग्रहणेन ग्रहणे समुदायस्य सखिशब्दान्यत्वात्। यदा खलु पुंल्लिङ्गेप्यतिसखेरिति भवति तदा कः प्रसंगोप
दन्तवद्भावेन स्यात्। एवं तर्हि तत्र सत्त्वे इकस्य लोपस्य तच्छितए वोदाहरणं नेच्छीति परतः यत्तु तत्रोदाहरिष्यते सोना सखा वा सो दृष्टः। शेषग्रहणं चिन्त्यप्रयो
जनं। एकसंज्ञाधिकारादेव हि स्त्रियाख्यस्य ङिति नदीसंज्ञापक्षे घिसंज्ञा न भविष्यति॥ ॥ ५ ॥ ॥७ ७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥पतिसमास॥ ॥सिद्धप्रामिति प्राप्तापाभिन्नार्थः। न पुनर्न्निष्पन्नायां न हि ष्पन्नायां नियमेन निवृत्तिः शक्यावक्तुं। पतिशब्दः समास एव घिसंज्ञो भवती
ति किं पुनरिदं समासावयवस्य पतिशब्दस्य संज्ञा विधीयते। आहो स्वित्तदंत समासस्य यदि समासस्य पतिश्च गृहं च पतिगृहे अत्र इदूधत्यादि एवं निशब्दो
न प्राप्नोति। अथ पतिशब्दस्य प्रजापतिनेत्यादावंगस्य घिसंज्ञा कार्यं न प्राप्नोति अरुणपतिशब्दस्याङ्गाधिकारे सावड्वत्यस्येति अंगस्याधिकार्यं
भविष्यति। अथ वा पतिः समास एवेति नियमेन किं आवर्त्यते। असमस्तः पतिशब्दः नासति शब्दस्याख्यासमासाकेन नदंतस्याख्या वर्त्यते। अथ
कथं नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ। पंचस्वापत्सु नारीणां पतिरन्यो विधीयत इति घिसंज्ञा देवदत्तयः कुर्वीति। अथ सर्वत्रैवासखिपती इति क
स्मान्नोक्तं। उत्तरत्रयस्पुरे विकल्पो यथा स्यात्। किंच असखिपती इत्युच्यमाने पतिशब्दस्य समासेपि न स्यात्। पतिगृहे इति तथा वसखिशब्दस्य

॥पतिः समास एव॥ ॥पतिशब्दस्य घिसंज्ञा णोसिद्धायामयं नियमः क्रियते पतिशब्दः समास एव घिसंज्ञो भवति। प्रजा
पतिना प्रजापतये। समास इति किं। पत्या पत्ये। एवकार इष्टतोवधारणार्थः पत्युर्मुष्टिना हृढमुष्टये॥ ॥षष्ठीयुक्तः छंद
सि वा॥ पतिरिति वर्त्तते। पूर्वेणानियमेनासमासेन प्राप्नोतीति वचनमारभ्यते। षष्ठ्यंतेन युक्तः पतिशब्दः छंदसि विषये
वा घिसंज्ञो भवति। कुलुंचानां पतये नमः। कुलुंचानां पत्ये नमः। षष्ठीग्रहणं किं। मया पत्या जरदष्टिर्यथासः छंदसी
ति किं ग्रामस्य पत्ये॥ ॥

समासेन भवति समासेपि गृहे गृहस्यापि विति वा नियमः पूर्वनियातस्या षष्ठी॥ ॥षष्ठ्यंते वचनश्रु
तेनेति षष्ठ्या विभक्त्या युक्त इति तु न भवति। तथा हि षष्ठ्यामित्येव ब्रूयात्॥ युक्तग्रहणमनर्थकं स्यात्। षष्ठीग्रहणं किमिति। केन विधोगस्याव
जनीयत्वाद्युक्त इत्येव विशिष्टो योगः प्रसेव्यत इति मन्यते वचनमंतरेण विशेषो दुर्ज्ञान इत्यु त्तरं अपमत्र योगविभागः कर्तव्यः। षष्ठीयुक्तः
छंदसि षष्ठीयुक्तः पतिशब्दः छंदसि घिसंज्ञो भवति। ततो वा छंदसीति वर्त्तते तत्र यत्र यावद्यशास्त्रे कार्यं तत्सर्वं छंदसि विकल्पेन भवति।
सर्वविधयः छंदसि विकल्प्यंत इत्यर्थः। उभयत्र विभाषा चेयं बहुलं छंदसीत्यादिकस्तस्या एव प्रपंचः॥ ॥९॥ ॥१॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रस्वं। इहमपि ह्रस्विमित्यत्र ह्रस्वात्कारो न ह्रितशतिषत्वार्थं। ह्रस्वसंज्ञया गुरुसंज्ञायाः समावेशः स्यात्। अतत त्तदित्यत्र तु सत्वद्भावनिवृत्त्यर्थं लघुसंज्ञा यागुरु संज्ञया बाध्यस्यते। अतो ह्रस्वप्रदेशेषु संयोगपरस्यापि मात्रिकस्य ग्रहणं यथा स्यात् न लघुप्रदेशेषु मा भूदिति यथाप्रदेशं संज्ञाद्वयं कर्त्तव्यं। यस्मात्। कर्त्तेति लुट्। करिष्यतीति लृट्। वहुनोः स्मरतीदं। यस्मादिति संज्ञिनिर्देशार्थमिति। ननु तदादीत्यनेन संज्ञा निर्दिश्यते तेन यस्मादित्यनेन तत्राहत तदादीति संबंधादिति। सति हि यस्मादित्यस्मिन् तदादीत्यनेन संज्ञा निर्देष्टुं शक्यते नान्यथा सति हि परामर्शनीये तदित्यनेन परामर्शो भवति। अन्यथा न तदादीति

ह्रस्वं लघु॥ ॥मात्रिकस्य ह्रस्वसंज्ञा कृता तस्यानेन लघुसंज्ञा विधीयते ह्रस्वमक्षरं लघुसंज्ञं भवति। भेत्ता छेत्ता। अचीकरत्। अजीहरत्। लघुप्रदेशाः पुगन्तलघूपधस्य चेत्येवमादयः॥ ॥संयोगे गुरु॥ ॥ह्रस्वं इति वर्त्तते॥ पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते ह्रस्वमक्षरं लघुसंज्ञं भवति। भेत्ता छेत्ता। अचीकरत्। अजीहरत्। लघुप्रदेशाः पुगन्तलघूपधस्य चेत्येवमादयः॥ ॥संयोगे गुरु॥ ॥ह्रस्वं इति वर्त्तते॥ पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते संयोगे परतो ह्रस्वमक्षरं गुरुसंज्ञं भवति। कुण्डा। शिक्षा। भिक्षा। गुरुप्रदेशाः गुरोश्च हल इत्येवमादयः॥ ॥दीर्घं च॥ ॥संयोग इति नानुवर्त्तते। दीर्घं च अक्षरं गुरुसंज्ञं भवति। ईहांचक्रे। ईक्षांचक्रे॥ ॥यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं॥ ॥यस्मात्प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद्वा तदादि शब्दरूपं प्रत्यये परतोऽङ्गसंज्ञं भवति। कर्त्ता हर्त्ता करिष्यति। हरिष्यति। हरिष्यति। औपगवः कापटवः यस्मादिति संज्ञिनिर्देशार्थं तदादीति संबंधात्। प्रत्ययग्रहणं

संबद्धं एव स्यात्। नेविंशः इत्युपसर्गात् क्षिपिरस्तीति यघपि नित्रधातुविशेषणं नेः परो यो विशिरिति धातोरस्तत्र विशेषानात्। नियमविधिरपि धातोरेव नोपसर्गात् तथा चोपसर्गस्यापि तत्रान्वयोऽस्तीति यत्तदेवमुक्तं॥ ८ ॥ ॥ ॥७ ९॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

विधिग्रहणं किमिति यस्मात्प्रत्यय इत्युक्ते साकांक्षत्वात् । यस्माद्विधीयते तस्य ध्याहरिष्यत इति प्रश्नः । परश्च तस्याप्य आहारः स्यादित्युत्तरं । स्त्री इयतीति
इदं यत्परिमाणमस्याः । किमिदंभ्यां वो घः इत्यादेशः इदं किमोरीश्की यस्येति चेति लोपः उगितश्चेति ङीप् । स्त्रीशब्दात्तसोर्हल्ङ्यादिलोपः । अत्र इयच्छब्दे पर
तश्चांगसंज्ञाणात् भसंज्ञा चेति तन्निमित्तो यस्येति लोपः प्रसज्येत तत्र शादेशाप्ययो यस्येति लोपः नस्याप्यसिद्धत्वेन भवति प्राग्यादसिद्धत्वमिति केचित्
उपगमात् स्यान्निवृत्ता वोपिनाक्षिपदांतरनिरपेक्षे हीयतीशब्दे तु साघमाने स्त्रीशब्दो नानादिष्टादचः पूर्वः । ननु क्रियमाणेपि विधिग्रहणेऽस्मादेवसं
ज्ञात्प्रत्ययत्वं तत्र स्त्रीशब्दात् विभक्तेः प्रत्ययस्य विधिरपि प्रत्ययस्य प्रत्ययपरः । नैष दोषः । सति विधिग्रहणे प्रत्यासत्तेर्यस्माद्यः प्रत्ययो विहितः त
स्मिन्नेव प्रत्यये परतः तदादेशमितस्यार्थो भवति । इह च स्त्रीशब्दाद्विहितो नुप्रः श्रूयमाणोऽपि न ततो विहितः । न तादिग्रहणमनर्थकं यत्तदोर्नित्यस
म्बन्धादेव यस्मात्प्रत्ययो विधीयते तदादि तदंगमित्यर्थलाभात् ॥ अत आह । तदादिवचनमिति । सामान्ययोर्विकरणः आदिशब्देन शबादेर्ग्रहणं अस्मादिति

॥ विधिग्रहणं किं । प्रत्ययपरत्वमात्रे मा भूत् । स्त्री इयती । तदादिवचनं स्यादिनुमर्थं । करिष्यावः । करिष्यामः ।
कुंडानि ॥ ७ ॥ ॥७॥ ॥

तदादिग्रहणेऽयच्छब्दस्याध्याहारात् प्रत्ययविधिस्तस्मै वसंज्ञा स्यात् ननु ततः आरम्भात् सात्प्रत्ययाद्यः संघातः तस्यात्तत एव करिष्यावः पचावः । टी आवः
तुदावइति आदावर्दतो यीयजो तिदीर्घ निस्यात् स्याद्यंतस्य समुदायस्यानंगत्वात् ततश्च याद्यावइस्यादेव स्यात् । पयणं जौ यङ्गुंतस्य लोपो ओर्वे
लीति यलोपे रूपं कुंडानीति । यदा यनुम्परादिः तदा सुपि चेति दीर्घः सिध्यति दधीनीसादेऽप्यनकारान्तत्वान्न सिध्यति पूर्वं तिपदेन तु सामानीत्यादि
वासिध्यति यदा त्वमक्तपक्षः तदेतत्प्रयोजनमादिग्रहणस्य पूर्वं तिपक्षे तु कृतत्रास्थितइति प्रयोजनमेतत् । ननु च शतिपदिकांतनुमविभक्तिषु
चेति नुमग्रहणं कुर्वतः सूत्रकारस्याभक्तो नुमिति अभिप्रायो लक्ष्यते । अन्यथा माषवापाणीत्यत्र प्रातिपदिकांतनत्वाद्विभक्तिनकारत्वाह्वाण
त्वासिद्धेरनर्थकं तत्स्यात् तेनैतत्स्पष्टमेवं ॥ ॥ तत्र हि समासप्रातिपदिकांतो नगरस्यनेकिं तहि पूर्वपदाद्दिपदतुष्टत्तेः तदाश्लिष्टणो नरद्रप्राति

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ ५॰ १३
१४१

पदिकस्यांतोग इत्युक्ते समुदायभक्त एवायमनुम् उत्तरपदप्रातिपदिकांतो न भवति ततश्च यथा गर्गाणां भगिनी गर्गभगिनीत्यत्रा णत्वं न भवति तथानुमो यि
न स्यात्। ननु हीदानीमिदं भवति गर्गभगिणीति भवति यदेतद्वाक्यं भवति गर्गाणां भगो गर्गभगः सोस्या अस्तीति तदा यदुत्तरपदस्थत्वात् पूर्वपदान्तसंज्ञायामेवे
ति नियमाभावः तद्यथा मातृभोगाय हितो मातृभोगीण इति। एवमपि माषाणां वपनं मुद्गलमस्याः माषवापिणी अत्र न प्राप्नोति। ङीवत्तोत्तरपदस्थत्वात्। ननु न का
रः नकारेणाव्यवहितः। कथं गार्ग्यकाकोपपदस्थानो ङोङः स हि समासवचनं प्राकृ सुवुलमं तेः। अतः स्यादयं क्विपमाणानुभाषी हंसाध्यपतीति मत्वानुमग्रहणं कृ
तं। यदि तदादीनुच्यते कर्मेत्यादेनेन प्राप्नोति। न ह्यत्र तदादि किंचिदस्ति किं तर्हि तदेव व्यपदेशिवद्भावाद्भविष्यति। वाक्यभेदाद्वा यस्मात्प्रत्ययविधिस्तद
ंगं तदादि च इह प्रकरणादि प्रत्यये गमिति इयता सिद्धे गुरुनिर्देश एव लिंगं वाक्यभेदस्य। अथ कथं भिनत्ति संचस्करतुरित्यत्र सशब्दस्य समुदायः स च समुदा
यस्यांगसंज्ञा गमसंज्ञा कथं वन स्यात् इह तस्यैवाग्रहणं भवति तदादेर्वा निवेदंतत्रापि तदादि। इदमपि तदादि कथं नेत्येवं विज्ञायते सस्मादिरस्य तदादीति क
थं तर्हि तस्यादिस्तदादिस्तदादिस्तदादेशि दिस्येतितदादि इत्यनुस्वारे कस्यादिशब्दस्य लोपः एवं हि विज्ञायमाने भिनत्ती त्यत्र यस्मात्प्रत्ययविधिर्भि
देः तस्मादिर्भकारः सस्मादिः सशब्दस्य समुदायस्येति सिध्यति एवं संचस्करतुरित्यत्रापि तन्मध्ये निपतितत्वात् ग्रहणेन गृह्यत इति चात्रेभ
यत्र संज्ञासिद्धिः। अथात्र श्नमः प्रत्ययस्य भिदशब्दस्यांगसंज्ञा कस्मान्न भवति। भवतु को दोषः गुणस्तावत् सार्वधातुकमपिदिति ङित्वादेव न भविष्यति।
इहत्वं न भिनत्ति अतो दीर्घो यञीति दीर्घः प्राप्नोतीति ङीतितत्र वर्त्तते अथवा यस्मात्प्रत्ययविधिरिति वचनाद्यस्मिन्प्रत्यये विधीयमाने यत्ते च स्मा
निर्दिष्टं तत्र न देवांगं श्नम्विधीयमाने यत्पञ्चमीनिर्दिष्टं प्रकृतिरूपं। न तेन तत्परतः येन तत्र परतो भिदभत्तयः नाप्येवं स्मानिर्दिष्टा इति संज्ञा

भाव्यः॥ ॥७॥ ॥७॥ ॥

राम॰
१४१

© Dharmartha Trust J&K. Digitized by eGangotri

अर्थेत्वर्थमिति। चतुर्थ्यर्थे निरर्थेति समासः। अस्मिन्नत्र चतुर्थ्येकवचनस्य विधिरित्यसति पुनः प्रत्ययस्त्रीप्रत्ययग्रहणे अंगशब्दस्यासंबंधिशब्दत्वाभावात्
वस्तुतोऽमात्राश्रयत्वं स्यात्। सति तु सप्तमीनिर्दिष्टप्रत्ययग्रहणेऽगशब्दः संबंधिशब्दो भवति। ततश्चांगसंज्ञा भवति। अचीत्युक्ते यस्ये पक्षे यदंगं तत
त्रतस्याजादौ विति विज्ञानादर्थ शब्दे यरतस्य तु वद्रेण भविष्यतः। किं पुनरत्र संज्ञायां प्रयोजनमंगस्येत्यधिकारः। नेतदस्ति यद्येनदंगस्येत्येतत प्रत्ययप्र
त्ययस्यामीत्येवमपि प्राकरोतत्प्रे हि इष्टस्यायसर्गस्यादोषः। पुनः नैष दोषः। प्रत्ययग्रहणेऽयस्मात्स विहितः तदादेर्ग्रहणं भवति। क्व पुनरेषा परि
भाषानत्वेषाप्यत्रैव योगविभागेन सिद्धा यस्मात्प्रत्ययः विधिः तदादि प्रत्यय इत्येतावानेको योगः। प्रत्यये गरन्यमाणे यस्मात्तत्स्य विधिस्तदादि
गन्त्यत इत्यर्थः। तेन स्त्रिसादि रिसादौ प्रत्ययः स सप्तम्या निर्दिश्यते तत्र तदादेर्ग्रहणं तेन देवदत्तो गार्ग्य इति संघातस्याश्रितस्वरो न भवति। सुपश्च

॥पुनः प्रत्ययग्रहणं किमर्थं। लुप्ते प्रत्यये मा भूत्। तास्त्वर्थं।
त्वर्थं। अंगप्रदेशाः अंगात्पित्येवमादयः॥ ॥१४॥

त्मनः वाजिसत्राविस्यनेन तदादिनियमः। तत्र सुपां कर्मणो विशेषणात्तदन्तविधौ सिद्धे महान्तं पुत्रमिच्छतीत्यत्र तदादिनियमेन सुपा
सः। पदितदादिनियमः क्रियते स्त्रीप्रत्ययेऽपि स्यात्। ततः ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे परमकारीषगंधीपुत्र इत्यत्र न स्यात्। यस्मत्ब
पदं न तत्प्यङन्तं यच्च तदन्तं न तत्पूर्वपदं। नैष दोषः। नेयङुवङ्स्थानावस्त्रीत्यतोऽस्त्रीमनुवर्तते। तद्बलस्तत्रोपपदार्थकत्वेन प्रकृतमिहार्थपदार्थ
कं संपद्यते। तदयमर्थो भवति। प्रत्ययग्रहणे तदादिगृह्यते। स्त्रीचिन्नाभिधीयते स्त्रीप्रत्यये तदादिनियमो नास्तीत्यर्थः। यद्येवं अतिकारीष
गंध्यापुत्रः अत्रापि प्राप्नोति प्राधान्यं या स्त्री तस्यामेव तदादिनियमः प्रतिषेधः। अप्रधानस्त्रियां तु तदादिनियमो भवत्येव तेन यावानुच्छदः
स्त्रियं प्राधान्येन प्रतिपादयति तावत एव तस्य ग्रहणं भवति। तद्ग्रहणे तु गतिकारकपूर्वस्यापि ग्रहणं भवतीति गतिरनन्तर इत्यनेन तत्र ग्रहणे
नन्नापि पिष्यति॥ ॥७॥ ॥

सुप्तिङंतं। ॥सुप्तिङिति प्रत्याहारग्रहणमिति सु इति सप्तमीबहुवचनस्य ग्रहणं न भवति यदि स्यात् ङिसंबुद्ध्योः परत्वाभावादेव नलोपस्याप्रसंगात् न ङि
संबुद्ध्योरिति प्रतिषेधोनर्थकः स्यादिति भावः। सप्तमीबहुवचनस्य च पकारेण प्रत्याहारः न कपः पकारेणानन्यार्थत्वात्। न च स्वरार्थः पकारः। यद्
यत्र कपः पकारेण प्रत्याहारः तदा स्वरविधावपि तथैवेति सुप्त्वादेव स्वरसिद्धेः पित्त्वमनर्थकमेव स्यात्। यदि च सुग्रहणेषु कपः पकारेण प्रत्याहारो
ऽभिमतः स्यात् सुप्यसर्वनामस्थानेऽन्येव ब्रूणाता साटिषि तिगुरुनिर्देशोनर्थकः स्यात्। ब्राह्मणराजीति पदत्वाद्रुत्वविसर्जनीयौ न तु यस्मात्प्रस

॥सुप्तिङंतंपदं॥ सुप्तिङिति प्रत्याहारग्रहणं सुबंतं तिङंतं च शब्दरूपं पदसंज्ञं भवति। ब्राह्मणाः पचंति।
पदसंज्ञायामंतग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदंतविधेः प्रतिषेधार्थं। गौरी ब्राह्मणितरा। पदप्र
देशाः पदस्य पदादित्येवमादयः॥ ॥८॥ ॥७ ७॥ ॥७ ७॥ ॥

यविक्षिप्तदारीत्यनुवृत्तसुप्तिङ्भ्यां विशेषणादेव तदंतस्य ग्रहणं सिद्धं नार्थोंतिग्रहणेन तत्राह पदसंज्ञायामिति। इहासत्यंतग्रहणे सुप्तिङामेव सं
ज्ञा स्यात् ततश्च ग्रिग्रिघिरूपादौ सात्पदाद्योरिति षत्वनिषेधः स्यादित्यामंत्रकाक्रियमाणेऽंतग्रहणमुक्तस्यार्थस्य ज्ञापकं संपद्यते गौरी ब्राह्मणि
तरेति तरप्तरवं न स्य घसंज्ञायां सत्यां तत्रोत्तरपदे परतो गौरीशब्दस्य पूर्वं ङ्यापोः संज्ञाछंदसोर्बहुलमिति वा पाक्षिकं ह्रस्वत्वं स्यात्। तरपि तु परतो ब्राह्मणीशब्दस्यान स्या
त् ततश्च गौरी ब्राह्मणीतरेति स्यात् गौरब्राह्मणितरेति चेष्यते तेन गोतुल्यमासप्रदर्शनपरं वा कंजको नत्वेतत्कार्योदाहरणं। गौरब्राह्मणितरे
तिसमासेरूपं ८ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।नं क्ये।क्य इति मच्च क्यप्रमृत्तमिति। घं न्नात्वर्णां समनेनास्य क्यस्याग्रहणात्र भवति। प्रयोजनाभावान्नान्तावन्यस्य पत्र न
लोप्सच्च न लोपः। प्रयोजनं नस्य पदत्वे अप्रातिपदिकत्वात् सुबन्तमिति चुक् नैवांस्मिपि विधिं अर्थमेतत्त्र भवति न नुक जात्यः सर्व
सुबन्ताद्विधीयंत इति प्रत्ययलक्षणेनात्र सिद्धं पदत्वं नार्थ एतेन नत्र इमिद्धे सतीति। नान्तमेवेति। कारवन्नान्तमिसेवंतु विपरीतनिय
मो न भवति न हि संबुद्धौ मिति निषेधात्। वाच्यनीति जन्यपदत्वाभावो लुक्त्वज श्वेन भवतः। पितुगोमम मानासं नान्ता इव कानभ
वाते ला न्मेप्यरस्ताङ्कुः तेषां मङ्कु अथ पैवानियमस्मामावर्त्त्यं प्रदर्शनीयं तपस्यतीत्यादौ ॥ ॥मितिच॥ ॥भवदीय इति पदत्वा

॥नः क्ये॥ क्य इति क्यच्क्यङ्क्यषां सामान्यग्रहणं नान्तं शब्दरूपं क्ये परतः पदसंज्ञं भवति। कच् राजीयति। क
ङ् राजायते। क्यष् चर्मायति चर्मायते मिद्धे सत्यारम्भो नियमार्थः। नान्तमेव क्ये परतः पदसंज्ञं भवति नान्यत्। वाच्यति
सुच्यति। ॥मितिच॥ यचि भमिति वक्ष्यति तत्स्यापवादः पुरस्तादयं कर्षः। सिति प्रत्यये परतः शब्दरूपं पदसंज्ञं भवति। भवतष्ठ
क्छसौ। भवदीयः। ऊर्णायुः। ऊर्णायुः। ऋतो मरण्। छंद इति घस। ऋत्विष्यः॥ ॥स्वादिष्वसर्वनामस्थाने॥ स्वादि
ष्विति सुशब्दादेकवचनाद्यारभ्य॥ ॥
न्नाम्बं दूशस्पापुरिति पदसंज्ञया निरस्तत्वात् यस्येति लोपाभावः। एवमन् त्विषदृत्वे गुणो न भवति बकारोऽनुक्तसमुच्चयार्थः। ते
न भुवन्तं धारयन्तो मर्त्तो छिद्रमितमो मत्वर्थ इति भसंज्ञां बाधित्वा पदसंज्ञा भवति भुवद्वसः यारपवङ्गाः॥ ॥स्वादिषु॥ ॥
स्वादिष्विति सुशब्दादेकवचनादिति॥ सप्तमीबहुवचनादारभ्य ग्रहणं न भवति। असर्वनामस्थान इति निषेधात्। परि
हि राजश्रित इत्यादौ सर्वनामस्थाने सुबन्तं इति मा ताप्याः संज्ञाप्य निषेधोऽभीष्टः। स्यात् तत्रैवासर्वनामस्थान इति ब्रूया
त्। अथ राजन्वानित्यादौ अन्तवीन्नि निषेध इति चेत्। न। लुमता लुप्ते प्रत्ययलक्षणाभावात्। तसौ मत्वर्थ इति पदसंज्ञावा
धनाय पदसंज्ञाविधानाच्च॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ १३

१४३

ऽऽकडारपदइति। यदि पुनः सप्तमीबहुवचनमर्थवत्ताएकविंशतिः प्रत्ययाग्रहणेन तदन्तसि कग्रहणमेव कुर्यात। अनुवर्त्तयेद्वा॥ असर्वना
© Dharmartha Trust J&K. Digitized by eGangotri

घप्रयोजनंमनसादीव्यतीतिकर्मत्वाद्द्वितीयाप्रसंगः।करणत्वाच्चतृतीया।मनसः संज्ञायामित्यलुक्।मनसादेवी।इहवाहेतुर्देवयतेदेवद
शोपत्नुरनेनेति।अन्येत्विति तृतीयाप्रयोगेपि धातोः सकर्मकत्वात् गमितुं द्वीस्तादिनाः एपंतावत्स्त्रुणीकर्तुंपक्षेदोस्माकंमसंज्ञान
भवति।अणावकर्मकाच्चित्तिपरस्मैपदंचपरितर्हिसमावेशः अतएवदीव्यतीतिपरत्वात्तृतीयास्मामीतियपपित्तुनायंदोषःकर्मस
ज्ञापक्षेकरणसंज्ञायाअभावात्।समावेशेतुकरणसंज्ञायाअवकाशः।देवनाअक्षाःकरणाधिकरणयोश्चेतिल्युट्कर्मसंज्ञाया
अवकाशः।दीव्यंतेभवताअक्षाःभावकर्मणोरितियगात्मनेपदेअक्षानिसत्रतूभयसंज्ञाकार्यप्रसंगेपरत्वात्तृतीयास्यात्।नैषदोषः
कार्यकालेहिसंज्ञासंनिभावंज्ञतेश्चकर्मणिद्वितीयेसत्रपदस्याप्रस्तुत्वेनतदनवकाशमितिद्वितीयाभविष्यति।अयंतर्हिसमावे
शेदोषदीव्यंतेअक्षाःइतिकर्मण्यभिहितेपिकरणस्यानभिहितत्वात्तृतीयास्यात्।तथादेवनाअक्षाःइतितुकरणस्याभिहितत्वाने
पिकर्मणोनभिधानेनद्वितीयास्यात्।नैषदोषः।एकैवकारकशक्तिःसंज्ञाद्वययोगिनी।ततश्चैकस्मिन्नाकारेतिर्हितेन्याकारांत
रमप्यभिहितमेवभवति।शक्तेरेकत्वात्।परिक्रयणे।परिक्रयणशब्देधातुगानमेवोपसमाश्रित्यरघाप्यामित्येवरणत्वं।प्रत्ययमाप
निपातितत्वात्प्रत्ययोपसर्गाभावेपिक्रयणमितिनचनुपसर्गंस्थमाश्रित्यपरिक्रयपवरत्यनेनान।तस्यपश्चादुपसंनिपतितत्वेनबहिरंगत्वात्।वे
तनादिनेति।वेतनंभृतिः।वेतनंभृतिःनियतकालत्वमेवस्पष्टयति।नासंतिकःक्रमरणेति।परिशब्दःसामीप्यंद्योतयति।क्रयेणा
मासंतिकंस्वीकरणंनियतकालंतुतस्यसामीप्यमेवेतिपरिशब्दस्यार्थः॥ २२ ॥ ॥७॥ ॥७॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ आधारः ॥ ॥ आध्रियन्तेऽस्मिन् क्रिया इत्याधार इति। अथ आयस्यापि णवेत्याह इना अधिकरणोपन्न। क्रियापेक्षत्वात् कारकभावस्य
क्रियाग्रहणं परि क्रियाधारस्याधिकरणसंज्ञा कर्तृकर्मणोरेव स्यात् कर्तृस्था हि क्रिया भवति कर्मस्था वा कर्तृसंज्ञायाः कोऽवकाशः
पेकर्मस्था क्रियाः। पचत्योदनं देवदत्त इति। ननु च तत्र विप्रतिषेधः परत्वात् कर्तृत्वात्ति स्यादेव प्रसंगः। अयं तर्हि अवकाशः एवं तर्हि आपरोव
तेमोदकं इत्युक्तं सत्रे देवदत्तस्य स्थालीषस्थामोदकः कर्त्तीति। अथाप्यनवकाशा कर्तृसंज्ञा एवमपि पर्यायः स्यात्। अथ कर्मसं
ज्ञायाः कोऽवकाशः पेकर्तृस्था क्रिया आदित्यं पश्यतीति इति अतः कर्तृकर्मणोरेवाधिकरणसंज्ञा मा भूत् इत्यसंगादिस्तत्र आह कर्तृकर्मणोरि
॥ आधारोऽधिकरणम् ॥ आध्रियन्तेऽस्मिन् क्रिया इत्याधारः तत्कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणात् क्रियायाः प्रतिपद्य आधा
रस्तत्कारकमधिकरणसंज्ञं भवति। कटे आस्ते। कटे शेते। स्थाल्यां पचति। अधिकरणप्रदेशाः। मम्बधिकरणे विसेव
मात्पयः॥ ॥ अधिशीङ्स्थासां कर्म॥ पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते। अधिपूर्वाणां शीङ्स्था
आसां इत्येतेषामाधारो यस्तत्कारकं कर्मसंज्ञं भवति। ग्राममधिशेते। ग्राममधितिष्ठति। पर्वतमध्यास्ते॥ ॥ अभिनिविश
श्च॥ ॥ अभिनिपूर्वस्य विशतेराधारो यस्तत्कारकं कर्मसंज्ञं भवति। ग्राममभिनिविशते। यदि अभिनिवेशः पापसंज्ञा पस्मि
न्नस्मिन्नभिनिविशन्त इति। अन्यतरस्यामिति वर्त्तते परिक्रयणे संप्रदानमन्यतरस्यामित्यतः। सा च व्यवस्थितविभाषा विज्ञा
स्यादिह पुनः स्यात् क्रियाधारस्य भवति क्रियाधारभूतकर्तृकर्मव्यवधाने। न क्रियाधारस्यांगेनास्य ग्रहणं शक्यं विज्ञातुं करणसंज्ञाया
तमपग्रहणेन ज्ञापितमेतत् यथा कथंचित् क्रियाधारस्याधिकरणसंज्ञा न भवतीति मुख्यस्यापि तु कस्मान्न स्यात् इत्येनावनत्त हपिनपरत्वा
त् कर्तृकर्मसंज्ञाभ्यां बाधितत्वादिति गतमेतत्। आस्त इति कर्तृस्थायाः क्रियाया उदाहरणं। पचनीति कर्मस्थायाः। त्रिविधमधिक
रणं औपश्लेषिकं वैषयिकं अभिव्यापकं चेति कटे आस्ते गुरौ वसति तिलेषु तैलं इति। ॥ अभिनि। नेरल्गी स्यापूर्वनियमा
त् अभिनीति समुदायान् करणमित्याह। अभिनिपूर्वस्येति॥ ॥ अन्यथा ह्यभिपूर्वस्य निपूर्वस्य चेति ब्रूयान्॥ ॥ ११ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

१५

को॰ पद॰ १३

१५७

उपान्वध्याङ्वसः पपथस्येति। अर्थश्चादेोतिवृत्तिवचनः। अधिकरणोषष्ठ्यो अतुपथ्यस्योपोवाचकस्तस्येमर्थः। भोजननिवृत्तिवाचिन इति
यावत्॥ पद्माशीर्षेयोयस्य सप्तर्थः न स्पर्थंश॥ अस्यार्थस्य स्थानार्थस्य सर्थः। स्थानेपि हि शीङ्वत्तेनेजल्पाशय्य इतितेन ग्रामेति स्प्तीस
त्रार्थे ग्राममुपवसतीति भवति। अस्थानार्थत्वेनुपामउपवसतीति। तिमतर्हि प्रतिषेधोवक्तव्यः नवक्तव्यः। कथं नात्रापि पूर्वस्य वसेः ग्रा
मोधिकरणं। किंतर्हि अनुपसर्गस्य ग्रामेवसन् त्रिरात्रमुपवसति। एतदुक्तं भवति। विशिष्टाधारावच्छिन्नत्वेन निश्चिते देवदत्ते भोजननिवृ
त्तिविशिष्टकालं प्रतिपादयितुमिदं प्रयुज्यते ग्रामउपवसतीति तत्रांतरगत्वात प्रतीयमानवसिक्रियापेक्षो ग्रामस्याधिकरणभावः उ

उपान्वध्याङ्वसः। उप अनु अधि आङ् इत्येवं पूर्वस्य वसतेराधारोयत्तत्कारकं कर्मसंज्ञं भवति। ग्राममुपवसति
सेन॥ पर्वतमुपवसति। ग्राममनुवसति। ग्राममधिवसति। ग्राममावसति। वसेरनशनार्थस्य प्रतिषेधो वक्तव्यः॥
ग्रामे उपवसति। भोजननिवृत्तिं करोतीत्यर्थः॥ ॥कर्तुरीप्सिततमं कर्म। कर्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं
कर्मसंज्ञं भवति। कटं करोति। ग्रामं गच्छति। कर्तुरिति किं। माषेष्वश्वं बध्नाति॥ २३ ॥ ॥श्री॥ ॥छ॥ ॥

पवसनं तु सप्तम्येवो वकालमपेक्षत इति कालेनैवांतरंगः संबंधः ग्रामादिना तु बहिरंग इति अप्राप्तकर्मणि निमित्तान्तरिकं कर्मभव
ति। कर्तुरीप्सित। कर्तुः क्रियये सा दि। कर्तुर्यदाप्तुमिष्टतममिति यत्नोपः। कर्तुरिति वेप्सितापेक्षया कस्य चवर्त्तमानः इति कर्तरि
षष्ठी॥ ईप्सितमिति बुद्धोत्साद्दिनावर्त्तमानो क्तः क्रियये ति करणे तृतीया। कर्त्ता हि नाम यः क्रियामनुतिष्ठति। तेन कर्तुरुपदिष्टतम
मिसुक्तेप क्रियावेशात्सो कर्त्ताभवतितया कारणभूतयेतिगम्यते कर्त्रायदाप्तुमिष्यते तत्तमो आत्मापयातिर्यपिसर्थः। अप्सितश
ब्दोपमसमभिप्रोते हृटः ईप्सितोभिप्रेत इतिऋस्तित्रिणाशव आसु आमोप्पन आपत्तं स्थयामीन। आप्तुमिष्टमीप्सितमिति तत्रक्रि
याशब्दस्येह ग्रहणमिति दर्शितं। आप्तुमिष्टतममिति २३ ॥

राम॰

१५७

© Dharmartha Trust J&K. Digitized by eGangotri

।कर्म्मणाइति।अग्नेयस्यासहिम सृणाक्रियया मावाना मुमिछति। पयेवंपपाग्नस्य रक्तस्तोभ हरणो कर्तृचे ममपिसंप्रतिबंधनं। प्रतिकर्म्मितेन
न विवक्षितत्वात् माषाणां कर्म्मसंज्ञा न भवति तथा सार्थाहाय तस्त्रापि हीयमानं सार्थ्यो जहातीति विवक्षवने कस्माककर्तुरपि सार्थ एव
सप्रस्तयाहानन्त्वेपा विवक्षित अकर्तृत्वात् कर्म्मणि गाताने पदेन स्यात्॥ अत्राहुः। कर्म्मकर्तृपत्त्रयोगात्मनेपदे कथं जहातिः। यदा मनापो वर्त्तते
इव दत्तं सार्थेन हातीति जयगमपतीसर्थः। एषेवच स्वार्थसापगमनापदुतस्य उपगाज्ञा हिनादेव दत्तं सापगमेतत्समर्थो वर्णापदानुसुधा हिना
सपमेवापगछतीति देतदुदाहरणं हीयते देवदत्तः स्वयमेवापगछतीति पुनः कुतो हीयतेःस्त्वपेक्षायां सार्थेन संबंधः स्यात्। तमसग्रहणं किमिति
ईप्सिततमस्यापि ईप्सितत्वसंभवात् उदाहरणं सिद्धिं मम तो पयसौदनं भुंक्तइति करणसंज्ञा तु दात्रेण लुनातीत्यादेः सावकाशा न हि दात्रं लव
नेनेप्सितं तथा युक्त्वा मिसनेनापि न भवति। दृष्टा दासी नप्राप्येस्त त्र ग्रहणात्। मत्पयसि च न पयसो भुजिक्रियायां प्रकर्षोपकारकत्वे ईप्स
याः प्रकर्षाभावः यत्र तर्हि पयसएवेप्सिततमं तत्र प्राप्नोति। तद्यथा कश्चित् सुकविरोह सिद्धं। नुष्ठतामितिमस्याह। प्रभुतंभुक्तमस्यामिति इत्
॥ कर्म्मणीप्सिता माषाः न कर्तुः। तमप ग्रहणं किं। पयसा दनं भुंक्ते॥ ॥श्री ४॥ ॥
अप्यपयोभविष्यतीतिस्माहापयसाव लुसुंजीयेति अत्र प्रामाप्रापविवेके न पयसएवेप्सिततमत्वं नचोदनैनस्य अत्रायोदनमेवेप्सितत
मेपपमत्कसंस्कारकत्वात् करणात्। न ह्यस्य केवले गुणोस्त्यपरः किंतर्हि तत्संस्कृत ओदने न ह्यसौ केवलस्य पयसः पाते नसं तुष्यतीति
प्सितमवग्रहणो क्रियते पयसौदनं भुंक्त इत्येव स्यात् पचवसौदनमिस्यादौ न स्यात् नहीप्सिततमं युक्तं अस्मानिमतियोगिनी। वक्तव्यं तुल्यता
तीयदेतत्र प्रति योगिता भवतीति कारकं वा त्र न किंचिदृष्टमीप्सितं। पपस्त्वीप्समानत्वात् पुरुषेनेप्रतियोगिता नेष दोषः। अत्रापि किं पायेसः
प्रकर्षः आदौ हि कर्ता फलार्थं क्रियामभीप्सति। अतः फलार्थिमिष्यमाणत्वात् ईप्सिता क्रियाफलं तु स्वरूपेणेष्यमाणं ईप्सिततमं किं
पाया अपि कर्म्मत्वं पंदर्शनात् विशेषात् न एष स्वपापत्र तर्हि फलाभावः न तत्र न स्यात्। व्रुवफलाभावः। विकार्यं काष्ठानि भस्मीकरोतीति न
हि काष्ठानि फलत्वेन प्राप्तानि अभवन्तानि स्वरूपेणाफलानि भस्मात्मनानु फलानि प्राप्यन्तेहि तिस्यात्। आदित्यं पश्यति हिमवंतं शृणोती
ति न ह्यत्र क्रियया कश्चिदतिशयो जन्यते। अत्राप्यतिशयो जन्यते। पाकर्षं नाम यो हि यं पश्यति शृणोति वा तस्यासौ प्रकर्षो भवति प्रसिय
त्तद्यति ति क्रमुहृषायेतया तु विशेषो नास्तीमुमतो यद्यतमवग्रहणेन यत्रा पत्कष्टे स्यात् देवमा वदन्ते तेनेनपदयत्यादौ दादित्यादी नामपि

का॰प॰द॰१३
१५८

॥कर्म्मेत्यनुवर्त्तमाने पुनः कर्म्मग्रहणं आधारनिवृत्त्यर्थमिति। प्राप्यं कर्म्मग्रहणात्। आधारे आसंवन्धमिति तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात् इति भावः। आधारानुवृत्तौ को दोषः। तत्राह। आधारस्यैव हि स्यादिति चेत्स्यादिह गेहं प्रविशतीत्यादि। यत्र नु तस्मात् तदेव प्राप्यं वर्तते। स्यादिरात त्रैशिन्ततर्मक मन्त्रिविधे निवर्त्यविकार्यं प्राप्यमिति त्रयाणां कर्मविधिद्वैविध्यं स्यादिति। अकथितं चेत्यपरे। संज्ञान्तरप्रसंगेऽपि ह्यादिवः कर्मचेत्यादिः। नदेवं सम्प्रसिद्धं कर्म। उक्तं च निर्वर्त्यं च विकार्यं च प्राप्यं चेति। त्रेधा मतेन तद्विशिष्टतमं कर्म चतुर्धान्ये तु कल्पितं। ओदनादीनि च यत्प्राप्यं पचकर्तुरनीप्सितं। संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकमिति। तथाप्युक्तं न जायते यदा जन्म ना प्रकाशते। न निर्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितं प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादिभस्मवत् किंचिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् इ

॥कर्मेत्यनुवर्त्तमाने पुनः कर्म्मग्रहणं आधारनिवृत्त्यर्थं। आधारस्यैव हि स्यात् गेहं प्रविशति। तृन्दनं पचति सत्त्रमि वतीत्यादिषु न स्यात्। पुनः कर्म्मग्रहणात् सर्वत्र सिद्धं भवति। कर्म्मप्रदेशाः कर्म्मणि द्वितीयेत्येवमादयः ॥

॥२४॥ ॥२४॥ ॥

प्रकृतविशेषाणां सिद्धिर्यत्र नाप्यतो दर्शनात् तु मानाद्भूतं प्राप्यमिति कथ्यते इति तत्र निर्वर्त्यं घटं करोतीति तिलत्वमभिप्रायेण जन्म सामान्याभिप्रायेण प्रकाशनं नानन्तु च यदि हि येन कर्त्तव्यः अथ कर्त्तव्यः न घटः इत्यनुपपन्नं घटं करोतीति। नैष दोषः तथा विधं वस्तु करोतीति यस्मिन् निष्पन्ने स घट इति संज्ञेत्यथमत्रार्थ एव मोदनं पचतीत्यादावपि विकार्यं काष्ठानि भस्म करोति सुवर्णं कुण्डलं करोतीत्यादि। प्राप्यं आदित्यं पश्यतीति। न ह्यत्र प्रत्यक्षेणानुमानेन वा कश्चिदतिशयो गम्यते यथा निर्वर्त्यविकार्ययो रुत्पत्त्या विकारेण चेति कारकत्वं तु प्राप्यस्याभासोपगमादिभिः आदित्यो ह्याभासमुपगच्छति यतो द्रष्टा तं प्र तिपद्यते। उपलभ्यते सह तेन दर्शनं यतः इत्यन्ते। तदेवं आभ्यासोपगमो व्याप्तिः सोऽत्वमिति कर्मणः विशेषाः प्राप्यमाणस्य क्रिया सिद्धो विवक्षिताः २४ ॥ ॥

रा॰म॰
१५८

© Dharmartha Trust J&K. Digitized by eGangotri

।।तथा।। तथेति।। एवकपदं नोपसमस्तं। लक्षणाभावात्। चकारो विधायकोऽनेकार्थत्वान्निपातानां। तत्रेत्यस्य प्रकृतं तत्स्वरूपं अत्र ... नैवेति।
ईप्सितादन्यत्सर्वमनीप्सितं इति यथा अधर्मानृतादिभिरुत्तरपदार्थप्रतिपक्षभूतं यत् वस्तु तत्प्रतिषेधद्वारेणाभिधीयते तथेहाती। प्सितप्र
तिपक्षभूतं न द्वेष्यमेवातिधीयते किं तर्हि अभ्यात अन्यः स्यादि वरीप्सितव्यतिरिक्तं सर्वमिति सर्वशब्दस्यार्थः।। विषं भक्षयतीति। नक
श्चापि विषमीप्सितमिति भावः। ननु परवशमनुष्यो मात्माहिना सर्वतः पीडितो मरणमेव तावन्मन्यते तस्य विषभक्षणमीप्सितमेव येऽपि युक्त
दृश्यो स्यादि विषे प्रवर्तते तस्यापि तदीप्सितमेव परिहर्तुं पुनरहितबुद्धिरेव तत्र प्रवर्तते। अतोऽत्र पूर्वेणैव सिद्धमिति सुदाहरणान्तरमाह।।
ग्रामं गच्छन्निति। नात्र वृक्षमूलानीप्सितत्वमानि पूर्वमनभिसंहितत्वान्नान्तरीयकहितदुपसर्पणं न चात्रापि पापवृक्षमूलं गच्छन्निति तत्प्र
युज्यते तन्नान्तरीयकत्वान्न प्रतीयत इति पूर्वेणैव सिद्धं यथा नदीकूले कण्टकास्तत्राचेतनत्वादीप्साभावयदान्तरसंबंधात्प्रती यमानो बहि
।।तथायुक्तं चानीप्सितं।। येन प्रकारेण कर्तुरीप्सिततमं क्रियया युज्यते तेनैव चेत्प्रकारेणायदनीप्सितं युक्तं भवति
तत्कर्मसंज्ञं विधीयते। ईप्सितादन्यत्सर्वमनीप्सितं द्वेष्यमितरच्च विषं भक्षयति चोरान्पश्यति ग्रामं गच्छन्वृ
क्षमूलान्युपसर्पति।। ।। रंगत्वात्कर्मसंज्ञा न प्रतिबध्यते भवत्वयं प्रतिपक्षात् प्रतिपत्तिरुपपादनप्रकारः यत्कर्मप्रयुक्तो सर्वं एवेमसाप्र
कर्षभावं ज्ञानं न तत्कथमयुक्तमिति पूर्वेणैव सिद्धे एवं च नदीकूलमित्यत्रापि अनेनैव कर्मसंज्ञा। तथा यत्र क्रियया नैव नास्य येन फले
नान्तरीयकत्वं फलसिद्धिः तत्राप्यनेनैव भवति। अथ क्रियाफलयोगि कर्मेति कस्मान्नोक्तं ईप्सिततमं पृष्ट्वा मितरच्च तत्र सर्वत्रानु
गतमेतत् युक्तं क्रियाफलयोगित्वं कर्तुरपि तर्हि कर्मत्वं स्यात्। क्रियाफलसंबंधयोगस्य तत्रापि भावात्। अथ परसमवेतक्रियाफलयो
गीति लक्षणं। एवमप्यात्मा ज्ञात आत्मनेत्यत्र न स्यात् संविदः स्वयंप्रकाशाभिमतायाः कर्मत्वं स्यात् परमहं जानामीत्यत्र हि क्रियायम
वभासते ये ज्ञानमात्मावेति न ज्ञानं क्रियात फलं शब्दप्रयोगादिरूपो व्यवहारः तेन युष्मदात्मसाधारणस्य यथा कर्मत्वं तथा ज्ञान
स्यापि स्यात् ज्ञानं हि क्रियाभवति व्यवहारस्य च फलस्याप्रभूतं तत्संवेदज्ञानस्य यतस्वरूपं तदपेक्षया पश्यत्रात्मा तत्र संवेत्ती
त्यलं प्रयत्ने। चोरानित्यत्रापि मनुष्काम्यो वा मित्रादिरूपत्वान्निषिध्यमानो वा चोरानुपसर्पतीति पूर्वेणैव सिद्धं।।

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ परि॰ ३
१५९

अकथितं। अकथितशब्दोऽप्रमत्त्वप्रधानेन वर्तते। तद्यथा अकथितोऽहमस्मिन् ग्रामे अप्रधानम् इत्यभिगम्यते अस्ति वक्रियायाः शब्दीकी
र्तितयर्थापि। कथयवाक्यमवबोधे चुरादावरत। पन्मतेत्तत्र पूर्वस्य ग्रहणो पाणिनाकांक्षयाश्चांदो ग्धिप्रपद इत्यत्र पातिकार्यास्या ओतपि
यतकरणाधिकरणसंज्ञयोरत्यय चसादिखिकाशः नेहितत्रास्य ग्रहणं। दुहियाचीनि परिगणनात् अतीदितिपस्य ग्रहणान्तदा
हृकेनाकथितमपादानादिभिर्विशेषकथाभिरिति। किमेतत्र ममानांके नेनिकरणानिर्देशः। दृशिशदेवुहियुत्पत्यर्थमेवक्रियोपा
दीयतेनतत्रकरणादिसंबंध्यते। नहिगच्छतीतिगोरित्यत्र केनेतिप्रश्नः स्येनेतिप्रतिवचनेनाभवति। कारक इत्यनुवर्त्तनात् सत्ते

॥अकथितंच॥ ॥अकथितंचयत्कारकं तत्कर्म्मसंज्ञं भवति। केनाकथितमपादानादिविशेषकथाभिः। परिगणनं
कर्त्तव्यं दुहियाचिरुधिप्रछिभिक्षिचिजामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमा
चरितं कविना। उपयुज्यत इत्युपयोगः पयः प्रभृति। तस्य निमित्तं गवादि। तस्योपयुज्यमानपयःप्रभृतिनिमित्तस्य
गवादेः कर्म्मसंज्ञा विधीयते॥ २५ ॥ ॥छ॥ ॥

चकारः कत्वेः कथितस्य संज्ञयाभावमिति साम्यर्थ्याद्विशेषकथाभिरित्युक्तं। परिगणनं कर्त्तव्यमित्ति नरस्य ग्रहणोत्तीत्यादेर्याद्वं
तत्प्रयोगो माभूत्। प्रछिभिक्षी सत्रछि चेति रूथ्युभा सोऽनिमित्तवाद्गामशासनस्य प्रनष्टः सनाघं ताधातवः इक्कोपरणावितिवत्।
उपयुज्यत इत्युपयोग इति। अ संज्ञापाप्रमधिकर्म्मणि उपयज्ञ। तस्य निमित्तं गवादीति। अनेन गोदोग्धिपय इत्यादौ पयःप्रभृते रूपयु
ज्यमानत्वादीप्सिततमत्वं गवादेस्तु तदर्थत्वादुपादानस्यानीप्सिततमत्वं च दर्शयति। तथा युक्तत्वाभावाच्च गवादेस्तत्प्रायुक्तमि
त्यनेनापि न सिध्यति। एतदेव दर्शयति। तस्योपयुज्यमानस्य पयःप्रभृतेर्यन्निमित्तं गवादि तस्येत्यर्थः॥ २५ ॥

राम॰
१५९

© Dharmartha Trust J&K. Digitized by eGangotri

पाणपादिकमपि उपयोगनिमित्तमिति तेनापि विनोपयोगस्य पयसो ऽसंभवात् । तदर्थमाह इति तस्य करणादेः कर्मसंज्ञा निवृत्त्यर्थः
प्रयोजनवचनमेवकारार्थः शब्दः । निवर्त्तमानतया तु प्रयोजनलोलुटः स्वर्गादेरुपचारः प्रयोजनमिति वत् । अपूर्वविधावित्यत्र
पौ विधिर्नास्तीत्यत्रेत्यर्थः । एवं ग्रहणमयमात्रोपलक्षणं तेन वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोरपि विषये कर्मसंज्ञा न भवति सूत्रेण
कथितमिति कथनमिह न्नियरायोगे नायो भूतकालो न विवक्षितः तेपयाथमराजे । सोऽयं गलस्यासहिष्यमाणस्याप्यपादानसंज्ञा भ
वति । अध्ययनात् पराजयते इति न हस्त्रापि साधनमिति । साधनं हि प्रधानं भवति क्रियामपेक्ष्य गुणो भवति । प्रधानकर्म धर्म
पाणिनाकांक्ष्यया त्र्यं दोग्धि पयः । पाणपादिकमप्युपयोगनिमित्तं न तस्य कस्मान्न भवति । नैतदस्ति विहिताहितत्र
करणादिसंज्ञा । तदर्थमाह अपूर्वविधाविति । ननु विशामिगुणो न च पन्नवते नु विशायो गुणः साधनं प्रधाने कर्म
धर्मादिकं तेन यत्संबध्यते । तदकीर्तितमाचरितं कविना तदकथितमुक्तं सूत्रकारेण । दुहि । गां दोग्धि पयः । याचि ॥
पौरवं गां याचते । रुधि । गामवरुणद्धि व्रजं ॥ प्रच्छि । माणवकं पन्थानं पृच्छति । भिक्षि । पौरवं गां भिक्षते । चित्र् वृक्षमवचि
नोति फलानि । ब्रुवि । माणवकं धर्मं ब्रूते । शासि माणवकं धर्ममनुशास्ति ॥ २६ ॥ ॥
ईति । तस्य तु प्राधान्यं तदर्थत्वात् । प्रवृत्तेः संबध्यत इति । न च तत्र तस्यार्थकथनमेतत्तन्न वचसमभावापेक्षमिति । केचित्तु परस्मैपरि
तिः सह धातुमेनं पठंति । षच समवाये ऽपलपत्रकायावाचीति । नत्वाहुः वसेर्वेन रत्नसानुदात्तेतीनेकार्थत्वात्समवायेप्रवृत्ति
रितिसेव प्रातेश्च कर्मव्यापारे सचिर्वर्त्तत इति कर्तृपरेस्मैक मपि देनार्थकपनेत्रानुपपन्नं पथाराध्यसोऽयं नत्वस्यपथ्यत इति ।
उक्तं इति आचरितमित्यस्य विवरणं । सूत्रकारेणेति । कविशब्दो मेधाविमात्रवचनोऽपि प्रकरणात् सूत्रकारे प्रयुक्त इति दर्शयति । गां
दोग्धि पयः इति । ननु चात्राप्यसमर्थः गोः पयस्यन्तति दोग्धा गवापयः स्रावयतीति तत्र प्रयोजकव्यापारेणाप्यमानत्वान्न सिद्धि
गोः कर्मसंज्ञा । न च वाच्यं प्रयोजकव्यापारेणाप्यमानस्य यत्प्रिभवति । तस्यापि ह्येकेषु तरसूत्रे नियमार्थत्र नप्राप्नोति यथा यंते
देवदत्तं मयुंक्ते यावयति देवदत्तेनेत्यत्रेति । एवं तेषां वरिष्ठनियमः । आयंतु मकृतिशब्दः । नैतदस्ति यथा ण्यंतेषु धातुषु क्रिया

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ १२

१६०

विशिष्टस्य प्रवृत्तिः प्रतीयते। गामयतीति। नेच मत्रा। निष्क्रियस्यापि गवादेर्देहि नयनादिष्वविनियोगात्। तथा सहृदा नापि गोर्दुग्धे तेऽग्र
गाधं तो भ्यापरपः। शिरसानीयं तेन तस्माद्दोधीत्येक स्याएव क्रियापाः श्रवणाद्गोपयसो भेदेन कर्मत्वं न भवति। एतिवितु मतिप्र
कृतं शास्त्रप्रसंगं शास्त्रव भेदे न द्विक्रियेवाख्ये इति कर्मभेदोपपत्तिः। गामवतिग्रामं दैवदत्तमितिपदात्तु दुहेः स्तारणामर्थः श्रु
तिगोः क्षीरं भूरपतिरेव दैत्य इति तदापद्यपि गोः पयेव धिमावोविध तेन ध्यायव्रिवत्स तेन सिम्नि भिन्नमा त्रापेक्षायां तद्वाहरणो
पपत्तिः। एवं वावधित्वविवेचार्यां अपादानसंज्ञायां भवत्येव गोर्दुग्धे पय इति। यदा तु पयस्य विशेषणं गोः तदा षष्ठी गोः पयो दो
ग्धीति। पौरवं गां याचत इति। पूर्वैरपत्यं योरवा। ननु विहिता चायादानसंज्ञायोगात् संयोगा मा इत्तेन याचनादेवनत आदत्ते याचि
तो यो दद्यात् ततस्त्वेन तु मानामादित आदित आदित्सने तावता नदपि न यतः स्वभावं यशिविच्छिन्न नादित्समानोपि या
चते। गामवरुणद्धि व्रजमिति। ननु वागां व्रजं प्रवेशयतीत्ययमत्रार्थः ततश्च सिद्धं व्रजस्य कर्मत्वं अथ व्रजे गामवस्थापयतीत्यर्थः
तर्हि किथिनात्राधिकरणसंज्ञायः प्राप्तर्सवरोधनक्रियां प्रति निमित्तत्वमात्रं विवक्षितेन कर्मत्वं नाधिकरणत्वं तदे दमुदाहरणं व्र
जे न हेतु नावस्थापयतीत्यर्थः माणवकं पन्थानं पृच्छतीत्यत्रापि तु दादिः अविहितादिना संप्रसारणं न तु चकथितात्रापादानसंज्ञा
सद्भिति सोऽनुपदेशपादरत्नेन भक्ष्ममात्रादाक्ते दृष्टोसौ पद्य पद्य पदिश्यानि ततत्या इतेमानामा दित्सादित्सनेतावततदाप
नस्त्र नादित्समाने पि स्वभावं परित्ताना पपृच्छति भिक्षितिर्यविवक्षा कौपः किमर्थं पुनर्यागिभिस्सो भयोपादानं न स्यनपोऽर्थे भे
दातिप्रत्यर्थोऽपयावेवं मत्तानु स्यादित्तत्रणा अयाममानार्थोपि पिहिग्रहस्त तेरेवद तेशते प्रार्थयते इति उक्ते अनुनयार्थस्यापा
र्थस्य पायार्थे तेर्ग्रहणार्थत्वे नाविनीतं विनयं याचते वृक्षस्य प्रसार्यं याचत इत्यत्रापि भवति सकृत्तु यात्र स्वोभयरूपानुपपत्तेः भि
क्षिविक्षाः ततः वृक्षमवचिनोति फलानि इति पध्याद्यवचिच्च वृक्षान्फलाः पातन इति अपादानसंज्ञायास्त्वयं विषयः त
थापि परात्तत्त्वाव्यधित्वेन विवक्षितेनिमित्तरूपेणैव तु विवक्षितेन देहमुदाहरणं व्रजे तेस्मं तु शास्तीति व्रजमक्रोणंवा विश
सुअनुशिष्टो अपदापयप्यत्र धर्मेणवचनानु शासनकर्मणा माणवकस्याभिप्रेयमाणत्वं तथापि स्तातिकर्मभावात्संप्रत्ता

पद॰ १६०

अथान्येपि द्विकर्मकाः। नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च। द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः। गत्यर्थानामिसूत्रस्
त्रोपलक्षणं। नीञ् अजां नयति ग्राममेवं वहि वहति भारं ग्रामं हरति भारं हृञ् ग्रामं चक्रारे राजपत्स्यादयः समुद्गीयं ते शतं त्रयति दे
वदत्तं शतं मुष्णाति देवदत्तं शतं दण्डयति देवदत्तं कर्षति ग्रामं शाखां दं विचार्यति द्विकर्मकेभ्यो धातुभ्यः कर्मणि लादयस्तस्
धमानाः किमीप्सिततमे कर्मणि प्रधाने उत्पद्यंते। आहोस्वित् नेन यस्य कर्मत्वं तस्मिन् गुणकर्मणि इति। तत्रोक्तं प्रधानक
र्मण्याख्येये लादीनाहुर्द्विकर्मणां अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः। अयमर्थः। ये द्विकर्मका धातवः ते षां प्र
धाने कर्मणि ईप्सिततमे वाच्ये लादीनाहुः लादयो भवंति। माहुः। लादयो लक्ष्यन्ते खलर्थाः प्रधानाप्रधानयोरभि
लकयोर्युगपदभिधानासंभवे प्रधानस्यैवाभिधानं न्याय्यं प्रधानत्वादेवेति भावः। नी नीयते ग्राममजा नेया नीता सु
नया वहि। उह्यते भारो ग्रामं वोढव्यं वोढं सुवहः हृ ह्रियते भारो ग्रामं हर्तव्यः हृतः सुहरः। कृष् कृष्यते शाखा ग्रामं कृष्टव्या
कृष्टा सुकर्षा। अप्रधाने दुहादीनामिति। अत्र दंडि ग्रहणत्तयोरित्यस्तेनेन दुहियाचमिश्लोकपठिता एव। एतेषां दुहा
दीनामप्रधाने कर्मण्याख्येये लादीनाहुः। एतदपि न्याय्यमिदं। यतः यथोक्तयोर्थं गतिप्रवर्तते अतः शुद्धस्य दुहेः ग
वाभिसंबंधः गोर्दोहे न तु पयस उत्सं तु गत्वा तदकथितकर्मण्येव तत्रैव लादयो भवन्ति। एवं सर्वत्र दुहि गौर्दुह्यते पयः दो
ग्धा दुग्धा सुदोहा याचि पौरवो गां याच्यते। याच्यो याचितः सुयाचः। रुधि व्रजोऽवरुध्यते गां अवरोध्यः अवरुद्धः स्ववरो
धः प्रछि माणवकः पंथानं पृच्छ्यते। प्रष्टव्यः पृष्टः सुप्रच्छः भिक्षि पौरवो गां भिक्ष्यते भितव्यः। भिक्षितः सुभिक्षः चिञ् वृक्षो
वचीयते फलानि। अवचेतव्यः अवचितः सुचयः। ब्रुवि। उच्यते माणवको धर्मं वक्तव्यः। उक्तः सुवचः शासु अनुशिष्यते
माणवको धर्मं अनुशासितव्यः अनुशिष्टः स्वनुशासः दंडि। गर्गाः शतं दंड्यन्ते दंडितव्याः दंडिताः सुदंडाः जि शतं जीयते दे

© Dharmartha Trust J&K. Digitized by eGangotri

द्रजण जेतव्यो जितः। सुजपः। सुषिपुष्यातेदेवदत्तः शतं मोषितव्यो मुषितः सुमोषः। णिचेतेकर्त्तुः कर्म्मणि इति अभिधानं इति शे-
षः। णिचंतावस्थायाकर्त्तुः णिचंतावस्थायां कर्म्मणः प्रतोभिधाने लादीनाङ्कुरित्यर्थः। एतत्तु कं भवति येण साप्यीदप्ये णिचंतावस्था-
यामपि सकर्म्मकाः णिचंतावस्थायामुत्तरत्रेणाकिकर्म्मका जाताः तेषु णिचंतावस्थायां यदुत्तरत्रेणाय जाते कर्म्मतत्र ला-
दयो भवंतीत्यर्थः। गमगतौ ग्रामं देवदत्तं गम्यते ग्रामं देवदत्तः गमयितव्यः। गमितः सुगमः। बुध्यर्थ। बोध्यते माणवकोध-
र्म्मो बोधयितव्यः पाठितः सुपाठः। अकर्म्मक। आस्यते माणवको मासं आसयितव्यः। आसितः। स्वासः। बुद्धिप्रत्यवसाना-
र्थशब्दकर्म्मकेषु नाताः तेषु णिचंतावस्थायां यदुत्तर गुणकर्म्मणि लादय इति मतांतरं बोध्यते माणवकं धर्म्मः। बोध्य-
ते माणवकमोदनः। पाठ्यते माणवकं वेदः इत्यादि तत्त्वयमत्र निर्णयः। नीवाह्योर्हृकृषिभ्यः प्रधानं कर्म्मणि लादयः तत्सं-
बंधस्य पूर्वमावित्वात् दुहादिभ्यो जितेहि मुखिष्वप्राधान्येन तत्संबंधस्यांतरंगत्वात्। बुद्धिप्रत्यवसानार्थशब्दकर्म्मके गुण-
कर्म्मणि प्रधाने वा यथेष्टं। गत्यर्थाकर्म्मकयोः द्विकर्म्मणि णिचंतयोः प्रयोज्ये कर्म्मणीति प्रयोज्यस्यैव प्राधान्येनाभिधीयमानप्र-
योजकव्यापारेणाप्यमानत्वात् प्राधान्यं गुणात्मनः प्रयोज्यव्यापारस्य कर्म्मणस्तु गुणभावः। आर्थेति। आधे। न प्रयोज्यव्यापारस्य
प्राधान्यं संतत्स्थितत्वात् प्रयोजकव्यापारस्य। तत्प्राधान्याच्च तत्कर्म्मणोपि प्राधान्यमित्यस्मिन्नेव विषये लादयः प्रयोज्यकर्म्मणीति स्थित-
अकर्म्मकाणां च धातूनां कालभावाध्वगंतव्यदेशाः कर्म्मसंज्ञा इष्यंते। अकर्म्मकं च कालभावाध्वगंतव्याः कर्म्मसंज्ञा सकर्म्मसंज्ञा
सकर्म्मकाणां देशश्चाकर्म्मकाणां तु कर्म्मसंज्ञो भवतीति वक्तव्यमिति। अध्वगंतव्यमेति। गंतव्योध्वा। अध्वगंतव्यः क्रोशादिरध्वशब्दो-
द्रुमः। गंतव्यत्वेन प्रसिद्धस्य निपतपरिमाणस्य क्रोशादेर्ग्रहणार्थं गंतव्यग्रहणं तेन नीधानं स्वपितीति न भवति। नन्वेककालाध्वनो-
रिति सिद्धा द्वितीया किं कर्म्मसंज्ञया देशस्य तावदुत्तमाक्कालाध्वनोरपि लादिविधानार्थं कर्म्मत्वं एषितव्यं। आस्यते मासः आसि-
तः आसितव्यः आसितः स्वासः। एवं शय्यते क्रोशः इत्यादि। भावः गोदोहमास्ते यावता कालेन गोर्दुह्यते तावंतं कालमास्त इ-

© Dharmartha Trust J&K. Digitized by eGangotri

सर्थः। गोदोहो दीर्नामामास्ते विकाले देनामसिद्धत्वाद्भावस्पष्टं कुग्रहणोऽदिशः कुनदस्त्वमिति कुरवः सुप्यंतइत्यादि काला

ध्वनोरत्यंतसंयोगा इति सूत्रम क्रियात्मेन संयोगार्थमात्संगुडध्वानः सर्वरात्रं कल्याणी क्रोशं कुटिला नदीति तत्र हि विच्छ

यं कालमार्गाध्वनां गमनाश्रिति न वा कर्मं नात्र। सिरामनमात्रे वर्त्तने किं तु तत्स्वके व्याप्य नेव वर्त्तते मासमास्ते कोऽर्थः मासमास

नेन व्याप्नोतीत्येवं सर्वत्र एवं च कृत्या अकर्म्मकेऽपि मासमास्ते यः कर्म भवति। मासं वेदमधीते मासं वेदाध्ययनेन व्याप्नोती

त्यर्थः। अथ कर्तृकर्मणोः कृतीति षष्ठी द्विकर्म्मकेषु किं प्रधाने कर्म्मणि भवति। आहोस्वित् गुणे भवति आहोस्विदुभयोः।

। उभयोरिति प्राप्ते द्वितीयावद्वाऽकारवचनानुगुणकर्मणि विकल्पेन षष्ठी प्रधानकर्मणि नित्या नेता। अश्वस्य सुघ्नस्य

घ्नस्य तु घ्नमिति वा इहाकथितं कर्म्मसेनावत आह माह पूर्वं सत्र तद्वर्यंत तद्विषयस्याप्यकथितत्वात्। नतत्रं नटस्य शृणो

तीत्यत्र माभूदिति दुह्याद्यपि गणनमवङ्गपेकर्त्तव्यं तस्मिं श्चक्रियमाणोऽर्नं प्रभवतीत्यत्र मूलानुपसर्पयतीत्यत्रलाद्यादि

ति पूर्वमपि योगद्वयमारब्धम् इति ॥ २६ ॥ ॥ ७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ गतिबुद्धि ॥ गमयति माणवकं ग्राममिति । कथमत्र ग्रामस्य कर्मत्वं यावता कर्तुरीप्सिततमं ह्युच्यते नो न व संप्रति माणवकः
कर्त्ता अनेन कर्मसंज्ञकत्वात् । तत्र यथा माघे षष्ठ्यं व धातौ सत्र वल्लत्तो भवति ग्रामे स्थिततमा नाम पि माणवकाणां कर्मसंज्ञा न भ
वति तत्कस्य हेतोः अप्रस्य सत्प्रत्यक्कर्तृत्वात् । तदुद्दत्रापि न प्राप्नोति । माभूत्तावत्तु सान्ते माणवकः कर्त्ता प्रयुक्तुं तदुक्तेः प्रकृ
त्यर्थे कर्त्ता भवति । तदानीमेव च ग्रामस्याभिसंबंधः ग्राम कर्मणि पश्य सौ गमने प्रेष्यते ग्रामं गच्छति । उक्तो यस्मामवस्थायां

॥ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ ॥ अर्थशब्दः प्रत्येकमभिसंबध्यते । ग
त्यर्थानां बुध्यर्थानां प्रत्यवसानार्थानां धातूनां तथा शब्दकर्मकाणामकर्मकाणां च अणौ यः क
र्त्ता स ण्यन्तानां कर्मसंज्ञो भवति । गच्छति माणवको ग्रामं । गमयति माणवकं ग्रामं । याति माणवको ग्रामं ।
यापयति माणवकं ग्रामं । गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः । नयति भारं देवदत्तः । नाययति भारं देव
दत्तेन । वहति भारं देवदत्तः । वाहयति भारं देवदत्तेन ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ छ ॥ ॥

ग्रामस्य कर्मत्वं तत्र स्थाम साधकस्य कर्मत्वं परस्यां वाप्पनावस्थायां माणवकस्य कर्मत्वं न तस्यां ग्रामस्य कर्मत्वं पूर्वमप्रकृ
तत्वात् स्मा घेष्व प्र स्मिन्नत्र तत्समेव संभवति । यापयतीति या प्रापणे युत्तत्र प्राप्याग ति ल्पे स्यत इत्ति णतिर्गत्यर्थः ।
नीवह्योरिति न चेतयोर्गतिफलं प्रापणमर्थः । न गतिर्हि सार्थस्य इत्यत्र व भाष्ये न हि वहिर्गत्यर्थ इति सत्यं गुणभा
वेनाप्यगतिः प्रतीयत इति गत्यात्प्रतिषेध उक्तः ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

वहेरनियंतृकस्येति वसामीति चोपसंख्येयः वाहयति बलीवर्दान्यवानिसत्राणो बलीवर्दाः कृत्तारिः एपंनेतुनियंतासारथिः कर्त्ता
तत्रप्रतिषेधप्रतिषेधाद्विधिरेवभवति। बुध्यर्थग्रहणेज्ञानमात्रवाचिनांस्मरत्यादीनामिसाद्धः। स्मरत्याचयितत्येवेदाहृतंअरि
खेधोरिति। अपरआहसर्वमेवप्रत्यवसानकार्यमदेर्नभवति। नावद्रूपंरूपमेवकर्मसंज्ञेतितिनिगरणाचलनार्थेभ्यश्चेतिप

वहेरनियंतृकर्तृकस्येति वक्तव्यं इहप्रतिषेधोमाभूत् वहति यवान्बलीवर्दा वाहयति यवान्बलीवर्दानिति
। बुद्धि। बुध्यते माणवको धर्मं। बोधयति माणवकं धर्मं। वेत्ति माणवको धर्मं। वेदयति माणवकं धर्मं।
प्रत्यवसानमभ्यवहारः। भुंक्ते माणवक ओदनं। भोजयति माणवकमोदनं। अश्नाति माणवक ओ
दनं। आशयति माणवकमोदनं। आदिखाद्योः प्रतिषेधो वक्तव्यः। अत्ति माणवक ओदनं। आदयते मा
णवकेनौदनं खादति माणवकः। खादयते माणवकेन। भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः। भक्ष
यति पिंडीं देवदत्तः। भक्षयति पिंडीं देवदत्तेनेति। अहिंसार्थस्येति किं। भक्षयंति बलीवर्दाः सस्यं। भक्ष
यंति बलीवर्दान्सस्यं॥ २७ ॥ ॥

दमपि न भवति। रटमंक(?)मिष्यते कौधिकरणाच्च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः इदमेषां जाधमितिभक्षेरिति गत्यर्थादिषु प्रा
येणाहेतुमणिच एव संभवात् हेतुमणि वे विधिरिति प्रतिषेधोपि प्रसंगात्तत्रैस्यैवन्याय्यः इति चुरादिणिजंतीयर्थापत्तए
वेति भक्षेः प्राप्तिः। भक्षयति बलीवर्दान्सस्यमिति क्षेत्रस्वानां पावनां भक्षमाणां नाहिंसा भवतीति तत्स्यामवस्थायां के
ष्विद्वेतन्माभ्युपगमात्तावामिनोवाहिंसा द्रष्टव्या २७

© Dharmartha Trust J&K. Digitized by eGangotri

॥इह कर्मशब्देन न क्वचित् क्रियाग्रहणं । यथा कर्त्तुरीप्सिततमं कर्मेति किं तु चित्तसाधनकर्म्माविः शब्दकर्म्मणा इति । इह शब्दक्रियाणामिति चेत्तद्रू पत्वादीनां प्रतिषेधः । वर्षति पुत्रं देवदत्तः । रवापयति पुत्रं देवदत्तेन । क्रंदति पुत्रो देवदत्तः । क्रंदयति पुत्रं देवदत्तेन । शब्दायते देवदत्तः । शब्दापयति शब्दापयते देवदत्तेन । अकर्मकत्वादस्य त्वप्रसंगः । शब्दलक्षणस्य कर्मणोन्तर्भावात् कर्म्मान्तरायोगाद्व्याप्तेभ्यो पसंख्यानं । अशब्दक्रियत्वात् न शृणोति श्लोकं देवदत्तः । श्रावयति श्लोकं देवदत्तं न च तु ध्यर्थत्वात् सिद्धिः । चेतसा दर्शयोर्हि ज्ञानमात्रवचना

॥शब्दकर्म्मणां ॥ अधीते माणवको वेदं । अध्यापयति माणवकं वेदं । पठति माणवको वेदं । पाठयति माणवकं वेदं ॥ ॥ अकर्म्मकाणां ॥ आस्ते देवदत्तः । आसयति देवदत्तं । शेते देवदत्तः । शाययति देवदत्तं । एतेषामिति किं । पचत्योदनं देवदत्तः । पाचयत्योदनं देवदत्तेनेति । अण्यन्तानामिति किं । गमयति देवदत्तो यज्ञदत्तं । तमपरः प्रयुंक्ते । गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः २८ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥ श्रीः॥ ॥ ॥

बुध्यर्थाः । आह तर्हि साधनकर्म्मणो ग्रहणं शब्दकर्म्मण इति चेत् जल्पतिनां तु न संख्यानं । जल्पति पुत्रं देवदत्तः । जल्पयति पुत्रं देवदत्तेन । विलपति पुत्रं देवदत्तः । विलापयति पुत्रं देवदत्तेन । आभाषते पुत्रं देवदत्तः । आभाषयति पुत्रं देवदत्तेन । दृशेः सर्वत्र यद्यपि क्रियाग्रहणं अथापि साधनग्रहणं अथाप्युभयग्रहणं सर्वथा दृशेरुपसंख्यानं । पश्यति रूपतर्ककः कार्षापणं । दर्शयति रूपतर्कं कार्षापणं । यद्यपि बुध्यर्थः दृशिः चक्षुःसाधनके ज्ञानविशेषे वर्त्तते तदेव दृशेः कर्म । ज्ञानमात्रवचनत्वे तु बुध्यर्थत्वादेव सिद्धं । तदेवमुभयोरपि पक्षयोर्दोषाः तं भा

© Dharmartha Trust J&K. Digitized by eGangotri

यं नाम्यतः पक्षो निरणापि। हन्तिकारणत्येशब्दक्रियाः शब्दसाधनकर्माण्यन्तानर्विकार सिद्धान्तउदाहरन्ति। अधीतइत्यादि
अध्यापयतीति क्रीडं ऽज्ञीनो शाविसावं अतिं ज्ञो साहिना पुक्तनिर्णायफलसाधनकर्मणो ग्रहणं कर्मत्र ग्रहणादन्यभागतिबु
द्धिशब्दप्रत्यवसानार्थकर्मकाणामित्येव सिद्धं जल्पादीनां तत्र संख्याग्रं कर्त्तप्रमेव अन्यत्त्वाहाजल्पतिदेवदत्तइति व
चनेन बोधयतीत्यर्थः। एवं नन्वत्रापि तत्र तुल्यार्थत्वादेवसिद्धायपयप्यत्वा बुद्धिस्याबोधनाउपसर्जनीभूतां पिनाव बुद्धि
रस्तीति गृह्यते न बुद्ध्यर्थत्वमस्येव उपसर्जनीभूतो पिचारसादिर्यो अन्यथा गमयतीत्यादीनाम गमयर्थत्वादेवाप्रसंगात् शि
ग्रहणमनर्थकं स्यादिति। आल्हचे तनविषय एवमचेतनविषये कथं पाल्केचिज्जल्पतितमन्यो जल्पयति नह्यत्र बोधना
प्यस्ति॥ ॥अकर्मकाणामिति कालभावाध्वगति यन्ते देशास्तिरिक्तकर्मरहिताना मित्यर्थः आंग्राह्यः अन्यथामास
मास्ते देवदत्तः मासमासयति देवदत्तं गोदोहमास्यति क्रोशमासयति कुरूनासयतीति इत्यत्र नस्यात् कालादि कर्म
णामकर्मकत्वात् एवं लः कर्मणिचेत्याद्यावपि पत्राकर्मकग्रहणं तत्र सर्वत्रैद्दृष्टव्यं। तेन मासमास्यते देवदत्तेने
त्यादौ भावे लादयः सिद्धा भवंति कर्मकवद्भ्च नादिनि कालग्रहणमुपलक्षणत्वात्कारणात्वाभ्यपमपि भवति। मा
सआस्यते देवदत्तेनमासकर्मणि लो योभवति। सत्तर्हि कर्मकवद्भावी वक्तव्यः। नवक्तव्यः त्वकर्मकाणामित्युप
तेनच कालादिभिः केचित्कर्मकाः लादिभिरप्यकर्मकाः पठ्यन्ते नविवक्ष्यन्ते। यथाशेते देवदत्तो नन्तुं तेइतिविवक्षि
तकर्मणो कर्मकाः। किंतर्हि विसंताविधमानकर्मणो धातवाः अकर्मकाः नार्थापिसाधातो स्वरूपावधिमकर्मकत्वं न

© Dharmartha Trust J&K. Digitized by eGangotri

चकालादिकर्मणास्तस्यावधिकमकर्मकत्वं भवतीति सामर्थ्यात्तत्रापि तेनैव कर्मणात्र्यकर्मकत्वं विज्ञायते किमर्थं पुन
रिदमुच्यते पाकत्वाव्यापारो भवति तत्रापि प्रयोज्यस्य प्रयोजकव्यापारे विवक्षिते तेन प्रधानभूतेनाप्यमानत्वात् अंतरंगत्वेन
पूर्वप्रवृत्तामपि कर्तृसंज्ञां बाधित्वा कर्मसंज्ञा बाधित्वा कर्मसंज्ञा भविष्यतीति एवं तर्हि सिद्धे सत्यारंभो नियमार्थः प्र
योजकव्यापारेणाप्यमानस्य परिभवति गत्यर्थादीनामेव नान्येषामिति तेन पाचयत्योदनं देवदत्तेनोपन्नस्तेनेत्य
त्र पूर्वप्रवृत्तायाः एव कर्तृसंज्ञायाः अवस्थानात्कर्तरि तृतीया भवति। उक्तं च गुरुणा। क्रियायां स्वातंत्र्यात् प्रेषणेक
र्मतां गतः। नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते इति कर्तुः स्वधर्मस्तृतीया। अथ कथमयाचि नारं नहि
देवमद्भिः सुतां नाथ ह्यपि तुं शशांकेति। स्वतंत्राः कवयः। पद्मसुतां प्रति किं विडम्बाह विषये ग्राहयितुं बोधयितुं न
शशांके त्वेवं व्याख्येयं तत्र बुध्यर्थत्वात् सिद्धं॥ ॥२८॥ ॥छ॥ छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।हृक्रोरन्यतरस्यां प्रयोनिवृत्ताः।तेनोभयत्रविभाषेयं।यदाहरतिर्गतौ वर्त्ततेहरतिभारं देवदत्त इति स्वं व्यवहारे वा अभ्यवहरति माणवकः अन्नमिति करोतिः चापमकर्मकः उं दनस्य पूर्वेणैः छात्राः विकुर्वत इति तदा पूर्वेण प्राप्ते।यदा हरति स्त्रायां रो वर्त्तते हरति सुवर्णं चोरयति सुवर्णं चोरयति करोतिश्चासकर्मकः तदा अप्राप्ते।न च वर्त्तत रस्य विधिर्विभाषा भवतीति प्रतिषेधो वा इ तिनियमस्यैव विकल्पो युक्तः गत्यर्थादिसूत्रे वेति योगनियमः सह हृक्रोरन्यतरस्यामिति ततश्च पक्षे नियमाभावात् गत्याद्यर्थे

हृक्रोरन्यतरस्यां ॥ ॥ अणिकर्त्ता णिचीति वर्त्तते। हरतेः करोतेश्च अण्यन्तयोर्यः कर्त्ता स ण्यन्तयोरन्यतरस्यां कर्मसंज्ञो भवति। हरति भारं माणवकः। हारयति भारं माणवकं माणवकेन वा। करोति कटं देवदत्तः। कारयति कटं देवदत्तं देवदत्तेन वा। अभिवादिदृशोरात्मनेपदे उपसंख्यानं। अभिवदति गुरुं देवदत्तः। अभिवादयते गुरुं देवदत्तं देवदत्तेन वा। पश्यन्ति भृत्या राजानं। दर्शयते भृत्यान् राजा। दर्शयते भृत्यैरिति वा। ॥ आत्मनेपद इति किं दर्शयति चैत्रं मैत्रमपरः प्राप्तविकल्पत्वाद्द्वितीयैव· अभिवादयति गुरुं माणवकेन पिता अप्राप्तविकल्पत्वात् तृतीयैव· ॥ स्वतन्त्रः कर्त्ता· स्वतन्त्र इति प्रधानभूत उच्यते· अगुणीभूतो यः क्रियासिद्धौ स्वातन्त्र्येण विवक्ष्यते तत्कारकं कर्तृसंज्ञं भवति। देवदत्तः पचति। स्थाली पचति। कर्तृप्रदेशाः कर्तृकरणयोस्तृतीयेत्येवमादयः ॥ २५ ॥ ॥

दमत्र पक्षे कर्मत्वं पक्षान्तरे वकर्तृत्वं भवतु गत्वे तु निःस्वत कर्म संज्ञा प्राप्नोति। एवं तर्हि वार्त्तिककारेणोभयत्र विभाषा स्थिरं पठिता तत्सामर्थ्यादनन्तरस्य विधिरिति नाश्रीयते अविशेषेण हृक्रोर्विकल्पः प्रवर्त्तते। अभिवादिदृशोरिति। अभिवादयतेरप्राप्ते विभाषा दृशेर्बुध्यर्थत्वात् दृशेः सर्वत्र णिचाप्राप्ते ज भिवादयत इति णिचश्च सात्मनेपदं परस्मैपदत्वभिवादत्वे अभिवादयति गुरुं देवदत्तेनेति कर्तृसंज्ञैव भवति। दर्शयत

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ १३

१६५

इतिकर्मसंज्ञाभावपक्षेकर्मांतरस्योपचारात्तयोरेणाविसात्मनेपदं प्रसज्यतेनुशिगाचष्टेति॥ स्वतंत्रः॥ ॥ स्वतंत्रशब्दोयंतंतुवायपर्यव
नोप्यस्ति। स्वतंत्रमस्य स्वतंत्रः। वितताः तंतवः तंत्रमिति उच्यते। अस्ति च साधारणाद्रव्ये पुनुषे वर्त्तते साधारणाभवे तंत्रं स्वं धनं न तंत्रं सा
धारणमस्य स्वतंत्रः। अस्ति च प्रधानवचनो यथात्मतंत्रं प्रधानमस्य स्वतंत्र इति। तत्राप्यर्योर्ग्रहणे तयोरपि स्नानादिविषये कर्तृसंज्ञा
स्यात् स्वत्वाद्विशेषाद्धि हि तस्या स्वतंत्रं तुवायाद्गच्छति स्नाहे हस्तस्य तद्देवदत्तो गच्छतीति। इममाद्यर्योर्ग्रहणे दोषं दृष्ट्वाह तृतीयम
र्थमाश्रित्य स्वतंत्र इति प्रधानभूत उच्यत इति स्वतंत्रशब्दस्यात्र स्वप्रसिद्धत्वाद्विनिभाव। किंच कारकाधिकारात् क्रियाविषयं
स्वातंत्र्यमत्र हि तेन च तंतुवायः तंतुवायत्वात्क्रियायां स्वप्रयुज्यते किं तर्हि प्रधानत्वेपि वेतितद्ध विवक्षावशत्त्रायस्ततः क्रियायांस्मि प्रधानभूत
उच्यते। एवं च समप्रधानापेक्षत्वात्। प्रधानभावस्य यत्रापि करणादीन्यप्रधानानि कारकाणि संति काष्ठैः स्थाल्या ओदनं पचतीति
अत्रैव स्यात् न त्वासनेन इत्यादौ विवक्षावशात्प्रधानेनागुणभावो लक्ष्यत इति दर्शयति अगुणीभूत इति तेन यस्य गुणभावो नास्ति
स कर्त्ता कारकांतराविवक्षायामपि यस्यागुणभावो स एव कः पुनरत्र कारकाणां गुणीभावः यदा एकया एव क्रियाप्रवृत्तिनिर्वर्त्त्यते
कर्मण्यागमतः शक्तिलाभात् अन्याचापारात् तादृप्यतदधीनप्रवृत्तित्वात्। प्रवृत्तानां निवर्त्तनात्। अदृष्टत्वान्न तु निवृत्तेः पृथिवी
कोपि दर्शनात्। आरादुपकारित्वात् स्वातंत्र्यं कर्तुरिष्यत इति। कर्मणि च वर्त्तिता निकरणादीनि शक्तिं प्रतिलभंते। कर्ता तु प्रागेव
कर्तृसंनिधौ च करणादीति न भवंति तदधीनेषां प्रवृत्तिनिवृत्ती प्रधानं कर्तुश्च प्रतिनिधिर्न दृष्टः करणादीनां तु दृष्टः। व्री
ह्यपचारे नीवारैर्यज्यते। प्रविविक्तोऽभावः करणप्रभावे व्याप्तेशीतेऽस्या दोके वलः कर्त्रीदृश्यते न तु कर्त्तुरभावे करणादीनि दृश्य
ते। आरादुपकारित्वादिति यस्मासौत उच्छ्रः फलानि स्वावुपकरोति न तु करणादिवदनुप्रविश्य तथा चोपीत्स्यर्थः। एतच्च प्रायेण
चेतनेष्वेव संभवति नाचेतने पुरस्त्योपाती स्नाहे नैष दोषः। उक्तलक्षणोक्तरीहृदयं दृष्टं प्राधान्यमगुणभावश्च तत्रागुणभावो
चेतनेष्वचेतनेष्वपि संभवति। स चाप्यगुणभावो न मतिनिपतविषयः यथैव तु दिप सतेलस्येवेस्याहा। स्वातंत्र्येण विवक्षितत
त्विविक्षितः स्थाल्यो दाह्यते स्थाली पचतीति। अस्मे तु भावसंतो। अगुणभावेनाभिधीयमानमापरेणगुणीभूतो गुणाभूतधात्
वात्वापारः कर्त्तेत्यर्थः। कस्य च व्यापारो धातुना अगुणभावेनोपादीयते यस्यापि च सतेतस्येति सर्वत्र सिद्धं इति॥ २९ ॥ ॥

राम॰

१६५

© Dharmartha Trust J&K. Digitized by eGangotri

॥तत्प्रयोजको हेतुश्चेत्यनेन कर्त्तृसंज्ञां वक्ष्यतः इति कर्तृसंज्ञाविशिष्टः स्वतन्त्र इत्यर्थः। ननु च प्रयोजकसंनिधौ प्रयोज्यस्य पारतन्त्र्यं कर्तृसंज्ञा न स्या
द्विवक्षणाच्छेत्यत्र स्वतन्त्रः प्रयुज्यते। कथं तर्हि च कर्तृसंज्ञाविशिष्टः कथ्यते मोचयिता च पचतो देवदत्तोपपत्तये तेनेति प्रयो
ज्यत्वेऽपि भवति पूर्वमेव स्वातन्त्र्यमतः प्रयुक्तिरपि किमर्थमापि विवक्षितेति [illegible] । भवत्येवं स्वतन्त्रं प्रवर्त्तने यत्र तु बलात्कारेण
प्रवर्त्तते तत्र न कथ्यते। उच्यते अप्रवृत्तमवर्त्तनेऽपि यावत् स्वार्थो दर्शमात् प्रयोज्यो न प्रवर्त्तते तावत् प्रयोजकः पाचयतीति न व्यपदिश्य
ते प्रयोज्यस्य स्वतन्त्रः कालमेव तु प्रयोज्यते तदानीमपि च स्वस्यानुरागप्रयुक्तिविघात इति अनुवर्त्तमाना हि प्रयुक्तिः प्रयोज्यस्यापि फ
लनिष्पत्तेः प्रवृत्तौ हेतुर्न मध्ये विच्छिन्ना लोकेऽपि स्वामिसत्प्रेषः प्रयोज्यस्याप्रवृत्तावपि भवति। उक्तं च द्रव्यमात्रस्यानुमेषयत्नादि

॥तत्प्रयोजको हेतुश्च॥ तदिति अनन्तरः कर्त्ता परामृश्यते। तस्य प्रयोजकः तत्प्रयोजकः निपातनात् समासः॥ स्वा
तन्त्र्यस्य प्रयोजको योऽर्थः तत्कारकं हेतुसंज्ञं भवति। चकारात् कर्तृसंज्ञं च। संज्ञासमावेशार्थश्चकारः। कुर्वाणं प्रयुङ्क्ते।
कारयति। हारयति। हेतुत्वान्णिचो निमित्तं कर्तृत्वात् कर्तृप्रत्ययेनोच्यते। हेतुप्रदेशाः हेतुमति चेत्येवमादयः॥

ले द्विधीयते। प्रवृत्तस्य परामेषणा स्वविषयो णिच इति तद्रेवं लिङ्गाभ्यां प्रयुक्तिः प्रवृत्तप्रवर्त्तनारूपेण प्रतीयत इति प्रकृत
र्थकर्तुः स तत्र प्रयोजक इत्यनिरूढं समर्थमेव वार्थदर्शपि तु न छसीयासानं अन्यथा कस्य प्रयोजक इत्यपेक्षायां प्रकृतत्वादेव स्वात
न्त्र्यस्य प्रयोजक इति लाभात् अनर्थकं तत् तस्मात्। तत्प्रयोजक इति। ननु तज्जकाभ्यां कर्त्तरि चेति प्रतिषेधात् कथमत्र समास इत्य
त आह। निपातनात् समास इति। अत्र विचार्यमस्ति स प्रथमप्रकरणे एव विचारयिष्यामः॥ संज्ञासमावेशार्थश्चकार इति असति
हि तस्मिन् एकसंज्ञाधिकारात् कर्तृसंज्ञा न स्यात्। कुर्वाणं प्रयुङ्क्त इति कुर्वाणं स्वार्थाय प्रयुङ्क्ते स्य स्वातन्त्र्येण वर्णितं ह्येतद्वि
ग्रहः हेतुत्वादि सादिना समावेशस्य प्रयोजनं दर्शयति॥ प्राग्रीश्वरात्॥ ॥प्राचि काले देशे वा प्राक्। अधिरीश्वर इति वक्ष्यतीति रीश्वर
शब्देन भागस्य पूर्वपदस्य रेफेण महानुकरणं द्रष्टव्यम्। अनुकार्यानुकरणयोरनर्थत्वात् विभक्त्युत्पत्तिः। क्वचाहं स्यात्र निपातत्वेऽपि च
रादिनिपातमव्ययमित्यव्ययसंज्ञा भवति निपाता आद्युदात्ता इति स्वरेण न भवति। वैवारीनाम न दात्तानां ग्रहणं दात्ता। अप्येषा

© Dharmartha Trust J&K. Digitized by eGangotri

नुनर्द्‌पिमवतिननुपथाप्रसयरत्वादिषिकारेपिनाण्यवधिनिर्देशेनाभिमतविषयेप्रवर्त्तनेतथापममपिमवर्त्तिष्यतेनिपातास्तेनास्क
न्नार्थोविधिनिर्देशेनेसतत्राह। प्राग्वचनमिति। प्राग्वचनद्वारेणावधिनिर्देशस्यप्रयोजनमुक्तम्॥ अयमर्थः। असत्यवधिनिर्देशे
निपाताइत्यस्यप्रतियोगमनुवृत्तौसत्यामप्येकसंज्ञाधिकारान्नपर्यायःस्यान्ननुसमावेशः सतितुतस्मिन्नरीश्वरात्प्राग्भवन्तः
सन्तिनःसर्वोत्तत्तेकथमिहापेक्ष्यसहत्वंनाविधीयतेप्रतिकातत्वपरत्वनिःतस्माश्चसमावेशः। प्रयोजनमितिअथवाप्राग्वचना
न्नेकिमर्थंयचेप्येवप्रागितिदिक्शब्दोध्याहरिष्यतेयत्प्रागित्यस्यचध्याहारेणभविष्यतिचादयोसत्वेप्रादयइत्यनयोविधेयासंभ
वेनानर्थकाप्रसंगात्। अतआह॥ प्राग्वचनमिति। अयंभावः। अध्याहारेणासिद्धेप्राग्ग्रहणसामर्थ्यान्नत्रेणाद्वौप्राकृच्छब्दौउ
च्चार्येतेतेनायमर्थोभवतिप्राग्रीश्वरादेअवस्थिताःतेप्राक्नियातसंज्ञाभवन्तिनियाताःसंतोगत्यादिसंज्ञाइतितेननिमित्त

॥प्राग्रीश्वरान्निपाताः॥ अधिरीश्वरइतिवक्ष्यतिप्रागेतस्माद्वधेर्यानितऊर्ध्वमनुक्रमिष्यामःनिपातसंज्ञास्ते
वेदितव्याः। वक्ष्यतिचादयोसत्वे। चवाहअह। प्राग्वचनंसंज्ञासमावेशार्थं। गत्युपसर्गकर्मप्रवचनीयसंज्ञा
भिस्सहनिपातसंज्ञासमाविशति। रेफोच्चारणमीश्वरेतोसुन्कसुनाविसयमवधिमीविज्ञायीति। रीश्वरा
द्धीश्वरान्माभूततद्दूनेजतःपरोपिसः ३०

मेवनिपातसंज्ञागत्यादिसंज्ञानामितिसमावेशसिद्धिरितिरीश्वरादितिसहरेफेणानुकरणेप्रयोजनमाह। रीश्वराद्धीश्व
रान्माभूदितिरीश्वरादित्यामुल्कमुलोरीश्वरेतोसुन्कसुनोविसयंमाभूतइत्येवमर्थमित्यर्थः। पदासंहितयासत्राणिप
ठ्यन्तेतत्रावीश्वरशब्देस्तीतिअभिप्रेत्यवीश्वरादित्युक्तंज्ञापकात्सिद्धंपदांपंक्तनेजेतइतिकृतोमातस्येजंतस्यवाक्य
संज्ञांप्राप्तितन्नाप्नुयात्तिअनंतरईश्वरशब्देवधिर्नअवहितइतिअमथामसेनप्रभृतीनामुल्कमुल्कमुलोस्मनियाततत्वा
देसाव्ययसंज्ञायाःसिद्धत्वादनर्थकततनेतद्दृत्तिज्ञापकंकनेजंत। यरोपिसः। इश्वरेतोसुन्कसुनाविसस्मात्परोपिकन्नेजंतरा
जंतत्वाप्तिलंत्वार्थंतवेकेनित्सायेजंतःणमुलादिश्वमांतःतदर्थमेतवणात ३०

© Dharmartha Trust J&K. Digitized by eGangotri

पत्तदर्थं अव्ययीभावस्याव्ययत्वं शास्ति तज्ज्ञापयति अनंतरस्य ग्रहणमिति । अन्यथा द्वितीयेन निपातसंज्ञाप्राप्तात् । अव्ययीभाव
स्य निपातत्वादेवाव्ययसंज्ञायाः सिद्धत्वादनर्थकं तत्स्यात् । नैतदस्ति समासेष्वव्ययीभावः । तुल्यजातीयमाहृत्ये नियमार्थमे
तस्मात् न त्वनंतरस्य ग्रहणज्ञापकं इत्यर्थः । एवं तर्हि लौकिकस्याद्यादेर्वानंतरस्य ग्रहणं भविष्यति लौकिके ह्येवं कोशे त्रिय

। समासेष्वव्ययीभावो लौकिकं चातिवर्त्तते ॥ ॥ चादयोऽसत्त्वे ॥ चादयो निपातसंज्ञा भवंति न चेत्सत्त्वे वर्त्तंते । प
सत्त्वप्रतिषेधोऽयं । सत्त्वमिति द्रव्यमुच्यते ॥ च । वा । ह । अह । एव । एवं । नूनं । शश्वत् । युगपत् । सूपत् । कूपत् । कु
वित् । नेत् । चेत् । चण् । कच्चित् । यत्र । नह । हंत । माकिम् । नकिम् । माङ् । माङो ङकारो विशेषणार्थः । माङि लु
ङिति । इह न भवति । मा भवतु मा भविष्यति । नञ् । यावत् । तावत् । त्वै । द्वै । रै । श्रौषट् । वौषट् । वौषट् । स्वाहा । वष
ट् । स्वधा । तुं । तथाहि । खलु । किल । हो । अहो । अथो । ज· मानो· ना । ननु । मन्ये । मिथ्या । असि । ब्रूहि । तु । नु । इति
इव । वत् । वत् । वत् । इह । वो· शं । हिं । कुं । सुकं । शुकं । जनुकं । नहिकं । सस्नं । स्नतं । अद्धा । इद्धा । नोचेत् । नहि । जातु ।
कथं । कुतः । कुत्र । अव । अनु । हा । हे । हे हा । इहा । आहोस्वित् । छंवट् । खं दिष्ट्या । पशु । वट् । खं । दिष्ट्या । पशु । व
ट् । सह । आनुषक् । अंग । फट् । ताजक् । अये । अरे । चटु । वाटु । कुं । खुं । घुं । हुं । आं । ई । शीं । सीं । वै ॥ उपसर्गविभ
क्तिस्वरप्रतिरूपकाश्च निपाताः । उपसर्गप्रतिरूपकाः । अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि । सुदत्तमनुदत्तं च
निदत्तमिति चेष्यते । अत्र उपसर्गात्र इति णत्वं न भवति । दुर्नीतिं दुर्नयः । दुर्निर्णयः । उपसर्गादिति णत्वं न भवति
असत्त्व इति किं । पशुर्वै पुरुषः । पशुः पुरोडाशः । निपातप्रदेशाः स्वरादिनिपातमव्ययमित्येवमादयः ॥ ॥

प्राप्यमनुव्रजेदिति एवमानंतरं उदकांतात् आ तत इति अनुप्रसंबंध वा निवर्त्तंते तत्र तज्ज्ञापितत्वात् लौकिकं चातिवर्त्तत इति लौ
किकं आप्यलोक एवातिवर्त्तते यत्नी द्वितीयमप्युदकांतं स्नेहाति प्रायादनुव्रज्यानिवर्त्तते । तस्मादाश्वरादित्युभनेवीश्वराल्का
भूयिति स्थितं ॥ ननु च न लोकाव्ययेत्यत्र लोकादीनामव्ययत्वादेव षष्ठीप्रतिषेधे सिद्धे पुनरुपादानं ज्ञापकं भविष्यति । अनंत

© Dharmartha Trust J&K. Digitized by eGangotri

का. प. १२

१६०

रस्य ग्रहणमिति। नैतदस्ति अपसंज्ञाया एवाभावं ज्ञापयेत निपातसंज्ञा तु स्यादेव न त्वस्य चिकीर्षितार्थ इस्याद्यो निपात एकाजनाङि
ति प्रगृह्यसंज्ञा स्यात्। प्रोष्यमिति। पर्यायं प्रमिस्यर्थः। प्राप्य पर्यायं प्रोप चाय चिक्रियाविशेषणत्वान्नपुंसकत्वं। चादयः। न चेत्स
त्त्वं वर्त्तन इति मत्वैवेवं वर्त्तते नञ्। सत्ता न भवतीत्यर्थः। तदाह प्रसज्य प्रतिषेधोऽयमिति। अथ पर्युदासे को दोषः। पशुशब्दोऽत्र पश्य
ते सम्यग्ज्ञाने विशिष्टे अवर्त्तते तस्य निपातत्वं स्यात् नातिद्रव्यसमुदायपर्यायो ह्यर्थः केवलद्रव्यादन्यो भवति। तथा प्रादयः स्वरवि
प्रातेतिविप्रः। आनश्योपसर्गा इतिकः। अत्र प्रशब्दः क्रियाविशिष्टद्रव्ये वर्त्तते। तत्र क्रियाद्रव्यसमुदायस्य द्रव्याद्रन्यत्वान्नि
पातत्वे सत्यमपसंज्ञायां तदं न विधेयस्युपगमान विप्रशब्दस्याव्ययसंज्ञास्यात् प्रसज्यप्रतिषेधे सुपत्रद्रव्यागंधस्तत्र सर्वत्र
मानः पश्यद्वोपस्त्वव चनोभवतिर् इत्यर्थे लोधं नयतीति पशुमन्यमानाः इत्यत्र दृश्यर्थे नमनं विशेष्यते। दर्शनमेतन्मननंस
म्यकमसमोनाः इत्यर्थः। सत्वशब्दोऽपसत्तो भावः मत्वं इति मत्वा ज्ञातिवचनो गृह्यन इति श्रान्तिमयनयति॥ सत्वमितिवद्रव्यमु
च्यत इति। दिदं तदिति सर्वनामपयोगमर्हयोरर्यवस्तद्रव्यमुच्यते उक्तं चावस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते। द्रव्यमिति
उक्ते सोऽर्थोऽभिधत्वेन विवक्षित इति स्वार्थेनेति शेषः। मिद्धत्र्योयोऽर्थः स्वार्थेन विशेष्यत या विवक्षितः तद्द्रव्यमित्यर्थः। उक्तं
चा स्वार्थस्य पत्र विश्रान्ति र्वाच्यं द्रव्यं तदुच्यते इति एतेन च द्रव्यत्वासारतिति विशेते यत्र ज्ञास्यादिकं शब्दप्रवृत्तिनिमित्तं विशेषणा
भावेनेति सत्त्वं द्रव्यं सदैरोणादिकस्त्वप्रत्ययः। ताभ्यामसत्त्वाणास्यदसधिकरणसाधनः वृत्तिरित्यव्यत्ने सवेदर्थवर्त्तितणका
रस्त्वर णकविघत्र पुक्तमिति विशेषणार्थश्च नत्रो नकारो न लोपो नञ इति विशेषणार्थः। न लोपो न स्येत्युच्यमाने यामतपुत्रः अ
त्रापि प्राप्नोति प्रासङ्गिक एष दोषः अलुगुत्तरपद इति वर्त्तते तत्र यत्रोत्तरपदे नास्ति संपूर्वपदं नस्य विशेषणं तदा हर्त्तपद
म् तस्य नस्य लोपः तुच्यमानेनेवात्र प्राप्नोति। नशब्देन पूर्वपदं विशेष्यमाणे न तं न विधिस्सद्भावात्त्रापि स्यात् अथा
सिन्पक्षे नञ इत्युच्यमाने पित्रेणापुत्र इत्यत्र नञः कस्मान्न भवति। अतुल्यत्वात्प्रत्यपस्य जकारोच्चरितापोश्चरितार्थनिपा
तस्य त्वचरितार्थः। तथेति पद्यते सोऽतुल्यत्वः समुच्चये वर्त्तते। तस्य तु धातोलेनस्य लिस्वरणाय स्यात तत्वं सिद्धं। अत्रापत्वमपि
तद्धितस्था सर्वविभक्तिरित्येव सिद्धं। ननु अतुल्यस्यापि विभक्तिप्रतिरूपकादित्येवाद्भिद्धमित्यप्रयंचार्थः पाठः। एवं वैलापो
मात्रायामिसादेरपि। स्वरप्रतिरूपकारति। अतिक्रवाच्च नमित्यादयः तेषां निपातसंज्ञाविधानं हारणासंज्ञा च एव प्रतिपाद्य

रामः १६०

१६०

© Dharmartha Trust J&K. Digitized by eGangotri

॥प्रादयः॥ ॥अयं योग उत्तरस्माद्विभज्य तेन पूर्वस्माच्च॥ परि पुनः प्रादय उपसर्गाः क्रियायोगे इत्युच्यते। नैवं शक्यमित्याह। पृथग्
योगकरणमिति। उत्तरस्मादुपसर्गसंज्ञाया एव क्रियायोग इति विशेषणं यथा स्यात्। निपातसंज्ञायां मा भूदिति एवमर्थं
उत्तरस्मात् योगाद् विभाग इत्यर्थः। अथ वा दिग्विधं प्रादीनपि पठित्वा पूर्वस्माद्योगात् किं भविविभज्येत त्राप्याह॥ उपसर्गाः क्रि

॥प्रादयो। सत्वे निपातसंज्ञा भवंति। प्र। परा। अप। सं। अनु। अव। निस्। दुस्। वि। आङ्। नि। अधि। अ
पि। अति। सु। उत्। अभि। प्रति। परि। उप। पृथग्योगकरणमुत्तरसंज्ञाविशेषणार्थं। उपसर्गाः क्रियायो
ग इति। यादृशो नामुपसर्गसंज्ञा मा भूत्। असत्व इत्येव। परा सेना॥ ३१॥ ॥श्री॥ ॥श्री॥ ॥

यायोग इति वाद्रीनामिति चलो योत्र द्रष्टव्यः। इति च वादीनामिति। पराजयंति सेना इति परा उत्कृष्टा परदेशस्थिना वा द्रष्टव्या
त्रत्र वर्तमानस्य प्रशब्दस्य न भवति। यत्र त्वेकवचनं यज्ञते पराग्नयति तत्र प्रयोदाहरणं। द्रष्टव्यम्। हल्ङ्याब्भ्य इति सुलो
पात्। पराशब्दस्याद्युदात्तत्वाच्च॥ ३२॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।उपसर्गाणां क्रियायोगा इति मरुद्योगे तृतीया। निपातनात् समासः कर्तृकरणे कृता बहुलमिति बहुलवचनाद्वा। यद्वा क्रियया करणभूतया
प्रादीनां धातुभिर्योगात् करणे तृतीया। पाप एव समासः। प्रणयतीति। उपसर्गादसमासेऽपीति णत्वं। प्रनायक इति। न चात्रापि क्रि
यायोगोऽस्त्येव मरुत्संभारय।। पुनरेवमाशङ्काः प्रभृताश्च तायां तु समाधानं क्रियामाक्षिपन्तीति तत्र क्रियायोगग्रहणसामर्थ्यात् यं प्र
ति क्रियायुक्ताः प्रादयः तं प्रत्युपसर्गसंज्ञा भवतीत्ययमर्थो भवति अत्र च यत्क्रियायुक्तः प्रादिः स गतिरित्युपपद्यते। पञ्चम्यां युक्त
तेन न तत्क्रियायुक्ताः इति नास्ति णत्वप्रसंगः। मरुच्छब्दस्येत्सुपसर्गसंज्ञैवेष्यते। न निपातसंज्ञा तस्यां हि सत्यां निपाता [illegible]
न्तीया कर्म्मणीति पूर्वपदप्रकृतिस्वरः स्यात् अन्तोदात्तश्च मत्तुशब्द इष्यते। न कुपसर्गसंज्ञायामप्युपसर्गाश्चाभिव

उपसर्गाः क्रियायोगे। प्रादयः क्रियायोगे उपसर्गसंज्ञा भवन्ति। प्रणयति। परिणयति। प्रणायकः। परिणायकः
।क्रियायोग इति किं। प्रगतो नायकोऽस्मात् देशात् प्रनायको देशः। मरुच्छब्दस्य चोपसंख्यानं कर्त्तव्यं। मरुद्दित्तो म
रुत्तः। संज्ञाविधानसामर्थ्यादनजन्तत्वेपि अच उपसर्गात्त इति तत्वं भवति। श्रच्छब्दस्योपसंख्यानं। श्रातश्चो
पसर्गे इति अङ् भवति श्रद्धा। उपसर्गप्रदेशाः उपसर्गाद्वौ। किरित्येवमादयः।।

न्तेमित्या पुरान्तत्वं स्यादेवं तानेना पूर्वमायुदात्तत्वं विधीयते किं तर्हि निपाताद्युदात्तत्वं सिद्धं अभे प्रतिषेधार्थमेतत्। किंच निपातसं
ज्ञायामप्यपसंज्ञास्यात् अथ उपसर्गे घोः। किः आतश्चोपसर्गे इत्येतौ विधी कस्मान्न भवतः। अनभिधानात्। मरुत्त इति। मरु
च्छब्दत्कारस्यानं चित्येति द्विर्वचने उरोऽरोरीतिमध्यमस्य मध्यमयोर्मध्यमानां वा लोपे पत्वे रूपं भवति। कर्थं पुनरत्र तत्वं
प्राप्तो यमनजं तत्वमत आह। संज्ञाविधानसामर्थ्यादिति। उक्तः प्रयोजनान्तराभावः। एवं तु मरुत्त्रयनी तितिति तकारस्य वाधि
पि णत्वं प्राप्नोतीति तस्मात् त्वे विशिधावेवेष्यते। अच्छब्दस्येति अङ्विधावेवेष्यते किं प्रत्ययो हि न भवतीति तदा हस्मा। तस्मादुपसर्गा
इति भिदादिपाठान्न प्रवृत्तं ह्येवं ते तिनिपातनाद्वा सिद्धं।।

© Dharmartha Trust J&K. Digitized by eGangotri

गतिश्च गतिरनन्तर इति पुंल्लिङ्गनिर्देशात् । गम्यते इति गतिः क्तिच्क्तौ च संज्ञायामिति क्तिच् । निपातनाद्वा नञि विदीर्घो इति न भव
ति प्रकृतिस्वरत्वे गतित्वान्न ह्रस्वो भवति । समासान्त प्राप्तिश्चादेव सिद्धः । प्राप्तिर्भी मत्र समासोऽपि प्रयोजनं प्रकृतमिति गतिर
नन्तर इति पूर्वपदप्रकृतिस्वरः । यत्प्रकरोतीति । तिङ्-ङ्शस्य निघातः स्यान्निपातैर्यद्यदिहन्तेति निषेधेति पः पित्वादनुदात्तत्वे विकरण
स्य प्रत्ययस्वरः । धातोः शेषनिघातः । तिङि चोदात्तवतीति प्रशब्दस्यानुदात्तत्वं । एतत्प्रयोजनं न चतुर्थ्यां गतिसंज्ञाप्रकर
णे सर्वत्र द्रष्टव्यं । चकारः संज्ञासमावेशार्थ इति । अस्य येऽकसंज्ञाधिकारे कत्र संज्ञाद्वयविधानाद्वा पर्यायः स्यादिति भावः ।

गतिश्च । गतिसंज्ञकाश्च प्रादयो भवन्ति क्रियायोगे । प्रकृत्य । प्रकृतं । यत्प्रकरोति । योगविभाग उत्तरार्थः । ऊर्यादि
गतिसंज्ञैव यथा स्यात् । उपसर्गसंज्ञा मा भूत् । ऊरीस्यादित्यत्रोपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जामिति पञ्चमर इति षत्वं प्रसज्येत ।
चकारः संज्ञासमावेशार्थः । प्रणीतमभिषिक्तं । गतिरनन्तर इति स्वरः । उपसर्गादिति णत्वषत्वे च भवतः । का
रिकाशब्दस्योपसंख्यानं । कारिकाकृत्य । यत्कारिकाकरोति । पुनश्चनसौ छन्दसि गतिसंज्ञौ भवत इति वक्तव्यं । पु
नरुत्स्यूतं वासो देयं । गतिर्गतौ इति निघातो भवति । चनोहितः । गतिरनन्तर इति स्वरः । गतिप्रदेशाः कुगतिप्रा
॥ इत्य इत्येवमादयः ॥ ३३ ॥

कारिकाशब्दस्येति । कारिका क्रिया मर्यादा स्थितिरित्यर्थः । यत्न इत्यपरे । बाल्यर्थी निर्दे
श इति ण्वुलन्तः कर्तरि कारिकाशब्दः कारिकास्मीति पक्षे कर्मणि वा चीनयोर्ग्रहणं न भवति क्रियायोगग्रहणेन कार
कस्य विशेषणात् क्रियायां ते ह न स्यात् । यत्कारिकाकरोतीति निपातनत्वादभ्यत्वेमति विभक्तेर्लुक् । पुनरुत्स्यूतमिति ग
तित्वात्समासः । गतिर्गतौ इति निघातो भवतीति यद्यप्यत्र प्रहवादीनां चेत् उत्तरपदान्तोदात्तत्वेन शेषनिघातः सिद्धः न
थापि परत्वादयमेव निघातो युक्त इति भावः । इह च पुनराधियामिति त्वात्समासे कृते हृद्य उत्तरपदप्रकृतिस्वरेणायत्तो नाव
इति षष्ठ्यन्त आद्युदात्तः । चनोहित इति । निपातत्वादाद्युदात्तस्य चनःशब्दस्य गतिरनन्तर इति प्रकृतिस्वरः ॥ ३३ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ १३

१६५

॥ कुर्यादि॥ ॥ अंतात्यंतं तावच्चेति। यद्यपि परसंज्ञायामंत्रग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदंतविधिर्नास्तीति कापि तत्तथापि क्रियायोग इति च
नुवृत्ते स्तदंतग्रहणमिति भावः॥ नहि प्रत्ययमात्रस्य क्रियायोगः संभवति। सार्थिकत्वेन ह्युपमनर्थकत्वेऽलात। द्वेरश्यादि त्वाच्च। कृभ्वस्ति
योग इति नकेवलमेतन्नाप्रयोगोऽप्यन्यत्र न भवति नहि भवति उररी संपद्यत इति। श्रौषड्रादीनां स्वाहायर्थतानां वा द्विधा यादात् अक्रियायोगे
पि निपातत्वं आविः। डाजंतस्य मा ह्यात्प्रभ तिषु पाठात् कृञोयोगेपि कल्पः स्येत्ति योगीत्वेनेन निसोकथंतर्ह्याविग्यसुषो भवत् सा विग्रा
गा॥ अभवन स्युराद्विलोल जिह्वायुंग लीरो भयस्त्वधाग मा कि रि तिस्वतंत्राः कवयः॥ शुक्ली कृत्येति अस्य वा दित्वात् पटपटाशब्दो वा
॥ कुर्यादि च्विडाचश्च॥ ऊर्यादयः शब्दाः च्यंताः डाजंताश्च क्रियायोगे गतिसंज्ञा भवंति च्विडाचोः कृभ्वस्तियोगे विधानं तत्साह
चर्याद्ध्यर्यादीनामपि तैरप्रयोगे गतिसंज्ञा विज्ञायते। ऊरी। उररी। उररीशब्दावंगीकरणे विस्तारे च। ऊरीकृतं। यदूरी करोति।
उररीकृत्य। उररीकृतं। यदुररीकरोति। अर्थविवल्पे। शुक्लीकृत्य। शुक्लीकृतं। यच्छुक्ली करोति। डाच्। पटपटाकृत्य। प
टपटाकृतं। यत्पटपटाकरोति। पापी। ताली। आताली। वेताली। धूसी। शकला। संशकला। ध्वंशकला। भ्रंशकला। एते
शकलादयो हिंसायां। शकलाकृत्य। संशकलाकृत्य। ध्वंशकलाकृत्य। भ्रंशकलाकृत्य। गुलुगुधा पीडार्थे। गुलुगुधा
कृत्य। सजूः सहार्थे। सजूः सहार्थे सजूः कृत्य। फलू। फली। विक्ली। आक्ली इति विकारे। फलूकृत्य। फलीकृत्य। विक्ली
कृत्य। आक्लीकृत्य। आलोष्टी। केवाली। केवली। शेवाली। शेवाली। पर्याली। मिश्मसा। मसमसा। एते हिंसायां। वषट्
। वौषट्। श्रौषट्। स्वाहा। स्वधा। वंधा। प्रादुस्। श्रत्। आविस्॥ ॥ अनुकरणं चानितिपरं। इतिः परो यस्मादिति वहुव्रीहिः
। अनुकरणमनितिपरं क्रियायोगे गतिसंज्ञं भवति। खाट्कृत्य। खाट्कृत्य खाट्करोति। अनितिपरमिति किं। खाडिति कृत्वा॥ नि
ष्ठाव इत्यत्र मुख्यादितः॥ ॥ आदरानादरयोः सदसती॥ ॥ इतिः परो यस्मादिति पंचमी समासः तल्लक्षणामावन्ताश्रितः। तेनेतिरवाट्
कृत्सेत्यत्र इतेः परत्वेपि भवति। खाडिति कृत्वा निरष्ठीवदिति। अत्राभ्यति मा तिषेधाद्गतिसंज्ञायां समासः स्यात्। धातोश्चानंतरः प्रयोग
इति नियमेनैतत्रासिध्येत्। ष्ठिवुनिरसने ष्ठिवु कसु वा च मो शितीति दीर्घः। भूतकाले लुङ्मः किमर्थः। कस्यचित् कवेरयं प्रयोग उदा
हृतः। धुंवस्य कः सोऽस्याः धुतमूलं दशनमात्मनो वदने। जिह्वामूलेस्य स्वाडिति कृत्वा निरष्ठीवत॥ ॥ ॥

॥ काशिका ५९ ॥

राम॰

१६८

आदरानादरयोः॥ ॥प्रीतिसंभ्रम इति प्रीतिपूर्विका प्रत्युत्थानादिविषयात्वरेत्यर्थः। परिभवो दार्त्स्न्यमिति अवज्ञया कर्तव्यं प्र
त्युत्थानादिकं प्रत्युपेक्षेत्यर्थः। असदनादरग्रहणांश्चिमर्थं असत्कृत्येत्यत्रापि यथा स्यात् मा भूत् सच्छब्दस्य गतिसंज्ञा सत्कृत्य
नेन तत्र समासो भविष्यति। नैवं शक्यं मतिशिष्टत्वात् कृत्स्वरस्य पदप्रकृतिस्वरो बाधितः। अन्यथा एवं यदि प्रकृतिस्वरेणाद्युदात्त
त्वं स्यात्। असत्कृतमित्यत्र तु सत्कृतशब्दे गतिरनन्तर इति स्वरे प्रकृते पश्चान्नञ् समासे पित्स्ये वस्वरः। असच्छब्दस्यापि ह
न शब्देनापि समासे नन्यनिपातत्वात् पुरो ऽव्ययं गतित्वात् प्रतिभावेपि सरस्वरः इति नास्ति विशेषः। इह च यत् सत्करोतीस
त्तत्वस्य निषेधो नस्यात्। अव्ययसंज्ञापि तस्य नस्यात् इति समच्छब्दस्यैव गतिनिपातसंज्ञे एधितस्येन च अत्र सच्छब्देन तदन्तवि
धिर्नस्यते विशेषणस्याभावात्। न चात्र सच्छब्दस्यैव संज्ञा स्वकार्यप्रदेशेषु प्रकृतस्येतेन तदन्तविधिर्भविष्यति अन्यपसंज्ञा

आदरानादरयोः सदसती॥ प्रीत्यतिशय आदरः। परिभवो ऽनास्था अनादरः। आदरानादरयोर्यथाक्रमं स
दसच्छब्दौ गतिसंज्ञौ भवतः। सत्कृत्य। सत्कृतं। यत्सत्करोति। असत्कृत्य। असत्कृतं। यदसत्करोति। आ
दरानादरयोरिति किं। सत्कृत्वा काण्डं गतः॥ ॥

यान्तावदन्नेवदन्तविधिः परमो घेरितिय थाकुगतिप्रादय इत्यत्रापि सुविति वर्तते सुपेस्येव निवृत्तं तदहति नाविशेष्यते गति
रनन्तर इत्यत्र पूर्वपदं। गतिर्गता वित्यत्रापि पदस्येति प्रकृतं भवतु नस्तेन विधिना कार्यं अनादरणव यति सुहेतः। स्यात्। असत्व
नादरग्रहणेन सद्भूमहिप्सादनिषेधात्रेवं शक्यं आदरप्रसंगएव हि स्यात्। गुरुनमसत्कृत्येति वोडालमसत्कृत्येत्यत्र न स्या
त्। यथा अब्राह्मण इति क्षत्रियादिरेवोच्यते न लोष्टादिः अनादरस्य ग्रहणे तु सति वकुब्रीहिर्विज्ञायते अविद्यमानादरो ऽदरः
इति बहुव्रीहिश्चात्र नाभावे प्रसक्तो भावे च भवतीति सर्वत्र संज्ञा सिध्यति तस्मादनादरस्य ग्रहणं कर्तव्यं असद्ग्रहणात्तु शक्यम
कर्तुं आदरानादरयोः सदित्येवास्तु तत्र यथा गोष्पदं सेवितं सत्रासेवितं गोष्पदशब्देन संभवति इति गोष्पदार्थमसेवि
तग्रहणं। एवमनादरेपि सच्छब्देन संभवतीति असच्छब्दोर्थमनादरग्रहणं भविष्यति। सत्कृत्वा सत्कृत्येति। शोभनवचनो वि
द्यमानवचनो वा सच्छब्दः तद्विपरीतवचनो ऽसच्छब्दः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ाम्भूषणो ॥ अलमितिप्रतिषेधइत्यादि। नपथ्यान्अलंकृत्वा अलंभोक्तुं। अलंभुक्त्वेअलंकरोतिकन्यामिति। अंतः। अंतर्हत्वा मध्येहत्वेत्य
र्थः। अंतः शब्दस्येत्यादि उपसर्गसंज्ञायामेवैतन्नोक्तं। अंतः शब्दप्रसंगेनवक्ष्यामीतियवाअोपसर्गसंज्ञो च तेनतद्धं नरणीयतीत्यादिवदंतर्हण्ण
त। अंतर्हत्यनमित्यादाववहितेरत्वं स्येनिमित्तत्वंसिद्धं। अंतरयणमित्यत्रापिहत्वचडमेवसिद्धं इति। अंतर्हतौ शोऽपनेवेतिसूत्रे द्रव्यमपिदेशप्र
तिषेधार्थत्वदृष्टं॥ ॥ कणेमनसी॥ ॥ कणेशब्दः सप्तमीप्रतिरूपोनिपातोभिलाषोतिशयेवर्ततेमनः शब्दोपिसाहचर्यादभिलाषवृत्तिरेवे

॥ भूषणेऽलं॥ अलमितिप्रतिषेधेसामर्थ्यपर्यासौभूषणेचेतिविशेषणमुपादीयते। भूषणेयोऽलशब्दः सगतिसं
ज्ञोभवति। अलंकृत्य। अलंकृतंपटलंकरोतिभूषणइतिकिं। अलंभुक्त्वाउदरंनगतः॥ ॥ अंतरपरिग्रहे। अंतः शब्दोऽप
रिग्रहेर्थेगतिसंज्ञोभवति। परिग्रहाः स्वीकरणंतदभावेगतिसंज्ञाविधीयते। अंतर्हत्य अंतर्हतं॥ पदंतर्हत्य। अपरिग्रहइ
तिकिं। अंतर्हत्वामूषिकांश्येनोगतः परिगृह्यगतइत्यर्थः। अंतः शब्दस्याङ्किंविधिणत्वेषुउपसर्गसंज्ञावक्तव्या। अ
तर्द्धा। अंतर्द्धिः। अंतरणयति॥ ॥ कणेमनसीश्रद्धाप्रतीघाते। कणेशब्दोमनसशब्दश्चश्रद्धाप्रतीघातेगतिसंज्ञौभवतः
। कणेहत्यपयः पिबति। मनोहत्यपयः पिबति। तावत्पिबतियावदस्याभिलाषोनिवृत्तः॥ श्रद्धाप्रतिहतेत्यर्थः। श्रद्धाप्र
तीघातइतिकिं। कणेहत्वागतः। मनोहत्वागतः॥ ३५ ॥ ॥ श्री४॥ ॥ श्री४॥ ॥ श्री४॥ ॥

विज्ञेयः। कणेहत्येति। अतिशयेनाभिलष्यतन्निवृत्तिपर्यंतंपिबतीत्यर्थः। तदाहतोवदितिश्रद्धाप्रतिहत्यतइत्यर्थः इतियावदस्येत्यपज्ञ
ते। प्रत्युदाहरणेकणेशब्दः सूक्ष्मतंडुलावयवेधिकरणेभूतेवर्त्ततेमनः शब्दोपिचेतसि॥ ३५ ॥ ॥ ७॥ ॥ ७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।पुरोऽव्ययं।। असिप्रत्ययांतः पुरःशब्दोऽव्ययमिति पूर्वाधरावराणामसि पुरधवश्चैषामित्यसिप्रत्ययः पूर्वशब्दस्य पुरादेशः। तद्धितश्चास
र्वविभक्तिरित्यव्ययसंज्ञा विसर्जनीयस्य छान्दिकः सकारादेशः।। पुरस्कृत्येति पूर्वं स्थिन्ने शेष हत्वेत्यर्थः। पुरोपुरः कृत्वेति पुरः कृत्वेत्येतदत्र
सुदाहरणं दत्तरयोन्यन्यपमासः तत्साहचर्यात्पुरस्ति शब्दस्य ज्ञानायव्ययमिति प्रदर्शनार्थः अत्र नमस्पुरसोर्गत्योरिति सत्वं न भवति समा
सश्च न भवति।। ।।अस्तंच।। ।।अस्तंकृत्वेति अस्तु क्षेपणे निष्ठा उदितो वा इति विभाषेति इट्प्रतिषेधः। तत्तुल्यार्थाल्लौकिकत्वादेवान्

।।पुरोऽव्ययं।। असिप्रत्ययांतः पुरःशब्दोऽव्ययं गतिसंज्ञो भवति। समासस्वरोपचाराः प्रयोजनं। पुरस्कृत्य पुरस्कृतं। यत्पुरस्क
रोति। अव्ययमिति किं। पूर्वपुरः कृत्वा काण्डं गतः।। ।।अस्तंच।। अस्तशब्दो मकारांतोऽव्ययमनुपलब्धार्थो वर्त्तते स गतिसंज्ञो भ
वति। अस्तंगत्य सविता पुनरुदेति। अस्तंगतानि धनानि। यदस्तं गच्छति। अव्ययमित्येव। अस्तं काण्डं क्षिप्तमित्यर्थः।। ।।
अच्छ गत्यर्थवदेषु। अच्छशब्दोऽव्ययमभिशब्दस्यार्थे वर्त्तते। स गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञो भवति। अच्छगत्य। अच्छ
गतं।। अच्छ गच्छति। वदतौ अच्छोद्य। अच्छोदितं। यदच्छवदति। अव्ययमित्येव। उदकमच्छं गच्छति।। ।।अदोऽनुपदेशे।। अदः
शब्दस्त्यदादिषु पठ्यते सोऽनुपदेशे गतिसंज्ञो भवति। उपदेशः परार्थः प्रयोगः स्वयमेव तु परामृश्याय आमृशति तदा नास्त्यु
पदेशः इति सोऽस्य विषयः। अदःकृत्य। अदःकृतं। यददः करोति। अनुपदेश इति किं। अदः कृत्वा काण्डं गत इति परस्यक
थयति।। ।।तिरोऽन्तर्द्धौ।। अंतर्द्धिर्व्यवधानं। तत्र तिरः शब्दो गतिसंज्ञो भवति। तिरोभूय। तिरोभूतं। यत्तिरोभवति। अं
अंतर्द्धाविति किं। तिरोभूत्वा स्थितः।। ।।छ।। ।।छ।। ।।छ।। ।।

न भवति।। किमव्ययग्रहणात् तुल्यस्य एवं तस्य अस्तं शब्दस्य अव्ययमिति ज्ञाप्यते नत्वपंचादिषु स्वरादिषु गणपाठ्यते।। ।।अच्छगत्य।। ।।अच्छे
त्यनुकरणं तेऽपि अविभक्तिको निर्देशः।। सुपांसुलुगिति विभक्तेर्लुप्तत्वात्। अभिशब्दस्यार्थ इति। आभिमुख्ये। अच्छोद्येति। यजादित्वा
त्संप्रसारणं। उदकमच्छं गच्छति अकलुषमित्यर्थः। अदोऽनुपा उपदेशः परार्थ इति वाक्यप्रयोगः इत्यर्थो दृश्यते। अदः कृत्येति। एतं क
र्मइति स्वपमालोच्य इत्यर्थः।। ।।तिरोऽन्तर्द्धौ।। ।।तिरोभूयेति समास कृत्स्वरौ प्रयोजनं तिरोभूतमिति भवते रक्मकत्वात् कर्त्तरि
क्तः गतिरनंतर इत्यत्र च कर्मणीति निवर्त्तितं समासस्वरो तत्र प्रयोजनं। तिरोभूत्वेति। पार्श्वमोभूत्वेत्यर्थः।। ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

विभाषा॥ ॥तिरस्कृत्येति तिरसोऽन्यतरस्यामिति सत्वं प्रत्युदाहरणे तु न भवति तत्र गतित्वमनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् सूत्रे विभ
क्त्यभावः॥ ॥साक्षात्प्रभृतीनि॥ ॥साक्षात्प्रभृतिष्विति॥ असाक्षाद्भूतं यदा साक्षात्क्रियते तदा यथा स्यात् यदा तु साक्षाद्भूतमेव रूपान्तरे
णाक्रियते तदा माभूदित्येवमर्थमेवं मिथ्याप्रभृतिष्वपि द्रष्टव्यम्। एतच्च्व्यर्थ इति गत्वा लभ्यते तथा हि णत्वं लवणं कृतमिति सुप्त्वा ... तेष्वन्त्येव रूपस्य
करणं प्रतीयते न स्वभावान्तरं यत्र तस्य न च समासमपि प्रकृतिविवक्षायां तस्यैव रूपस्य करणं प्रतीयते अथ च्व्यर्थ इति नाप्नोतीति तस्मान्च्व्यर्थ
ग्रहणमेव कर्तव्यम्। अथ च्व्यर्थेऽपि साक्षादादिषु अयं विकल्पः कस्मान्न भवति। अस्त्वनेन मुक्ते पुनः प्रसंगविज्ञानाद् भूर्यादिष्विडावश्य

विभाषा कृञि॥ अन्तर्धावित्यनुवर्तते। प्राग्विभाषेयम्। तिरःशब्दः करोतौ परतो विभाषा गतिसंज्ञो भवति। तिरस्कृत्य तिरःकृत्य। यत्तिरस्क
रोति। तिरस्कृत्वा। अन्तर्धावित्येव। तिरःकृत्वा काष्ठं तिष्ठति। उपाजेऽन्वाजे॥ विभाषा कृञीति वर्तते। उपाजे अन्वाजे शब्दौ विभक्तिप्रति
रूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते। तौ कृञि विभाषा गतिसंज्ञौ भवतः। उपाजेकृत्य उपाजेकृत्वा। अन्वाजेकृत्य। अन्वा
जेकृत्वा॥ ॥साक्षात्प्रभृतीनि च॥ विभाषा कृञीति वर्तते। साक्षात्प्रभृतीनि शब्दरूपाणि कृञि विभाषा गतिसंज्ञानि भवन्ति।
साक्षात्प्रभृतिषु च्व्यर्थवचनम्। साक्षात्कृत्य साक्षात्कृत्वा। मिथ्याकृत्य मिथ्याकृत्वा। साक्षात्। मिथ्या। चिन्ता। भद्रा। लोचन। विभाषा। संपत्का।
आस्था। अमा। श्रद्धा। प्राजर्या। प्राजरुहा। बीजर्या। बीजरुहा। संसर्या। आर्य। अर्थे। लवणम्। उष्णम्। शीतम्। उदका। आर्द्रा। गतिसंज्ञा
संनियोगेन लवणादीनां मकारान्तत्वं निपात्यते। अग्नौ। वशे। विकसने। प्रहसने। प्रत्यसने। प्रादुस्। नमस्। आविस्॥ ३६

तेषामप्यविष्यति नैवं शक्यम्। यदेतल्लवणादीनां मकारान्तत्वनिपातनं तदपि च्व्यन्तेषु स्यात्। एवं तर्हि लवणादीनां मान्ता लवणादीनां मान्ता ल
वणावद्भूयः आदेशाः करिष्यन्ते तत्र पक्षे घरे शविहतं सालम्य लाह्न ... शब्दस्यापि पक्षे लवणमादेशः क्रियते न कश्चिद्दोषः त्रेशाय्य
हि नः साक्षा लवणं कृत्य लवणं कृत्वा लवणी कृत्येति। नन्वेवं सति सिद्धं दृष्टिकारस्कमकारान्तत्वं निपात्यत इति वदति सम मन्येते क्षम्यते बु
पूर्वविप्रतिषेधेन नित्या संज्ञा भवति विकल्पेन तु समनिप्रयुक्तं मान्तत्वनिपातनमिति। अग्नौ वशे प्रभृतयो विभक्तिप्रतिरूपका निपाताः। प्रा
दुराविःशब्दयोः कुर्यादित्वात् मान्तेभ्यो विभाषा ३६॥

© Dharmartha Trust J&K. Digitized by eGangotri

अनत्याधाने उरसिमनसी शब्दौ निपातौ। उरसिकृत्येति अभ्युपगम्येत्यर्थः। मनसिकृत्य निश्चित्येत्यर्थः। मध्येपदे। अविभक्तिको निर्दे
शः मध्येपदे शब्दौ निपातौ। निवचनं वचनाभाव इति तत्र निपातनात् एकारान्तत्वं न पुनरेषा सप्तमी वाचं नियम्येति व्याख्या। निपातनं गवि

॥अनत्याधान उरसिमनसी॥ विभाषा कृञि इति वर्तते। अत्याधानमुपश्लेषणं तदभावे अनत्याधाने उरसि मनसी शब्दौ
विभाषा कृञि गतिसंज्ञौ भवतः॥ उरसिकृत्य। उरसि कृत्वा। मनसिकृत्य। मनसि कृत्वा। अनत्याधान इति किं। उरसि कृत्वा
पाणिं शेते॥ ॥मध्येपदे निवचने च॥ विभाषा कृञि इति वर्तते। एकारान्तत्वं अनत्याधान इति च मध्ये पदे निवचने इत्येते शब्दाः
अनत्याधाने विभाषा कृञि गतिसंज्ञा भवन्ति। मध्येकृत्य। मध्ये कृत्वा। पदेकृत्य। पदे कृत्वा॥ निवचनं वचनाभावः। निवचनेकृत्य निवचने कृ
त्वा वाचं नियम्येत्यर्थः। अनत्याधान इत्येव। हस्तिनः पदे कृत्वा शिरः शेते॥ ॥नित्यं हस्ते पाणावुपयमने॥ कृञि इति वर्तते। ह
स्ते पाणौ इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ भवतः उपयमने। उपयमनं दारकर्म। पाणौकृत्य। हस्तेकृत्य। दारकर्म कृत्वे
त्यर्थः॥ उपयमन इति किं। हस्ते कृत्वा कार्षापणं गतः॥ ॥ श्रीः॥ ४ ॥श्रीः॥ ४ ॥श्री४॥ ४ ॥
॥छ छ॥ ॥छ छ॥ ॥

शेषेण न तु संज्ञासंनियुक्तं निवचने कृत्वेति उदाहृतत्वादित्याहुः॥ नित्यं हस्ते॥ ॥दारकर्मेति अन्ये तु स्वीकरणमात्रमिच्छन्ति। हस्त
कृत्य महास्त्राणीति। हस्तेपाणौ शब्दौ निपातौ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्राध्वं बंधने मकारांतोऽव्ययमिति। चादिषु पाठः। आनुकूल्ये वर्तत इति तेन बंधने वर्तमानः प्राध्वम् शब्दः। इत्ययमर्थो न भवति। कथं तर्हि बंध नद्गुण्यात् स्त्वयं एवत आह। तु दिति। बंधन इति सत्संप्रम्यर्थ हाके प्राध्वमित्यनेन संबंधः। बंधने सति यदानुकूल्यं तत्र बंधनहेतुकमिति भावः। प्राध्वं कृत्वा शकटं गत इति प्राध्विनो ध्यानं प्राध्वः गोसाद्यः आतायर्थ इति समासः उपसर्गादि ध्वन इत्यच्। लाक्षणिकत्वादेवात्र न भविष्यति तस्मादव्ययस्यैवायं प्रयोगः। आनुकूल्यं तु बंधनहेतुकं न भविष्यतीति भावः इत्येव सते॥ ॥जीविकोप॥ ॥जीविकाजी

प्राध्वं बंधने॥ कृञीति वर्तते॥ प्राध्वमिति मकारांतमव्ययमानुकूल्ये वर्तते तत्र आनुकूल्यं बंधहेतुकं यदा भवति तदा प्राध्वं शब्दः कृञि नित्यं गतिसंज्ञो भवति। प्राध्वं कृत्वा बंधन इति किं। प्राध्वं कृत्वा शकटं गतः॥ ॥जीविकोपनिषदावौपम्ये॥ कृञीति वर्तते। जीविकाउपनिषदित्येतौ शब्दौ औपम्ये विषये कृञि गतिसंज्ञौ भवतः। जीविकाकृत्य। उपनिषत्कृत्य। औपम्य इति किं। जीविकां कृत्वा गतः॥ ३७॥ ॥श्री॥ ॥श्री॥ ॥

वनीयायः संज्ञायामिति करणे राख्वल्। राय्यं ताध्वकर्त्री उपनिपूर्वात् सदेः सत्सूद्विषेति क्विप्। सदिप्रत्ययेनेति बलवत् उपनिषद् रहस्यं वेदांतस्तत्संज्ञानं बेदांतभागो वा। औपम्य इति। उपमीयते नयेत्युप मा आत श्चोपसर्ग इत्यङ्। तस्या भाव औपम्यं विषयस्स समभी वैषा उपमानोपमेयसंबंधनिमित्तादभेदोपचारात्तावुपमेये निर्दिष्टो भवतः तावौपाय विषयो जीविका कृत्य उपनिषत्कृत्येति जीविकामिव कृत्वा उपनिषदमिव कृत्वा इत्यर्थः॥ ययपिगतिसमासो नित्यः तथापीव शब्दप्रयोगोऽस्वार्थनिष्ठत्वाद्दृष्टांतार्थं वाक्यं भवत्येव॥ ३७॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ते प्राग्धातोः ॥ नियमार्थमिदं । स पुनर्नियमः संज्ञानियमो वा स्यात् प्रयोगनियमो वा स्यात् । तत्र संज्ञानियमे ते शब्देन प्रादयः उपनिबद्धस्वर्यमाणस्वरू
पेण परामृश्यन्ते । न गत्युपसर्गसंज्ञाविशिष्टेन रूपेण संज्ञयोरनिष्पादितत्वात् । तेनैकवाक्यतामापन्नैः पूर्वसूत्रैः संज्ञाविधानात् । ते प्रादयः उपनि
बद्धाः प्रयोगे धातोः प्रागेव प्रयुज्यमानाः गत्युपसर्गसंज्ञा भवन्तीत्यर्थः । प्रयोगनियमे तु लब्धगत्युपसर्गसंज्ञाः परामृश्यन्ते । ते गत्युपसर्गसंज्ञका
धातोः प्रागेव प्रयोक्तव्याः इत्यर्थः । तत्राद्ये पक्षे स्वरूपेण परामर्शः प्रादीनामिव चादीनामपि स्यात् तथा च निपातसंज्ञाया अपि नियमः स्या
त् अथवा गत्युपसर्गसंज्ञयोरेव नियमः एवमप्यनर्थकं वचनं प्रयोग एव हि ते धातोः प्राक् दृश्यन्ते न पुनरप्राक् प्रयुज्यमानानां संज्ञायां किंचि
दनिष्टमापद्यते छन्दसि परेऽपि व्यवहिताश्चेति सूत्रद्वयं वानर्थकं पक्षे व्यवहितानां संज्ञैव निषिद्धा न तु प्रयोगः न च तेनापि संज्ञैव विधीय
ते निष्प्रयोजनत्वात् । किं च अनुकरणं चानितिपरमिति निति परग्रहणमनर्थकं स्यात् स्वादिति कृत्वा निरष्ठीवदित्यत्र व्यवहितत्वादनु

॥ ते प्राग्धातोः ॥ ते गत्युपसर्गसंज्ञकाः धातोः प्राक् प्रयोक्तव्याः । तथा चैवोदाहृताः । ते ग्रहणमुपसर्गार्थं गतयोऽस्यन्तं
नाः ॥ ३९ ॥ श्री ४ ॥ ॥ श्रीः ॥ ॥

करणस्य गतिसंज्ञैव निषिद्धा प्रयोगस्तु केन कार्यतां प्रयोगनियमे तु धातोः प्रागेवानुकरणस्य प्रयोगः स्यात् न त्विति शब्देन व्यवहितस्येति
अनितिपरमिति वक्तव्यं । अतः प्रयोगनियम एवाभ्युपेत इति मत्वाह । ते गत्युपसर्गसंज्ञका इति । अथास्मिन्पक्षे तेति पातानामपि
ते शब्देन परामर्शः कस्मान्न भवति अव्यवहितत्वात् । कथं तर्हि उपसर्गाणां परामर्शः तेषु प्रसङ्गात्ते । तद्रूपेण परामृश्यन्ते किं तर्हि गतिस्वरूपेण
निपातमपि गतित्वात् । अनेनैवाभिप्रायेणाह लाघवादुपसर्गाणां पृथग्ग्रहणं वा । द्वयस्यानेव मितिनिन ते परामृश्यन्ते । ननु यत्र लोके संकीर्णः
प्रयोगो गौणीरीति तत्र साधुपरिज्ञानाय शास्त्रमर्थवत् यत्र त्वसंकीर्ण एव प्रयोगः न तत्र शास्त्रकृत्यमस्ति । न च कश्चित् प्रपचतीति
प्रयोक्तव्ये पचतीति प्रतिप्रयुंक्ते पर्यधिलोके प्रयोगो न दृश्यते विपरीतश्छन्दसि तु परव्यवहितप्रयोगदर्शनात् भाषायामपि तथा प्रयो
गः शङ्क्येत दर्शितस्याप्यत्वे विभाषायामेव गतरावि: शब्दस्य परव्यवहितप्रयोगं कुर्यादित्सूत्रे । किं च उदरिके लेरहतिवहोकूलेरहतिवहोम
लमुद्रहस्सत्र बहिःकूलेः तिद्वयोरपि समानिर्देश उपयत्तु समासे कृते उपजेज्जीनं पूर्वमिति शास्त्रवैशस्यपर्यायेण प्रवृत्तिर्यातं मनेर

© Dharmartha Trust J&K. Digitized by eGangotri

तदेषूपसर्जनसंनिपातेति पूर्वपरत्वमेव स्यादर्थमिदं वक्तव्यं। पद्येवं कर्तृकर्मणोश्च भूकृञोः सुखेन कष्टः क्रियन्ते सुकरं करणानि वीरणा
नि दुष्कृतं कराणि तत्र सुदुसोः प्राप्तातोः प्रयोगः प्राप्नोति। कटं सुकराणीति। खलः। खल्कारणमिदानीं किमर्थं स्यात्। अथ नेपप्र
हिम्नमते। खिल्करणसामर्थ्यात् तत्सुपसमवत्युपदिवाकृद्ग्रहणं गतिकारकपूर्वस्यापि ग्रहणमिति सुकरशब्दे परतः कुत्सभवि
ष्यति कर्तृत्वेऽत्र पतः। धातुग्रहणमनर्थकं। कुतः प्रागिस्थये ह्यायां पतन्क्रियायुक्ताः प्रादयः ततः प्रागिति विज्ञास्यते नैवं शक्यं
ह्यचककर्तृप्रेच्छति। प्रतिकीर्षतीति सत्वाश्रयाऽच्छपप्रकाद्धा प्रयोग इति मन एव प्राक्प्रयोगशब्दः मयुज्येत धातुग्रहणान्तनु धातो
रेव विक्रीषितेः प्राक्प्रयुज्यते। तेग्रहणमुपसर्गार्थमिति। ननुपदिगतिसंज्ञारहिताः केवलोपसर्गसंज्ञा एव प्रादयः स्युः तत्तोस्य
ति नेग्रहणेऽगतीनामनन्तरत्वात्स्वसंबन्धेऽनन्तरनुपसर्गा इति तदर्थं तेग्रहणं कर्तव्यं। तेपि तु गतिसंज्ञकाः ततश्चानन्तरग्रहणगती
नामपि संबन्धे प्रादीनामपि गतिलाटैवग्रहणं सिद्धं स्यादेतत्न असतितेग्रहणे गतिसंज्ञैव केवलापेषां तेषामेव स्यात्तलोप
पसंज्ञकानां प्रादीनामिति। न। केवला तेरभावात्। ननु चापमस्ति अनुकरणं चानितिपर इति। मतस्यापि नियतत्वान्नाउच्यते।
असतितेग्रहणे प्रकृतेष्वपेक्षा चेत कयतिपयेमं संबध्येरन्। नीपसर्गापि यत्ताः आसि मायाततु भूय सामये स्यापांन प्रादि ष्वेव पर्यव
सानेकारणमस्तीति गादयोप्यपेक्षेरन्। तेष्वहणे तु मतिगतिसंज्ञायामनन्तरत्वात्तेनान्वपेतायरामर्शनकतिपयानामेव भवती।
ति प्रादीनपि आप्नोतीति वा दीश्चपरिसंबन्ध इति तेग्रहणमुपसर्गार्थं भवति। तत्पर्यन्तानां च पाठात्स्यात्। तेषामेव च यथा स्यादिति सर्वेः
गतयोप्यनन्तरा इति येनन्तराः त एवक निपर्यया स्यान्न समस्तानामिति भावः। आसे तु दोषः सुसानत्वान्नकं टोकः॥ ३८॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।छंदसि।। ।।नत्वपरेषामिति। नच गतिर्गता विसर्ग्गस्यापि संभवः परभूतानामेकाकिनामेव दर्शनात् इति मन्यते।। ।।व्यवहि।।
तेषु छन्दसि नामव्यवहितेषु व्योमहन्ति। निपातस्य परस्ताच्च व्यवहितानां प्रयोगार्थमिदं वचनं अन्तएव भाषायां व्यवहितानामप्रयो
गः कथं तर्हि गतिर्व्यवायेऽप्रयोगः अभ्युद्धरति समुदाहरतीति न ल ज्जातीयं व्यवधायकं भवति तथा किमन्तरे एते प्राह्णादकु

।।छंदसि परेपि।। प्रागन्यो गेप्रासे छंदसि परेप्यभ्यनुज्ञायंते। छंदसि विषये गत्युपसर्गसंज्ञकाः परेपि पूर्वेपि
प्रयोक्तव्याः। नत्वपरेषां प्रयुज्यमानानां संज्ञाकार्यं किंचिद्दृत्ति। केवल परप्रयोगे प्रक्रियायोग एषामस्तीति ज्ञा
प्यते। याति निहस्ति ना। हंति निमुष्टिना।। ।।व्यवहिताश्च गत्युपसर्गसंज्ञकाः छंदसि दृश्यंते। आमंद्रैरिंद्र ह
रिभिर्याहि मयूररोमभिः आयाहि।। ।।छ।। ।।

लेइति एषः सन्तपानानन्तरे वृषलकुलमनयोर्मध्यइति विजातीयं व्यवधायकं निर्दिशति। जातेवस्मिन्नाश्रयणान्नास्ति व्यवधा
यकत्वं। एवं च गतिरनंतर इति अनंतर इति अनंतर इति अनंतरस्य ग्रहणं गतिर्गता वितिवचनमभिप्रेतमिति निर्देश स्थापपन्नो भव
ति।। ।।छ छ।। ।।छ छ।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

कर्म्मप्रा।।वस्समासानांसंज्ञिनांवहुत्वाद्वहुत्वाद्वहुवचनंयथानिपाताः कृत्सा॰ इतिकेचित्तुसामान्यविवक्षयैकवचनमप्यातिश्चप्रस
यः कृदिति।महासंज्ञाकरणमन्वर्थसंज्ञापरिज्ञानार्थं। कर्म्मक्रियांप्रोक्तवंतः कर्म्मप्रवचनीया इति भूते कृत्यल्युटो वहुलमिति क
र्त्तरि कृत्यः केवकर्म्मप्रोक्तवंतः येप्रयुज्यमाने क्रियापदेऽनुभूयते केवलत्वस्योक्रियाविशेषं द्योतितवंतः नसंप्रति क्रियावि
शेषं द्योतयंतिकिंतर्हि संवंधविशेषंतद्यथा शाकल्यस्य संहितामनुप्रावर्षदितिनहि अत्रानुभूयत इत्योदाविवा। क्रियाविशेषं
द्योतयति क्रियायदाभावात् नापिषष्ठीवत संवंधमात्रेप्रेसंहितामितिद्वितीयायाप्यसिद्धत्वात् नापि क्रियायदमाक्षिपतियथा

कर्मप्रवचनीयाः। कर्मप्रवचनीयाइत्यधिकारोवेदितव्यः। यानितदूर्द्धमनुक्रमिष्यामः कर्मप्रवचनीय
संज्ञास्तेवेदितव्याः। अधिरीश्वर इतियावद्वस्यतिअनुर्लक्षणे। शाकल्यस्यसंहितामनुप्रावर्षत्।। कर्म्म
प्रवचनीयप्रदेशाः कर्म्मप्रवचनीययुक्ते द्वितीयेत्येवमादयः।। ।।३९।। ।।श्री४।। ।।छ।। ।।

णादेशं विपरिलिखतीतिविशब्दोविमानक्रियांप्रदिशं विमापयपरिलिखतीति। तथाहिसतिप्रादेशमितिवत् कारकविभक्तिप्रसंगः
शेषसंवंधस्यवाप्रतीतिप्रसंगः। नदेवमनुः संहिताप्रवर्षणयोः यः शेषसंवंधो द्वितीयाभिहितः तंविशेषवस्थापयति। हे
तुहेतुमद्भावेनरूपेणावशिष्टक्रियाततितत्वेननासंवंधस्यतत्संनिधौसंप्रत्ययात संहितामनुशाल्यप्रावर्षत इति। उक्तंच। क्रि
यायाद्योतकोनायंनसंवंधस्यवाचकः। नापिक्रियापदाक्षेपीसंवंधस्यनुभेदक इति। केचित्तुप्रवृत्तिनिमित्ताभावेपिवचन
सामर्थ्यादियंसंज्ञाप्रवर्त्ततेयथासुः प्रज्ञायांअतिरतिक्रमणेचेति ३९

© Dharmartha Trust J&K. Digitized by eGangotri

।। अनु ।। ।। यावतेति यावता शब्दो निपातः । ननु निमित्तार्थः । यथ्पेस्यार्थे समो । लक्षणेत्थंभूताख्यानेति सिद्धेति तत्र चायं पूर्वमनोर्ग्रह
णं कर्त्तव्यं । इत्थंभूताख्यानादिषु यथा स्यात् लक्षणग्रहणं च प्रसाधयत्यन्यानोऽर्थान्तरसंज्ञान्तरसाधारणत्वात् । तेनायं हेतुरिति न क
र्त्तव्यमिति भावः । हेत्वर्थं त्विति तुशब्दः पक्षं व्यावर्तयति । हेतुः कारणं अर्थः प्रयोजनं प्रयोजनकोऽस्य वचनस्येत्यर्थः । ननु यत्र तत्र वा लक्ष
णग्रहणमेव क्षिपते तथापि हेतुर्लक्षणं न भवति ।। इहापि न स्यात् । अथ भवति तत्रापि किं स्यादिति पुनरपि नार्थ एतेन तत्राह हेतुत्वे
तीयामिति समलसंतेन ततल्लक्षणी चिह्नं ज्ञापकं कारणमपि विनिपतेत् कार्यविशेषावगतिहेतुत्वात् लक्षणं भवेत्सेव । उक्तमा

।। अनुर्लक्षणे ।। अनुशब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । शाकल्यस्य संहितामनु प्रावर्षत् ।
अनद्युधज्ञमन्वसिञ्चत् । अगस्त्यमन्वसिञ्चन् प्रजाः । किमर्थमिदमुच्यते । यावता लक्षणेत्थंभूताख्यानेति सि
द्धैवानोः कर्मप्रवचनीयसंज्ञा हेत्वर्थं तु वचनं । हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात् ।। ।।श्री ४।। ।।

र्थे लक्षणे न हेतुरपि व्याप्तः नावश्यं तदेव लक्षणं येन पुनः पुनः लक्ष्यते किं तर्हि यत्सकृदपि निमित्तत्वायोपकल्पते तदपि लक्ष
णमिति । किं तु यत्र नाप्राप्तिः स्यात् येन कर्मप्रवचनीययुक्ते द्वितीयाया एवापवादः । ननु च लक्षणेत्थंभूतेत्यनोर्लक्षणे त्थंभू
तेऽस्यानोर्लक्षणे कर्मप्रवचनीयसंज्ञायाऽवकाशः । योऽहेतुर्न भवति वृक्षमनु विद्योतते विद्युदिति । हेतुतृतीयाया अवकाशः ।। ये
नेन वृत्तमिति हेतुभूते तु लक्षणे उभयप्रसंगे परत्वात्तृतीया स्यात् तामपि बाधित्वा द्वितीयैव यथा स्यात् । पुनः संज्ञाविधा
ने कृतं तत्प्राप्तत्वात् द्वितीयैव तृतीयां बाधते उक्तं च । हेतुहेतुमतोर्योगपरिच्छेदे त्वनुना कृते । आरंभाद्बाध्यते प्राप्ता तृतीया हेतु
लक्षणेति तृतीयार्थ इत्यत्तेन तु पुरस्तादपवादन्यायेन सहयुक्तेऽप्रधाने इत्यस्यैव बाधो न तु तृतीयायाः इति वक्तव्यमेतत् ।।

© Dharmartha Trust J&K. Digitized by eGangotri

त्तृतीयार्थे॥ ॥नदीमन्ववसितेति। सहार्थोत्र तृतीयार्थः। अन्ववसृष्टास्तिर्वेजवं घन इत्यस्मात् कर्त्तरि क्तः इति॥ ॥हीनोत्कृष्टसंबंधे यं
द्योतिकर्म्मप्रवचनीयविभक्तिरुक्तेन संबंधेन अतिरिच्यमानउत्कृष्ट एव भवति न हीनेऽभिधानशक्तिस्वाभाव्यात्। नोभाभ्यामेकयैव
द्वितीयया द्विष्ठस्यापि संबंधस्याभिधानात् षष्ठीवत्॥ उपोधि॥ ॥अत्राप्यधिकिनाधिकस्यासंभवात्। अधिकाधिकि संबंधे संज्ञाविधीयते विभक्तिश्चाधिकिन एव भवति नाधिकात्। उपखार्यां द्रोणा इति द्रोणशब्दो गोरादिः। खारी नाम द्रोणः अधिकोपि तस्यां द्रोणाः

त्तृतीयार्थे अनुशब्दस्तृतीयार्थे द्योत्ये कर्म्मप्रवचनीयसंज्ञो भवति। नदीमन्ववसिता सेना। नद्यान्ववसिता सेना
नद्या सह संबद्धेत्यर्थः॥ ॥हीने॥ हीन इति न्यूनउच्यते। स चोत्कृष्टापेक्षः। तेन यं हीनोत्कृष्टसंबंधे संज्ञा विज्ञायते। हीने द्यो
त्ये यदनुः कर्म्मप्रवचनीयसंज्ञो भवति। अनुशाकटायनं वैयाकरणाः। अन्वर्जुनं योद्धारः॥ ॥उपोधिके च॥ ॥
उपशब्दः अधिके हीने च द्योत्ये कर्म्मप्रवचनीयसंज्ञो भवति। उपखार्यां द्रोणाः। उपनिष्के कार्षापणं। हीने। उप
शाकटायनं वैयाकरणाः॥ ॥अपपरी वर्ज्जने॥ ॥अपपरीशब्दौ वर्ज्जने द्योत्ये कर्म्मप्रवचनीयसंज्ञौ भवतः। प्र
कृतेन संबंधिना कस्यचिदनभिसंबंधो वर्ज्जनं। अपत्रिगर्त्तेभ्यो वृष्टो देवः। परित्रिगर्त्तेभ्यो वृष्टो देवः। वर्ज्जन इति किं।
ओदनं परिषिंचति ४० ॥ श्री॥ ॥

स्तीत्यर्थः। यस्मादधिकमिति सप्तमी। अपपरी। प्रकृतेन वाक्ये प्रतिपाद्यमानेनेत्यर्थः। परिपरित्रिगर्त्तेभ्य इति पंचम्यपाङ्परिभि
रिति पंचमी। परेर्वर्जन इति द्विर्वचनं। कर्मप्रवचनीयेन पंचमीसहितेन द्योतिते पि वर्जने भवति। उभयोरपि विधानसामर्थ्यात्। परि
षिंचतीति परिः सर्वतोभावे। अत्रास्याः संज्ञाया अभावात् उपसर्गत्वे सति उपसर्गात्सुनोतीति षत्वं भवति। शेमुषी दीनामि
ति नुम्॥ ४० ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

र्थो ऽस्त्र यो ऽमर्यो मरणधर्माणो मनुष्याः । औणादिकोऽयमसप्रत्ययः । तैर्दीयते मर्यादा आतश्चोपसर्गे इति कप्रत्ययः । अवधिर्मर्यादेति ननु यत्रावधिः कार्येणाप्युज्झते सोऽभिविधिः यत्र न सा मर्यादा अवधिस्तु साधारणस्तत्कथमवधिर्मर्यादेत्यायमत्रार्थः । योऽवधिः सामर्थ्यादिति किं तर्हि या मर्यादा सोऽवधिरित्यर्थः । वचनग्रहणादिति । इह मर्यादायामभिविधौ चेत्येव वचनग्रहणे क्रियमाणे तस्मिन्नप्रयोजनमेवं प्रयाविज्ञापितं उभे अपि तस्मिन्निति वचनं मर्यादाया वचने इति कर्मणि षष्ठ्याः समासः । मर्यादाशब्दोऽयमत्रोच्यते । आङ् मर्यादाभिविधौ इति तस्माङ्गेऽग्रहणं सत्याभिविधिवृत्तिरपीति । अत्राप्यभिविधेर्ग्रहणं भवति । यद्वा वचनग्रहणसामर्थ्यादेवानर्थभेदेन विवक्ष्यते । अवधिमात्रं गृह्यते । आमथुराया इति । पृष्टो देव इत्यपेक्ष्यते । मथ विलोडने औणादिकः कुरच्प्रत्ययः । ईषदर्थे क्रियायोगे मा भूदिति । वाक्यस्मरणयोरङित्वादेवाप्रसङ्गः तत्रेषदर्थे आ कडारः । पंचमी न भवति क्रियायोगे समीहार इति । गतिर्गतावितिनिघातो भवति ॥ ॥ ७ ॥ ॥

॥ आङ् मर्यादावचने ॥ आङित्येष शब्दः मर्यादावचने कर्मप्रवचनीयसंज्ञो भवति । अवधिर्मर्यादा । वचनग्रहणादभिविधिरपि गृह्यते । आपाटलिपुत्राद् वृष्टो देवः । आकुमारं यशः पाणिनेः । आसंकाश्यात् · आमथुरायाः । मर्यादावचन इति किं । ईषदर्थे क्रियायोगे च मा भूत् ॥ ॥ ७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

लक्षणेत्थं॥ ॥लक्ष्यते येन तल्लक्षणं चिह्नं ज्ञापकं अयंप्रकार इत्थंप्रथमांतादिदमस्थमुः इदलिटमाप्रत्ययम शास्त्रेविहितः तस्य कस्यचि
चित्प्रकारविशेषमात्रमाहेति इत्थंशब्दः भूप्राप्तावात्मनेपदी धृषाद्वेति णिजभावपक्षे गत्यर्थत्वात्कर्तरि क्तः। तत इत्थंशब्द
स्य यापादेयिहत्तिविषये सत्वधर्मोपादानात्कर्मणि द्वितीया श्रितादिषु गमिगाम्यादीनामिति समासः। कंचित्प्रकारं प्राप्त इत्थंभूतः।
इत्थंभूतस्याख्यानमित्थंभूताख्यानं त्वौक्तिप्रमाणेनांशो भागः। यत्त्वंशमात्रे प्रयोगः प्रियं गोभिर्गा इति सभागमादश्यपाद्यात्तु मिच्छावी
प्सा व्याप्तुमिच्छा इष्यते। एतेल लक्षणादयोपाथाविभक्तिसमीपादयोप्यपार्थाः। नैवं प्रत्यादीनामर्थाः। किंतर्हि मज्ञायाः प्रत्यादीनां
विषयत्वेन निर्दिष्टा इत्याह। वीप्सायां च विषयभूतायामिति एतच्च विपरिमाणमेन लक्षणादिभिरपि संबंधनीयं। वृक्षं प्रतीति अत्र

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः। लक्षणे इत्थंभूताख्याने भागे वीप्सायां च विषयभूतायां प्रति
परि अनु इत्येते कर्मप्रवचनीयसंज्ञा भवंति। लक्षणे तावत्। वृक्षं प्रति विद्योतते विद्युत्। वृक्षं परि। वृक्षमनु। इत्थं
भूताख्याने। साधुर्देवदत्तो मातरं प्रति मातरं परि मातरमनु। भागे। यदत्र मां प्रति स्यात्। मां परि स्यात्। मामनु स्यात्।
वीप्सायां। वृक्षं वृक्षं प्रति सिंचति। परि सिंचति। लक्षणादिष्विति किं। नुदेनं प्रतिषिंचति। अभ्यादिशब्दयोगे यं चमी
कस्मान्न भवति यं चमपपाञ्चरिभिरिति। वर्जने विषये सा विधीयते। अपशब्दसाहचर्यात्॥ ॥४१॥ ॥ ॥

वृक्षो लक्षणं विद्योतनस्य प्रसादयस्य व्याप्तिक्रिया भवतीतो लक्ष्यलक्षणभाव इति एवं संबंधविशेषे अवद्योतयंतीति वृक्षं प्राप्य वि
द्योतनते वृक्षे प्रदेशे विद्योतत इत्यर्थः। साधुरित्यत्रापि मातृक्रियाजनित एव विषयविषयिभावसंबंधः। यथा हर्देवदत्ते विद्योतनं ल
क्षणेनैवं मातरि साधुत्वापन्न इति इत्थंभूताख्यानग्रहणं। यदत्र मामिति यो मम भागः स दीयतामित्यर्थः। अत्र स्वीकरणक्रिया
जनितः स्वस्वामिसंबंधः। वृक्षं वृक्षमिति वीप्सा द्विर्वचनेन द्योत्यते परिशब्दस्तु क्रियपैव संबध्यते द्वितीयाचेद्धकर्मप्रवचनीय
संज्ञा उपसर्गसंज्ञानिवृत्त्यर्था तेनोपसर्गात्सुनोतीति षत्वं भवति। अपशब्दसाहचर्यादिति परिशब्दोप इत्यपि चारो वर्जने चाव
र्जने च कर्मप्रवचनीयः। अपशब्दस्तु वर्जन एव कर्मप्रवचनीयाभिकारे यचेभी विधीयते। तत्र साहचर्यं परिवर्जनस्याहेतु ४१

© Dharmartha Trust J&K. Digitized by eGangotri

।।अभिरभागे।। अभागे इति किमिति अभिधेयं प्रयोजनं च परिज्ञातुं प्रश्नः। अत एवोभयं दर्शयति भाग।। स्वीक्रियमाणोंऽश यदत्र
मामभिष्यादिति ननु अन्वर्थसंज्ञाविज्ञानादेवात्र न भविष्यति। संप्रत्येव हि सोविभजनं क्रियाद्योतयति प्रत्यादीनामपि तर्हि
न स्यात्। वचनाद्भविष्यति। अथापि तर्हि स्यात्। तस्माद्भागे इति वक्तव्यं। तत्रोपसर्गत्वात् उपसर्गप्रादुर्भ्यामस्तिर्यच्परः इति षत्वं।
स्यादेव कस्मान्नोक्तं न लक्षणे इत्थंभूताख्यानवीप्सास्वभिः प्रतिपर्यनुभागे च चकाराल्लक्षणादिषु च अनुर्लक्षणे तृतीयार्थे

।।अभिरभागे।। ।।लक्षणादिष्वेव भागवर्जितेष्वभिः कर्मप्रवचनीयसंज्ञो भवति। वृक्षमभिद्योतते। साधु
देवदत्तो मातरमभि। वृक्षं वृक्षमभिषिंचति। अभागे इति किं। भागः स्वीक्रियमाणोंऽशः। यदत्र मामभिष्यात्
तद्दीयतां। यदत्र ममभवति तद्दीयतामित्यर्थः।। ।।प्रतिः प्रतिनिधिप्रतिदानयोः।। मुख्यसदृशः प्रतिनि
धिः। दत्तस्य निर्यातनं प्रतिदानं। प्रतिनिधिविषये प्रतिदानविषये च प्रतिः कर्मप्रवचनीयसंज्ञो भवति।। अ
भिमन्युरर्जुनतः प्रति। माषानस्मै तिलेभ्यः प्रतियच्छति।। ।। श्री४।। ।।श्री४।। ।।राम।। ।।

योश्च। चकाराद्धोत्लक्षणादिषु वर्त्ततो हीनेऽप्युपाधिके चेत्येवं हि सिद्धेरनोर्ग्रहणमभागे इति वचनं वक्तव्यं भवति एवं हि द्वि
र्ग्रहणं क्रियत इति पदयोः साम्यं अक्षरलाघवं तु नादृतं। प्रतिप्र।। ।।मुख्यसदृश इति मुख्येन तुल्ये विकार्ये शत्रुबाधादेरु
पस्थापनसमर्थः यस्मात् तदभावेन तत्कार्यकरणाय प्रतिनिधीयते। उपादीयते स प्रतिनिधिः। कर्म्मणि किमस्य पः। दत्तस्य पुनर्मर्प
णं प्रतिनिर्यातनमिति प्रत्यर्पणं। अर्जुनतः प्रतीति प्रतिनिधिप्रतिदाने च यस्मादिति पंचमी प्रतियोगे पंचम्यः तसिः। माषा
निति तिलान् गृहीत्वा माषान्ददातीत्यर्थः।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

अधिपरीननुवानर्थकयोः क्रियायोगाभावात् तयोरुपसर्गसंज्ञयोः प्राप्त्यभावान्न तद्बाधनार्थं कर्मप्रवचनीयसंज्ञाविधानमुपप द्यते नापि परीशब्दप्रयोगे पंचमीविधानार्थं तद्विधौ वर्ज्जनार्थस्य ग्रहणात् अथापादाने लोप्त्वमिति पंचमी यथा अधिशब्दस्य प्रयोगे कुतो ध्यागच्छतीति अत एव द्वितीयाविधानार्थमपि नोपपद्यते । तस्मादनर्थकयोः संज्ञाविधानमनर्थकमित्यत आह । अनर्थान्तरवा चिनाविति । यथा तिष्ठन्तिति प्रतिभवति परिभवतीत्यादौ धातूनामर्थादर्थान्तरवाचित्वं नैवमत्रार्थान्तरत्ववाचित्वं किं लागच्छती ।

अधिपरी अनर्थकौ ॥ ॥ अधिपरीशब्दौ अनर्थकौ अनर्थान्तरवाचिनौ कर्मप्रवचनीयसंज्ञौ भवतः । कुतोऽध्याग च्छति । कुतः पर्यागच्छति । गत्युपसर्गसंज्ञाबाधनार्था कर्मप्रवचनीयसंज्ञा विधीयते ॥ ॥ सुः पूजायां ॥ सुश ब्दः पूजायामर्थे कर्मप्रवचनीयसंज्ञो भवति । सुसिक्तं भवता । सुस्तुतं भवता । धात्वर्थः स्तूयते । उपसर्गसंज्ञाश्र यं षत्वं न भवति । पूजायामिति किं । सुषिक्तं किं तवात्र ॥ ॥ अतिरतिक्रमणे च ॥ ॥ अतिशब्दः अतिक्रमणे चकारात् पूजायां च कर्मप्रवचनीयसंज्ञो भवति । निष्पन्नेऽपि वस्तुनि क्रियाप्रवृत्तिरतिक्रमणं । अतिसिक्तमेव भवता । अतिस्तुतमेव भवता । पूजायां । अतिसिक्तं भवता । अतिस्तुतं भवता । शोभनं कृतमित्यर्थः ४१ ॥

तिप्रयोगे योऽर्थः । स एवाधिपरियोगेऽप्युच्यते तत्र विषये धातोरधिपर्योश्च सहाभिधायित्वं यथा गजशब्दे योऽर्थः स एव मत गज इति सर्वैः सहाभिधीयते । एवं वृषशब्दे योऽर्थः स एव वृषभशब्दे । तदेवमनर्थान्तरवाचित्वादनर्थककल्पत्वादनर्थकावि त्युक्तं न त्वभावात् तयोश्च गतिसंज्ञाबाधाय कर्मप्रवचनीयसंज्ञा विधेयेति दर्शितं भवति । कुतोऽध्यागच्छतीति । किंशब्दा दपादानेवाहोपरुहोरिति तसिः तस्य जस्थे सेतिन सिलादेशः । गतिर्गताविति निघातो नाभावः ॥ ॥ सुः पूजायां । सुसिक्तं भवते तिभवच्छब्दात् कर्तरि तृतीया । कर्मप्रवचनीययुक्ते द्वितीया न भवति । उपपदविभक्तेः कारकविभक्तिर्बलीयसीति । सुषिक्तं कि

© Dharmartha Trust J&K. Digitized by eGangotri

अपि पदान्तरस्येत्यादि। तावदभिचारात्र गम्यत इति पदान्तरस्यार्थः पदार्थः। तत्रापि पदान्तरप्रयोगे सत्यपिः प्रयुज्यमानस्तद
र्थे किंचिद्विशेषमाधत्ते। यथा नीलशब्द उत्पले। न तु न क्षिन्नेवास्ता नास्तीति केनचित्तेन पासत्तिप्रसंगेनाप्रयोगार्हत्वात्। अ
तः पदान्तरस्याप्रयोग एव तदर्थप्रवृत्तो भवतीति भावः। सर्पिषोऽपि स्यादिति प्रार्थनायां लिङ्। तस्मा एव दुर्लभविषयतामपिशब्दो द्यो
तयत्स्यादित्यनेन संबध्यत इति षष्ठ्यप्रसंगः। दुर्लभत्वं च विषयस्याल्पं भवति। यदि तस्य बिन्दुमात्रमपि न लभ्यत इत्यत्रापि शब्दः साम

॥ अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु। पदार्थसंभावनेऽन्ववसर्गे गर्हायां समुच्चये च वर्तमानः अपिः
कर्मप्रवचनीयसंज्ञो भवति। पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थः। सर्पिषोऽपि स्यात्। मधुनोऽपि स्यात्। मात्रा बिन्दुः
स्तोकमित्यस्यार्थेऽपिशब्दो वर्तते। संभावनमधिकार्थवचनेन शक्तेरप्रतिघाताविष्करणं। अपि सिंचेन्मूलकस
हस्रं। अपि स्तुयाद्राजानं॥ अन्ववसर्गः कामचारानुज्ञाने। अपि सिंच। अपि स्तुहि। गर्हायां धिग्जाल्मं देवद
त्तमपि सिंचेत्पलांडुं। अपि स्तुयाद्वृषलं। समुच्चये। अपि सिंच। अपि स्तुहि। सिंच च स्तुहि च। उपसर्गसंज्ञाबाधना
त्षत्वं न भवति॥ ॥९६॥ ॥

स्यादित्युरिति। गम्यत इत्याह मात्रा बिन्दुः स्तोकमित्यस्यार्थेऽपिशब्दो वर्तत इति न तु पदान्तरेति च व्यतिरेके सर्पिष इति षष्ठी द्वितीया
तु न भवति अपिना योगाभावात्। सर्पिषः स्यादित्यनेन संबध्यत इत्युक्तं। अधिकार्थवचनेनेति। यावत्सर्वस्य सामर्थ्यं ततोऽधिकम
र्थं ब्रुवन् यत्तस्य कार्ये शक्तिमाविष्करोतीति तत्संभावनमित्यर्थः। अपि सिंचेदिति। संभावने लिङ्। तस्यैव दुष्करविषयतामपिराह
। कामचार इच्छाप्रवृत्तिः। अपि सिंचेति। सिंच वा मा वा स्तुहि वा मा वा यथेष्टं कुर्वित्यर्थः। जाल्मो शपदः अपि सिंचेदिति गर्हायां
लिङ्। उपसर्गसंज्ञाबाधनादिति। स्यादित्यत्रोपसर्गप्रादुर्भ्यामिति सिंच उपसर्गात्सुनोतीति षत्वप्रसंगः॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰ २०१३
१७८

आधि॥ तद्रूपमिति। यथा हीन इत्यत्र हीनोत्कृष्टसंबंधे संज्ञा उपाधिके चेत्यत्राधिकाधिकिसंबंधे तथात्रापीत्यर्थः॥ विभक्तिस्तु तत्रास्यत
इत्याहु अते। इह तु न तयोस्साह। तत्र कदाचिदिति। यस्येश्वरवचनमिति तत्रार्थद्वयं ईश्वरशब्दो भावप्रधानः। यस्य स्वामिन ईश्वरत्वमु
अते तस्मात् स्वामिनः सप्तमी स्वैकायस्य स्वस्य ईश्वर उअते। तस्मात् स्वात्सप्तमी सपरः तत्र यदा स्वाम्यर्थे व्यतिरेकविवक्षा तदा ततः स
सप्तमी स्वस्य तु व्यतिरेके तत इति न तु न इह भाष्ये पुनः यद्भावति। एकयैव विभक्त्या द्विष्ठस्यापि संबंधस्याभिधानादिति मत्वा कदाचिदि

अधिरीश्वरे। ईश्वरः स्वामी स च स्वमपेक्षते। तदयं स्वस्वामिसंबंधे कर्मप्रवचनीयसंज्ञो भवति। तत्र कदाचि
त्स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति कदाचित्स्वात्। अधिब्रह्मदत्ते पंचालाः। अधि पंचालेषु
ब्रह्मदत्तः॥ ॥ विभाषा कृञि। अधिः करोतौ विभाषा कर्मप्रवचनीयसंज्ञो भवति। यदत्र मामधिकरिष्यति।
कर्मप्रवचनीयसंज्ञापक्षे गतिसंज्ञाविधानात्तिङि चोदात्तवतीति निघातो न भवति॥ ४३ ॥ ॥

मुक्तं ब्रह्मदत्तत्र इति। ब्रह्मदत्तस्य स्वाः पंचाला इत्यर्थः। अधि पंचालेष्विति पंचालानां ब्रह्मदत्तः स्वामीत्यर्थः। विभाषा।
अधिरीश्वर इत्यनुवृत्तेः प्राप्ते विभाषेयं। यदत्र मामधिकरिष्यतीति। अधिपूर्वः करोतिर्विनियोगे वर्त्तते यथा अधिकृतोयमि
ह ग्रामे स्वरिते नाधिकार इति वई श्वरो भवत्वेवमत्र मां विनियोक्ष्यत इत्यर्थः। कर्मणि द्वितीयैषा। यद्येवं संज्ञाविधानस्य किं प्रयो
जनं तत्राह कर्मप्रवचनीयसंज्ञापक्ष इति निघाते यद्वृत्तान्नित्यमिति निघातप्रतिषेधात् एवमप्रसक्ते स्वरेणान्तिडुं न मद्रात्रवत ॥४३॥

॥॥०
१७८

© Dharmartha Trust J&K. Digitized by eGangotri

॥लः परल इति षष्ठीति। अथ प्रथमा बहुवचने को दोषः आप इति लवस्थायामेव लुप्यमानस्य। लिटः संज्ञा स्यात् ततश्चेक्र-
मिसत्राप्रस्यात् नप्रमो लिट्प संभवति। शेषादेव परस्मैपदमिति नियमात्। ज्ञापकात्सिद्धं। परप्रमाप्रस्यवदिसाह। ततसा-
पयति भवस्यात्मनेपदिभ्योऽप्यामिति। अयं तर्हि दोषः लकारस्यैव संज्ञास्यात् तदादेशानां तिबादीनां नेति तस्यानिवंज्ञावाने-
षामपि भविष्यति। तप्रनाचात्मनेपदमित्यत्र तर्हि ल इति प्रथमान्तस्य तप्रनाभ्यां संबन्धो न स्यात्। न हि तङानौ लौ भवतः ननु वे

॥लः परस्मैपदं। ल इति षष्ठी आदेशापेक्षा। लादेशाः परस्मैपदसंज्ञा भवन्ति। तिप् तस् झि। सिप् थस् थ।
मिप् वस् मस्। शतृक्वसू च। परस्मैपदप्रदेशाः सिचि वृद्धिः परस्मैपदेष्वित्येवमादयः॥ ॥

वं विज्ञायते तङानभावी लकार एव तङानावित्युक्त इत्येवमपि सान्तरे सति निक्लिष्टकल्पना प्रयुक्ता तस्माल्ल इति षष्ठी।
आदेशापेक्षेति। न च संज्ञापेक्षा। लकारस्य परस्मैपदमिति संज्ञा भवतीति। कुतः सामानाधिकरण्येन प्रायेण संज्ञाविधाना-
त्। किं च जसि योऽदोषः सोऽस्मिन्नपि स्यात्। उभयत्र लकारस्य संज्ञित्वात्। तस्मादादेशापेक्षा षष्ठी पक्षेवं मनवकाशा पुरुषसं-
ज्ञा परस्मैपदसंज्ञा शतृक्वसोः सा च काशं वा धेता जहि तु लकारस्य परस्मैपदसंज्ञा तिङ्त्रु पुरुषसंज्ञेति भिन्नविषयत्वा-
न्नास्ति बाधप्रसंगः॥ ॥ एग्मा॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰पद॰१२
१७९

यद्यपिजस्यन्तेपितिवादीनामादेशानामपिस्थानिवद्भावादेशाःइत्यनेनपरस्मैपरस्मैपदसंज्ञाभविष्यतितथापितस्यानेनाकठारीय
त्वात्समावेशसिद्धिः।षष्ठीपक्षेपिज्ञापकात्सिद्धं।परस्यैमितिवृद्धिंपरस्मैपदेष्विस्याहततज्ञापपतिभवतीतितरामप्येषासंज्ञेतितिन
हिसिद्धिविषयेशास्त्रस्यसंभवतः।सामान्यापेक्षेवज्ञापकमितिआत्मनेपदसंज्ञयापुरुषसंज्ञानांसमावेशसिद्धिः।अन्यथापर
स्मैपदेषुमाक्काशाःपुरुषसंज्ञास्तद्वत्स्थानावकाशात्मनेपदसंज्ञकाःसंतस्त्रीणित्रीणिपदानिप्रथममध्यमादिसंज्ञाभवंती

तङानावात्मनेपदानांतङितिप्रत्याहारोनवानांआनइतिशानचकानचोर्ग्रहणं।पूर्वेणापरस्मैपदसंज्ञायांप्रा
प्तायांतङानयोरात्मनेपदसंज्ञाविधीयते।त।आतां।झ।थास्।आथां।ध्वं।इट्।वहि।महिङ्।आनःखल्वपि
।शानचकानचौ।लटःस्थानेकतीहनिर्दिष्टाः।आत्मनेपदप्रदेशाःअनुदात्तङितआत्मनेपदमित्येवमा
दयः॥ ५५ ॥ श्री॥ ॥

तीनेनसमावेशसिद्धिः॥ ॥तङानौ॥अथकस्माल्लस्येत्यस्यानंतरमेतेसंज्ञेनविहितेएवंहिपुरुषसंज्ञाभिरप्येतयोःसिद्धे
नयोःसमावेशोभवतीतितत्राहपूर्वेणेति।आत्मनेपदसंज्ञयापरस्मैपदसंज्ञायाबाधोपियथास्यादित्येवमर्थमस्मिन्प्रकरणेन
योर्विधानमितिभावःमहासंज्ञाकरणंपूर्वाचार्यानुरोधेन॥ ५५ ॥ ॥ = = ॥ ॥ = = ॥ ॥

राम॰
१७९

© Dharmartha Trust J&K. Digitized by eGangotri

तिङः। त्रीणि त्रीणि। इति विप्सार्थं द्विर्वचनं। तत्र च समुदायस्यावयवयोः च पृथक्‌ पृथक्‌ सत्त्वमिष्यते। आपद्यते पञ्चमि सिद्धे वद्‌ जेत्येकां ला
तायथाप्राप्त कुंडं कुंडं ददाति त्रे वाक्‌ अपवल्लपचन्निस्त्रोघे पूर्वपदे ष्पंनुस्वारादिप्स्कार्षे यथा प्राप्तिरिति तेन पदच्छेदकौ त्रीणि त्रीणि
रीत्येकं पदं द्वेवा रहहति तिङो षड्‌ कौः संज्ञाक्रमनिस्त्र इति वैषम्यात्‌ संख्यातानुदेशो न प्राप्नोति अत्र पदयमेकैकं प्रत्येकस्यानेक
संज्ञाविधाने प्रयोजनं नास्ति नैतावता यथाभिमतविषयलाभः तत्राह तिङो ष्टादश प्रत्ययाः इति एवं समस्तसंज्ञा अपि षड्‌ एकवचने क

तिङः त्रीणि त्रीणि प्रथममध्यमोत्तमाः। तिङो ष्टादश प्रत्ययाः नव परस्मैपदसंज्ञकाः नवात्मनेपदसंज्ञकाः तत्र पर
स्मैपदेषु त्रयस्त्रिकाः यथाक्रमं प्रथममध्यमोत्तमसंज्ञा भवंति। आत्मनेपदेष्वपि त्रयस्त्रिकाः प्रथममध्यमोत्तमसंज्ञा
भवंति। तिप्‌। तस्‌। झि। इति प्रथमः। सिप्‌ थस्‌। थ। इति मध्यमः। मिप्‌। वस्‌। मस्‌। इत्युत्तमः। आत्मनेषु। त आतां झ इ
ति प्रथमः। थास्‌ आथां ध्वं इति मध्यमः। इट्‌ वहि महिङ्‌ इत्युत्तमः। प्रथममध्यमोत्तमप्रदेशाः शेषे प्रथमः स एवमाद
यः॥ ॥ तान्येकवचनद्विवचनबहुवचनान्येकशः। तान्येकवचनद्विवचनबहुवचनसंज्ञानि भवंति एकशः ए
केकं पदं। तिप्‌ इत्येकवचनं। तसिति द्विवचनं झि इति बहुवचनं। एवं सर्वत्र। एकवचनद्विवचनबहुवचनप्रदेशाः
बहुषु बहुवचनमित्येवमादयः॥ ४५ ॥ ॥

शेषनिर्देशपितत्र पाठे प्रथममध्यमोत्तमाश्च प्रथमो मध्यमश्च मध्यमश्च मध्यमोत्तमश्च उत्तमश्च उत्तमो प्रथममध्यमोत्तमा
इति कृते कशेषाणां द्वंद्वः क्रियेत ततो नाभिमत संख्यातानुदेशः स्यात्‌ तस्मात्कृतद्वंद्वानां एकशेषः प्रथममध्यमोत्तमाश्च प्रथ
ममध्यमोत्तमाश्च प्रथममध्यमोत्तमाः इति। नन्वेवमपि न विज्ञायते के ते इत्यत आह त्रीणि त्रीणि वचनानि गृह्यन्ते आहो स्विदि
च्छातस्त्रिकपरिग्रह इति नाहि त्रिकपरिग्रहे पि यथासंख्यशास्त्रं क्रमते किं तर्हि विहितेषु संज्ञानां क्रमेणा संबंधविन्ने एवं तर्हि लोकतः

© Dharmartha Trust J&K. Digitized by eGangotri

तिरुक्तं तथ्याविहन्मस्य द्वाभ्यां द्वाभ्यामग्रिहणपाश्च्ये परुतिनवोऽन्ते आनुपूर्व्येणेति अथ च विहन्मामस्मद् इत्यादित आरभ्य आनु
पूर्व्येण द्वाभ्यां द्वाभ्यामग्रामग्रिहणपाश्च्ये पतेनयाभ्यां काध्ये चित् । तत्र तिङोऽष्टादशप्रत्यपारस्मैनेनादित आरभ्य त्रिकाणां आनुपू
र्व्येण ग्रहणं ने छातःसनि दर्शयितुं तिङ् ग्रहणं समं तिवेशोऽन्तीति दर्शितं । नवपरस्मैपद संज्ञा त्यादिना तु कृतं द्वन्नामे कशेषो न कृते
कशेषाणां द्वन्द्व इति दर्शितं । पदिवापरस्मैपदग्रहणमात्मनेपदग्रहणं वानुवर्तते इति ङ् ग्रहणानुशात् कं स्थानेिव्यर्थं तदनुवृत्तोच
द्देशी भवतः नयोश्च आयाभतेदे नसत्रेमे तत्प्रवर्तते तत्रैकैकं त्रयाह्विका इति यथा सोऽयमसिद्धिः । तत्र नवेस्यादिना राशिद्वयं द
र्शितम् । तत्रेस्यादिनानु आयास्ते दश । अत्रापि महासंज्ञाकरणं पूर्ववत् । तान्येका एकशः इति संख्यै वचनावृवीप्सायमिति प्रथ
मं ताच्छस । प्रकृतत्वादेवात्रीणीत्यस्य संबन्धे सिद्धे तानि वचनं पुरुषवचनं संज्ञयोः समावेशार्थं अस्यथास्येकसंज्ञाधिकारे वचन
संज्ञा एवापवादः स्यात् ननु तेष्वावुन्नमप्यपि पनिर्संद्धि तदन्तिकार्यं वचनसंज्ञापसे उत्तमसंज्ञापास्त्रभावान्न स्यात् ताभी संसि
द्धमतितास्येतानि प्रथमादिसंज्ञाविशिष्टानि त्रीणि त्रीणि इस्ये वं परामर्शी लब्धप्रथमादिसंज्ञानामेकवचनादिसंज्ञाविधानात्तभ
वति समावेशः ननु त्रिकाणां पुरुषसंज्ञाए केकस्य वचनसंज्ञेति विषयभेदान्नापमेकसंज्ञाधिकारविषयः । तन्न यथाद्वन्द्वसंज्ञाप्रसे
कमादेवां भवात् तथा पुरुषसंज्ञापि त्रीणि त्रीणि निवचनात् त्रिषु प्रवर्तमानापि तिवादिषु प्रत्येकमेव प्रवर्तते न समुदायेत स्य प्र
योगेऽभावात् । प्रत्येकमेव तेषां धातीहस्यत्तेः त्रिग्रहणं तु मर्यादार्थं आदित आरभ्य त्रयाणां प्रथमसंज्ञा भवतीति न पुनः स
मुदाये संज्ञाप्रसङ्गस्यार्थं । तानीति तिङः स्त्रीणि त्रीणि पदानि भूत्वेति तिवादिस्त्रेस्समाहारद्वन्द्वे ष्टादशावयवपदानि तिङ् शब्दस्य त्रीणि
त्राणीति समानाधिकरणस्यापि पुल्लिंगतापि सत्त्ववद्वृत्ति ॥ ४५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ८ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।परः संनिकर्षः। परशब्दोऽत्रातिशये वर्त्तत इति यथा परं सुखं परं दुःखमिति दिग्वृत्तेर्वर्त्तमानस्य ग्रहणं न भवति संनिकर्षस्य दिग्देशकालायोगात्।
अर्थान्तरेऽपि हस्वमसत्त्वं अभ्यभिचारि संनिकर्षः प्रत्यासत्तिरिति। ननु संश्लेषः तस्य वर्णेष्वसंभवात् स हि संयोगश्च द्रव्यधर्मत्वान्न शब्दस्य गुणस्य
संभवति। समवायश्चेन्न वर्णे वर्णाः समवेता इति शब्दस्याकाशसमवायित्वात् तेषां तु शब्दो द्रव्यं ते तेषां न क्वापि शब्दः समवेत इति अतिशयोऽपि संयोगस्य
समवाययोः कीदृश इति विमृशः। प्रत्यासत्तेस्त्वपेक्षाभेदात् भवति प्रकर्षभेदः तस्मात्प्रत्यासत्तिरेव संनिकर्षः। ननु च क्रमेणोच्चार्यमाणेषु
वर्णेषु पूर्वस्य वर्णस्य प्रनिष्पादकाः स्पन्दाः तेषां व्यापारे परतो वर्णान्तरस्य निष्पादकाः। तेषां व्यापारारम्भः। तत्रावश्यं मध्ये कियत्यपि का-
लकला भवति इत्यल्पात्वात्तु नोपलभ्यते पुनः परत्रशतं ममिति भेदवत्तत्कर्षं परः संनिकर्ष इत्यत्राह। अर्धमात्राकालव्यवधान इति। इतरथा हि एताव

परः संनिकर्षः संहिता। परशब्दोऽतिशये वर्त्तते। संनिकर्षः प्रत्यासत्तिः। परो यः संनिकर्षो वर्णानामर्धमात्राकालव्य-
वधानः स संहितासंज्ञो भवति। दध्यत्र। मध्वत्र। संहिताप्रदेशाः संहितायामित्येवमादयः॥ ॥ ॥ ॥

द्व्यवधानमवर्जनीयत्वात् संभवति। आधिकेन तु कालेन व्यवधानं परग्रहणेन व्यावर्त्त्यत इत्यर्थः। प्रयत्नेऽवर्धमानायामेव वर्णोत्पत्ता न्यूनमध्यम-
मायां विलम्बितायां वा। न हि तथा नयोः संनिकर्षोऽपि पश्यद्रुतायां। तुल्यः संनिकर्षः सर्वासु वृत्तिषु नैरन्तर्येणोच्चारणात्। वर्णोपलम्भ-
कभेदात्तु वृत्तिविशेषः। द्रुतायां स्वल्प उपलब्धिकालो मध्यमायामधिकः विलम्बितायामधिकतरः। द्विविधा हि ध्वनयः प्राकृता वैकृताश्च। वै-
कृताश्च। प्राकृता वर्णानामुत्पादकाः वैकृतेन पुनः पुनरुपलम्भः। मध्यवर्त्ती तु कालः सर्वासु वृत्तिषु नावधीयते। पद्धापरयाः ... यावता
काले न व्यवधानं ... भावि ततोऽधिकेन व्यवधानं परग्रहणेन व्यावर्त्त्यते। यदस्य पदान्तरेण यवनं तर्थ्य तत्रैव लोके संहिताशब्दः प्रसिद्धः। तथा
च संहितामधीते न पदानि पदान्यधीते न संहितामिति व्यवहारो भवति। ततश्च कुमार्या विमाहोऽपि ... संहितीकार्यं न स्यादिति हृदयम्।

© Dharmartha Trust J&K. Digitized by eGangotri

का॰१६॰१३
१८१

विरामो॥ विराम इति। विरम इति भावे घञ्। विरामो वर्णानामभावः। अर्थान्तमाहा विरम्यते नेनेति वा विराम इति। करणल्युटो वा हलो। मिस
संज्ञायामपि हलश्चेति करणे घञ्। पूर्वत्राभावः संज्ञी उत्तरत्रान्त्यो वर्णः। नेमहि विरम्यते तत्राद्यपक्षे खरवसानयोरिति परसप्तमी। कथं पु
नरवसाने न पौर्वापर्यमभावो हि सः। खरवाक्यं। न हि परत्र खरस्तित्वं हौरेफः पदान्ते फः तदा खरवर्णानां क्रमत्वात् विरामात् उच्चारित मधु
स्तिता च अप्यत न बुद्धि परिकल्पितं पौर्वापर्यमितरभावेपि सामानमेवं पावसानं इत्यत्रापि द्वितीयेत पक्षे खरवसानयोरित्येकापि सप्तमी
विषयभेदाद्भिद्यते तस्याः परत्वे रेफस्य विसर्जनीयो भवति अवसाने चेरेफस्यानिमित्तविसर्जनीय इति स्थानाद्देशस्य विषयत भावि

विरामोऽवसानं॥ ॥ विरतिर्विरामः। विरम्यतेऽनेनेति वा विरामः। सोऽवसानसंज्ञो भवति। दधि॥ मधु॥ वृक्षः॥ प्लक्षः। अव
सानप्रदेशाः खरवसानयोर्विसर्जनीय इत्येवमादयः॥४॥ ॥ ॥ इति श्रीजयादित्यविरचितायां काशिका
यां वृत्तौ प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तश्चाध्यायः॥ ॥४९॥ ॥ ॥

वक्ष्यते। एवं चावसान इत्यत्रापि। दधि मधु इति। अणोऽप्रगृह्यस्यानुनासिकः। अन्त्यावसान इति वर्तते। ननु च लोक एवावसान
शब्दो विरामे प्रसिद्धः। यथा पूर्वः सातिशयात्तेऽवर्ततेकेनेतरद्वसाय इति। मरणमवसानमिति तो देवदत्त इति अवसानशब्द
स्य विराम एव प्रसिद्धः। नव रेफस्यावसानविरामयोः करणत्वं संभवतीति नार्थः संज्ञाकरणेन तत्राह। संहितावसानयोः लोक
विदितत्वात् सिद्धमिति। संहिताशब्दोऽपि संनिकर्षमात्रे प्रसिद्धो न परस्मिन् संनिकर्ष इति ज्ञापकं परमन्यते॥ ॥ इति हरदत्तमिश्र
विरचितायां पदमञ्जर्यां प्रथमाध्यायस्य चतुर्थः पादः समाप्तः॥५१॥

१८१
राम॰

© Dharmartha Trust J&K. Digitized by eGangotri